Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।।   ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।।   ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

## जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

# उपमितिभवप्रपञ्चा कथा।

## सिद्धर्षिप्रणीता।

नमो निर्नाशिताशेषमहामोहहिमार्त्तये।
लोकालोकामलालोकभास्वते परमात्मने ॥१॥
नमो विशुद्धधर्माय स्वरूपपरिपूर्त्तये।
नमो विकारविस्तारगोचरातीत मूर्त्तये ॥२॥
नमो भुवनसंतापिरागकेशरिदारिणे।
प्रशमामृततृप्ताय नाभेयाय महात्मने ॥३॥
नमो द्वेषगजेन्द्रारिकुम्भनिर्भेदकारिणे।
अजितादिजिनस्तोमसिंहाय विमलात्मने ॥४॥
नमो दलितदोषाय मिथ्यादर्शनसूदिने।
मकरध्वजनाशाय वीराय विगतद्विषे ॥५॥

अथवा॥

अन्तरङ्गं महासैन्यं समस्तजनतापकम्।
दलितं लीलया येन केनचित्तं नमाम्यहम् ॥६॥
समस्तवस्तुविस्तारविचारापारगोचरम्।
वचो जैनेश्वरं वन्दे सूदिताखिलकल्मषम् ॥७॥

1

उपमितिभवप्रपञ्चा कथा ।

मुखेन्दोरंशुभिर्व्याप्तं या बिभर्त्ति विकस्वरम् ।
करे पद्ममचिन्त्येन धाम्ना तां नौमि देवताम् ॥८॥
परोपदेशप्रवणो मादृशोऽपि प्रजायते ।
यत्प्रभावान्नमस्तेभ्यः सद्गुरुभ्यो विशेषतः ॥९॥
इत्थं कृतनमस्कारः शान्तविघ्नविनायकः ।
विवचितार्थप्रस्तावं रचयिष्ये निराकुलः ॥१०॥
इहातिदुर्लभं प्राप्य मानुष्यं भव्यजन्तुना ।
ततः कुलादिसामग्रीमासाद्य शुभकर्मणा ॥११॥
हेयं हानोचितं सर्वं कर्त्तव्यं करणोचितम् ।
श्लाघ्यं श्लाघोचितं वस्तु श्रोतव्यं श्रवणोचितम् ॥१२॥
यत् किञ्चिच्चित्तमालिन्यकारणं मोक्षवारणम् ।
मनोवाक्कायकर्मेह हेयं तत्त्वहितैषिणा ॥१३॥
हारनीहारगोक्षीरकुन्देन्दुविशदं मनः ।
कृतं यत् कुरुते कर्म कर्त्तव्यं तन्मनीषिणा ॥१४॥
श्लाघनीयः पुनर्नित्यं विशुद्धेनान्तरात्मना ।
त्रिलोकनाथस्तद्धर्मा ये च तत्र व्यवस्थिताः ॥१५॥
श्रोतव्यं भावतः सारं श्रद्धासंशुद्धबुद्धिना ।
निःशेषदोषमोषाय वचः सर्वज्ञभाषितम् ॥१६॥
तदत्र प्रस्तुतं तावत्तदेव जगते हितम् ।
श्रोतव्यमिति संचिन्त्य वचः सर्वज्ञभाषितम् ॥१७॥
ततस्तदनुसारेण महामोहादिसूदनी ।
निर्दिष्टभवविस्तारा कथेयमभिधास्यते ॥१८॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाहि ॥

पञ्चास्रवमहादोषा हृषीकाणां च पञ्चकम्।
महामोहयुतानां च कषायाणां चतुष्टयम् ॥१९॥
मिथ्यात्वरागद्वेषादिरूपं यच्चान्तरं बलम्।
तद्दोषावेदकं सर्वं वचः सर्वज्ञभाषितम् ॥२०॥

तथा ॥

ज्ञानदर्शनचारित्रसंतोषप्रशमात्मकम्।
तपःसंयमसत्यादिभटकोटिसमाकुलम् ॥२१॥
यच्चान्तरं बलं तस्य गुणसंभारगौरवम्।
वर्णयत्येव जैनेन्द्रं वचनं हि पदे पदे ॥२२॥

तथा ॥

एकेन्द्रियादिभेदेन दुःखरूपमनन्तकम्।
भवप्रपञ्चं जैनेन्द्रं वचनं कथयत्यलम् ॥२३॥
अतस्तां भित्तिमाश्रित्य मादृशेनापि जल्पितम्।
वाक्यं जैनेन्द्रसिद्धान्तनिष्यन्द इति भाव्यताम् ॥२४॥

इह च ॥

अर्थं कामं च धर्मं च तथा संकीर्णरूपताम्।
आश्रित्य वर्त्तते लोके कथा तावच्चतुर्विधा ॥२५॥
सामादिधातुवादादिकृष्यादिप्रतिपादिका।
अर्थोपादानपरमा कथार्थस्य प्रकीर्त्तिता ॥२६॥
सा क्लिष्टचित्तहेतुत्वात्पापसंबन्धकारिका।
तेन दुर्गतिवर्त्तन्याः प्रापणे प्रवणा मता ॥२७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामोपादानगर्भार्था वयोदाक्षिण्यसूचिका।
अनुरागेङ्गिताद्युत्था कथा कामस्य वर्णिता ॥२८॥
सा मलीमसकामेषु रागोत्कर्षविधायिका।
विपर्यासकरी तेन हेतुभूतैव दुर्गतेः ॥२९॥
दयादानक्षमाद्येषु धर्माङ्गेषु प्रतिष्ठिता।
धर्मोपादेयतागर्भा बुधैर्धर्मकथोच्यते ॥३०॥
सा शुद्धचित्तहेतुत्वात्पुण्यकर्मविनिर्जरे।
विधत्ते तेन विज्ञेया कारणं नाकमोक्षयोः ॥३१॥
त्रिवर्गसाधनोपायप्रतिपादनतत्परा।
यानेकरससारार्था सा संकीर्णकथोच्यते ॥३२॥
चित्राभिप्रायहेतुत्वादनेकफलदायिका।
विदग्धताविधाने च सा हेतुरिव वर्त्तते ॥३३॥
श्रोतारोऽपि चतुर्भेदास्तासां सन्तीह मानवाः।
तेषां संक्षेपतो वक्ष्ये लक्षणं तन्निबोधत ॥३४॥
मायाशोकभयक्रोधलोभमोहमदान्विताः।
ये वाञ्छन्ति कथामाद्यां तामसास्ते नराधमाः ॥३५॥
ये रागग्रस्तमनसो विवेकविकला नराः।
कथामिच्छन्ति कामस्य राजसास्ते विमध्यमाः ॥३६॥
मोक्षकाङ्क्षैकतानेन चेतसाभिलषन्ति ये।
शुद्धां धर्मकथामेव सात्विकास्ते नरोत्तमाः ॥३७॥
ये लोकद्वयसापेक्षाः किञ्चित्सत्त्वयुता नराः।
कथामिच्छन्ति संकीर्णां ज्ञेयास्ते वरमध्यमाः ॥३८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रैवं स्थिते ॥

रजस्तमोनुगाः सत्त्वाः स्वयमेवार्थकामयोः ।
रज्यन्ते धर्मशास्तारमवधूय निवारकम् ॥३९॥
रागद्वेषमहामोहरूपं तेषां शिखित्रयम् ।
अर्थकामकथासर्पिराकृत्या वर्द्धते परम् ॥४०॥
केकायितं मयूराणां यथोत्कण्टकवर्द्धनम् ।
पापेषु वर्द्धितोत्साहा कथा कामार्थयोस्तथा ॥४१॥
कथां कामार्थयोस्तस्मान्न कुर्वीत कदाचन ।
कः क्षते क्षारनिक्षेपं विदधीत विचक्षणः ॥४२॥
परोपकारशीलेन कर्त्तव्यं तन्मनीषिणा ।
हितं समस्तजन्तुभ्यो येनेह स्यादमुत्र च ॥४३॥
तेन यद्यपि लोकानामिष्टा कामार्थयोः कथा ।
तथापि विदुषा त्याज्या येन पर्यन्तदारुणा ॥४४॥

तदेतदवगम्य ॥

इहामुत्र च जन्तूनां सर्वेषाममृतोपमाम् ।
शुद्धां धर्मकथां धन्याः कुर्वन्ति हितकाम्यया ॥४५॥
आक्षेपकारणीं मत्वा संकीर्णामपि सत्कथाम् ।
मार्गावतारकारित्वात् केचिदिच्छन्ति सूरयः ॥४६॥
किंत्वात्र यो यथा जन्तुः शक्यते बोधभाजनम् ।
कर्त्तुं तथैव तद्बोध्ये विधेयो हितकारिभिः ॥४७॥
नचादौ मुग्धबुद्धीनां धर्मो मनसि भासते ।
कामार्थकथनात्तेन तेषामाक्षिप्यते मनः ॥४८॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आक्षिप्तास्ते ततः शक्या धर्मं ग्राहयितुं नराः ।
विक्षेपद्वारतस्तेन संकीर्णा सत्कथोच्यते ॥४९॥
तस्मादेषा कथा शुद्धधर्मस्यैव विधास्यते ।
भजन्ती तद्गुणापेक्षां क्वचित्संकीर्णरूपताम् ॥५०॥

अन्यच्च ॥

संस्कृता प्राकृता चेति भाषे प्राधान्यमर्हतः ।
तत्रापि संस्कृता तावद्दुर्विदग्धहृदि स्थिता ॥५१॥
बालानामपि सद्बोधकारिणी कर्णपेशला ।
तथापि प्राकृता भाषा न तेषामपि भासते ॥५२॥
उपाये सति कर्त्तव्यं सर्वेषां चित्तरञ्जनम् ।
अतस्तदनुरोधेन संस्कृतेयं करिष्यते ॥५३॥
न चेयमतिगूढार्था न दीर्घैर्वाक्यदण्डकैः ।
न चाप्रसिद्धपर्यायैस्तेन सर्वजनोचिता ॥५४॥
कथाशरीरमेतस्या नाम्नैव प्रतिपादितम् ।
भवप्रपञ्चो व्याजेन यतोऽस्यामुपमीयते ॥५५॥
यतोऽनुभूयमानोऽपि परोक्ष इव लक्ष्यते ।
अयं संसारविस्तारस्ततो व्याख्यानमर्हति ॥५६॥

अथवा ॥

भ्रान्तिव्यामोहनाशाय स्मृतिबीजप्रबोधनम् ।
कथार्थसंग्रहं कृत्वा शरीरमिदमुच्यते ॥५७॥
द्विविधेयं कथा तावदन्तरङ्गा तथेतरा ।
शरीरमन्तरङ्गायास्तत्रेदमभिधीयते ॥५८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रस्तावास्तावदष्टाच विधास्यन्ते परिस्फुटाः ।
प्रत्येकं तेषु वक्तव्यो योऽर्थस्तं मे निबोधत ॥५९॥
प्रस्तावे प्रथमे तावन्निबद्धा येन हेतुना ।
इयं कथा मयेदृचा स हेतुः प्रतिपाद्यते ॥६०॥
द्वितीये भव्यपुरुषो मानुष्यं प्राप्य सुन्दरम् ।
यथात्महितजिज्ञासुः समासाद्य सदागमम् ॥६१॥
तदन्तिकस्थः संसारिजीवस्य चरितं यथा ।
श्रुत्वागृहीतसंकेताव्याजात्तेनैव सूचितम् ॥६२॥
तिर्यग्वक्तव्यताबद्धं सार्द्धं प्रज्ञाविशालया ।
विचारयति निःशेषं तदिदं प्रतिपाद्यते ॥६३॥

कुलकम् ॥

तथा तृतीयप्रस्तावे हिंसाक्रोधवशानुगः ।
स्पर्शनेन्द्रियमूढश्च यथा दुःखैर्विबाधितः ॥६४॥
संसारिजीवः संसारे भ्रष्टो मानुष्यजन्मतः ।
इदं संसारिजीवस्य सुखेनैव निवेद्यते ॥६५॥

युग्मम् ॥

पुनश्चतुर्थप्रस्तावे मानजिह्वानृतेषु भोः ।
रक्तः संसारिजीवोऽसौ यथा दुःखैः प्रपीडितः ॥६६॥
भ्रयश्चानन्तसंसारमपारं दुःखपूरितः ।
यथा भ्रान्त इदं सर्वं सविशेषं निगद्यते ॥६७॥

युग्मम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रस्तावे पञ्चमे लच्च विपाकः स्तेयमाययोः ।
उक्तः संसारिजीवेन तथा घ्राणेन्द्रियस्य च ॥६८॥
तथाच षष्ठप्रस्तावे लोभमैथुनचचुषाम् ।
विपाको वर्ण्यते तेन योऽनुभूतः पुरात्मना ॥६९॥

युग्मम् ॥

प्रस्तावे सप्तमे सर्वं महामोहविजृम्भितम् ।
परिग्रहस्य श्रोत्रेण सहितस्येह वर्णितम् ॥७०॥

किंतु ॥

तृतीयात्सप्तमं यावद्व प्रस्तावपञ्चके ।
तस्य संसारिजीवस्य यद्वृत्तान्तकदम्बकम् ॥७१॥
तत्किञ्चित्तस्य संपन्नं किंचिदन्यैर्निवेदितम् ।
तथापि तत्प्रतीतत्वात्स्वैवं तस्येति वर्णितम् ॥७२॥

युग्मम् ॥

अष्टमे मीलितं सर्वं प्रस्तावे पूर्वसूचितम् ।
तेन संसारजीवेन विहितं चात्मने हितम् ॥७३॥
तच्च संसारिजीवस्य वृत्तं भवविरञ्जनम् ।
आकर्ण्य भव्यपुरुषः प्रबुद्ध इति कथ्यते ॥७४॥
तथा संसारिजीवेन भूयो भूयः प्रचोदिता ।
बुद्धागृहीतसंकेता कृच्छ्रेणातिनिवेद्यते ॥७५॥
आसाद्य निर्मलाचार्यं केवलालोकभास्करम् ।
समस्तोऽप्यात्मवृत्तान्तः पृष्टः श्रिष्टोऽवधारितः ॥७६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा सदागमाद्दुच्चैर्भूयो भूयः स्थिरीकृतः।
संजातावधिना तेन ततोऽयं प्रतिपादितः ॥७७॥

अन्यच्च ॥

इहान्तरङ्गलोकानां ज्ञानं जल्पो गमागमम्।
विवाहो बन्धुतेत्यादि सर्वलोकस्थितिः कृता ॥७८॥
सा च दृष्टा न विज्ञेया यतोऽपेच्य गुणान्तरम्।
उपमाद्वारतः सर्वा बोधार्थं सा निवेदिता ॥७९॥

यतः ॥

प्रत्यक्षानुभवासिद्धं युक्तितो यन्न दुष्यति।
सत्कल्पितोपमानं तत्सिद्धान्तेऽप्युपलभ्यते ॥८०॥

तथाहि यथावश्यके ॥

साक्षेपं मुद्गशैलस्य पुष्कलावर्त्तकस्य च।
स्पर्द्धा सर्पाश्च कोपाद्या नागदत्तकथानके ॥८१॥

तथा ॥

पिण्डैषणायां मत्स्येन कथितं निजचेष्टितम्।
उत्तराध्ययनेष्वेवं संदिष्टं शुष्कपत्रकैः ॥८२
अतस्तदनुसारेण सर्वं यदभिधास्यते।
अत्रापि युक्तियुक्तं तद्विज्ञेयमुपमा यतः ॥८३॥
तदेतदन्तराङ्गायाः शरीरं प्रतिपादितम्।
बहिरङ्गकथायास्तु शरीरमिदमुच्यते ॥८४॥
पूर्वविदेहे सन्मेरोः सुकच्छविजयप्रभुः।
क्षेमपुर्यां समुद्भूतश्चक्रवर्त्यनुसुन्दरः ॥८५॥

2

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स च स्वायुष्कपर्यन्ते निजदेशदिदृक्षया ।
विनिर्गतो विलासेन प्राप्तः शंखपुरेऽन्यदा ॥८६॥
तत्र चित्तरणोद्याने मनोनन्दननामके ।
जैने समन्तभद्राख्याः सूरयो भवने स्थिताः ॥८७॥
अभूच्च तत्समीपस्था महाभद्रा प्रवर्त्तिनी ।
तथा सुललिता नाम राजपुत्री सुमुग्धिका ॥८८॥
तथान्यः पौण्डरीकाख्यः समीपे राजदारकः ।
आसीत्समन्तभद्राणां तदा संसच्च पुष्कला ॥८९॥

ततश्च ॥

कृतभूरिमहापापं दृष्ट्वा तं चक्रवर्त्तिनम् ।
ज्ञानालोकेन ते धीराः सूरयः प्राहुरीदृशम् ॥९०॥
यस्य कोलाहलो लोके श्रूयते नीयतेऽधुना ।
संसारिजीवनामायं तस्करो वध्यधामनि ॥९१॥
एतत्सूरेर्वचः श्रुत्वा महाभद्रा व्यचिन्तयत् ।
कश्चिन्नरकगाम्येष जीवो योऽवर्णि सूरिभिः ॥९२॥
ततः सा करुणोपेता तत्समीपमुपागता ।
तद्दर्शनाच्च संजातं ज्ञानं तस्य स्वगोचरम् ॥९३॥
ततो विज्ञाय वृत्तान्तं तस्कराकारधारकः ।
भूत्वा वैक्रियलब्ध्यासौ तया सार्द्धं समागतः ॥९४॥
ततः सा राजपुत्री तं पप्रच्छ विहितादरम् ।
अशेषचौर्यवृत्तान्तं सोऽप्युक्तस्तेन सूरिणा ॥९५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवप्रपञ्चमात्मीयं तस्या बोधविधित्सया ।
उपमाद्वारतः प्राह तीव्रं संवेगकारणम् ॥९६॥
श्रुत्वा च तं प्रबुद्धोऽसौ लघुकर्मतया स्वयम् ।
पौण्डरीकः क्षणादेव प्रसंगश्रवणादपि ॥९७॥
सा पुनः कथितेऽप्युच्चैः प्राचीनमलदोषतः ।
अबुध्यमाना तेनैव भूयो भूयः प्रचोदिता ॥९८॥
अथ कृच्छ्रेण साप्येवं प्रबुद्धा विहितं ततः ।
सर्वैरेवात्मनः पथ्यं गतानि च शिवालयम् ॥९९॥
कथाशरीरमेतच्च धारणीयं स्वमानसे ।
प्रस्तावे चाष्टमे सर्वमिदं व्यक्तीभविष्यति ॥१००॥

एवं स्थिते ॥

यतः सर्वज्ञसिद्धान्तवचनामृतसागरात् ।
निष्यन्दबिन्दुभूतेयमाकृष्टा परमार्थतः ॥१॥
ततो दुर्जनवर्गोऽस्याः श्रवणं नार्हमर्हति ।
कालकूटविषं नैव युज्यतेऽमृतबिन्दुना ॥२॥
अतो दुर्जनवर्गस्य नेह दोषविचारणम् ।
क्रियते पापकारिण्या पापानां कथयाप्यलम् ॥३॥
स्तुतोऽपि दुर्जनः काव्ये दोषमेव प्रकाशयेत् ।
निन्दितस्तु विशेषेण युक्तातोऽस्यावधीरणा ॥४॥

अथवा ॥

निन्दायामात्मदौर्जन्यं स्तवेऽप्यनृतभाषणम् ।
भवेद्दुर्जनवर्गस्य ततो युक्तापकर्णना ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततोऽस्याल्पकर्माणः क्षीरनीरधिसंनिभाः।
गम्भीरहृदया भव्याः सज्जनाः श्रवणोचिताः॥६॥
तेषामपि न कर्त्तव्या निन्दा नापि प्रशंसनम्।
मौनमेव परं श्रेयस्तत्रेदं हन्त कारणम्॥७॥
तन्निन्दाया महापापमनन्तगुणशालिनाम्।
स्तवोऽपि दुष्करस्तेषां मादृशैर्जडबुद्धिभिः॥८॥

किंच॥

अस्तुता अपि ते काव्ये पश्यन्ति गुणसञ्चयम्।
दोषमाच्छादयन्त्येवं प्रकृतिः सा महात्मनाम्॥९॥
अतस्तेषां स्तवेनालं केवलं ते महाधियः।
अभ्यर्थनीयाः श्रवणे तेनेदमभिधीयते॥१०॥
भो भव्याः सुमनीभूय कर्णं दत्वा निबोधत।
यूयं मदनुरोधेन वक्ष्यमाणं मया क्षणम्॥११॥
अनन्तजनसंपूर्णमस्ति लोके सनातनम्।
अदृष्टमूलपर्यन्तं नाम किंचिन्महापुरम्॥१२॥

तच्च कीदृशम्॥

अभ्रोत्तुङ्गमनोहारिसौधपद्धतिसंकुलम्।
अलक्ष्यमूलपर्यन्तं हट्टमार्गविराजितम्॥१३॥
अपारैर्भूरिविस्तारैर्नानापण्यैः प्रपूरितम्।
पण्यानां मूल्यभूताभिराकीर्णं रत्नकोटिभिः॥१४॥
विचित्रचित्रविन्यासैर्भ्राजिते देवमन्दिरैः।
आक्षिप्तबालहृदयैर्निश्चलीकृतलोचनैः॥१५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाचालबालसंघातैर्लसत्कलकलाकुलम् ।
असंख्यतुङ्गप्राकारवलयेन विवेष्टितम् ॥१६॥
अलब्धमध्यगम्भीरं वेदिकाजलदुर्गमम् ।
विलसल्लोलकल्लोलैः सरोभिः कृतविस्मयम् ॥१७॥
घोरान्धकूपसंघातैः प्रचूर्णां त्रासहेतुभिः ।
समंतादुपगूढं च प्राकाराभ्यर्णवर्त्तिभिः ॥१८॥
भ्रमद्भ्रमरझंकारतारसंगीतसुन्दरैः ।
नानापुष्पफलाकीर्णैर्भाति चामरकाननैः ॥१९॥
अनेकाश्चर्यभूयिष्ठं तच्चमत्कारकारणम् ।
अदृष्टमूलपर्यन्तमीदृशं हि महापुरम् ॥२०॥
तत्र निष्पुण्यको नाम कश्चिद्रङ्को महोदरः ।
निर्णष्टबन्धुर्दुर्बुद्धिरर्थपौरषवर्जितः ॥२१॥
क्षुधाक्षामतनुर्भिक्षामादाय घटकर्प्परम् ।
पर्यटत्यनिशं दीनो निन्द्यमानो गृहे गृहे ॥२२॥
अनाथो भूमिशयनघृष्टपार्श्वत्रिकः परम् ।
धूलीधूसरसर्वाङ्गश्चीरिकाजालमालितः ॥२३॥
दुर्दान्तडिम्भसंघातैस्ताडयमानः क्षणे क्षणे ।
यष्टिमुष्टिमहालोष्टप्रहारैर्जर्जरीकृतः ॥२४॥
सर्वाङ्गीणमहाघाततापानुगतचेतनः ।
हा मातस्त्रायतामित्थं दैन्यविक्रोशविक्लवः ॥२५॥
सोन्मादः सज्वरः कुष्ठी सपामः शूलपीडितः ।
निलयः सर्वरोगाणां वेदनावेगविह्वलः ॥२६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शीतोष्णदंशमशकक्षुत्पिपासाद्युपद्रवैः।
बाध्यमानो महाघोरनारकोपमवेदनः॥१७॥
कृपास्पदं सतां दृष्टो हास्यस्थानं समानिनाम्।
बालानां क्रीडनावासो दृष्टान्तः पापकर्मणाम्॥१८॥
अन्येऽपि बहवः सन्ति रोरास्तत्र महापुरे।
केवलं तादृशः प्रायो नास्ति निर्भाग्यशेखरः॥१९॥
तस्य तस्य गृहे लप्स्ये भिक्षामित्यादि चिन्तयन्।
ध्यानमापूरयन् रौद्रं विकल्पाकुलमानसः॥२०॥
स किंचिन्नैव लभते केवलं परिताम्यति।
कदन्नलेशमात्रं तु राज्यवत्प्राप्य तुष्यति॥२१॥
अवज्ञया जनैर्दत्तं भुञ्जानस्तत्कदन्नकम्।
शक्रादपि बिभेत्युच्चैरयमेतद्ग्रहीष्यति॥२२॥
तृप्तिस्तेनापि नैवास्य बुभुक्षा वर्द्धते परम्।
जीर्यन्तत्पीडयत्येनं कृत्वा वातविसूचिकाम्॥२३॥
अन्यच्च सर्वरोगाणां निदानं तदुदाहृतम्।
तदेव पूर्वरोगाणामभिवृद्धिकरं परम्॥२४॥
स च तन्मन्यते चारु वराकोनान्यदीक्षते।
सुस्वादुभोजनास्वादो न स्वप्नेऽप्यस्य गोचरः॥२५॥
उच्चावचेषु गेहेषु नानाकारासु वीथिषु।
बहुशस्तत्पुरं तेन भ्रान्तमश्रान्तचेतसा॥२६॥
एवं पर्यटतस्तस्य महापापहतात्मनः।
न ज्ञायते कियान् कालो दुःखपस्तस्य संचितः॥२७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तत्र पुरे राजा सुस्थितो नाम विश्रुतः ।
समस्तसत्त्वसंघस्य स्वभावादतिवत्सलः ॥३८॥
अटाट्यमानोऽसौ रङ्कः संप्राप्तस्तस्य मन्दिरम् ।
स्वकर्मविवरो नाम तत्रास्ते द्वारपालकः ॥३९॥
स द्वारपालस्तं रोरं दृष्ट्वातिकरुणास्पदम् ।
प्रावेशयत् कृपालुत्वादपूर्वं राज्यमन्दिरम् ॥४०॥

तच्च कीदृशम् ॥

रत्नराशिप्रभाज्वालैस्तमोबाधाविवर्जितम् ।
रशनानूपुराद्युत्थभूषणारावसुन्दरम् ॥४१॥
देवपट्टांशुकोल्लोचलोलमौक्तिकमालिकम् ।
ताम्बूललालिताशेषलोकवक्त्रमनोहरम् ॥४२॥
विचित्रभक्तिविन्यासैर्गन्धोद्धुरसुवर्णकैः ।
आकीर्णं प्राङ्गणं माल्यैः कलालिकुलगीतिभिः ॥४३॥
विलेपनविमर्देन कर्दमीकृतभूमिकम् ।
प्रहृष्टसत्त्वसंदोहवादितानन्दमर्दलम् ॥४४॥
अन्तर्ज्वलन्महातेजःप्रलयीभूतशत्रुभिः ।
बहिःप्रशान्तव्यापारै राजवृन्दैरधिष्ठितम् ॥४५॥
साक्षात्भूतजगच्चेष्टैः प्रज्ञावज्ञातवैरिकैः ।
समस्तनीतिशास्त्रज्ञैर्मन्त्रिभिः परिपूरितम् ॥४६॥
पुरः परेतभर्त्तारं येऽभिवीक्ष्य रणाङ्गणे ।
न क्षुभ्यन्ति महायोधास्तैरसंख्यैर्निषेवितम् ॥४७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोटीकोटीः पुराणां ये पालयन्ति निराकुलाः।
ग्रामकरानसंख्यांश्च व्याप्तं तादृग्नियुक्तकैः ॥४८॥
येऽत्यन्तवत्सला भर्तुर्गाढं विक्रमशालिनः।
आकीर्णं तादृशैरन्तः सूरिभिस्तलवर्गिकैः ॥४९॥
प्रमत्तप्रमदालोकनिवारणपरायणैः।
निवृत्तविषयासंगे राजते स्थविराजनैः ॥५०॥
अनेकभटसंघातैराकीर्णं तत्समंततः।
सदृविलासिनीसार्थैर्निर्जितामरधामकम् ॥५१॥
कलकण्ठैः प्रयोगज्ञैर्गायद्भिर्गायनैः परैः।
वीणावेणुरवोन्मिश्रैः श्रोत्रानन्दविधायकम् ॥५२॥
विचित्रचित्रविन्यासैश्चित्ताक्षेपविधायिभिः।
सद्रूपैरतिसौन्दर्यान्निश्चलीकृतलोचनम् ॥५३॥
चन्दनागरुकर्पूरमृगनाभिपुरःसरैः।
अतिगन्धोद्धुरैर्द्रव्यैर्घ्राणमोदनकारणम् ॥५४॥
कोमलांशुकतूल्यादिललनालोकयोगतः।
स्पर्शप्रमुदिताशेषतद्योग्यजनवृन्दकम् ॥५५॥
मनःप्रीतिसमुत्पादकारणै रसनोत्सवैः।
स्वस्थीभूताखिलप्राणिसंघातं भोजनैः परैः ॥५६॥
समस्तेन्द्रियनिर्वाणकारणं वीक्ष्य तत्त्वतः।
स रङ्कश्चिन्तयत्येवं किमेतदिति विस्मितः ॥५७॥
सोन्मादत्वान्न जानाति विशेषं तस्य तत्त्वतः।
तथापि हृदयाकूते स्फुरितं लब्धचेतसः ॥५८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदिदं दृश्यते राजभवनं सततोत्सवम् ।
द्वारपालप्रसादेन न मया दृष्टपूर्वकम् ॥५९॥
अहं हि बहुशः पूर्वमस्य द्वारि परिभ्रमन् ।
द्वारपालैर्महापापैः प्राप्तः प्राप्तो निराकृतः ॥६०॥
सत्यं निष्पुण्यकोऽस्मीति येनेदं देवदुर्लभम् ।
न दृष्टं प्राग् न चोपायो दर्शनार्थं मया कृतः ॥६१॥
कदाचिन्नैव मे पूर्वं मोहोपहतचेतसः ।
जिज्ञासामात्रमप्यासीत् कीदृशं राजमन्दिरम् ॥६२॥
निर्भाग्यस्यापि कृपया चित्ताह्लादविधायकम् ।
अयं मे परमो बन्धुर्येनेदं दर्शितं मम ॥६३॥
एते धन्यतमा लोकाः सर्वद्वन्द्वविवर्जिताः ।
प्रहृष्टचित्ता मोदन्ते सततं येऽत्र मन्दिरे ॥६४॥
यावत्स चिन्तयत्येवं द्रमको लब्धचेतनः ।
तावद्यत्तत्र संपन्नं तदिदानीं निबोधत ॥६५॥
प्रासादशिखरे रम्ये सप्तमे भूमिकातले ।
तत्रास्ते लीलयासीनः स राजा परमेश्वरः ॥६६॥
अधस्तादर्शिं तत्सर्वं नानाव्यापारमञ्जसा ।
नगरं सततानन्दं समन्तादवलोकयन् ॥६७॥
न किञ्चिन्नगरे तत्र बहिश्च खलु वर्त्तते ।
वस्तु यन्न भवेद्दृष्टेर्गोचरस्तस्य पश्यतः ॥६८॥
अतः प्रविष्टं तं रोरं गाढबीभत्सदर्शनम् ।
महारोगभराक्रान्तं शिष्टानां करुणास्पदम् ॥६९॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारुण्यादिव राजेन्द्रः स महात्मामलेक्षणः ।
स्वदृष्टिवृष्टिपातेन पूतपापमिवाकरोत् ॥७०॥
धर्मबोधकरो नाम महानसनियुक्तकः ।
स राजदृष्टिं तां तत्र पतन्तीं निरवर्णयत् ॥७१॥
अथासौ चिन्तयत्येव तदा साकूतमानसः ।
किमेतदद्भुतं नाम सांप्रतं दृश्यते मया ॥७२॥
यस्य दृष्टिं विशेषेण ददाति परमेश्वरः ।
तूर्णं त्रिभुवनस्यापि स राजा जायते नरः ॥७३॥
अयं तु द्रमको दीनो रोगग्रस्तशरीरकः ।
अलक्ष्मीभाजनं मूढो जगदुद्वेगकारणम् ॥७४॥
आलोच्यमानोऽपि कथं पौर्वापर्येण युज्यते ।
तदस्योपरि पातोऽयं स दृष्टेः पारमेश्वरः ॥७५॥
ऊं ज्ञातमेष एवात्र हेतुरस्य निरीक्षणे ।
स्वकर्मविवरेणात्र यस्मादेष प्रवेशितः ॥७६॥
स्वकर्मविवरस्त्वायं नापरीक्षितकारकः ।
तेनायं राजराजेन सम्यग्दृष्ट्या विलोकितः ॥७७॥
अन्यच्च पक्षपातोऽत्र भवने यस्य जायते ।
परमेश्वरपादानां स प्रियत्वं प्रपद्यते ॥७८॥
अयं च नेत्ररोगेण नितरां परिपीडितः ।
एतद्विदृक्षयात्यर्थमुन्मिषत्येव लोचने ॥७९॥
दर्शनादस्य सहसा गाढबीभत्सदर्शनम् ।
प्रमोदाद्वदनं मन्ये लभते दर्शनीयताम् ॥८०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोमाञ्चयति चाङ्गानि धूलीधूसरितान्ययम् ।
ततोऽनुरागो जातोऽस्य भवने तेन वीच्यते ॥८१॥
तदयं द्रमकाकारं बिभ्राणोऽप्यधुना स्फुटम् ।
राजावलोकनादेव वस्तुत्वं प्रतिपत्स्यते ॥८२॥
इत्याकलय्य तस्यासौ करुणाप्रवणोऽभवत् ।
सत्यं तच्छ्रूयते लोके यथा राजा तथा प्रजाः ॥८३॥
अथादरवशात्तूर्णं तस्य मूलमुपागमत् ।
एह्येहि दीयते तुभ्यमित्येवं तमवोचत ॥८४॥
कदर्थनार्थमायाताः पश्चाल्लग्नाः सुदारुणाः ।
दुर्दान्तडिम्भा ये तस्य दृष्ट्वा तं ते पलायिताः ॥८५॥
भिक्षाचरोचिते देशे स तं नीत्वा प्रयत्नतः ।
धर्मबोधकरस्तस्मै दानाय जनमादिशत् ॥८६॥
अथास्ति तद्दया नाम दुहिता तस्य सुन्दरा ।
सा तद्वचनमाकर्ण्य संभ्रमेण समुत्थिता ॥८७॥
समस्तगदनिर्णाशि वर्णौजःपुष्टिवर्द्धनम् ।
सुगन्धि सुरसं स्निग्धं देवैरप्यतिदुर्लभम् ॥८८॥
महाकल्याणकं नाम परमान्नं मनोहरम् ।
सा तदादाय वेगेन तत्समीपमुपागता ॥८९॥
इतश्च नीयमानोऽसौ द्रमकः पर्यचिन्तयत् ।
तुच्छाभिप्रायवशतः शंकयाकुलमानसः ॥९०॥
यदयं मां समाहूय पुरुषो नयति स्वयम् ।
भिक्षार्थं किल नैवैतत् सुन्दरं मम भासते ॥९१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिक्षाया: पूरितप्रायमिदं हि घटकर्परम् ।
तदेष विजने नीत्वा नूनमुद्दालयिष्यति ॥९२॥
तत् किं नश्यामि सहसा भक्षयाम्युपविश्य वा ।
न कार्यं भिक्षयेत्युक्त्वा यद्वा गच्छामि सत्वरम् ॥९३॥
इत्यनेकविकल्पेषु भयं तस्य विवर्द्धते ।
तदध्यान्नैव जानीते क्वाहं यात: क्व च स्थित: ॥९४॥
गाढमूर्च्छाभिभूतत्वात्संरक्षणाभिसिक्तकम् ।
रौद्रध्यानं समापूर्य मीलिते तेन लोचने ॥९५॥
समस्तेन्द्रियवृत्तीनां व्यापारोपरते: क्षणात् ।
नासौ चेतयते किंचित् काष्ठवन्नष्टचेतन: ॥९६॥
गृहाणेति च जल्पन्तीं भूयोभूय: समाकुलाम् ।
ततोऽसौ द्रमकोऽपुण्यो न जानात्येव कन्यकाम् ॥९७॥
सर्वरोगकरं तुच्छं कदन्नं न भविष्यति ।
इति ध्यानेन नष्टात्मा तां सुधां नावबुध्यते ॥९८॥
प्रत्यक्षं तमसंभाव्यं वृत्तान्तं वीक्ष्य विस्मित: ।
स तदा चिन्तयत्येवं महानसनियुक्तक: ॥९९॥
किमेष द्रमकस्तारु दीयमानमपि स्फुटम् ।
परमान्नं न गृह्णाति ददात्यपि च नोत्तरम् ॥१००॥
विद्राणवदनोऽत्यन्तं निमीलितविलोचन: ।
हृतसर्वस्ववन्मोहात् संजात: काष्ठकीलवत् ॥१॥
तदयं नोचितो मन्ये परमान्नस्य पापभाक् ।
यद्वा नास्य वराकस्य दोषोऽयमुपलभ्यते ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयं हि रोगजालेन बहिरन्तश्च वेष्टितः ।
वेदनाविह्वलो मन्ये न हि जानाति किंचन ॥३॥
अन्यथा कथमेतत्स्यात् कदन्नलवलम्पटः ।
अमृतास्वादमप्येष न गृह्णीयात्सचेतनः ॥४॥
तदयं निर्गदो हन्त केनोपायेन जायते ।
आ ज्ञातं विद्यते चारु मम तद् भेषजत्रयम् ॥५॥
यत्तावद्विमलालोकं नाम मे परमाञ्जनम् ।
समस्तनेत्ररोगाणां तदपाकरणक्षमम् ॥६॥
सूक्ष्मव्यवहितातीतभाविभावविलोकने ।
परमं कारणं मन्ये प्रयुक्तं तद्विधानतः ॥७॥
तत्त्वप्रीतिकरं नाम यच्च तीर्थोदकं परम् ।
विद्यते मम तत्सर्वरोगतानवकारणम् ॥८॥
विशेषात्पुनरुन्मादसूदनं तदुदाहृतम् ।
दृढं च पटुदृष्टित्वे कारणं वर्णितं बुधैः ॥९॥
महाकल्याणकं नाम यच्चैतदुपढौकितम् ।
परमान्नमिदं सर्वगदनिर्मूलनक्षमम् ॥१०॥
प्रयुज्यमानं विधिना वर्णं पुष्टिं धृतिं बलम् ।
मनःप्रसादमौर्जित्यं वयःस्तंभं सवीर्यताम् ॥११॥
तथाजरामरत्वं च कुर्यादित्यत्र संशयः ।
नातः परतरं मन्ये लोकेऽपि परमौषधम् ॥१२॥
तदेनममुना सम्यक् क्रमेणापि तपस्विनम् ।
व्याधिभ्यो मोचयामीति चित्ते तेनावधारितम् ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः शलाकामादाय विन्यस्याग्रे तदञ्जनम् ।
तस्य धूनयतो ग्रीवामञ्जिते तेन लोचने ॥१४॥
प्रह्लादकत्वाच्छीतत्वादचिन्त्यगुणयोगतः ।
तदनन्तरमेवास्य चेतना पुनरागता ॥१५॥
क्षणादुन्मीलितं चक्षुर्विनष्टा इव तद्गदाः ।
मनागाह्लादितश्चित्ते किमेतदिति मन्यते ॥१६॥
तथापि च तदाकूतं भिखारक्षणलक्षणम् ।
पूर्वाविधवशाच्चैव सम्यगस्य निवर्त्तते ॥१७॥
विजनं वर्त्तते हन्त लास्यत्येनां व्यचिन्तयत् ।
नष्टुकामो दिगन्तेषु दृष्टिं धत्ते पुनः पुनः ॥१८॥
अथाञ्जनवशाद्दृष्ट्वा पुरः संजातचेतनम् ।
तं रोरं मधुरैर्वाक्यैर्धर्मबोधकरोऽब्रवीत् ॥१९॥
पिबेदमुदकं भद्र तापोपशमकारणम् ।
येन ते स्वस्थता सम्यक् शरीरस्योपजायते ॥२०॥
स तु शंकाकुलाकूतः किमनेन भविष्यति ।
न जान इति मूढात्मा नोदकं पातुमिच्छति ॥२१॥
कृपापरीतचित्तेन हितत्वात्तदनिच्छतः ।
बलाद्विवृत्य वदनं सलिलं तस्य गालितम् ॥२२॥
तच्छीतममृतास्वादं चित्ताह्लादकरं परम् ।
नीरमीरितसंतापं पीत्वा स्वस्थ इवाभवत् ॥२३॥
नष्टप्रायमहोन्मादो जातान्यगदतानवः ।
क्षणाद्विगतदाहार्त्तिस्ततोऽसौ समपद्यत ॥२४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुप्रसन्नेन्द्रियग्रामः स्वस्थेनैवान्तरात्मना ।
सोऽचिन्तयदिदं चित्ते किंचिद्विमलचेतनः ॥२५॥
महामोहहतेनाहो नरोऽयमतिवत्सलः ।
मया महात्मा पापेन वञ्चकत्वेन कल्पितः ॥२६॥
ममाञ्जनप्रयोगेण विहितापदुदृष्टिता ।
अनेन तोयपानेन जनिता स्वस्थता परा ॥२७॥
तस्मान्महोपकारीति किमस्योपकृतं मया ।
महानुभावतां मुक्त्वा नान्यदस्य प्रवर्त्तकम् ॥२८॥
एवं चिन्तयतोऽप्यस्य मूर्च्छा तत्र कदन्नके ।
गाढं भावितचित्तत्वान्न कथंचिन्निवर्त्तते ॥२९॥
अथ तद्भोजने दृष्टिं पातयन्तं मुहुर्मुहुः ।
विदित्वा तदभिप्रायमितरस्तमभाषत ॥३०॥
अरे द्रमक दुर्बुद्धे किमिदं नावबुध्यसे ।
यदेषा कन्यका तुभ्यं परमान्नं प्रयच्छति ॥३१॥
भवन्ति रोराः प्रायेण बहवोऽन्येऽपि पापिनः ।
त्वत्समो नास्ति निर्भाग्यो मयैतत्परिनिश्चितम् ॥३२॥
यस्त्वं कदन्नलाम्पट्यात्सुधाकारमिदं मया ।
दाप्यमानं न गृह्णासि परमान्नमनाकुलः ॥३३॥
अन्येऽस्मात्सद्मनो बाह्याः सत्त्वास्तिष्ठन्ति दुःखिताः ।
तेषु नैवादरोऽस्माकं न ते राज्ञावलोकिताः ॥३४॥
यतस्त्वं भवनं दृष्ट्वा मनागाल्हादितो हृदि ।
तवोपरि नरेन्द्रस्य दयातोऽस्तीति गम्यते ॥३५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रिये प्रियं सदा कुर्युः स्वामिनः सेवका इति ।
यो न्यायस्तद्विधानार्थं वयं त्वयि दयालवः ॥३६॥
अमूढलक्ष्यो राजायं नापात्रे कुरुते मतिम् ।
अवष्टम्भः किलास्माकं स त्वया वितथीकृतः ॥३७॥
इदं हि मधुरास्वादं सर्वव्याधिनिबर्हणम् ।
नादत्से त्वं कथं तुच्छे कदन्ने बद्धमानसः ॥३८॥
अतस्त्यजेदं दुर्बुद्धे गृहाणेदं विशेषतः ।
यत्प्रभावादिमे पश्य मोदन्ते सर्वजन्तवः ॥३९॥
ततः संजातविश्वासस्तथाविर्भूतनिर्णयः ।
तत्त्यागवचनाद्दीनस्तं प्रतीदमवोचत ॥४०॥
यदेतद्गदितं नाथैस्तत्सत्यं मम भासते ।
किं तु विज्ञापयाम्येकं वचनं तन्निबोधत ॥४१॥
यदिदं भोजनं नाथ वर्त्तते कर्परोदरे ।
प्राणेभ्योऽपि विशेषेण स्वभावादतिवल्लभम् ॥४२॥
उपार्जितं च क्लेशेन काले निर्वाहकं तथा ।
इदं तु तावकं नाहं जानामि मम कीदृशम् ॥४३॥
तदिदं नैव मोक्तव्यं मया स्वामिन् कथंचन ।
यदि देयं सहानेन दापयस्व स्वभोजनम् ॥४४॥
इतरस्तु तदाकर्ण्य मनसा पर्यचिन्तयत् ।
पश्यताचिन्त्यसामर्थ्यं महामोहविजृम्भितम् ॥४५॥
यदयं द्रमको मोहात्सर्वव्याधिकरे रतः ।
अस्मिन् कदन्नके नैतत्तृणाय मम मन्यते ॥४६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि किंचिद्ब्रूयोऽपि शिक्षयामि तपस्विनम् ।
यदि मोहो विलीयेत स्यादस्मै हितमुत्तमम् ॥४७॥
इत्याकलय्य तेनोक्तं भद्र किं नावगच्छसि ।
एतन्निमित्तकाः सर्वे रोगास्तव शरीरके ॥४८॥
एतद्विभक्षितं सर्वैः सर्वदोषप्रकोपनम् ।
जायते नितरां तेन त्यक्तव्यं शुद्धबुद्धिभिः ॥४९॥
तवापि भासते भद्र विपर्यासादिदं हृदि ।
यदि स्वादं पुनर्वेत्सि मामकान्नस्य तत्त्वतः ॥५०॥
ततस्त्वं वार्यमाणोऽपि त्यजस्येवेदमात्मना ।
को नामामृतमास्वाद्य विषमापातुमिच्छति ॥५१॥
अन्यच्चाञ्जनसामर्थ्यं माहात्म्यं सलिलस्य च ।
किं न दृष्टं त्वया येन मद्वचो नानुतिष्ठसि ॥५२॥
यच्चोक्तमर्जितं क्लेशादिदं मुञ्चामि नो ततः ।
तत्रापि श्रूयतां सौम्य मोहं हित्वा त्वयाधुना ॥५३॥
येनैवोपार्जितं क्लेशात् क्लेशरूपं च वर्त्तते ।
क्लेशस्य च पुनर्हेतुस्तेनैवेदं विमुच्यते ॥५४॥
यच्चोक्तं न त्यजामीदं काले निर्वाहकं यतः ।
तत्राप्याकर्ण्यतां तावत्त्यक्त्वा तत्र विपर्ययम् ॥५५॥
अनन्तदुःखसंतानहेतुर्निर्वाहि यद्यपि ।
एतद्धि किं त्वया स्थेयं दुःखग्रस्तेन सर्वदा ॥५६॥
इदं तु तावकं नाहं जानामि मम कीदृशम् ।
यदुक्तं तत्र विश्रब्धो वक्ष्यमाणं मया शृणु ॥५७॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्लेशं विना सदाकालं प्रयच्छामि यथेच्छया ।
परमान्नमिदं तुभ्यं गृहाण त्वमनाकुलः ॥ ५८ ॥
समूलकाषं कषति सर्वव्याधीनिदं हि ते ।
तुष्टिं पुष्टिं बलं वर्णं वीर्यादीन् वर्द्धयत्यपि ॥ ५९ ॥
किं वानेनाक्षयो भूत्वा सततानन्दपूरितः ।
यथायमास्ते राजेन्द्रः स्थास्यस्येतद्बलात्तथा ॥ ६० ॥
ततो मुञ्चाग्रहं भद्र त्यजेदं रोगकारणम् ।
गृहाणेदं महानन्दकारणं परमौषधम् ॥ ६१ ॥
स प्राह त्यक्तमात्रेऽस्मिन् म्रियेऽहं स्नेहविभ्रमात् ।
भट्टारक ततो देहि सत्यस्मिन्मे स्वभेषजम् ॥ ६२ ॥
ततो विज्ञाय निर्बन्धमितरः पर्यकल्पयत् ।
नैवास्य ग्रिचणोपायो विद्यते ऽन्योऽधुना स्फुटम् ॥ ६३ ॥
ततोऽत्र विद्यमानेऽपि दीयतामिदमौषधम् ।
पश्चाद्विज्ञातसद्भावः स्वयमेव विहास्यति ॥ ६४ ॥
इत्याकलय्य तेनोक्तो गृह्यतां भद्र सांप्रतम् ।
परमान्नमिदं सद्यो गृहीत्वा चोपयुज्यताम् ॥ ६५ ॥
एवं भवतु तेनोक्ते संज्ञिता तेन तद्दया ।
दत्तं तया गृहीत्वा तत्तेन तत्रैव भक्षितम् ॥ ६६ ॥
ततस्तदुपयोगेन बुभुक्षा शान्तिमागता ।
नष्टा इव गदव्राता येऽस्य सर्वाङ्गसंभवाः ॥ ६७ ॥
याशावज्ञनसंपाद्या या च सा सलिलोद्भवा ।
सुखासिका क्षणात्तस्य सानन्तगुणतां गता ॥ ६८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ प्रादुर्भवद्भक्तिर्नष्टाशंकः प्रमोदितः ।
स तं प्रत्याह नान्योऽस्ति नाथो मे भवतो विना ॥६९॥
यतोऽनुपहतैरेव भवद्भिर्भाग्यवर्जितः ।
अहं सर्वाधमोऽप्येवमेतावदनुकंपितः ॥७०॥
इतरः प्राह यद्येवमुपविश्य क्षणं त्वया ।
श्रूयतां यदहं वच्मि श्रुत्वा तच्च समाचर ॥७१॥
अथोपविष्टे विश्रब्धं तस्मिन्स प्राह वाग्भिः ।
मनः प्रह्लादयंस्तस्य वचोभिर्हितकाम्यया ॥७२॥
यदभ्यधायि भवता नाथोऽन्यो नास्ति मेऽधुना ।
तन्न वाच्यं यतः स्वामी तव वर्यो नृपोत्तमः ॥७३॥
अयं हि भगवान्नाथो भुवनेऽपि चराचरे ।
विशेषतः पुनर्येऽत्र भवने सन्ति जन्तवः ॥७४॥
येऽस्य किंकरतां यान्ति नराः कल्याणभागिनः ।
तेषामल्पेन कालेन भुवनं किंकरायते ॥७५॥
येऽत्यन्तपापिनः सत्वा येनैव सुखभाजनम् ।
ते वराका नरेन्द्रस्य नामाप्यस्य न जानते ॥७६॥
ये भाविभद्रा दृश्यन्ते सदनेऽस्य महात्मनः ।
तेषां स्वकर्मविवरो ददात्यत्र प्रवेशकम् ॥७७॥
वस्तुतः प्रतिपद्यन्ते तेऽमुं नास्त्यत्र संशयः ।
विशेषाज्जानते मुग्धाः पश्चात्ते कथितं मया ॥७८॥
तदेष नाथस्ते भद्र जात एव नरेश्वरः ।
यतः प्रभृति पश्येऽस्मिन् प्रविष्टस्त्वं सुपुण्यतः ॥७९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केवलं तु विशेषेण मद्वचस्तः प्रपद्यताम् ।
यावज्जीवमयं नाथो भवता शुद्धचेतसा ॥८०॥
विशेषतः पुनर्येऽस्य गुणास्तानवभोत्स्यसे ।
यथा यथा गदा देहे यास्यन्ति तव तानवम् ॥८१॥
अयं च तानवोपायोऽमीषां नाशे च कारणम् ।
भेषजत्रितयस्यास्य परिभोगः क्षणे क्षणे ॥८२॥
तत्सौम्य स्थीयतामत्र भवने मुक्तसंशयम् ।
त्वया त्रयमिदं युक्त्या भुञ्जानेन प्रतिक्षणम् ॥८३॥
ततस्त्वं दलिताशेषरोगव्रातो नरेश्वरम् ।
विशेषतः समाराध्य भवितासि नृपोत्तमः ॥८४॥
इयं च तद्दया तुभ्यं दास्यत्येतद्दिने दिने ।
किमत्र बहुनोक्तेन भोक्तव्यं भेषजत्रयम् ॥८५॥
ततः प्राह्लादितः स्वान्ते वचनैस्तस्य कोमलैः ।
स्वाकूतमुररीकृत्य स एवं द्रमकोऽब्रवीत् ॥८६॥
इदं नाद्यापि शक्नोमि पापस्त्यक्तुं कदन्नकम् ।
अन्यत्तु यन्मया किंचित् कर्त्तव्यं तत्समादिश ॥८७॥
तच्छ्रुत्वा स्फुरितं चित्ते धर्मबोधकरे तदा ।
भुंक्षेदं त्रयमित्युक्तः किमेवं बत भाषते ॥८८॥
आ ज्ञातमेष तुच्छत्वादेवं चिन्तयते हृदि ।
भोजनत्याजनार्थी मे सर्वोऽयं विस्तरो गिराम् ॥८९॥
क्लिष्टचित्तो जगत्सर्वं मन्यते दुष्टमानसम् ।
शुद्धाभिसंधयः सर्वं शुद्धचित्तं विजानते ॥९०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो विहस्य तेनोक्तं माभैषीर्भद्र किंचन ।
नाधुना त्याजयामीदमन्नमेधि निराकुलः ॥९१॥
अहमत्याजयं पूर्वं तवैव हितकाम्यया ।
यदि नो रोचते तुभ्यं तूष्णींभावोऽत्र मे मतः ॥९२॥
यच्चैतदुपदिष्टं ते प्राक्कर्त्तव्यतया मया ।
तदत्र भवता किंचित् किं सम्यगवधारितम् ॥९३॥
सोऽब्रवीन्नैव तन्नाथ किंचित्संलक्षितं मया ।
केवलं पेशलालापैस्तावकैर्मोदितो हृदि ॥९४॥
अज्ञातपरमार्थापि सतां नूनं सरस्वती ।
चेतोऽतिसुन्दरत्वेन प्रीणयत्येव देहिनाम् ॥९५॥
अन्यच्च चेतसो न्यासे नयने तव संमुखे ।
विशत्येकेन कर्णेन वचो यातीतरेण मे ॥९६॥
यच्चात्र मनसो नाथ वैधुर्यं मम कारणम् ।
तत्सांप्रतं भयापायात् कथयामि निराकुलः ॥९७॥
यदा ह्याकारितः पूर्वं भवद्भिः करुणापरैः ।
अहमन्नप्रदानार्थं तदा मे हृदि वर्त्तते ॥९८॥
लास्यत्येष क्वचिन्नीत्वा मामकं भोजनं नरः ।
तदाकूतवशाद्गाढं ध्यात्वा चेतनतां गतः ॥९९॥
यदा प्रबोधितः पश्चादञ्जनेन सुवत्सलैः ।
भवद्भिश्चिन्तितं तूर्णं नश्यामीति तदा मया ॥१००॥
यदा तु तोयपानेन प्रीतीकृत्य वपुर्मम ।
कृतं संभाषणं नाथैस्तदा विश्रंभमागतः ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिन्तितं च मया योऽयं ममैवमुपकारकः ।
स महाभूतिसंपन्नः कथं स्यादन्नहारकः ॥२॥
विमुञ्चेदं गृहाणेदं यदा नाथैः प्रजल्पितम् ।
तदा किं करवाणीति चिन्तेनाकुलतां गतः ॥३॥
नैष तावत्स्वयं लाति त्याजयत्येव केवलम् ।
त्यक्तुं नैतच्च शक्नोमि किं वदामि तदुत्तरम् ॥४॥
सत्यस्मिन् देहि मे भोज्यमित्युक्ते दापितं त्वया ।
तदास्वादात्पुनर्जातं ममायमतिवत्सलः ॥५॥
तत् किमस्य वचः कुर्वन् मुञ्चामीदं स्वभोजनम् ।
मरिष्ये न तु मुक्तेऽस्मिन् मूर्च्छयाकुलचेतनः ॥६॥
अयं वक्ति हि तत्त्वेन शक्तोऽस्म्यस्य न मोचने ।
अहो व्यसनमापन्नं ममेदमतिदुस्तरम् ॥७॥
एवमाकुलचित्तस्य यन्नाथैर्वक्तुभाषितम् ।
तन्मे भूतघटस्येव लुठित्वा पार्श्वतो गतम् ॥८॥
नाधुना त्याजयामीति भवद्भिर्ज्ञातमानसैः ।
इदानीं पुनरादिष्टे मनाग् ज्ञातो निराकुलः ॥९॥
तद् ब्रूत सांप्रतं नाथाः कर्त्तव्यं पापकर्मणा ।
यन्मयेदृशचित्तेन येनाहमवधारये ॥१०॥
तदाकर्ण्य दयाढ्येन यदुक्तं प्राक् समासतः ।
सविस्तरतरं तस्मै तत्पुनः प्रतिपादितम् ॥११॥
ततोऽञ्जनजलान्नानां नरेन्द्रस्य विशेषतः ।
प्रायोऽज्ञातगुणं ज्ञात्वा तं प्रतीदमभाषत ॥१२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहं तात नरेन्द्रेण प्रागादिष्टो यथा त्वया ।
योग्येभ्य एव दातव्यं मदीयं भेषजत्रयम् ॥१३॥
अयोग्यदत्तं नैवैतदुपकारं प्रकल्पयेत् ।
प्रत्युतानर्थसंतानं विदधाति विशेषतः ॥१४॥
मया पृष्टं तदा नाथ कथं ज्ञास्यामि तानहम् ।
ततः प्रत्युक्तवान् राजा तेषामाख्यामि लक्षणम् ॥१५॥
ये तावदस्य नाद्यापि रोगिणो योग्यतां गताः ।
स्वकर्मविवरस्तेषां न गृहेऽत्र प्रवेशकः ॥१६॥
सोऽप्यादिष्टो मया पूर्वं ये योग्या भेषजत्रये ।
प्रवेशनीयास्ते नान्ये भवनेऽत्र त्वया नराः ॥१७॥
प्रविष्टा अपि ते दृष्ट्वा मोदन्ते नैव मद्गृहम् ।
तेषां न मामिका दृष्टिर्विशेषेण निरीक्षिका ॥१८॥
ते ह्यन्यद्वारपालेन स्युः कथंचित्प्रवेशिताः ।
त्वयापि लिङ्गतो ज्ञात्वा वर्जनीयाः प्रयत्नतः ॥१९॥
ये मन्मन्दिरमालोक्य जायन्ते हृष्टचेतनाः ।
रोगिणो भाविभद्रत्वान्निरीक्षेऽहं विशेषतः ॥२०॥
स्वकर्मविवरानीता ये मया च विलोकिताः ।
ते ज्ञेयास्त्रितयस्यास्य पात्रभूतास्त्वया नराः ॥२१॥
तेषां तु निकषस्थानमिदमेवौषधत्रयम् ।
प्रयुज्यमानं स्वगुणैः संग्रहेतरकारकम् ॥२२॥
येभ्योऽदो रोचते चित्ते प्रयुक्तं गुणकारकम् ।
अक्लेशतो विशेषेण ते सुसाध्याः प्रकीर्त्तिताः ॥२३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ये नादितः प्रपद्यन्ते बलाद्येषां विशाल्यते ।
कालक्षेपेण ते ज्ञेयाः कृच्छ्रसाध्यास्त्वयानुगाः ॥२४॥
येभ्यो न रोचतेऽत्यर्थं न क्रामति नियोजितम् ।
द्वेष्टारो दायकेऽप्यस्य ते त्वसाध्या नराधमाः ॥२५॥
तदेतद्राजराजेन मम यत्संप्रदायितम् ।
तेन ते कृच्छ्रसाध्यत्वं लक्षणेन विभाव्यते ॥२६॥
अन्यच्च ये प्रपद्यन्ते भवतोऽमुं नरेश्वरम् ।
यावज्जीवं विशेषेण नाथं निःशंकमानसाः ॥२७॥
अचिन्त्यवीर्यसंपूर्णा निःशेषगदबर्हिणी ।
तेषामेव गुणं धत्ते मदीया भेषजक्रिया ॥२८॥
अतस्त्वं प्रतिपद्यस्व नाथत्वेन नृपोत्तमम् ।
भावसारं महात्मानो भक्तिग्राह्या यतः स्मृताः ॥२९॥
अनन्तास्तात रोगार्त्ता भक्तितोऽमुं नृपोत्तमम् ।
प्रपद्य स्वामिभावेन दृष्टा जाताः कृतक्रियाः ॥३०॥
बलिनस्तावका रोगा अपथ्ये लम्पटं मनः ।
महायत्नं विना नात्र लक्ष्यते गदसंक्षयः ॥३१॥
तद्वत्स प्रयतो भूत्वा कृत्वा स्वं निश्चलं मनः ।
स्थित्वा निराकुलोऽत्रैव वितते राजमन्दिरे ॥३२॥
आदाय कन्यकाहस्तात्प्रयुञ्जानः क्षणे क्षणे ।
भेषजत्रयमेतत्त्वं कुरुष्वारोग्यमात्मनः ॥३३॥
ततस्तथेति भावेन गृहीतं तेन तद्वचः ।
तेनापि तद्दया तस्य विहिता परिचारिका ॥३४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः कुलैकदेशेन भिक्षापात्रमनारतम् ।
तदेव पालयन् कालं कियन्तमपि स स्थितः ॥२५॥
ददाति तद्दया तस्मै चितयं तदहर्निशम् ।
कदन्ने मूर्च्छितस्यास्य केवलं तत्र नादरः ॥२६॥
प्रायेण बहु भुङ्क्तेऽसौ तन्मोहेन कुभोजनम् ।
यत्पुनस्तु दयादत्तं तद्व्रजत्युपदंशताम् ॥२७॥
अञ्जनं च तया प्राज्ञो निधत्ते नेत्रयोः क्वचित् ।
तच्च तीर्थोदकं पातुं तद्वचस्तः प्रवर्त्तते ॥२८॥
महाकल्याणकं दत्तं संभ्रमेण तया बहु ।
भुक्त्वाल्पं हेलया शेषं कर्परे निदधाति सः ॥२९॥
तस्मांनिध्यगुणात्तच्च तस्यान्नं संप्रवर्द्धते ।
अदतोऽहर्निशं तस्मान्निष्ठां नैव प्रपद्यते ॥४०॥
ततो गाढतरं तुष्टो वृद्धिं दृष्ट्वा स्वभोजने ।
नचासौ तद्विजानीते यन्माहात्म्येन वर्द्धते ॥४१॥
केवलं तत्र गृद्धात्मा चितये शिथिलादरः ।
जानन्नपि न जानाति कालं नयति मोहितः ॥४२॥
अहर्निशमपथ्यं तद्भुञ्जानः कुक्षिमानतः ।
चितयेऽनादरास्वादी न रोगोच्छेदभाजनम् ॥४३॥
तावन्मात्रेण भुक्तेन किन्तु तस्य गुणो महान् ।
क्षतक्षयेण ते रोगा आनीता तेन याप्यताम् ॥४४॥
तथाप्यात्मज्ञताभावादुच्चणलादपथ्यतः ।
क्वचिद्विकारमात्मीयं दर्शयन्ति शरीरके ॥४५॥



For Private And Personal Use Only

क्वचिच्छूलं क्वचिद्दाहः क्वचिन्मूर्च्छा क्वचिज्ज्वरः ।
क्वचिच्छर्दिः क्वचिज्जाड्यं क्वचिद्धृत्पार्श्ववेदना ॥ ४६ ॥
क्वचिदुन्मादसन्तापः पथ्ये क्वचिदरोचकः ।
तै रोगैर्विक्रियापन्नैः शरीरस्य प्रजायते ॥ ४७ ॥
कदाचित्तद्दया दृष्ट्वा तं विकारैरुपद्रुतम् ।
आक्रन्दन्तं कृपोपेता संचिन्त्येत्थमभाषत ॥ ४८ ॥
कथितं तात तातेन यदन्नं तव वल्लभम् ।
एतन्निमित्तकाः सर्वे रोगास्तवशरीरके ॥ ४९ ॥
तथापि दृष्टवृत्तान्ता माभूदाकुलता तव ।
तद्भक्षयन्तं दृष्ट्वापि भवन्तं नैव वारये ॥ ५० ॥
परमस्वास्थ्यहेतौ ते शेषियिष्यं भेषजत्रये ।
एतत्तु रोचते तुभ्यं सर्वसन्तापकारणम् ॥ ५१ ॥
अधुना क्रन्दतो नास्ति हेतुः स्वास्थ्यस्य कारकः ।
अपथ्येऽत्यर्थं सक्तानां न लगत्येव भेषजम् ॥ ५२ ॥
अपवादो ममाप्यत्र यतस्ते परिचारिका ।
प्रत्यहं न च शक्नोमि कर्त्तुं स्वास्थ्यं तवाधुना ॥ ५३ ॥
इतरः प्राह यद्येवं वारणीयस्त्वयासुतः ।
अभिलाषातिरेकेण न त्यक्तुं स्वयमुत्सहे ॥ ५४ ॥
कदाचित्त्वत्प्रभावेन स्तोकस्तोकं विमुञ्चतः ।
सर्वत्यागेऽपि शक्तिर्मे कदन्नस्य भविष्यति ॥ ५५ ॥
साधु साधूदितं भद्र युक्तमेतद्भवादृशाम् ।
इत्युक्त्वाधिकमश्नन्तं सा कदन्नं न्यवारयत् ॥ ५६ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्तत्परिहारेण रोगा याम्यस्य तानवम् ।
न जायतेऽधिका पीडा लगत्यङ्गे च भेषजम् ॥५७॥
केवलं सा यदाभ्यर्णे तदा पथ्येन तिष्ठति ।
अपथ्यमल्पमश्नाति जायते तेन याप्यता ॥५८॥
यदा तु सा विदूरस्था साम्यथ्यात्तत्कदन्नकम् ।
भूरि निर्भेषजं सोऽस्ति तेनाजीर्णेन पीड्यते ॥५९॥
इतश्च तद्दया तेन धर्मबोधकरेण सा ।
प्रागेवाशेषलोकस्य पालकले नियोजिता ॥६०॥
सानन्तसत्त्वसङ्घातव्यापारकरणोद्यता ।
तन्मूले कचिदेवास्ते शेषकालं समुत्कलः ॥६१॥
अपथ्यभक्षणासक्तः स केनचिद्वारितः ।
विकारैर्बाध्यते भूयस्ते दरास्ते च मेछकाः ॥६२॥
कदाचित्पीडितो दृष्टो धर्मबोधकरेण सः ।
सोऽवादीत् किमिदं भद्र स चाशेषं न्यवेदयत् ॥६३॥
इयं हि तद्दया नित्यं न मत्पार्श्वेऽवतिष्ठते ।
तदेकत्वाच्च मे रोगाः प्रभवन्ति विशेषतः ॥६४॥
तस्मान्नाथास्तथा यूयं कुरुध्वं यत्नमुत्तमम् ।
यथा पीडा न मे देहे स्वप्नान्तेऽप्युपजायते ॥६५॥
स प्राह वत्स ते पीडा जायतेऽपथ्यसेवनात् ।
इयं तु तद्दया व्यग्रा कर्मान्तरनियोगतः ॥६६॥
या वारणं विधत्ते ते सदैवापथ्यमश्नतः ।
यदि स्यात्तादृशी काचित् क्रियते परिचारिका ॥६७॥—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केवलं त्वमनात्मज्ञः पथ्यसेवापराङ्मुखः ।
कदन्नभक्षणोद्युक्तस्तस्य किं करवाणि ते ॥६८॥
इतरस्त्वाह मामेवं नाथावदत सांप्रतम् ।
नैवाहं युष्मदादेशं लङ्घयामि कथञ्चन ॥६९॥
तदाकर्ण्य मनाग् ध्यात्वा क्षणमात्रमवोचत ।
धर्मबोधकरस्तस्मै हितायोद्यतमानसः ॥७०॥
अस्ति मे वचनायत्ता सद्बुद्धिर्नाम दारिका ।
तां ते करोमि निर्व्यग्रां विशेषपरिचारिकाम् ॥७१॥
सा हि संनिहिता नित्यं पथ्यापथ्यविवेचिका ।
तुभ्यमेव मया दत्ता माकार्षीश्चित्तवैक्लवम् ॥७२॥
केवलं सा विशेषज्ञा वैपरीत्यविधायिनाम् ।
अनादरवतां पुंसां नोपकाराय वर्त्तते ॥७३॥
यदि तेऽस्ति सुखाकाङ्क्षा दुःखेभ्यो यदि ते भयम् ।
ततः सा वक्ति यत्किञ्चित् कर्त्तुं युक्तं तदेव ते ॥७४॥
एष एव ममादेशो यत्तदादेशवर्त्तनम् ।
तस्यै न रोचते यत्तु नैव मह्यं स रोचते ॥७५॥
अनेकाक्षणयुक्तापि तद्दया क्वचिदित्य ते ।
प्रतिजागरणं भद्र करिष्यत्यन्तरान्तरा ॥७६॥
केवलं परमार्थस्ते कथ्यते हितकाम्यया ।
सद्बुद्धौ सततं यत्नः कर्त्तव्यः सुखमिच्छता ॥७७॥
ये मूढाः सम्यगाराध्य सप्रसादां न कुर्वते ।
एनां तेषां न राजेन्द्रो नाहं नान्यः प्रसीदति ॥७८॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अप्रमादहता नित्यं जायन्ते दुःखभाजनम् ।
ते यतोऽन्यो न लोकेऽपि हेतुरस्ति सुखप्रदः ॥७९॥
स्वाधीना वर्त्तते यस्माद्दूरस्था मद्विधादयः ।
तवेयं सुखहेतुत्वे तस्मादाराद्धुमर्हसि ॥८०॥
एवं भवतु तेनोक्ते कृता सा परिचारिका ।
ततः प्रभृति निश्चिन्तो धर्मबोधकरोऽभवत् ॥८१॥
यावदास्ते दिनान्येषा कतिचित्तस्य पार्श्वगा ।
तावद्यत्तत्र संपन्नं तदिदानीं निबोधत ॥८२॥
अतिलौल्येन यः पूर्वं खादन्नपि न तृप्यति ।
कदन्नं भूरि नैवात्ति तस्य चिन्तापि तद्गता ॥८३॥
पूर्वाभ्यासात् क्वचिद्भुङ्क्ते केवलं तृप्तिकारणम् ।
जायते न च तत्स्वास्थ्यं विहन्याद् गृद्ध्यभावतः ॥८४॥
योऽकार्षीदुपरोधेन महता भेषजत्रयम् ।
स्वयं तस्य बलात्तस्मिन् अभिलाषोऽभिवर्द्धते ॥८५॥
अहिते गृद्ध्यभावेन हिते चाभिनिवेशतः ।
यत्तदा तस्य संपन्नं तच्चैतदभिधीयते ॥८६॥
बाधन्ते नैव ते रोगाः शरीरं जाततानवाः ।
यापि पीडा भवेत् क्वापि सापि शीघ्रं निवर्त्तते ॥८७॥
विज्ञातस्य सुखास्वादो नष्टा बीभत्सरूपता ।
गाढं च वर्त्तते तोषः स्वस्थत्वात्तस्य चेतसि ॥८८॥
अन्यदात्यन्तहृष्टेन मनसा रहसि स्थितः ।
सद्बुद्ध्या सार्द्धमेवं स जल्पति स्म निराकुलः ॥८९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भद्रे किमिदमाश्चर्यं शरीरं मम वर्त्तते ।
एतद्दुःखाकरं पूर्वं यत्सुखाकरतां गतम् ॥९०॥
सा प्राह जातमेतत्ते सम्यक्पथ्यनिषेवणात् ।
समस्तदोषमूलेऽस्मिन्नहिते लौल्यवर्जनात् ॥९१॥
मत्सान्निध्याच्च ते भद्र भुञ्जानस्य कदन्नकम् ।
प्रागभ्यासवशाच्चित्ते लज्जात्यर्थं प्रजायते ॥९२॥
लज्जया तस्य सम्भोगोऽकार्यरूपः प्रकाशते ।
ततश्च गृह्ययोगेन कामचारो निवर्त्तते ॥९३॥
ततस्तद्भुक्तमप्यङ्गे नात्यर्थं रोगवर्द्धनम् ।
तेनैषा ह्लादसंवेद्या जाता तव सुखासिका ॥९४॥
इतरस्त्वाह यद्येवं सर्वथापि त्यजाम्यहम् ।
अदः कदन्नं मे येन जायते सुखमुत्तमम् ॥९५॥
सा त्वाह युज्यते किन्तु सम्यगालोच्य संत्यज ।
माभूत्ते स्नेहदोषेण प्रागिवाकुलता पुनः ॥९६॥
यदि त्यक्ते पुनस्तेऽत्र स्नेहाबन्धोऽनुवर्त्तते ।
ततोऽत्यागो वरः कस्मात् स्नेहोऽस्मिन्रोगवर्धकः ॥९७॥
अल्पाल्पमश्नतोऽप्येतद्भेषजत्रयसेवनात् ।
सांप्रतं याप्यता तेऽस्ति सापि चात्यन्तदुर्लभा ॥९८॥
सर्वत्यागं पुनः कृत्वा यस्यात्तदभिलाषुकः ।
याप्यतामपि नाप्नोति स महामोहदोषतः ॥९९॥
तदेतत्सम्यगालोच्य यदि चेतसि भासते ।
ततोऽस्य सर्वथा त्यागो युज्यते कर्तुमुत्तमैः ॥१००॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्बुद्धेस्तद्वचः श्रुत्वा मनाग् दोलायितं मनः ।
तस्य किं करवाणीति नास्ति सम्यग विनिश्चयः ॥१॥
अन्यदा परिभुञ्जोच्चैर्महाकल्याणकं बहु ।
तत् कदन्नं ततस्तेन प्रार्थितं लौलया किल ॥२॥
ततः सदन्नदत्तत्वात् सद्बुद्धेः सन्निधानतः ।
ततश्च तैर्गुणैश्चित्ते तदानीं प्रतिभासते ॥३॥
अहो कुथितमत्यर्थं लज्जनीयं मलाविलम् ।
बीभत्सं विरसं निन्द्यं सर्वदोषौघभाजनम् ॥४॥
इदं मे भोजनं मोहस्तथापि न निवर्त्तते ।
नैतत्त्यागादृते मन्ये निर्व्याधं सुखमाप्यते ॥५॥
त्यक्तेऽपि पूर्वलौल्येन कदाचिन्मे स्मृतिर्भवेत् ।
सद्बुद्ध्या सापि दुःखौघकारिणीति निवेदितम् ॥६॥
अत्यक्ते दुःखजलधौ सर्वदा स्थेयमञ्जसा ।
तदत्र किं करोमीति पापोऽहं सत्त्ववर्जितः ॥७॥

अथवा ॥

किमेतैः क्रियते मोहादालजालविचिन्तनैः ।
मुञ्चामि सर्वथापीदं यद्भाव्यं तद्भविष्यति ॥८॥
यद्वा किमत्र यद्भाव्यं न भवत्येव मे क्षतिः ।
को नाम राज्यमासाद्य स्मरेच्चण्डालरूपताम् ॥९॥
एवं निश्चित्य तेनोक्ता सद्बुद्धिः चालयस्व मे ।
भद्रे भाजनमेतत्त्वं हित्वा सर्वकदन्नकम् ॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तयोर्भ्रं पृच्छ्यतां तावद्धर्मबोधकरस्त्वया ।
कालेन विक्रियां याति सम्यगालोच्य यत् कृतम् ॥११॥
ततः सहैव सद्‌बुद्ध्या धर्मबोधकरान्तिके ॥
गत्वा सर्वोऽपि वृत्तान्तस्तेन तस्मै निवेदितः ॥१२॥
साधु साधु कृतं भद्र धर्मबोधकरोऽब्रवीत् ।
केवलं निश्चयः कार्यो येन नो यासि हास्यताम् ॥१३॥
सोऽवादीत् किमिदं नाथो भूयो भूयो विकथ्यते ।
एष मे निश्चयस्तस्मिन्नमनोऽपि प्रवर्त्तते ॥१४॥
ततोऽशेषजनैः सार्द्धं पर्यालोच्य विचक्षणः ।
अत्याजयत्स तत्पात्रं सज्जलैः पर्यशोधयत् ॥१५॥
महाकल्याणकस्योच्चैस्तत्पुनः पर्यपूरयत् ।
प्रमोदातिशयात्तच्च दिने वृद्धिमकारयत् ॥१६॥
धर्मबोधकरो हृष्टस्तद्दया प्रमदोद्धुरा ।
सद्‌बुद्धिर्वर्द्धितानन्दा मुदितं राजमन्दिरम् ॥१७॥
प्रवृत्तश्च जने वादो योऽयं राज्ञावलोकितः ।
धर्मबोधकरस्येष्टस्तद्दयापरिपालितः ॥१८॥
सद्‌बुद्ध्याधिष्ठितो नित्यमपथ्यत्यागकारकः ।
भेषजत्रयसेविलाद्रोगोघैर्मुक्तकल्पकः ॥१९॥
स नो निष्पुण्यकः किन्तु महात्मैष सपुण्यकः ।
ततस्तदेव संजातं नामास्येति सपुण्यकः ॥२०॥
कुतः पुण्यविहीनानां सामग्री भवतीदृशी ।
जन्मदारिद्र्यभाग् नैव चक्रवर्त्तित्वभाजनम् ॥२१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्बुद्धिस्तद्दयायोगात्तिष्ठते राजमन्दिरे ।
ततः प्रभृति यत्तस्य संपन्नं तन्निबोधत ॥२२॥
अपथ्याभावतो नास्ति पीडा देहे परिस्फुटा ।
क्वचित्सूक्ष्माल्पकाला च यदि स्यात्पूर्वदोषजा ॥२३॥
ततः स्वयं गताकाङ्क्षो लोकव्यापारशून्यधीः ।
विधत्ते विमलालोकं नेत्रयोरञ्जनं सदा ॥२४॥
तत्त्वप्रीतिकरं तोयं पिबत्यश्रान्तमानसः ।
महाकल्याणकं भुङ्क्ते तत्सदन्नमनारतम् ॥२५॥
ततो बलं धृतिः स्वास्थ्यं कान्तिरोजः प्रसन्नता ।
बुद्धिपाटवमक्षाणां वर्द्धते ऽस्य प्रतिक्षणम् ॥२६॥
नाद्यापि सम्यगारोग्यं बहुत्वाद्रोगसन्ततेः ।
जायते केवलं देहे विशेषो दृश्यते महान् ॥२७॥
यः प्रेतभूतः प्रागासीद्गाढं बीभत्सदर्शनः ।
स तावदेष संपन्नो मानुषाकारधारकः ॥२८॥
ये रोरभावे भावाः प्रागभ्यस्तास्ते न सन्ततम् ।
तुच्छता क्लीबता लौल्यं शोकमोहभ्रमादयः ॥२९॥
त्रयोपभोगात्ते सर्वे नष्टप्रायतया तदा ।
न बाधका मनाग् जातास्तेनासौ स्फीतमानसः ॥३०॥
अन्यदात्यन्तहृष्टात्मा सद्बुद्धिं परिपृच्छति ।
भद्रे त्रयमिदं लब्धं मयैतत् केन कर्मणा ॥३१॥
तयोक्तं तात लभ्यन्ते सर्वेऽर्था दत्तपूर्वकाः ।
इति वार्त्ताजने तेन दत्तमेतत् क्वचित्त्वया ॥३२॥

6

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः सञ्चिन्तयत्येवं वितीर्णं यदि लभ्यते ।
इदं सकलकल्याणकारणं भेषजत्रयम् ॥ ३ ३॥
इदानीं चारुपात्रेभ्यः प्रयच्छामि विशेषतः ।
पुनर्जन्मान्तरे येन संपद्येतेदमक्षयम् ॥ ३ ४॥
तस्य चायमवष्टम्भो राजराजावलोकितः ।
धर्मबोधकरस्येष्टस्तद्दयापरिपूजितः ॥ ३ ५॥
श्लाघितः सर्वलोकेन सद्बुद्धेर्गाढवल्लभः ।
अहं सपुण्यकस्तेन लोके वर्त्ते किलोत्तमः ॥ ३ ६॥

ततश्च ।

यदि मां कश्चिदागत्य प्रार्थयिष्यति मानवः ।
तद्दास्यामीति मन्वानो दित्सुरप्येष तिष्ठति ॥ ३ ७॥
अत्यन्तं निर्गुणोऽप्यत्र महद्भिः कृतगौरवः ।
नूनं संजायते गर्वी यथायं द्रमकाधमः ॥ ३ ८॥
तत्र ये मन्दिरे लोकास्ते सर्वे त्रयभोजनाः ।
तद्बलादेव निश्चिन्ताः संजाताः परमेश्वराः ॥ ३ ९॥
प्रविष्टमात्रा विद्यन्ते तादृशा येऽपि निःस्वकाः ।
तेऽन्येभ्य एव तद् भूरि लभन्ते भेषजत्रयम् ॥ ४ ०॥
ततो न कश्चित्तन्मूले तदर्थमुपतिष्ठते ।
स दिक्षु निक्षिपंश्चक्षुर्याचमानं प्रतीक्षते ॥ ४ १॥
स्थित्वापि कालं भूयांसमलब्धप्रार्थकस्ततः ।
सद्बुद्धिं पुनरप्येष तदर्थं परिपृच्छति ॥ ४ २॥
सा प्राह भद्र निर्गत्य घोषणापूर्वकं त्वया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीयतां यदि गृह्णीयुः केचित्स्यादतिसुन्दरम् ॥ ४३ ॥
ततोऽसौ घोषयत्युच्चैर्मदीयं भेषजत्रयम् ।
लोका गृह्णीत गृह्णीत गृहे तस्मिन्नटाय्यते ॥ ४४ ॥
ततः पूत्कुर्वतस्तस्माद् गृह्णीयुरतितुच्छकाः ।
ये तत्र तद्विधाः केचिदन्येषां तु हृदि स्थितम् ॥ ४५ ॥
अहो प्राग् दृष्टदारिद्र्यो रोरोऽयं मत्ततां गतः ।
राजवर्णवशेनास्मान् ग्राहयत्यात्मभेषजम् ॥ ४६ ॥
ततः केचिद्धसन्त्युच्चैः केचिदुत्रासयन्ति तम् ।
अन्ये पराङ्मुखीभूय तिष्ठन्ति विगतादराः ॥ ४७ ॥
अथ तं तादृशं वीक्ष्य दानोत्साहविबाधकम् ।
जनव्यापारमागत्य सद्बुद्धिः कथयत्यसौ ॥ ४८ ॥
गृह्णन्ति द्रमका भद्र न गृह्णन्ति महाजनाः ।
ममेच्छा यदि सर्वेषामेतेषामुपयुज्यते ॥ ४९ ॥
पर्यालोचे दृढं पटवी वर्त्तसे विमलेक्षणे ।
तदत्र हेतुर्विध्येत ग्राहणेऽस्य महात्मनाम् ॥ ५० ॥
तदाकर्ण्य महाकार्ये नियुक्ताहमनेन भोः ।
चिन्तयन्ती महाध्यानं प्रविष्टा सा विचक्षणा ॥ ५१ ॥
अथ निश्चित्य गर्भार्थं कार्यस्येत्थमभाषत ।
एक एवात्र हेतुः स्याद् ग्राहणे सर्वसंश्रयः ॥ ५२ ॥
राजाजिरे विधायेदं. काष्ठपात्र्यां जनाकुले ।
वस्तुत्रयं. विशालायां तिष्ठ विस्रब्धमानसः ॥ ५३ ॥
स्वयमेव ग्रहीष्यन्ति शून्यं दृष्ट्वा तदर्थिनः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्मरन्तो रोरभावं हि त्वत्करात्ते न गृह्णते ॥५४॥
आदद्यात् कश्चिदेकोऽपि यदि तत्सगुणो नरः ।
तेन स्यात्तारितो मन्ये यत एतदुदाहृतम् ॥५५॥
किञ्चिज्ज्ञानमयं पात्रं किञ्चित्पात्रं तपोमयम् ।
आगमिष्यति तत्पात्रं यत्पात्रं तारयिष्यति ॥५६॥
ततोऽसौ वर्द्धितानन्दस्तस्या वचनकौशलैः ।
विधत्ते तत्तथैवेति तच्चेदमभिधीयते ॥५७॥
प्रयुक्तं तादृशेनापि ये ग्रहीष्यन्ति मानवाः ।
ते भविष्यन्ति नीरोगा यच्चयं तच्च कारणम् ॥५८॥

अन्यच्च ।

यावदर्थं निस्पृहत्वाद् ग्रहणे तदनुग्रहात् ।
अनुकम्पापरस्तच्च सर्वस्मात्तुमर्हति ॥५९॥
एष तावत्समासेन दृष्टान्तः प्रतिपादितः ।
अधुनोपनयं यूयं कथ्यमानं निबोधत ॥६०॥
अदृष्टमूलपर्यन्तं यदत्र कथितं पुरम् ।
सोऽयं संसारविस्तारोऽदृष्टपारः प्रतीयताम् ॥६१॥
महामोहहतोऽनन्तदुःखाघ्रातो विपुण्यकः ।
पूर्वं मदीयजीवोऽयं स रोर इति गृह्यताम् ॥६२॥
भिक्षाधारतया ख्यातं यत्तस्य घटकर्परम् ।
तदायुर्गुणदोषाणामाश्रयस्तद्विवर्त्तते ॥६३॥
डिम्भाः कुतीर्थका ग्राह्या वेदनाक्लिष्टचित्तता ।
रोगा रागादयो ज्ञेया अजीर्णं कर्मसञ्चयः ॥६४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भोगाः पुत्रकलत्राद्या यच्च संसारकारणम् ।
तज्जीवरुद्धिहेतुत्वात् कदन्नमभिधीयते ॥६५॥
यश्चासौ सुस्थितो नाम महाराजः प्रकाशितः ।
जानीत परमात्मानं सर्वज्ञं तं जिनेश्वरम् ॥६६॥
यच्च तज्जनितानन्दं गदितं राजमन्दिरम् ।
अनन्तभूतिसंपन्नं तज्ज्ञेयं जिनशासनम् ॥६७॥
स्वकर्मविवरो नाम यः प्रोक्तो द्वारपालकः ।
आत्मीयकर्मविच्छेदो यथार्थोऽसावुदाहृतः ॥६८॥
ये चान्ये सूचितास्तत्र द्वारपालप्रवेशकाः ।
ते मोहाज्ञानलोभाद्या विज्ञेयास्तत्त्वचिन्तकैः ॥६९॥
आचार्यास्तत्र राजान उपाध्यायाः सुमन्त्रिणः ।
गीतार्थवृषभा योद्धा गणचिन्तानियुक्तकाः ॥७०॥
सामान्यभिक्षवः सर्वे विज्ञेया मूलवर्गिकाः ।
आर्यास्तु तत्र सद्गेहे प्रशान्ताः स्थविरा जनाः ॥७१॥
भटौघाः श्राद्धसङ्घातास्तद्वद्बहुमानसाः ।
ज्ञेया विलासिनीसत्वा भक्तास्तत्प्रमदागणाः ॥७२॥
शब्दादिविषयानन्दवर्णनं पुनरत्र यत् ।
तदेवमर्थं सद्धर्माज्ज्ञायन्ते तेऽपि सुन्दराः ॥७३॥
धर्मबोधकरो ज्ञेयः सूरिर्यो मत्प्रबोधकः ।
तद्दया तस्य या जाता ममोपरि महाकृपा ॥७४॥
ज्ञानमञ्जनमुद्दिष्टं सम्यक्त्वं जलमुच्यते ।
चारित्रमत्र विज्ञेयं परमान्नं मनीषिभिः ॥७५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्बुद्धिः शोभना बुद्धिः सन्मार्गे या प्रवर्त्तिका ।
काष्ठपात्री यथाकारा वक्ष्यमाणा कथोच्यते ॥७६॥
एषा समासतस्तावत् कृता सामान्ययोजना ।
विशेषयोजनाव्यक्तं गद्येनोदाहरिष्यते ॥ ४७७ ॥

तत्रेह तावत्तत्त्वविदुषामेष मार्गो यदुत तेषां कल्याणाभिनिवेशितया निष्प्रयोजनो विकल्पो न चेतसि विवर्त्तते। अथ कदाचिद्भावितावस्थायां विवर्त्तेत तथापि ते न निर्णिमित्तं भाषन्ते । अथ कदाचिदतत्त्वज्ञजनान्तर्गततया भाषेरन् तथापि न निर्हेतुकं चेष्टन्ते यदि पुनस्ते निष्कारणं चेष्टेरन् ततोऽतत्त्वज्ञजनसार्थादविशिष्टतया तत्त्वविद्वत्ता विशीर्येत तस्मात्तत्त्ववेदिष्वात्मनोऽन्तर्भावमभिलषता सकलकालं सर्वेण स्वविकल्पजल्पाचरणानां सार्थकत्वं यत्नतः परिचिन्तनीयम्। तद्वेदिनां च पुरतः कीर्त्तनीयम् ते हि निरर्थकेष्वप्यात्मविकल्पजल्पव्यापारेषु सार्थकत्वबुद्धिं कुर्वन्तमनुकम्पया वारयेयुरिति। अतो मयापि स्वप्रवृत्तेः सार्थकत्वमावेदयते मामुपमितिभवप्रपञ्चाभिधानां कथामारब्धुकामेन कथानकं दृष्टान्तद्वारेण निवेदितं तदेतच्चावधारितं भो भव्यास्ततो मदनुरोधेन विहाय विक्षेपान्तरमस्य दार्ष्टान्तिकमर्थमाकर्णयत। तत्र यत्तावददृष्टमूलपर्यन्तं नाम नगरमनेकजनाकुलं सदास्थायुकमाख्यातं सोऽयमनादिनिधनोऽविच्छिन्नरूपोऽनन्तजन्तुव्रातपूरितः संसारो द्रष्टव्यः ।

तथाहि ।

युज्यतेऽस्य नगरस्य नगरता कल्पयितुं यतोऽत्र धवलगृहायन्ते देवलोकादिस्थानानि । हट्टमार्गायन्ते परापरजन्मपद्धतयः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विविधपण्यायन्ते नानाकारसुखदुःखानि। तदनुरूपमूल्यायन्ते बहुविधपुण्यापुण्यानि। विचित्रचित्रोज्ज्वलदेवकुलायन्ते सुगतकणभक्षाक्षपादकपिलादिप्रणीतकुमतानि। पौर्वापर्यपर्यालोचनविकलमुग्धजनचित्ताक्षेपकारितया सहर्षप्रबलकलकलोपेतदुर्दान्तबालकलापायन्ते। क्रोधादयः कषायाः सकलविवेकिमहालोकचित्तोद्वेगहेतुतया तुङ्गप्राकारायन्ते। महामोहलंघ्यतया वेष्टकतया च महापरिखायते रागद्वेषात्मिका तृष्णा। विषयजलदुष्पूरतयाऽतिगम्भीरतया च विस्तीर्णमहासरायन्ते शब्दादयो विषयाः। प्रबलजलकल्लोलाकुलतया विपर्यस्तजनशकुनाधारतया च गम्भीरान्धकूपायन्ते प्रियविप्रयोगानिष्टसंयोगस्वजनमरणधनहरणादयो भावाः। त्रासहेतुतया अदृष्टमूलतया च विशालारामकाननायन्ते जन्तुदेहाः। हृषीकमनस्सञ्चरीकनिलयनकारणतया स्वकर्मविविधविटपिकुसुमफलभरपूरिततया चेति॥

यस्तु तत्र नगरे निष्पुण्यको नाम द्रमकः कथितः सोऽत्र संसारनगरे सर्वज्ञशासनप्राप्तेः पूर्वं पुण्यरहिततया यथार्थाभिधानो मदीयजीवो द्रष्टव्यः। यथासौ द्रमको महोदरः तथायमपि जीवो विषयकदशनदुष्पूरत्वान्महोदरः। यथाऽसौ द्रमकः प्रक्षीणबन्धुवर्गस्तथायमपि जीवोऽनादौ भवभ्रमणे केवलो जायते केवलो म्रियते केवलस्य स्वकर्मपरिणतिढौकितं सुखदुःखमनुभवति। इत्यतो नास्य परमार्थतः कश्चिद्बन्धुरस्ति। यथाऽसौ रोरो दुष्टबुद्धिस्तथायमपि जीवोऽतिविपर्यस्तो यतोऽनन्तदुःखहेतून् विषयानासाद्य परितुष्यति परमार्थशत्रून् कषायान् बन्धूनिव सेवते। परमार्थतोऽन्धत्वमपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिथ्यात्वं पटुदृष्टिरूपतया गृह्णाति । नरकपातहेतुभूतामप्यविरतिं प्रमोदकारणमाकलयति । अनेकानर्थसार्थप्रवर्त्तकमपि प्रमादकदम्बकमत्यन्तस्निग्धमित्रवृन्दमिव पश्यति । धर्म्मधनहारितया चरटकल्पानपि दुष्टमनोवाक्काययोगान् पुत्रानिव बहुधनार्जनशीलान् मन्यते । निविडबन्धनोपमानमपि पुत्रकलत्रधनकनकादीनामाह्लादातिरेकहेतून् पर्यालोचयतीति । यथाऽसौ द्रमको दारिद्र्योपहतस्तथायमपि जीवः सद्धर्मवराटिकामात्रेणापि शून्यत्वाद्दारिद्र्याक्रान्तमूर्त्तिः । यथासौ रोरः पौरुषविकलस्तथायमपि जीवः स्वकर्महेतूच्छेदवीर्यविकलतया पुरुषकाररहितो विज्ञेयः । यथाऽसौ द्रमकः क्षुत्क्षामशरीरस्तथायमपि जीवः सकलकालं विषयबुभुक्षानिवृत्तेरत्यन्तकर्षितशरीरो ज्ञातव्यः । यथाऽसौ रोरोऽनाथः कथितस्तथायमपि जीवः सर्वज्ञरूपनाथाप्रतिपत्तेरनाथो द्रष्टव्यः । यथाऽसौ द्रमको भूमिशयनेन गाढं घृष्टपार्श्वत्रिकः प्रतिपादितस्तथायमपि जीवः सदातिपरुषपापभूमिविलोटनेन नितरां दलितसमस्ताङ्गोपाङ्गो द्रष्टव्यः । यथासौ द्रमको धूलिधूसरसर्वाङ्गो दर्शितस्तथायमपि जीवो बध्यमानपापपरमाणुधूलिधूसरसमस्तशरीरो विज्ञेयः । यथासौ रोरश्चीरिकाजालमालितो गदितस्तथायमपि जीवो मोहकलालत्वणाभिर्लघुचेलपताकाभिः समन्तात्परिकरितमूर्त्तिरतीवबीभत्सदर्शनो वर्त्तते । यथासौ द्रमको निन्द्यमानो दीनस्वाख्यातस्तथायमपि जीवोऽवासविवेकैर्निन्द्यते सद्भिः भयशोकादिक्लिष्टकर्मपरिपूर्णतया चात्यन्तदीनो विज्ञेयः । यथाचासौ तत्र नगरेऽनवरतं गृहे गृहे भिक्षां पर्यटतीत्युक्तस्तथायमपि जीवः संसार-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नगरेऽपरापरजन्मलक्षणेषु उच्चावचेषु गेहेषु विषयकदन्नाशापाश-वशीकृतोऽनारतं भ्रमतीति। यत्पुनस्तस्य भिक्षाधारं घटखर्पर-माख्यातं तदस्य जीवद्रमकस्यायुष्कं विज्ञेयं यतस्तदेव तदुपभोग्यस्य विषयकदन्नादेराश्चिमहाकल्याणकादेश्चाश्रयो वर्त्तते। यतश्च तदेव गृहीत्वा भूयोभूयोऽस्मिन् संसारनगरेऽयं जीवः पर्यटतीति। ये तु तस्य द्रमकस्य दुर्दान्तडिम्भसंघाता यष्टिमुष्टिमहालोष्ट-प्रहारैः क्षणे क्षणे ताडयन्तः शरीरं जर्जरयन्तीति निदर्शितास्तेऽस्य जीवस्य कुविकल्पास्तत्संपादकाः कुतर्कग्रन्थास्तत्प्रणेतारो वा कुतीर्थिका विज्ञेयाः। ते हि यदा यदाऽमुं जीवं वराकं पश्यन्ति तदा तदा कुहेतुशतमुद्गरघातपातैरस्य तत्त्वाभिमुखरूपं शरीरं जर्जरयन्ति। ततश्च तैर्जर्जरितशरीरोऽयं जीवो न जानीते कार्याकार्यविचारं न लक्षयति भक्ष्याभक्ष्यविशेषं न कलयति पेयापेयस्वरूपं नावबुध्यते हेयोपादेयविभागं नावगच्छति स्वपरयोर्गुणदोषनिमित्तमिति ततोऽसौ कुतर्कभ्रान्तचित्तश्चिन्तयति नास्ति परलोको न विद्यते कुशलाकुशलकर्म्मणां फलं न संभवति खल्वयमात्मा नोपपद्यते सर्वज्ञः न घटते तदुपदिष्टो मोक्षमार्ग इति। ततोऽसावतत्त्वाभिनिविष्ट-चित्तो हिनस्ति प्राणिनो भाषतेऽलीकमादत्ते परधनं रमते मैथुने परदारेषु वा गृह्णाति परिग्रहं न करोति चेच्छापरिमाणं भक्षयति मांसमास्वादयति मद्यं न गृह्णाति सदुपदेशं प्रकाशयति कुमार्गं निन्दति वन्दनीयान् वन्दत्यवन्दनीयान् गच्छति स्वपरयो-र्गुणदोषनिमित्तमिति वदति परावर्णवादमाचरति समस्तपातका-नीति। ततो बध्नाति निविडं भूरिकर्मजालं पतत्येष जीवो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नरकेषु। तत्र च पतितः पच्यते कुंभीपाकेन विपाद्यते क्रकचपाटनेन आरोह्यते वज्रकण्टकाकुलासु शाल्मलीषु पाय्यते सन्दंशकैर्मुखं विदार्य कलकलायमानं तप्तं त्रपु। भक्ष्यते निजमांसानि भृज्यतेऽत्य-न्तमन्तप्तभ्राष्ट्रेषु तार्यते पूयवसारुधिरक्लेदमूत्रान्त्रकलुषां वैतरणीं छिद्यतेऽसिपत्रवनेषु स्वपापभरप्रेरितैः परमाधार्मिकसुरैरिति।

तथा समस्तपुद्गलराशिभक्षणेऽपि नोपशाम्यति बुभुक्षा। निः-शेषजलधिपानेऽपि नापगच्छति तर्षः। अभिभूयते शीतवेदनया कदर्थ्यते तापातिरेकेण तथोदीरयन्ति च तदन्यनारका नाना-काराणि दुःखानि। ततश्चायं जीवो गाढतापानुगतो हा मातर्हा नाथास्त्रायध्वं त्रायध्वमिति विक्लवमाक्रोशति न चास्य तत्र गात्र-त्रायकः कश्चिद्विद्यते।

कथञ्चिदुत्तीर्णोऽपि नरकाद्विबाध्यते तिर्यक्षु वर्त्तमानः। कथं। वाह्यते भारं कुट्यते लकुटादिभिः छिद्यन्तेऽस्य कर्णपुच्छादयः खाद्यते क्रमिजालैः सहते बुभुक्षां म्रियते पिपासया तुद्यते नाना-कारयातनाभिरिति।

ततः कथञ्चिदवाप्तमनुष्यभावोऽप्येष जीवः पीड्यत एव दुःखैः। कथं तदुच्यते। क्लेशयन्त्येनं रोगव्राताः जर्जरयन्ति जराविकाराः दोदूयन्ते दुर्जनाः विक्लवयन्तीष्टवियोगाः परिदेवन्त्यनिष्टसंप्रयोगाः विसंस्थुलयन्ति धनहरणानि आकुलयन्ति स्वजनमरणानि विक्लव-यन्ति नानाव्यसनानीति।

तथा। कथञ्चिल्लब्धविबुधजन्माप्येष जीवो ग्रस्यत एव नाना-वेदनाभिः। तथा हि। आज्ञाप्यते विवशः शक्रादिभिः खिद्यते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परोत्कर्षदर्शनेन जीर्यते प्रागभवकृतप्रमादस्मरणेन दन्दह्यतेऽस्वाधीनामरसुन्दरीप्रार्थनेन ग्लायते तन्निदानचिन्तनेन निन्द्यते महर्द्धिकदेववृन्देन विलपत्यात्मनश्च्यवनदर्शनेन आक्रन्दति गाढप्राप्तासन्नमृत्युः पतति समस्ताशुचिनिदाने गर्भकलमल इति । //—

एवं स्थिते । यद्द्रमकं वर्णयताऽभ्यधायि यदुत सर्वाङ्गीणमहाघाततापानुगतचेतनः हा मातस्त्रायतामित्थं दैन्यविक्रोशविक्लव इति । तदस्यापि जीवस्य तुल्यमेव द्रष्टव्यम् । तस्मादस्याः सर्वस्या महानर्थपरम्परायाश्चात्मगताः कुविकल्पास्तत्सम्पादकाः कुदर्शनग्रन्थास्तत्प्रणेतारश्च कुतीर्थिकाः कारणमिति । यत्तून्मादादयस्तस्य द्रमकस्य रोगा निर्दिष्टास्तस्य जीवस्य महामोहादयो विज्ञेयाः । तत्र मोहो मिथ्यात्वं तदुन्माद इव वर्त्तते समस्ताकार्यप्रवृत्तिहेतुतया ज्वर इव रोगः सर्वाङ्गीणमहातापनिमित्ततया शूलमिव द्वेषो गाढहृदयवेदनाकारणतया पामेव कामस्तीव्रविषयाभिलाषकण्डूकारितया गलत्कुष्ठमिव भयशोकारतिसम्पाद्यं दैन्यम् । जनजुगुप्साहेतुतया चित्तोद्वेगविधायितया च नेत्ररोग इवाज्ञानं विवेकदृष्टिविघातनिमित्ततया जलोदरमिव प्रमादः सदनुष्ठानोत्साहघातकतयेति । ततश्चायं जीवो मिथ्यात्वादिभिरेतैर्भावरोगैर्विह्वलीकृतो न किञ्चिच्चेतयते । ततश्च यदेतत् साम्प्रतमेव न जानीते भक्ष्याभक्ष्यमित्याद्यनध्यवसायरूपं महातमः प्रतिपादितम् । ये च नास्ति परलोक इत्यादयो विपर्यासविकल्पाः प्रतिपादितास्तेऽस्य इयस्याप्युत्पत्तौ बाह्याः कुतर्कग्रन्थादयः सहकारिकारणभावेनोत्पादकाः । एते तु रागद्वेषमोहादय आन्तरा उपादान-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारणभावेन जनकास्तस्मात्पूर्वोक्ता सर्वानर्थपरम्परा परमार्थतो गाढतरमेतज्जन्यापि विज्ञेया । किञ्च कुशास्त्रसंस्कारादयः कादाचित्का एते तु रागादयस्तदुत्पादने सकलकालभाविनः । अन्यच्च । कुदर्शनश्रवणादयो भवन्तोऽपि भवेयुर्वानर्थपरंपराकारणं न वेति व्यभिचारिणः । एते तु रागादयो भवन्तोऽवश्यतया महानर्थगर्त्तपातं कुर्वन्त्येव नास्त्यत्र व्यभिचारो यतस्तैरभिभूतोऽयं जीवः प्रविशति महातमोऽज्ञानरूपं विधत्ते नानाविधविपर्यासविकल्पान् अनुतिष्ठति कदनुष्ठानशतानि सञ्चिनोति गुरुतरकर्मभारं ततस्तत्परिणत्या क्वचिज्जायते सुरेषु क्वचिदुत्पद्यते मानुषेषु क्वचिदासादयति पशुभावं क्वचित्पतति महानरकेषु । ततश्च । तदेव प्राक्प्रतिपादितस्वरूपं महादुःखसन्तानमनवरतमरघट्टघटीयन्त्रन्यायेनानन्तशोऽनुभवद्वारेण परावर्त्तयतीति । एवञ्च स्थिते यत्तद्रमकवर्णने प्रत्यपादि यदुत शीतोष्णदंशमशकक्षुत्पिपासाद्युपद्रवैर्बाध्यमानो महाघोरनरकोपमवेदन इति । तदत्र जीवशरीरे समर्गलतरं मन्तव्यमिति । अत एव च यदुक्तं यदुतासौ द्रमकः ।

कृपास्पदं सतां दृष्टो हास्यस्थानं स मानिनाम् ।
बालानां क्रीडनावासो दृष्टान्तः पापकर्मणाम् ॥

तदत्रापि जीवे सकलं योजनीयम् । तथाहि । सततमसातसंनिपातग्रस्तोऽयं जीवो दृश्यमानोऽत्यन्तसात्मीभूतप्रशमसुखरसानां भगवतां सत्साधूनां भवत्येव कृपास्थानं क्लिश्यमानेषु सकलकालं करुणाभावनाभावितचित्तत्वात्तेषां तथा मानिनामिव वीररसवशेन तपश्चरणकरणोद्यतमतीनां सरागसंयतानां भवत्येवायं जीवो हास्य-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थानं धर्माख्यपुरुषार्थसाधनविकलस्य कीदृशी खल्वस्य पुरुषतेति तेषामनादरदृष्टेः । तथा ।

बालानां मिथ्यात्वाध्मातचेतसां तथाविधलोकानां कथञ्चिद्द्रवाप्तविषयसुखलवानां भवत्येवायं पापिष्ठजीवः क्रीडनावासो दृश्यन्ते हि धनगर्वोद्धुरचित्तैस्तथाविधकर्मकरादयो नानाप्रकारं विडम्ब्यमानाः । तथा पापकर्मणां फलप्ररूपणावसरे भवत्येवं विधो जीवो दृष्टान्तः। तथा हि । भगवन्तः पापकार्माणि दर्शयन्तो भव्यजन्तूनां संवेगजननार्थमीदृशजीवानेव दृष्टान्तयन्तीति। यत्पुनरवाचि यदुत।

अन्येऽपि बहवः सन्ति रोरास्तत्र महापुरे ।
केवलं तादृशः प्रायो नास्ति निर्भाग्यशेखरः ॥

तदेतदात्मीयजीवस्यात्यन्तविपरीतचारितामनुभवताभिहितं मया । योऽयं मदीयजीवोऽधरितजात्यन्धभावोऽस्य महामोहोऽपहस्तितनरकतापोऽस्य रागः । उपमागोचरातीतोऽस्य परेषु द्वेषः । अपहसितवैश्वानरोऽस्य क्रोधो लघूकृतमहाशैलराजोऽस्य मानो विनिर्जितभुजगवनितागतिरस्य माया दर्शितस्वयम्भूरमणसागरलघुभावोऽस्य लोभः स्वप्नपिपासाकारमस्य विषयलाम्पट्यं भगवद्धर्मप्राप्तेः प्रागासीत्स्वसंवेदनसिद्धमेतत् । अहमेवं तर्कयामि नैवमुल्बणदोषताप्रायोऽन्यजीवानां यथा चैतत्सोपपत्तिकं भवति तथोत्तरत्र प्रतिबोधावसरे विस्तरेणाभिधास्यामः ।

यत्तूक्तं यथाऽसौ रोरस्तत्रादृष्टमूलपर्यन्ते नगरे प्रतिभवनं भिक्षामटन्नेवं चिन्तयति । यदुत अमुकस्य देवदत्तस्य बन्धुमित्रस्य जिनदत्तस्य च गृहेऽहं स्निग्धां मृष्टां बह्वीं, सुसंस्कृतां भिक्षां लप्स्ये ताञ्चाहं

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तूर्णमादाय यथान्ये द्रमका न पश्यन्ति तथैकान्ते यास्यामि । तत्र कियतीमपि भोक्ष्ये शेषामन्यदिनार्थं स्थापयिष्यामि । ते तु द्रमकाः कदाचित्कुतश्चिन्निमित्तान्मां लब्धलाभं ज्ञास्यन्ति ततश्चागत्य याचमाना मामुपद्रवयिष्यन्ति । ततश्च म्रियमाणेनापि मया न दातव्या सा तेभ्यः । ततस्ते बलामोटिकया ग्रहीष्यन्ति । ततोऽहं तैः सह योद्धुं प्रारप्स्ये । ततस्ते मां यष्टिमुष्टिलोष्टादिभिस्ताडयिष्यन्ति । ततोऽहं महामुद्गरमादाय तानेकैकं चूर्णयिष्यामि क्क यान्ति दुष्टास्ते मया पापा इत्येवमलीकविकल्पजालमालाकुलीकृतमानसः केवलं प्रतिक्षणं रौद्रध्यानमापूरयिष्यति न पुनरसौ वराकः प्रतिग्टहमटाच्यमानोऽपि किञ्चिद्भोजनजातमासादयति । प्रत्युत हृदयखेदमात्मनोऽनन्तगुणं विधत्ते । अथ कथञ्चिद्दैववशात्कदन्नलेशमात्रमाप्नोति तदा महाराज्याभिषेकमिवासाद्य हर्षातिरेकाज्जगदप्यात्मनोऽधस्तान्मन्यते । तदेतत्सर्वमत्राऽपि जीवे योजनीयम् । तथास्य संसारेऽहर्निशं पर्यटतो य एते शब्दादयो विषया यश्चैतद्वन्धुवर्गधनकनकादिकं यच्चान्यदपि क्रीड़ाविकथादिकं संसारकारणं तद्वृद्धिहेतुतया रागादिभावरोगकारणत्वात् कर्मसञ्चयरूपमहाजीर्णनिमित्तत्वाच्च कदन्नं विज्ञेयं ततश्चायमपि महामोहग्रस्तो जीवश्चिन्तयति । यदुत परिणेष्याम्यहमनल्पयोषितः ताश्च रूपेण पराजेष्यन्ति त्रिभुवनं सौभाग्येनाभिमुखयिष्यन्ति मकरध्वजं विलासैः क्षोभयिष्यन्ति मुनिहृदयानि कलाभिरुपहसिष्यन्ति बृहस्पतिं विज्ञानेन रञ्जयिष्यन्ति अतिदुर्विदग्धजनचित्तानीति । तासां चाहं भविष्यामि सुतरां हृदयवल्लभः न सहिष्यन्ते ताः पर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरुषगन्धमपि न लंघयिष्यन्ति मम कदाचिदाज्ञां करिष्यन्ति मे सततं चित्तानन्दातिरेकं प्रसादयिष्यन्ति मां दर्शितकृत्रिमकोपविकारं विधास्यन्ति कामोत्कोचकरणबहूनि चाटुशतानि प्रकटयिष्यन्तीङ्गिताकारैर्मे हृदयसद्भावं हरिष्यन्ति नानाविकारविब्बोकैर्मे मानसं हनिष्यन्ति मामनवरतं ताः परस्परेर्ष्यया साभिलाषं कटाक्षविक्षेपैरिति। तथा भविष्यति मे विनीतो दक्षः शुचिः सुवेषोऽवसरज्ञो हृदयग्राही मय्यनुरक्तः समस्तोपचारकुशलः शौर्यौदार्यसम्पन्नः सकलकलाकौशलोपेतः प्रतिपत्तिनिपुणोऽपहसितशक्रपरिकरः परिकर इति। तथा। भविष्यन्ति मे निजयशःशुभ्रसुधाधवलतया स्वचित्तसन्निभा अत्युच्चतया च हिमगिरिसङ्काशा विचित्रचित्रोज्वला वितानमालोपशोभिताः शालभञ्जिकाद्यनेकनयनानन्दकारिरूपरचनाकलिता बहुविधशाला विशाला नानाप्रकारप्रकोष्ठविन्यासा अतिविस्तीर्णानेकाकारस्थानमण्डपपरिकरिताः समंतान्महाप्राकारपरिक्षिप्ता अपहसितविबुधाधिपावासाः सप्तभूमिकाद्यो भूयांसः प्रासादाः। तथा करिष्यन्ति मे भवने सततं प्रकाशं मरकतेन्द्रनीलमहानीलकर्केतनपद्मरागवज्रवैदूर्येन्दुकान्तसूर्यकान्तचूडामणिपुष्परागादिरत्नराशयः। तथा विराजिष्यन्ते मम मन्दिरे समन्तात्पीतोद्योतमादर्शयन्तो हाटककूटाः। तथा भविष्यन्ति मम सदनेऽनल्पतया हिरण्यधान्यकुप्यादिकमनाख्याख्यानम्। तथा नन्दयिष्यन्ति मे हृदयं मुकुटाङ्गदकुण्डलप्रालम्बाद्यो भूषणविशेषाः। तथा जनयिष्यन्ति मे चित्तरतिं चीनांशुकपट्टांशुकदेवांशुकप्रभृतयो वस्त्रविस्ताराः। तथा वर्द्धयिष्यन्ति मे मानसानन्दं मणि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कनकविचित्रभक्तिमण्डितराजतक्रीडापर्वतककलितानि दीर्घिका-गुञ्जालिकायन्त्रवापिकाद्यनेकविधजलाशयमनोहराणि बकुलपु-न्नागनागाशोकचम्पकप्रभृतिविविधविटपिजातिविस्तारीणि पञ्चवर्ण-गन्धबन्धुरकुसुमभरानम्रशाखापर्यन्तानि कुमुदकोकनदादिजलरुह-चारूणि भ्रमद्भृङ्गझङ्कारसारतारोपगीतानि प्रासादसमीपवर्त्तीनि लीलोपवनानि प्रमोदयिष्यन्ति मां निर्जितदिनकरस्यन्दनसौन्दर्या रथसङ्घाताः । हर्षयिष्यन्ति मामपहस्तितसुराधिपहस्तिमाहात्म्यानां वरकरिणां कोटयः । तोषयिष्यन्ति मामधरितविबुधपतिहरिरया हयकोटिकोटयः । समुल्लासयिष्यन्ति मे मनसि प्रमदातिरेकं पुरतो धावन्तोऽनुरक्ता अपरपराकरणपटवः परस्परमविभिन्न-चेतसो न चात्यन्तसंहतासङ्ख्यातीताः पदातिसङ्घाताः । रञ्जयिष्यन्ति मे प्रतिदिनं प्रणतिलालसानि राजवृन्दानि· किरीटमणिमरीचि-जालैश्चरणारविन्दम् । भविष्याम्यहं भूरिभूमिमण्डलाधिपतिः । तन्त्रयिष्यन्ति मे समस्तकार्याणि प्रज्ञावज्ञातसुरमन्त्रिणोऽमात्य-सत्तमाः । तदिदं सुसंस्कृतभिचालाभेच्छातुल्यं विज्ञेयम् । पुनश्च चिन्तयति । ततोऽहमतिसमृद्धतया निश्चिन्ततया च परिपूर्णसमग्र-सामग्रीकः करिष्यामि विधिना कुटीप्रावेशिकं रसायनं ततस्तदुप-योगात् संपत्स्यते मे वलीपलितखालित्यव्यङ्गादिविकलं जरामरण-विकाररहितं देवकुमाराधिकतरद्युतिवितानं निःशेषविषयोपभोग-भाजनं महाप्राणं शरीरम् । तदिदं लब्धभिचस्यैकान्तगमनमनोरथ-सममवगन्तव्यम् । भूयश्च मन्यते । ततोऽहमतिप्रमुदितचेता गम्भीर-रतिसागरावगाढस्तेन ललनाकलापेन सार्द्धं ललमानः खल्वेवं करिष्ये ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदुत क्वचिदनवरतप्रवृत्तमदनरसपरवशोऽनारतसुरतविनोदेन स्पर्शनेन्द्रियं प्रीणयिष्ये । क्वचिद्रसनेन्द्रियोत्सवद्वारेण स्वस्थीकृताशेषहृषीकवर्गान्मनोज्ञरसानास्वादयिष्ये । क्वचिदतिसुरभिकर्पूरानुविद्धमलयजकश्मीरजकुरङ्गमदादिविलेपनद्वारेण च पञ्चसुगन्धिकतांबूलास्वादनव्याजेन चाहं घ्राणेन्द्रियं तर्पयिष्ये । क्वचिदनारतताडितमरुजध्वनिसनाथममरसुन्दरीविभ्रमललनालोकसम्पादितमनेकाकारकरणाङ्गहारमनोहरं प्रेक्षणकमीक्षमाणश्चक्षुरिन्द्रियानन्दं विधास्ये । क्वचित्कलकण्ठतत्प्रयोगविशारदजनप्रयुक्तं वेणुवीणामृदङ्गकाकलीगीतादिस्वनमाकर्णयन् श्रोत्रेन्द्रियमाल्हादयिष्ये । क्वचित्पुनरखिलकलाकलापकौशलोपेतैः समानवयोभिः समर्पितहृदयसर्वस्वैः शौर्यौदार्यवीर्यवर्यैरपहसितमकरध्वजसौन्दर्यैर्मित्रवर्गैः सार्द्धं नानाविधक्रीडाविलासै रममाणः समग्रेन्द्रियग्राममाल्हादातिरेकमास्कन्दयिष्यामीति । तदिदमेकान्तेभिक्षाभक्षणाकांक्षासदृशमवसेयम् । चिन्तयति च ततो मामेवं निरतिशयसुखानुभवद्वारेण तिष्ठतो भूयांसं कालं समुत्पत्स्यन्ते सुरकुमाराकारधारकाणि रिपुसुन्दरीहृदयदाहदायकानि च समाल्हादितसमस्तबन्धुवर्गप्रणयिजननानाप्रकृतीनि मत्प्रतिबिम्बकसंकाशानि सुतशतानि । ततोऽहं सम्पूर्णाशेषमनोरथविस्तारः प्रत्यस्तमितप्रत्यूहसमूहोऽनन्तकालं यथेष्टचेष्टया विचरिष्यामि । सोऽयं भूरिदिनार्थं स्थापनमनोरथ इव वर्त्तते । यत्पुनरालोचयति ।

यदुत । अथ कदाचित्तं तथाभूतं मामकीनं संपत्प्रकर्षं शेषनृपतयः श्रोष्यन्ति । ततस्ते मत्सराध्मातचेतसः सर्वेऽपि संभूय मद्वि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षयेषूपप्लवं विधास्यन्ति। ततोऽहं तेषामुपरि चतुरङ्गसेनया विक्षेपेण यास्यामि ततस्ते स्वबलावलेपवशेन मया सह सङ्ग्रामं करिष्यन्ति । ततो भविष्यति प्रभूतकालिको महारणविमर्द्दः । ततस्ते परस्परं संहततया भूरिसाधनतया च मनाग् मामाक्रमिष्यन्ति ततोऽहमभिवर्द्धितक्रोधबन्धतया प्रादुर्भूतप्रबलरणोत्साहस्तानेकैकं सबलं चूर्णयिष्ये । नास्ति समस्तानामपि पातालेऽपि प्रविष्टानां मया बद्धानां मोक्ष इति । तदिदं रौररणाकाण्डविड्वरसमानमवबोद्धव्यम् । भूयश्च भावयति । ततोऽहमवजितसमस्तपृथिवीभाविराजवृन्दलालस्ये चक्रवर्त्तिराज्यमहाभिषेकम् । ततो नास्ति वस्तु तत्त्रिभुवने यन्मे न सम्पत्स्यत इति । एवमेष जीवो राजपुत्राद्यवस्थायां वर्त्तमानो बहुशो निष्प्रयोजनविकल्पपरम्परयात्मानमाकुलयति ।

ततश्च । रौद्रध्यानमापूरयति ततो बध्नाति निबिडं कर्म ततः पतति महानरकेषु न चेह तथापि खिद्यमानोऽपि पूर्वोपार्जितपुण्यविकलः स्वहृदयतापं विमुच्यापरं कञ्चनार्थमासादयति । तदनेनैतल्लक्षणीयं यदा खल्वेष जीवो नरपतिसुताद्यवस्थायामतिविशालचित्ततया किलापकर्णिततुच्छवस्तुगोचरमनोरथो बृहदर्थप्रार्थकतया स्वबुद्ध्यैव महाभिप्रायस्तदापि विदितप्रशमामृतास्वादनसुखरसानां विज्ञातविषयविपाकदारुणभावानां सिद्धिवधूसम्बन्धबद्धाध्यवसायानां भगवतां सत्साधूनां क्षुद्रद्रमकप्रायः प्रतिभासते । किम्पुनः शेषास्ववस्थास्विति ।

तथा हि । द्विजातिवणिजकाभीरान्त्यजादिभावेषु वर्त्तमानोऽयं जीवोऽदृष्टतत्त्वमार्गो वराकस्तुच्छाभिप्रायतया क्वचिद्द्विचाणामपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षुद्रग्रामाणां लाभं चक्रवर्त्तित्वं मन्यते । कश्चित् क्षेत्रखण्डमात्रप्रभुत्वमपि महामण्डलिकत्वमाकलयति । कश्चिज्जारकुलटामप्यमरसुन्दरीं कल्पयति । कश्चिद्वीभत्सविरूपमप्यात्मानं मकरध्वजं चिन्तयति । कश्चिन्मातङ्गपाटकाकारमप्यात्मपरिजनं शक्रपरिवारमिव पश्यति । कश्चिद्दविणस्य त्रिचतुराणां सहस्राणां शतानां विंशतीनां रूपकाणामपि लाभं कोटीश्वरत्वमवगच्छति । कश्चित्पञ्चषाणामपि धान्यद्रोणानामुत्पत्तिं धनदविभवतुल्यां लक्षयति । कश्चित्स्वकुटुम्बभरणमपि महाराज्यमवबुध्यते । कश्चिद्दुष्पूरोदरदरीपूर्णमपि महोत्सवाकारं जानीते । कश्चिद्भिक्षावाप्तिमपि जीवितावाप्तिं निश्चिनोति । कश्चिदन्यं शब्दादिविषयोपभोगनिरतमुद्वीक्ष्य राजादिकं शक्रोऽयं देवोऽयं धन्योऽयं पुण्यभागयं महात्मायं पुरुषो यदि ममाप्येवं सम्पद्यन्ते विषयास्ततोऽहमप्येवं विलसामीति चिन्तयन्परितप्यति । तथाविधाकूतविडम्बितश्च तदर्थं करोति भूभुजां सेवां पर्युपास्ते तान् सर्वदा दर्शयति विनयं वदत्यनुकूलं शोकाक्रान्तोऽपि हसति तेषु हसत्सु सञ्जातजातस्वपुत्रहर्षप्रकर्षोऽपि रोदिति तेषु रुदत्सु निजशत्रूनपि स्तौति तदभिमतान् स्वपरमसुहृदोऽपि निन्दति तद्विषो धावति पुरतो रात्रिंदिवं मर्द्दयति खिन्नदेहोऽपि तच्चरणान् क्षालयत्यशुचिस्थानानि विधत्ते तद्वचनात्सर्वजघन्यकर्माणि प्रविशति कृतान्तवदनकुहर इव रणमुखे समर्पयति करवालादिघातानामात्महृदयं म्रियते धनकामोऽपूर्णकाम एव वराकः । तथा प्रारभते कृषीं खिद्यते सर्वमहोरात्रं वाहयति हलं अनुभवत्यटव्यां पशुभावं विमर्द्दयति नानाप्रकारान्

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राणिनः परितप्यते वृक्षभावेन बाध्यते बीजनाशेन तथा विधत्ते वाणिज्यं भाषतेऽलीकं मुष्णाति विश्रब्धमुग्धलोकान् याति देशान्तरेषु सहेत शीतवेदनां क्षमते तापसन्तापं तितिक्षते बुभुक्षां न गणयति पिपासामनुभवति चायासायासादीनि दुःखशतानि प्रविशति महारौद्रसमुद्रे प्लाव्यते यानपात्रभङ्गेन भवति भक्ष्यं जलचराणां तथा भ्रमति गिरिकन्दरोदरेषु आस्कन्दत्यसुरविवराणि निभालयति रसकूपिकाः भक्ष्यते तदा रक्षराक्षसैः तथाऽवलम्बते महासाहसं याति रात्रौ श्मशानेषु वहति मृतकलेवराणि विक्रीणाति महामांसं साधयति विकलवेतालं निपात्यते तेन कुपितेन । तथाऽभ्यस्यति खन्यवादं निरीक्ष्यते निधानलक्षणानि तुष्यति तद्दर्शनेन ददाति रात्रौ तद्ग्रहणार्थं भूतबलिं दूयते तदङ्गारभृतभाजनवीक्षणेन । तथानुशीलयति धातुवादं समुपचरति नरेन्द्रवृन्दं गृह्णाति तदुपदेशं मीलयति मूलजालानि समाहरति धातुमृत्तिकाः समुपढौकयति पारदं क्लिश्यते तस्य जारणचारणमारणकरणेन धमते रात्रिन्दिवं फूत्करोति प्रतिक्षणं हृष्यति पीतश्वेतक्रिययोर्लेशसिद्धौ खादत्यहर्निशमाशामोदकान् व्ययीकरोति तदर्थं शेषमपि धनलवं माद्यते दुःसाधितकर्मविभ्रमेण । तथा विषयोपभोगसम्पत्तये धनार्थमेव चायं जीवः कुरुते चौर्यं रमते द्यूतमाराधयति यक्षिणीं परिजपति मन्त्रान् गणयति ज्योतिषीं प्रयुङ्क्ते निमित्तं आवर्जयति लोकहृदयं अभ्यस्यति सकलं कलाकलापं किं बहु तन्नास्ति यन्न करोति तन्न विद्यते यन्न वदति तन्न सम्भवति यन्न चिन्तयति न च तथाप्ययमनवरतमितश्चेतश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदर्थं संभ्रम्यमाणः प्राग्विहितपुण्यशून्यः समभिलषितार्थस्य तिल-तुषत्रिभागमात्रमपि प्राप्नोति केवलं स्वचित्तसन्तापमार्त्तरौद्रध्याने गुरुतरकर्म्मभारं तद्द्वारेण दुर्गतिं चात्मनोऽभिवर्द्धयतीति यदि पुनः कथञ्चित्पूर्वविहितपुण्यलवः स्यात् ततोऽयं जीवस्तदुदयेन धनसहस्रादिकं वा अभिमतभार्यां वा स्वशरीरसन्दर्यं वा विनीतपरिजनं वा धान्यसञ्चयं वा कतिचिद्ग्रामप्रभुत्वं वा राज्यादिकं वा प्राप्नुयादपि। ततश्च। यथाऽसौ द्रमकः कदन्नलेशमात्रलाभात्तुष्टस्तथायमपि जीवो माद्यति हृदये मदसन्निपातग्रस्तहृदयश्च नाकर्णयति विज्ञापनानि न पश्यति शेषलोकं न नामयति ग्रीवां न भाषते प्रगुणवचनैः अकाण्ड एव निमीलयति चक्षुषी अपमानयति गुरुसंहतिमपि अतोऽयमेवं विधतुच्छाभिप्रायहतस्वरूपो जीवो ज्ञानादिरत्नभरपरिपूर्णतया परमेश्वराणां भगवतां मुनिपुङ्गवानां क्षुद्रद्रमकेभ्योप्यधमतमः कथं न प्रतिभासते। यदा पशुभावे नरकेषु वा वर्त्ततेऽयं जीवस्तदा विशेषतो द्रमकोपमामतिलंघयति यतो विवेकधनानां महर्षीणां य एते किल शक्रादयो देवा महर्द्धयो महाद्युतयो निरुपचरितशब्दादिविषयोपभोगभाजनं द्राघीयःस्थितिकास्तेऽपि यदि सम्यक्दर्शनरत्नविकलाः स्युस्तदा महादारिद्र्यभराक्रान्तमूर्त्तयो विद्युल्लताविलसितचटुलजीविताश्च प्रतिभासन्ते किं पुनः शेषाः संसारोदरविवरवर्त्तिनो जन्तव इति। यथा चासौ द्रमकोऽवज्ञया जनैर्दत्तं तत्कदन्नं भुञ्जानः शक्रादपि शङ्कते यदुतायं ममैतद्दाल-यिष्यति। तथायमपि जीवो महामोहोपहतस्तद्द्रविणकलत्रादिकं कथञ्चित्तावता क्लेशजालेनोपार्जितं यदानुभवति तदा बिभेति

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्करेभ्यः त्रस्यति नरपतिभ्यः कम्पते भयेन दायादेभ्यः उद्विजते याचकेभ्यः किं बहुनाच जल्पितेनात्यन्तनिःस्पृहमुनिपुङ्गवेभ्योऽपि शङ्कते । यदुतैते महता वचनरचनाटोपेन मां प्रतार्य नूनमेतद्ग्रहीतुमिच्छन्ति तथाविधगाढमूर्च्छाविषाभिभूतचित्तश्चिन्तयत्येवं हन्त धच्यते ममैतद्द्रविणजातं चित्रभानुना प्लावयिष्यते वा सलिलप्रवाहेन हरिष्यते वा चौरादिभिः अतः सुरचितं करोमि ततोऽसहायः शेषजनाविश्रम्भितया रात्रावुत्थाय खनत्यतिदूरं भूतलं निधत्ते तत्तच निभृतसञ्चारः पुनः पूरयित्वा गर्त्तं कुरुते समं भूतलं विकिरति तस्योपरि धूलिकचवरादिकं सम्पादयति किलालच्यं स्वाकूतेन मा पुनर्न ज्ञास्यामि स्वदेशमिति विधत्ते विविधानि चिह्नानि प्रयोजनान्तरेण तद्देशेन सञ्चरन्तमपरं जनं मुहुर्मुहुर्निभालयति कथञ्चित्तद्देशे यान्तीं तद्दृष्टिं शङ्कते आ ज्ञातमेतेनातो मूर्च्छादन्दह्यमानमानसो न लभते रात्रौ निद्रां पुनरुत्थाय तत्प्रदेशात्तदुत्खनति निधत्ते च प्रदेशान्तरं निरीचते पुनःपुनर्दिगन्तरेषु सभयं निचिपंश्चचुः । यदुत मां कश्चिद्द्रच्यतीति व्यापारान्तरमपि स केवलं कायेन करोति चेतस्तु तत्प्रतिबन्धबन्धनबद्धं ततः स्थानादन्यत्र पदमपि न चलतीति । अथ कथञ्चित्तथाविधयत्नशतैरपि तेन रच्यमाणमपरो लचयेत् गृह्णीयाच्च ततोऽसावकाण्डवज्रपातनिर्दलितशरीर इव हा तात हा मातर्हा भ्रातरिति विक्लवमाराध्यमानः सकलविवेकिलोकं करुणापरीतचित्ततां प्रापयति । अतिमूर्च्छाव्याप्तशातचेतनो म्रियते वा । तदिदं धनलवप्रतिबद्धचेतोवृत्तीनां विलसितमुपदर्शितम् । तथा गृहिणीप्रतिबन्धग्रहगृहीतवि-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहोऽपीर्ष्याशल्यवितुद्यमानमानसः खल्वेष जीवस्तस्याः परवीक्षणरक्ष-णाक्षणिकः सन्न निःसरति गेहात् । न स्वपिति रजन्यां त्यजति मातापितरौ शिथिलयति बन्धुवर्गान् न ददाति परमसुहृदोऽपि स्वगृहे ढौकम् । अवधीरयति धर्मकार्याणि न गणयति लोकवचनीयतां केवलं तस्या एव मुखमनवरतमीक्षमाणस्तामेव च परमात्ममूर्त्तिमिव योगी निवृत्ताशेषव्यापारो ध्यायन्नेवास्ते । तस्य च यदेव सा कुरुते तत्सुन्दरं यदेव सा भाषते तदेवानन्दकारि यत्सा चिन्तयति तदेवेङ्गिताकारैर्विज्ञायासौ सम्पादनायाहं मन्यते । एवञ्चाकलयति मोहविडम्बितेन मनसा । यदुतेयं ममानुरक्ता हितकारिणी न चान्येदृशी सौन्दर्यौदार्यसौभाग्यादिगुणकलापकलिता जगति विद्यते । अथ कदाचित्तां मातेति भगिनीति देवतेत्यपि मन्यमानः परो वीक्षते ततोऽसौ मोहात् क्रुध्यतीव विक्लवीभवतीव मूर्च्छतीव म्रियत इव किं करोमीति न जानीते । अथ सा वियुज्यते म्रियते वा ततोऽसावप्याक्रन्दति परिदेवते म्रियते वा अथ सा कथञ्चिद्दुःशीलतया परपुरुषचारिणी स्यात् परपुरुषा वा बलात्तां समाक्रम्य गृह्णीयुः । ततोऽसौ महामोहविक्लवो यावज्जीवं हृदयदाहेन जीर्यते प्राणैर्वा वियुज्यते दुःखासिकातिरेकेणेति । तदेवमेकैकवस्तुप्रतिबन्धबद्धहृदयोऽयं जीवो दुःखपरम्परामासादयति । तथापि । विपर्यस्ततया तद्रक्षणप्रवणमनाः सर्वथा शङ्कते ममेदमयं हरिष्यतीति । यथा च तस्य रोरस्य तेन कदन्नेनोदरपूरंपूरितस्यापि न तृप्तिः संपद्यते । प्रत्युत प्रतिक्षणं सुतरां बुभुक्षाभिवर्धत इत्युक्तम् । तथास्यापि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवस्यानेन धनविषयकलत्रादिना कदन्नप्रायेण पूर्यमाणस्यापि नाभिलाषविच्छेदः किन्तर्हि गाढतरमभिवर्द्धते तत्तर्षः । तथाहि यदि कथञ्चिद्दविणशतं सम्पद्यते ततः सहस्रमभिवाञ्छति । अथ तदपि सञ्जायते ततो लक्षमाकांक्षति तत्सम्पत्तावपि कोटीमभिलषति तल्लाभे राज्यं प्रार्थयति । अथ राजा जायते ततश्चक्रवर्त्तीत्वं मृगयते तत्सम्भवेऽपि विबुधत्वमन्विच्छति । अथ देवत्वमप्यास्कन्देत्ततः शक्रत्वमन्वेषयते । अथेन्द्रतामपि लभते ततोप्युत्तरोत्तरकल्पाधिपतित्वपिपासापर्यासितचेतसो नास्त्येवास्य जीवस्य मनोरथपरिपूर्त्तिः । यथा हि गाढग्रीष्मे समन्तादृवदाहतापितशरीरस्य पिपासाभिभूतचेतनस्य मूर्च्छया पतितस्य कस्यचित्पथिकस्य तत्रैव स्वप्नदर्शने सुबहून्यपि प्रबलकल्लोलमालाकुलानि महाजलाशयकदम्बकानि पीयमानान्यपि न तर्षापकर्षकं मनागपि सम्पादयन्ति । तथास्यापि जीवस्य धनविषया दीनि । तथाह्यनादौ संसारे विपरिवर्त्तमानेनानन्तशःप्राप्तपूर्वादेव भवेषु निरुपचरितशब्दाद्युपभोगाः आसादितान्यनन्तानर्घेयरत्नकूटानि विलसितं खण्डितरतिविभ्रमैः सह विलासिनीसार्थैः क्रीडितं त्रिभुवनातिशायिनीभिर्नानाक्रीडाभिः । तथाप्ययं जीवो महाबुभुक्षाक्षामोदर इव शेषदिनभुक्तवृत्तान्तं न किञ्चिज्जानाति / केवलं तदभिलाषेण शुष्यतीति । यत्तूक्तं यदुत तत्कदन्नं तेन द्रमकेन लौल्येन भुक्तं जीर्यति जीर्यमाणं पुनर्वातविषूचिकां विधाय तं रोरं पीडयतीति । तदेवं योजनीयम् । यदा रागादिपरीतचित्तोऽयं जीवो धनविषयकलत्रादिकं कदन्नकल्पं स्वीकरोति तदास्य कर्मसञ्च-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यल्लक्षणमजीर्णं सम्पद्यते । ततश्च । यदा यदुदयद्वारेण जीर्यति तदा नारकतिर्यङ्नरामरभवभ्रमणलक्षणां वातविसूचिकां विधायेनं जीवं नितरां तत्कदर्थयति । यथा च तत्कदन्नं तस्य सर्वरोगाणां निदानं पूर्वोत्पन्नरोगाणां चाभिवृद्धिकारणमत्यर्थमभिहितं तथेदमपि रागग्रस्तचित्तेनानेन जीवेनोपभुज्यमानं विषयादिकं महामोहादिलक्षणानां प्रागुपवर्णितानां समस्तरोगाणां भविष्यतां कारणं पूर्वनिर्वर्णितानां पुनरभिवृद्धिहेतुभूतं वर्त्तते । यथा च स रोरस्तदेव कुभोजनं चारु मन्यते सुस्वादभोजनास्वादं तु स्वप्नान्तेऽपि वराको नोपलभत इत्युक्तम् । तथायमपि जीवो महामोहग्रस्तचेतोवृत्तितया यदिदमशेषदोषराशिदूषितमुपवर्णितस्थित्या विषयधनादिकं तदेवातिसुन्दरमात्महितञ्च चेतसि कल्पयति यत्पुनः पारमार्थिकं स्वाधीननिरतिशयानन्दसन्दोहदायकं महाकल्याणभूतसच्चारित्ररूपं परमान्नं तदयं वराको महामोहनिद्रातिरोहितसद्विवेकलोचनयुगलो न कदाचिदासादयति । तथा हि यद्ययमनादौ भवभ्रमणे पूर्वमेव तत् क्वचिदलप्स्यत ततोऽशेषक्लेशराशिच्छेदलक्षणमोक्षावाप्तिर्नेयन्तं कालं यावत्संसारगहने पर्यटिष्यत्ततश्चायमद्यापि संभ्रमीति । ततो नानेन मदीयजीवेन सच्चरणरूपं सद्भोजनं प्रागवाप्तमिति निश्चीयते । यत्पुनरभ्यधायि । यथा तददृष्टमूलपर्यन्तं नगरमुच्चावचेषु गेहेषु त्रिकचतुष्कचत्वरादिषु नानारूपासु च रथ्यासु पर्यटतोऽनवरतमश्रान्तचेतसाऽनेन रोरेणानन्तशः परावर्त्तितमिति । तदपि सर्वमत्र समानं विज्ञेयं यतोऽमुनापि जीवेनानादितया कालस्य भ्रमतानन्तपुद्गलपरावर्त्ताः पर्यन्तं नीताः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा च तस्य भ्रमतो द्रुमकस्य तत्र नगरे न ज्ञायते कियान् कालो लंघित इत्युक्तं तथा जीवभवभ्रमणकालकलनमपि न प्रतीतिगोचरचारितामनुभवति निरादितया तत्परिच्छेदस्य कर्त्तुमशक्तेरिति। तदेवमत्र संसारनगरोदरे मदीयजीवरोरोऽयं कुविकल्पकुतर्ककुतीर्थिकलक्षणैर्दुर्दान्तडिम्भसंघातैस्तत्वाभिमुख्यरूपे शरीरे विपर्याससंपादनलक्षणया ताडनया प्रतिक्षणं ताड्यमाने महामोहादिरागव्रातग्रस्तशरीरस्तद्वशेन नरकादियातनास्थानेषु महावेदनोदयदलितस्वरूपोऽत एव विवेकविमलीभूतचेतसां कृपास्थानं पौर्वापर्यपर्यालोचनविकलान्तःकरणतया तत्वावबोधविप्रकृष्टोऽत एव प्रायः सर्वजीवेभ्यो जघन्यतमोऽत एव धनविषयादिरूपकदन्नदुराशापाशवशीकृतः कथंचित्तल्लेशलाभतुष्टोऽपि तेनाल्पसचेतास्तदुपार्जनवर्द्धनसंरक्षणप्रतिबद्धान्तःकरणस्तद्द्वारेण च गृहीतनिबिडगुरुतराष्टप्रकारकर्मभाररूपानिष्ठितापथ्यपाथेयस्तदुपभोगद्वारेण विवर्द्धमानरागादिरोगगणपीडितस्तथापि विपर्यस्तचित्ततया तदेवानवरतं भुञ्जानोऽप्राप्तमहारित्नरूपपरमान्नास्वादोऽरघट्टघटीयन्त्रन्यायेनानन्तपुद्गलपरावर्त्तनसमस्तयोनिस्थानास्कन्दनद्वारेण पर्यटित इति। अधुना पुनरस्य यत्सम्पन्नं तदभिधीयते। इह च। त्रिकालविषयतयाऽस्य व्यतिकरस्य विवक्षया समस्तकालाभिधायिभिरपि प्रत्ययैरत्र सर्वत्राऽपि कथाप्रबन्धे निर्देशः सङ्गतो द्रष्टव्यः। यतो विवक्षया कारकवत्कालोऽपि वस्तुस्थित्यैकस्वरूपेऽपि वस्तुनि नानारूपः प्रयुक्तो दृष्टोऽभीष्टश्च शब्दविदाम्। यथा योऽयं मार्गो गन्तव्यः आपाटलिपुत्रात् तत्र कूपोऽभूदभवच्च बभूव भविष्यति भवितेति वा एते सर्वेपि कालनिर्देशा एकस्मिन्नपि कूपाख्ये

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्तुनि विरचनावशेन साधवो भवन्तीत्यलमप्रस्तुतविस्तरेणेति । तत्र योऽसौ तत्स्वभावतया समस्तभूतसंघातात्यन्तवत्सलहृदयः प्रख्यातकीर्त्तिस्तस्मिन्नगरे सुस्थिताभिधानो महानरेन्द्रो दर्शितः स इह परमात्मा जिनेश्वरो भगवान् सर्वज्ञो विज्ञेयः । स एव हि प्रक्षीणाशेषक्लेशराशितयानन्तज्ञानदर्शनवीर्यतया निरुपचरितस्वाधीननिरतिशयानन्तानन्दसन्दोहस्वरूपतया च परमार्थेन सुस्थितो भवितुमर्हति न शेषा अविद्यादिक्लेशराशिवशवर्त्तिनोऽतिदुःस्थितत्वात्तेषाम् । स एव च भगवान् समस्तभूतसंघातस्यापि सूक्ष्मरक्षणोपदेशदायितयाक्षेपमोक्षप्रापणप्रवणप्रवचनार्थप्रणेतृतया च स्वभावेनैवातिवत्सलहृदयः । स एव च प्रख्यातकीर्तिः निःशेषामरनरविसरनायकैः पुरुहूतचक्रवर्त्यादिभिः । यतः स एव प्रशस्तमनोवाक्कायव्यापरपरायणैरनवरतमभिष्टूयते । अत एव चासावेवाविकलं महाराजशब्दमुद्वोढुमर्हति । यथा च स रोरः पर्यटंस्तस्य मन्दिरद्वारं कथञ्चित्प्राप्तः । तत्र च स्वकर्मविवरो नाम द्वारपालस्तिष्ठति तेन च कृपालुतया तच्च राजभवने प्रवेशित इत्युक्तम् । तदेवमिह योजनीयम् । तत्र यदास्य जीवस्यानादिमता यथाप्रवृत्तसंज्ञेन करणेन कथञ्चिद् घर्षणघूर्णनन्यायेनायुष्कवर्जितानां सप्तानां कर्मप्रकृतीनां स्थितेः समस्ता अपि सागरोपमकोटीकोटयः पर्यन्तवर्त्तिनीमेकां सागरोपमकोटीकोटिं विहाय क्षयमुपगता भवन्ति । तस्या अपि कियन्मात्रं क्षीणं तदाऽयं जीवस्तस्यात्मनृपतेः सम्बन्धि यदेतदाचारादिदृष्टिवादपर्यन्तद्वादशाङ्गपरमागमरूपं तदाधारभूतचतुर्वर्णश्रमणसंघलक्षणं वा मन्दिरं तस्य द्वारि प्राप्तोऽभिधीयते । तत्र च

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवेशनप्रवणः स्वस्यात्मीयस्य कर्मणो विवरो विच्छेदः स्वकर्मविवरः स एव यथार्थाभिधानो द्वारपालो भवितुमर्हति । अन्येऽपि राग-द्वेषमोहादयस्तत्र द्वारपाला विद्यन्ते केवलं तेऽस्य जीवस्य प्रतिबन्धका न पुनस्तत्र प्रवेशकाः । तथा ह्यनन्तवाराः प्राप्तः प्राप्तोऽयं जीवस्तैर्निराक्रियते । यद्यपि क्वचिदवसरे तत्र तेऽपि प्रवेशयन्त्येनं तथापि तैः प्रवेशितो न परमार्थतः प्रवेशितो भवति रागद्वेषमोहा-द्याकुलितचित्ता यद्यपि यतिश्रावकादिचिह्नाः कथिद्भवन्ति तथापि ते सर्वज्ञशासनभवनाद्बहिर्भूता द्रष्टव्या इत्युक्तं भवति । ततश्चायं जीवस्तेन स्वकर्मविवरद्वारपालेन तावतीं भुवं प्राप्तो ग्रन्थिभेद-द्वारेण सर्वज्ञशासनमन्दिरे प्रवेशित इति युक्तमभिधीयते । यथा च तेन कथानककेन तद्राजभवनमदृष्टपूर्वमनन्तविभूतिसंपन्नं राजा-मात्यमहायोधनियुक्तकतलवर्गिकैरधिष्ठितं स्थविराजनसनाथं सुभ-टसंघाताकीर्णं विलसद्विलासिनीसार्थं निरुपचरितशब्दादिविष-योपभोगविमर्दसुन्दरं सततोत्सवं दृष्टं तथानेनापि जीवेन वज्र-वद्दुर्भेदोऽभिन्नपूर्वस्य संसारे यः क्लिष्टकर्मग्रन्थिस्तद्भेदद्वारेण स्वकर्म-विवरप्रवेशितेनेदं सर्वज्ञशासनमन्दिरं तथाभूतविशेषणमेव सकलम-वलोक्यते । तथा हि । दृश्यन्तेऽत्र मौनीन्द्रे प्रवचनेऽपास्ताज्ञानतमः-पटलप्रसरा विविधरत्ननिकराकारधारका विलसदमलालोकप्रका-शितभुवनभवनोदरा ज्ञानविशेषाः । तथा विराजन्तेऽत्र भागवते प्रवचने सम्पादितमुनिपुङ्गवशरीरशोभनतया मनोहरमणिरचितवि-भूषणविशदाकारतां दधानाः खल्वामर्षौषध्यादयो नानर्द्धिविशेषाः । तथा कुर्वन्तिसुजनहृदयाक्षेपमत्र जिनमतेऽतिसुन्दरतया विचित्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्त्रविस्ताराकारबहुविधतपोविशेषाः । तथा जनयन्ति चित्ताह्लादातिरेकमत्र पारमेश्वरे मते लोलोज्ज्वलांशुकोल्लोचावलम्बिमौक्तिकावचूलरूपतामाविभ्राणो रचनासौन्दर्ययोगितया चरणकरणरूपा मूलोत्तरगुणाः । तथाविधेऽत्र जैनेन्द्रदर्शने वर्त्तमानानां धन्यानां वक्त्रसौष्ठवगन्धोत्कर्षचित्तानन्दातिरेकमुदारताम्बूलसन्निभं सत्यवचनम् । तथा व्याप्नुवन्ति स्वसौरभोत्कर्षेण दिक्चक्रवालमत्र भागवते मते मुनिमधुकरनिकरप्रमोदहेतुतया विचित्रभक्तिविन्यासग्रथिततया मनोहारिकुसुमप्रचयाकारधारकाण्यष्टादशशीलाङ्गसहस्राणि । तथा निर्वापयति मिथ्यात्वकषायसन्तापानुगतानि भव्यसत्त्वशरीराणि गोशीर्षचन्दनादिविलेपनसन्दोहदेश्यतां दधानमत्र पारमेश्वरदर्शने सम्यग् दर्शनं यतश्चात्र सर्वज्ञोपज्ञे सज्ज्ञानदर्शनचारित्रप्रधाने प्रवचने वर्त्तन्ते ये जीवास्तैर्महाभागधेयैः स्थगितो नरकान्धकूपः । भग्नस्तिर्यग्गतिचारकावासः । निर्दलितनि कुमानुषत्वदुःखानि । विमर्दिताः कुदेवत्वमानससन्तापाः । प्रलयं नीतो मिथ्यात्ववेतालः । निष्पन्दीकृता रागादिशत्रवः । जरितप्रायं कर्मनिचयाजीर्णम् । अपकर्णिता जराविकाराः । अपहस्तितं मृत्युभयम् । करतलवर्त्तीनि संपादितानि स्वर्गापवर्गसुखानि । अथवाऽवधीरितानि तैर्भगवन्मतस्थैर्जीवैः सांसारिकसुखानि । गृहीतो हेयबुद्ध्या समस्तोऽपि भवप्रपञ्चः । कृतं मोक्षैकतानमन्तःकरणम् । न च तेषां परमपदप्राप्तिं प्रति व्यभिचाराशङ्का । न ह्युपाय उपेयव्यभिचारी । उपायश्चाप्रतिहतशक्तिकः परमपदप्राप्तेः सज्ज्ञानदर्शनचारित्रात्मको मार्गः । स च प्राप्तोऽस्माभिरिति । सञ्जाते च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तल्लाभे तेषामिति निश्चिता बुद्धिर्नास्त्यतः परं प्राप्तव्यमित्याकलय्य विहितं प्रतिपूर्णमनोरथं चेतः । अत एव तेषां पारमेश्वरमतवर्त्तिनां जन्तूनां नास्त्येव शोको न विद्यते दैन्यं प्रलीनमौत्सुक्यं व्यपगतो रतिविकारः जुगुप्सनीया जुगुप्सा असम्भवी चित्तोद्वेगः अतिदूरवर्त्तिनी तृष्णा समूलकाषंकषितः सन्त्रासः किन्तर्हि तेषां मनसि वर्त्तते धीरता कृतास्पदा गम्भीरता अतिप्रबलमौदार्य्यं निरतिशयोऽवष्टम्भः स्वाभाविकप्रशमसुखामृतानवरतास्वादनजनितचित्तोत्सवानां च तेषां प्रबलरागकलाविकलानामपि प्रवर्द्धते रतिप्रकर्षः विनिहतमदगदानामपि विवर्त्तते चेतसि हर्षः समवासौ चन्दनकल्पानामपि न सम्भवत्यानन्दविच्छेदः । ततश्च जैनेन्द्रशासनस्थायिनो भव्यसत्वाः स्वाभाविकहर्षप्रकर्षामोदितहृदयतया गायन्ति प्रतिक्षणं पञ्चप्रकारस्वाध्यायकरणव्याजेन नृत्यन्त्याचार्यादिदशविधवैय्यावृत्त्यानुष्ठानद्वारेण वल्गन्ति जिनजन्माभिषेकसमवसरणपूजनयात्रादिसम्पादनव्यापारपरतया उत्कृष्टसिंहनादादीनि चित्तानन्दकार्य्याणि दर्शयन्ति परप्रवादिनिराकरणचातुर्य्यमाबिभ्राणाः । क्वचिदवसरे आनन्दमर्द्दलसन्दोहान् वादयन्त्येव भगवतामवतरणजन्मदीक्षाज्ञाननिर्वाणलक्षणेषु पञ्चसु महाकल्याणकालेषु । तस्मादिदं मौनीन्द्रं प्रवचनं सततानन्दं प्रलीनाशेषसन्तापं न चानेन जीवेन क्वचिदपीदं प्राप्तपूर्वं भावसारतया भवभ्रमणसद्भावादेवेदं निश्चीयते । भावसारमेतल्लाभे हि प्रागेव मोक्षप्राप्तिः संपद्येत तदनेन यत्तद्राजभवनस्य कथानकोक्तस्य सविशेषणद्वयमकारि । यदुतादृष्टपूर्वमनन्तविभूतिसम्पन्नमिति । तदस्यापि सर्वज्ञशासनमन्दिरस्य दर्शितम् । साम्प्रतं

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदुक्तं राजामात्यमहायोधनियुक्तकतलवर्गिकैरधिष्ठितमिति तद्स्यापि विशेषणं निदर्श्यते । तत्रेह भगवच्छासनमन्दिरे राजानः सूरयो विज्ञेयाः । त एव हि यतोऽन्तर्ज्वलता महातपस्तेजसा प्रलयीभूतरागादिशत्रुवर्गा बहिश्च प्रशान्तव्यापारतया जगदानन्दहेतवः । त एव गुणरत्नपरिपूर्णलोकमध्ये प्रभुत्वयोगितया निरुपचरितराजशब्दवाच्याः । तथा मन्त्रिणोऽत्रोपाध्याया द्रष्टव्याः । यतस्ते विदितवीतरागागमसारतया साक्षाद्भूतसमस्तभुवनव्यापाराः प्रज्ञयावज्ञातरागादिवैरिकसंघा राहस्यिकग्रन्थेषु कौशलशालितया समस्तनीतिशास्त्रज्ञा इत्युच्यन्ते । त एव च सुबुद्धिविभवपरितुलितभुवनतया अविकलममात्यशब्दमुद्वहन्तो राजन्ते । तथा महायोधाः खल्वत्र गीतार्थवृषभा दृश्याः । यतस्ते सत्त्वभावनाभावितचित्ततया न क्षुभ्यन्ति दैविकाद्युपसर्गेषु न बिभ्यति घोरपरीषहेभ्यः । किम्बहुना । वैवस्वतसङ्काशमपि परमुपद्रवकारिणं पुरोऽभिवीक्ष्य न चासमुपगच्छन्ति । अत एव ते गच्छकुलगणसंघानां द्रव्यक्षेत्रकालोपपत्तिमग्नानां परंपराकरणद्वारेण निस्तारकारिण इति हेतोर्महायोधाः प्रोच्यन्ते । नियुक्तकाः पुनरत्र गणचिन्तका ग्राह्याः । त एव यतो बालवृद्धग्लानप्राघूर्णकाद्यनेकाकारासहिष्णुपरिपाल्यपुरुषसमाकुलाः कुलगणसंघरूपाः पुरकोटीकोटीगच्छरूपांश्चासङ्ख्यग्रामाकरान् गीतार्थतयोत्सर्गापवादयोः स्थानविनियोगनिपुणाः प्रासुकैषणीयभक्तपानभैषज्योपकरणोपाश्रयसंपादनद्वारेण सकलकालं निराकुलाः पालयितुं क्षमाः । त एव चाविपरीतस्थित्या आचार्यनियोगकारितया नियुक्तकध्वनिनाभिधेया भवितुमर्हन्ति । तलवर्गिकाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनरत्र जैनेन्द्रशासनभवने सामान्यभिक्षवो ज्ञातव्याः। यतस्ते दत्तावधानाः संपादयन्त्याचार्यादेशं कुर्वन्त्युपाध्यायाज्ञां विदधति गीतार्थवृषभविनयं न लङ्घयन्ति गणचिन्तकप्रयुक्तमर्यादां नियोजयन्त्यात्मानं गच्छकुलगणसङ्घप्रयोजनेषु स्वजीवितव्ययेनापि निर्वहन्ति तेषामेव गच्छादीनामशिवाद्यपायव्यतिकरेषु। अत एव ते शूरताभक्तताविनीततास्वभावादलं तलवर्गिकशब्दवाच्याः। यतश्चेदं मौनीन्द्रशासनभवनमनुज्ञातं सूरीणां चिन्त्यते। सदुपाध्यायै रक्ष्यते। गीतार्थवृषभैः परिपुष्टिं नीयते। गणचिन्तकैर्विहितनिश्चिन्तसमस्तव्यापारं सामान्यसाधुभिरतस्तैरनधिष्ठितमित्युच्यते। साम्प्रतं यदुक्तं स्थविराजनसनाथमिति। तदत्रापि जिनसङ्घसदने योजनीयम्। तत्रेह स्थविरा जनाः स्वस्वार्था लोका मन्तव्याः। तथा हि। ते तत्र राजमन्दिरे प्रमत्तप्रमदालोकनिवारणपरायणा निवृत्तविषयासङ्गाश्च व्यावर्णिताः। एतच्चोभयमपि निरुपचरितमार्यलोकानामेव घटामाटीकते। यतस्त एव धर्मकार्येषु प्रमादपरतन्त्रतया सीदन्तं श्रवणोपासकललनालोकमात्मीयशिष्यिकावर्गं च परोपकारकरणव्यसनितया भगवदागमाभिहितं महानिर्जराकारणं साधर्मिकवात्सल्यं चानुपालयन्तः स्मारणवारणचोदनादानद्वारेण कापथप्रस्थितमनवरतं निवारयन्ति सन्मार्गे चावतारयन्ति। त एव च विदितविषयविषविषमविपाकतया विषयेभ्यो निवृत्तचित्ताः सन्तो रमन्ते संयमे क्रीडन्ति तपोविशेषविधानैः रज्यन्तेऽनारतस्वाध्यायकरणे न सेवन्ते प्रमादवृन्दं समाचरन्ति निर्विचारमाचार्यादेशमिति। यच्चोक्तम् सुभटसंघाताकीर्णं तद्राजभवनमिति। तेऽत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगवच्छासने सुभटसंघाताः श्रमणोपासकसमूहा द्रष्टव्याः। यतस्त एव समस्तमपीदं व्याप्नुवन्त्यतिप्रचुरतया। तथा ह्यसंख्येया विद्यन्ते देवेषु संख्येयाः सन्ति मनुजेषु भूरिप्रकाराः सङ्कीर्तास्ते तिर्यत्तु बहवः सन्ति नरकेष्विति। त एव शौर्यौदार्यगाम्भीर्ययोगितया भगवच्छासनप्रत्यनीकानां मिथ्यात्वात्मसत्त्वरूपाणां योधसंघातानामुच्चाटनचातुर्यं बिभ्राणा निरुपचरितप्रवृत्तिनिमित्तं सुभटशब्दं स्वीकुर्वते। यतश्चैते सदा ध्यायन्ति सर्वज्ञमहाराजं समाराधयन्ति सूरिराजवृन्दानि समाचरन्त्युपाध्यायामात्योपदेशं प्रवर्तन्ते गीतार्थवृषभमहायोधवचनेन सर्वधर्मकार्येषु वितरन्ति विधिना सदात्मानुग्रहधिया नियुक्तस्थानीयेभ्यः साधुवर्गोपग्रहनिरतेभ्यो गणचिन्तकेभ्यो वस्त्रपात्रभक्तपानभेषजासनसंस्तारकवसत्यादिकं नमस्कुर्वन्ति विशुद्धमनोवाक्कायैस्तलवर्गिककल्पमध्यदीक्षितादिभेदभिन्नं सकलमपि सामान्यसाधुजनं वंदन्ते भक्तिभरनिर्भरहृदयाः स्थविराजनस्थानीयमार्यालोकं प्रोत्साहयन्ति समस्तधर्मकार्येषु विलासिनीसार्थस्थानीयं श्राविकाजनमनुशीलयन्ति सकलकालं जिनजन्माभिषेकनन्दीश्वरवरद्वीपजिनयात्रासम्मेतलोकपर्वयात्रादिलक्षणानि। तच्च जिनशासनसदने नित्यनैमित्तिकानि। किं बहुनोक्तेन। ते हि भावतः सर्वज्ञशासनं विमुच्य नान्यत्किञ्चित्पश्यन्ति नाकर्णयन्ति न जानन्ति न श्रद्दधते न रोचयन्ति नानुपालयन्ति किन्तर्हि तदेव सकलकल्याणकारणं मन्यन्त इति। अतोऽतिभक्तितया सर्वज्ञमहाराजादीनामभिप्रेता इति कृत्वा तस्यैव मन्दिरस्य मध्यवासिनो विनीतमहर्द्धिकमहाकुटुम्बिककल्पास्ते द्रष्टव्याः। अन्यादृशां कुतस्तत्र



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवने वास इति । तथा यदुक्तं विलसद्विलासिनीसार्थं तन्नृपति-गृहमिति । तदत्रापि मौनीन्द्रदर्शने दर्शनीयं तत्रेह विलसद्वि-लासिनीसार्थाः सम्यग्दर्शनधरणाणुव्रतचरणजिनसाधुभक्तिकरणपरा-यणतया विलासवन्त्यः श्राविका लोकसंघाता विज्ञेयाः । यतस्ता अपि श्रमणोपासिकाः श्रमणोपासकवत् सर्वज्ञमहाराजाज्ञाराधन-प्रवणान्तःकरणाः सत्यं कुर्वन्ति सदाज्ञाभ्यासं वासयन्ति दृढतरमा-त्मानं दर्शनेन धारयन्त्यणुव्रतानि गृह्णन्ति गुणव्रतानि अभ्यस्यन्ति शिक्षापदानि समाचरन्ति तपोविशेषान् रमन्ते स्वाध्यायकरणे वितरन्ति साधुवर्गाय स्वानुग्रहकरमुपग्रहदानं हृष्यन्ति गुरुपादवन्द-नेन तुष्यन्ति सुसाधुनमस्करणेन मोदन्ते साध्वीधर्मकथासु पश्यन्ति सुबन्धुवर्गादधिकतरं साधर्म्मिकजनमुद्विजन्ते साधर्म्मिकविकत्थदेश-वासेन न प्रीयन्तेऽसंविभागितभोगेन संसारसागरादुत्तीर्णप्रायमात्मानं मन्यन्ते भगवद्धर्मसेवनेनेति । तस्मात्ता अपि तस्य मौनीन्द्रप्रवचन-मन्दिरस्य मध्ये पूजोपकरणाकारास्तेषामेव श्रमणोपासकानां प्रति-बद्धा मुत्कला वा निवसन्ति । याः पुनरेवंविधा न स्युस्ता यद्यपि कथञ्चित्तन्मध्याध्यासिनो दृश्येरन् तथापि परमार्थतस्ततो बहि-र्भूता विज्ञेयाः । भावग्राह्यं ह्यीदं भागवतशासनभवनं नात्र बहिश्छायया प्रविष्टः परमार्थतः प्रविष्टो भवतीति विज्ञेयं तथा यथा तद्राजभवनं निरुपचरितशब्दादिविषयोपभोगविमर्द्दसुन्दरं तथेदमपि विज्ञेयम् । तथा हि । सर्वेऽपि देवेन्द्रास्तावदेतन्मध्य-पातिनो वर्त्तन्ते । ये चान्येऽपि महर्द्धिकामरसंघातास्तेऽपि प्रायो न भगवन्मतभवनाद्बहिर्भूता भवितुमर्हन्ति । ततश्च । तथाविध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विबुधाधारभूतस्यास्य निरुपचरितशब्दादिविषयोपभोगविमर्दसुन्दरता न दुरुपपादा। तद्वर्णनेन चैतल्लक्षणीयं यदुत भोगास्तावत्पुण्योदयेन संपद्यन्ते किन्तु तदेव पुण्यं द्विविधं पापानुबन्धि पुण्यानुबन्धि च। तत्र ये पुण्यानुबन्धिपुण्योदयसम्पाद्याः शब्दाद्युपभोगास्त एव सुसंस्कृतमनोहरपथ्यान्नवत्सुन्दरविपाकतया निरुपचरितशब्दादिभोगवाच्यतां प्रतिपद्यन्ते। ते हि भुज्यमानाः स्फीततरमाशयं संपादयन्ति ततश्चोदाराभिप्रायोऽसौ पुरुषो न तेषु प्रतिबन्धं विधत्ते। ततश्चासौ तान् भुञ्जानोऽपि निरभिष्वङ्गतया प्राग्बद्धपापपरमाणुसञ्चयं शिथिलयन्ति पुनश्चाभिनवं शुभतरविपाकं प्रागपुण्यभारमात्मन्याधत्ते स चोदयप्राप्तो भवविरागसम्पादनद्वारेण सुखपरम्परयोत्तरक्रमेण मोक्षकारणत्वं प्रतिपद्यत इति हेतोः सुन्दरविपाकास्तेऽभिधीयन्ते। ये तु पापानुबन्धिपुण्योदयजनिताः शब्दादिविषयानुभवास्ते सद्योघातिविषोपदिग्धमोदकवद्दारुणपरिणामतया तत्त्वतो भोगा एव नोच्यन्ते यतस्ते मरुमरीचिकाजलकल्लोला इव तदुपभोगार्थं धावतः पुरुषस्य विफलश्रमसम्पादनेन गाढतरं तृष्णामभिवर्द्धयन्ति न तु संपद्यन्ते। कथञ्चित्सम्प्राप्ता अपि ते भुज्यमानाः क्लिष्टमाशयं जनयन्ति। ततश्च। तुच्छाभिप्रायोऽसौ पुरुषोऽन्धीभूतबुद्धिस्तेषु नितरां प्रतिबन्धं विधत्ते। ततस्तान् कतिपयदिवसभाविनो भुञ्जानस्तत्सम्पादकं प्रागुपनिबद्धं पुण्यलवं व्यवकलयति। पुनश्चोदग्रगुरुतरपापभरमात्मन्याधत्ते। ततश्च तेनोदयप्राप्तेनानन्तदुःखजलचराकुलं संसारसागरमनन्तकालं स जीवः परावर्त्तते। तेन ते पापानुबन्धिपुण्यसम्पाद्याः शब्दादयो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दारुणपरिणामा इत्यभिधीयन्ते । येषां तु संसारोदरविवरवर्त्तिनां जन्तुसंघातानामवश्यतया ये शब्दादिविषयोपभोगाः सुन्दरपरिणामास्ते नियमतो भगवच्छासनमन्दिरादुक्तन्यायेन न बहिर्भूता वर्त्तन्ते । तस्मादन्यैरपि प्रेक्षापूर्वकारिभिराक्षेपेण मोक्षप्रापकेऽत्र भगवन्मन्दिरे भावतः स्थेयम् । अत्र स्थितानामनुषङ्गत एव तेऽपि सुन्दरतया भोगादयः संपद्यन्ते न तेषामपि समादकोऽन्यो हेतुरित्युक्तं भवति । अत एव चेदं परमेश्वरदर्शनसदनमप्रतिपातिसुखपरम्पराकारणतया सततोत्सवमभिधीयते । तदेवं यथा यावद्विशेषणकलापयुक्तं च तद्राजमन्दिरं तेन कथानकोक्तेनावलोकितं तथा तावद्विशेषणकलापोपेतमेवानेनापि जीवेनेदं सर्वज्ञशासनसदनमवलोक्येति स्थितम् । यथा च स कथानकोक्तः सततानन्दं तद्राजभवनमुपलभ्य किमेतदिति विस्मितश्चिन्तयति न चासौ सोन्मादतया तद्विशेषगुणांस्तत्त्वतो जानातीत्युक्तम् । तथायमपि जीवः सर्वज्ञशासनं सञ्जातकर्मविवरः कथञ्चिदुपलभ्य किमेतदिति जिज्ञासते न चायं मिथ्यात्वांशैरुन्मादकल्पैरनुवर्त्तमानैस्तस्यामवस्थायामस्य जिनमतस्येमे विशेषगुणास्तांस्तत्त्वतो जानीते । यथा च तस्य कथानकोक्तस्य तात्पर्यवशेन लब्धचेतसः सतो हृदयाकूतैः परिस्फुरितं यदुत यदेतद्राजमन्दिरं सकलाश्चर्यधामास्य स्वकर्मविवरद्वारपालस्य प्रसादेन मयाधुना दृश्यते । लग्नं नूनमेतच्च मया कदाचित्पूर्वं दृष्टम् । प्राप्तोऽहमस्य द्वारदेशे बहुशः पूर्वं केवलं मम मन्दभाग्यतया येऽन्ये द्वारपालाः पापप्रकृतयस्तत्राभूवंस्तैरहं प्राप्तः प्राप्तः कदर्थयित्वा निर्धाटित इति । तदेतत्सर्वं जीवेऽपि समानम् । तथा हि । भव्यस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्यासन्नभविष्यद्भद्रस्य कथञ्चिदुपलभ्य सर्वज्ञशासनमविदिततद्गुणविशेषस्यापि मार्गानुसारितया भवत्येवंविधोऽभिप्रायः। यदुतात्यद्भुतमिदमर्हद्दर्शनं यतोऽत्र तिष्ठन्ति ये लोकास्ते सर्वेऽपि सुहृद इव बान्धवा इवैकप्रयोजना इव समर्पितहृदया इवैकात्मका इव परस्परं वर्त्तन्ते। तथामृततृप्ता इव निरुद्वेगा इव निरौत्सुक्या इव सोत्साहा इव परिपूर्णमनोरथा इव समस्तजन्तुसंघातहितोद्यतचेतसश्च सकलकालं दृश्यन्ते। तस्मात्सुन्दरमिदमद्य मया विज्ञातं न पूर्वं विमर्शाभावात्। अन्यच्चायं जीवोऽनन्तवारान्ग्रन्थिप्रदेशं यावत्प्राप्तो न चाऽनेन तद्भेदद्वारेण क्वचिदपि सर्वज्ञशासनमवलोकितं यतो रागद्वेषमोहादिभिः क्रूरद्वारपालकल्पैर्भूयो भूयो निरस्त इत्येतावतांशेनेदमुपदर्शितं न पुनस्तस्यामवस्थायाममुं विभागमद्याप्ययं जीवो जानीते चिन्तयति वा। यथा च। तस्य कथानकोक्तस्य पर्यालोचनपरायणवृत्तेः सतः पुनरिदं परिस्फुरितं यदुत येन मया पूर्वमिदं नयनानन्दकारि राजसदनं न दृष्टं न वास्य दर्शनार्थं कश्चिदुपायः प्राग्विहितः सोऽहं सत्यं निष्पुण्यक एव। कीदृशं राजमन्दिरमिति जिज्ञासामात्रमपि ममाऽधन्यस्य कदाचिदपि पूर्वं नासीत्। येन चानेन महात्मना स्वकर्मविवरद्वारपालेन कृपापरीतचेतसा भाग्यकलाविकलस्यापि ममेदं दर्शितं सोऽयं मे परमबन्धुभूतो वर्त्तते। एते च धन्यतमा जना येऽत्र राजमन्दिरे सदा निःशेषद्वन्द्वरहिताः प्रमुदितचेतसोऽवतिष्ठन्ते तदेतदपि समस्तमत्र जीवे योजनीयम्। तथा हि। शुभध्यानविशुध्यमानाध्यवसायस्यास्यापि जीवस्य विवर्त्तते चेतसीदं सर्वं सर्वज्ञदर्शनगोचरं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कश्चिदवसरे समवसरणदर्शनेन वा जिनस्नात्रविलोकनेन वा वीतरागबिम्बनिरीक्षणेन वा शान्ततपस्विजनसाक्षात्करणेन वा सुश्रावकसङ्गतेन वा तदनुष्ठानप्रतिभासेन वा द्रावितमिथ्यात्वतया मृदूभूतभावस्य तथा ह्युपपद्यते। तदा तद्विचारेणास्य प्रीतिः। शोचति प्रागविचारकमात्मानम्। गृह्णाति मार्गादेशकम्। बन्धुबुद्ध्या बहु मन्यते सद्धर्मनिरतिचित्तांश्चान्यलोकान् सद्भावनयेति तदियता प्रपञ्चेन लघुकर्मणः सन्मार्गाभ्यर्णवर्त्तिनोऽभिन्नकर्मग्रन्थेर्भिन्नकर्मग्रन्थेर्वा पुरस्कृतसम्यग्दर्शनस्य कियन्तमपि कालं भद्रकभावे वर्त्तमानस्यास्य जीवस्य यो व्यतिकरो भवति स व्यावर्णितः। तदनन्तरमिदानीं सकलकल्याणाक्षेपकारणभूतां परमेश्वरावलोकनां प्राप्नुवतोऽस्य यः प्रपद्यते तत्र योऽसौ कथानकोक्तो रोरो लब्धचेतनो यावदित्थं विप्रकीर्णं चिन्तयति तावद् वृत्तान्तान्तरमपरं महाराजावलोकनलक्षणमापतितम्। तथेहापि यदायं जीवः सञ्जातस्वकर्मलाघवतया सन्मार्गाभिमुखो भद्रकभावे वर्त्तते तदाऽस्य योग्यतया परमात्मावलोकनलक्षणोऽयमपरो वृत्तान्तः संपत्स्यते। तत्र। योऽसौ सुन्दरे प्रासादशिखरे सप्तमे भूमिकातले निविष्टमूर्त्तिरधस्ताद्वर्त्तमानं तददृष्टमूलपर्यन्तं नगरं समस्तं समस्तव्यापारकलापोपेतं सकलकालं समन्तान्निरीक्ष्यमाणस्तस्माद्बहिरपि सर्वत्राप्रतिहतदर्शनशक्तिः सततानन्दो लीलया ललमानो महानरेन्द्रो दर्शितः। स इह निष्कलावस्थायां वर्त्तमानः परमात्मा भगवान् सर्वज्ञो विज्ञेयः। स एव यतो मर्त्यलोकापेक्षया या उपर्युपरिस्थायिन्यो भूमिकाकल्पाः सप्तरज्जवः तदात्मको यो लोकप्रासादस्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्छिखरे वर्त्तते । स एव हि परमेश्वरो युगपदमुं समस्तसंसार-विस्तारं विचित्रनगरव्यापाराकारमलोकाकाशञ्च तद्वहिर्भागकल्पं केवलालोकेन करतलगतामलकन्यायेनावलोकयति । स एव चानन्तवीर्यसुखपरिपूर्णतया सततानन्दो लीलया ललते नापरो भवगर्त्तमध्यपतितजन्तुलीलाललनस्य परमार्थतो विडम्बनारूपत्वात् । यथा च स कथानकोक्तस्तेन महाराजेन महारोगभराक्रान्ततया गाढबीभत्सदर्शन इति कृत्वा करुणया विशेषेणावलोकित इत्युक्तम् । तदत्रैव द्रष्टव्यम् । यदायमात्मा निजभव्यतादिपरिपाकवशादेतावतीं कोटिमध्यारूढो भवति तदास्य भवत्येव भगवदनुग्रहः न तद्व्यतिरेकेण यतो मार्गानुसारिता संपद्यते । तदनुग्रहेणैव भवति भावतो भगवति बहुमानो नान्यथा । स्वकर्मक्षयोपशमादीनां शेषहेतूनामप्रधानत्वात् । ततोऽयमात्मा तस्यामवस्थायां वर्त्तमानोऽमुमर्थमाकलय्य भगवता विशेषेणावलोकित इत्युच्यते । स एव परमेश्वरोऽचिन्त्यशक्तियुक्ततया परमार्थकरणैकतानतया चास्य जीवस्य मोक्षमार्गप्रवृत्तेः परमो हेतुरित्युक्तं भवति । समस्तजगदनुग्रहप्रवहणं हि भावतो निष्कलमपि रूपमिति परिभावनीयं केवलं तथापि तज्जीवभव्यतां कर्मकालस्वभावनियत्यादिकं च सहकारिकारणकलापमवेक्ष्य जगदनुग्रहे व्याप्रियते तेन न यौगपद्येन समस्तप्राणिनां संसारोत्तार इत्यालोचनीयमेतदागमानुसारेणेति । तस्माद्भवत्येव भाविकल्याणस्य भद्रकभावे वर्त्तमानस्यास्य जीवस्य भगवदवलोकना । यथा च तां महाराजदृष्टिं तत्र रोरे निपतन्तीं धर्मबोधकराभिधानो महानसनियुक्तो निरीक्षितवानि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्युक्तं तथा परमेश्वरावलोकनां मज्जीवे भवतीं धर्मबोधकरणशीलो धर्मबोधकर इति यथार्थाभिधानो सन्मार्गोपदेशकः सूरिः स निरीचते स्म । तथा हि । सज्ज्ञानबलेन विमलीभूतात्मानःपर-हितैकनिरतचित्ता भगवन्तो ये योगिनः पश्यन्त्येव देशकालव्यव-हितानामपि जन्तूनां छद्मस्थावस्थायामपि वर्त्तमाना दत्तोपयोगा भगवदवलोकनाया योग्यतां पुरोवर्त्तिनां पुनः प्राणिनां भगवदा-गमपरिकर्मितमतयोऽपि योग्यतां लचयन्ति तिष्ठन्तु विशिष्टज्ञाना इति । ये च मम सदुपदेशदायिनो भगवन्तः सूरयस्ते विशिष्ट-ज्ञाना एव यतः कालव्यवहितैरनागतमेव तैर्ज्ञातः समस्तोऽपि मदीयवृत्तान्तः स्वसंवेदनसंसिद्धमेतदस्माकमिति । यत्पुनस्तेन धर्म-बोधकरेण साकूतमानसेन सता तदनन्तरं चिन्तितं यदुत किमेत-दाश्चर्यं मयाधुना दृश्यते यतोऽयं सुस्थितो महानरेन्द्रो यस्योपरि विशेषेण दृष्टिं पातयति स पुरुषस्त्रिभुवनस्यापि द्रागेव प्रभुः सञ्जायत इति सुप्रसिद्धमेतत् । अयं पुनर्योऽधुनास्य राज्ञो दृष्टेर्गोचरचारितामनुभवन्नुपलच्यते स द्रमको दैन्योपहतो रोग-ग्रस्तदेहोऽलच्मीभाजनभूतो मोहोपहतात्मातिबीभत्सदर्शनो जग-दुद्वेगहेतुस्तत्कथं समस्तदोषराशेरस्य परमेश्वरदृष्टिपातेन सार्द्धं सम्बन्धः पौर्वापर्येण विचार्यमाणो न युज्यते न कदाचनापि दीर्घ-तरदौर्गत्यभाजिनां गेहेषु अनर्घ्यरत्नवृष्टयो निपतितुमुत्सहन्ते । तत्कथमेतदिति विस्मयातिरेकाकुलं चेतः । तदिदं सर्वमत्रापि जीवविषयं सद्धर्माचार्यचेतसि वर्त्तमानं योजनीयम् । तथा हि । यदाऽयं जीवो नितरां गुरुकर्मतया प्रागवस्थायां समाचरति सम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्रपातकानि भाषते निःशेषामभ्यालीकवचनानि न मुच्यतेऽनवरतं रौद्रध्यानेन स एव चाकाण्ड एव कुतश्चिन्निमित्ताच्छुभसमाचार इव सत्यप्रियंवद इव प्रशान्तचित्त इव पुनर्लक्ष्यते तदा भवत्येव पौर्वापर्यपर्यालोचनचतुराणां विवेकिनां मनसि वितर्को यदुत न तावत्सुन्दरा मनोवाक्कायप्रवृत्तिः सद्धर्मसाधिका भगवदनुग्रह-व्यतिरेकेण कस्यचित्संपद्यते अयं चेह भव एवातिक्लिष्टमनोवाक्काय-प्रसरोऽवधारितोऽस्माभिः । तदिदं पूर्वापरविरुद्धमिव प्रतिभासते । यतः कथमेवंविधपापोपहतसत्त्वे भगवदवलोकना प्रवर्त्तते । सा हि प्रवर्त्तमाना जीवस्य मोक्षसम्पादकत्वेन त्रिभुवननाथत्वमचेपेण जन-यति। तस्मान्नात्र तस्याः सम्भवो लक्ष्यते। यतश्चास्य सुन्दरमनोवाक्का-यप्रवृत्तिलेशो दृश्यते ततोऽन्यथानुपपत्त्या भगवदवलोकनायाः सद्भा-वोऽत्र निश्चीयते। तदिदमवलम्ब्य सन्देहविच्छेदकारणम् । अस्माकं मनो दोलायते किमिदमाश्चर्यमित्याकूते । यथा च। तेन तात्प-र्येण पर्यालोचयता महानसनियुक्तकेन पश्चान्निश्चितम् । यदुत सम्भवतोऽस्य द्रमकस्य द्वे कारणे महानरेन्द्रावलोकनायास्तेन युक्ति-युक्त एवास्य परमेश्वरस्य पारमेश्वरो दृष्टिपातस्तत्र । यस्मादेष सुपरीक्षितकारिणा स्वकर्मविवरेण द्वारपालेनात्र भवने प्रवेशितः तेनोचित एवायं विशेषदृष्टेरित्येकं कारणं यथा यस्यैतद्भवनमा-लोक्य नरस्य मनःप्रमादो जायते स महानरेन्द्रस्यात्यन्तवल्लभ इति प्रागेव विनिश्चितमिदं मया संजातश्चास्य मनःप्रमादो लक्ष्यते यतो नेत्ररोगपीडाभराक्रान्ते अपि लोचने भवनदिदृक्षया प्रतिक्षण-मयमुन्मीलयति तद्दर्शनेन वीभत्सदर्शनमप्यस्य वदनं सहसा प्रसाद-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्पत्तेर्दर्शनीयतामासादयति धूलिधूसराणि चास्य सर्वाङ्गोपाङ्गानि पुलकोद्भेदभाञ्जि दृश्यन्ते। न चैतदन्तर्विवर्त्तमानहर्षव्यतिरेकेण संपद्यते तस्मादिदमस्य नृपभवनपक्षपातलक्षणं परमेश्वरावलोकनाया द्वितीयं कारणमिति। तदेतत्सर्वं सद्धर्माचार्या अपि जीवविषयं पर्यालोचयन्तः परिकथयन्त्येव। तथा हि। यो जीवो हेतुभिर्लक्ष्यते यथा संजातकर्मविवरोऽयं तथा भगवच्छासनमुपलभ्य यस्य प्रादुर्भवति मनःप्रसादः स च भगवन् लक्ष्यते प्रतिक्षणं नेत्रोन्मीलनकल्पया जीवादिपदार्थजिज्ञासया विभाव्यते प्रवचनार्थलवाधिगमे विकसितवदनकल्पेन संवेगदर्शनेन निश्चीयते च धूलिधूसरिताङ्गोपाङ्गरोमाञ्चाकारेण सदनुष्ठानलेशप्रवृत्तिविलोकनेन तस्य जीवस्य सम्पन्ना भगवदवलोकनेति निर्णीयते। तस्मादिहापि निश्चयकारणे तदस्त्येव हेतुद्वयं यदुत सञ्जातकर्मविवरता भगवच्छासनपक्षपातश्चेति। यथा च तेन महानसनियुक्तकेन द्रमकगोचरमेतच्चिन्तितं यदुत यद्यपीदानीमेष रोराकारमाबिभर्त्ति तथापि महानरेन्द्रावलोकनादेवोत्तरोत्तरक्रमेण संभवत्कल्याणपरम्परः कालान्तरे वस्तुत्वं प्रतिपत्स्यते खल्वेष नास्त्यत्र सन्देह इति। तथा सद्धर्मगुरवोऽपि परमात्मावलोकनां जीवे विनिश्चित्य तस्य भविष्यद्भद्रतां विगतसन्देहाः स्वहृदये स्थापयन्त्येव। यथाचासौ महानसनियुक्तकस्तत्र द्रमके महानरेन्द्रावलोकनां निर्णीय तदनुवृत्तिवशेन करुणाप्रवणः सम्पन्नः। तथा जीवेपि परमात्मावलोकनामाकलय्य सद्धर्मगुरवस्तदाराधनपरायणतयैव करुणाप्रवणमानसाः सञ्जायन्ते। तदनुकम्पया तैरपि भगवानाराधितो भवतीत्यर्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्पुनरभ्यधायि। यथाऽसौ रसवतीपतिः शीघ्रं तत्समीपमादरवशेनागच्छत् गत्वा चैह्येहि भद्र दीयते तुभ्यं भिक्षेत्येवं रोरमाकारितवानिति। तदेवमिह योजनीयं यदास्य जीवस्य पूर्वोक्तन्यायेनानादौ संसारे पर्यटतः परिपक्वा भव्यता क्षीणप्रायं क्लिष्टकर्म्म स्तोकमास्ते तच्छेषं तेनापि दत्तं रन्ध्रं प्राप्ता मनुजभवादिसामग्री दृष्टं सर्वज्ञशासनं संजाता तत्र सुन्दरबुद्धिः प्रवृत्ता मनाक् पदार्थजिज्ञासा समुत्पन्नाकुशलकर्म्मलेशबुद्धिः। अथ चानुवर्त्तन्तेऽद्यापि पापकलाः तदेवंविधे भद्रकभावे वर्त्तमानस्य सञ्जातायां भगवदवलोकनायां सद्धर्म्माचार्याः प्रादुर्भूततीव्रकरुणापरिणामाः सन्मार्गावतारणार्थं योग्यतां निश्चित्य भावतोऽभिमुखीभवन्ति तदेतत्तेषां तत्समीपगमनमभिधीयते सञ्जातप्रसादाश्च कथयन्ति ते तस्मै यथा भद्राकर्णयायं लोकोऽनादिनिधनः कालः शाश्वतरूपोऽयमात्मा कर्मजनितोऽस्य भवप्रपञ्चः तच्चानादिसम्बद्धं प्रवाहेण मिथ्यात्वादयस्तस्य हेतवः। तत्पुनर्द्विविधं कर्म कुशलरूपमकुशलरूपं च। यत्तत्र कुशलरूपं तत्पुण्यं धर्मश्चोच्यते। यत्पुनरकुशलरूपं तत्पापमधर्मश्चाभिधीयते। पुण्योदयजनितः सुखानुभवः पापोदयसंपाद्यो दुःखानुभवः। तयोरेव पुण्यपापयोरनन्तभेदभिन्नेन तारतम्येन संपद्यते खल्वेषोऽधममध्यमोत्तमाद्यनन्तभेदवर्त्तितया विचित्ररूपः संसारविस्तार इति। ततश्चैवं विधं सद्धर्माचार्यवचनमाकर्णयतोऽस्य जीवस्य ते पूर्वमनादिकुवासनाजनिताः कुविकल्पाः प्रवर्त्तन्ते स्म। यदुताण्डसमुद्भूतमेतत्त्रिभुवनं यदि चेश्वरनिर्मितं वा ब्रह्मादिकृतं वा प्रकृतिविकारात्मकं वा यदि वा प्रतिक्षणविनश्वरं वा पञ्चस्कन्धा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्मकोऽयं जीवः पञ्चभूतात्मको वा विज्ञानमात्रं चेदं सर्वं शून्यरूपं वा न विद्यते वा कर्म महेश्वरवशादिदं सर्वं नानारूपं वर्त्तत इत्यादयस्ते सर्वेऽपि भीममहायोधदर्शनात्संग्रामशिरसि प्रत्यनीककातरनरा इव निवर्त्तन्ते । ततश्चायं तदा जीवो मन्यते यदेते महात्मानो मह्यं कथयन्ति तत्सर्वमुपपद्यते मत्तोऽधिकतरं परीचितुं वस्तुतत्त्वमेत एव जानन्ति । ततश्च यदुक्तं कथानकं कथयता यदुत

कदर्थनार्थमायाताः पश्चाद्भग्नाः सुदारुणाः ।
दुर्दान्तडिम्भा ये तस्य दृष्ट्वा तं ते पलायिता इति ॥

तदपि योजितं विज्ञेयम् । यतः कुविकल्पा एव दुर्दान्तडिम्भास्त एव जीवं कदर्थयन्ति तन्निवृत्तिश्च सुगुरुसम्पर्केणेति तदेवमपगतेषु सकलेषु कुविकल्पेषु यदायं जीवः सद्धर्मगुरूणां तद्वचनाकर्णनस्पृहया मनागभिमुखो भवति तदा ते परहितकरणैकव्यसनितया सन्मार्गदेशनां कुर्वाणाः खल्वेवमाचचते यदुताकर्णय भो भद्र संसारे पर्यटतोऽस्य जीवस्य धर्म एवातिवत्सलहृदयः पिता धर्म एव गाढस्नेहबन्धुरा जननी धर्म एवाभिन्नहृदयाभिप्रायो भ्राता धर्म एव सदैकस्नेहरसवशा भगिनी धर्म एव समस्तसुखखनीभूतानुरक्ता गुणवती भार्या धर्म एव विश्वासस्थानमेकरसमनुकूलं सकलकलाकलापकुशलं मित्रं धर्म एव सुरकुमाराकारधारकश्चित्तानन्दातिरेकहेतुस्तनयः धर्म एव शीलसौन्दर्यगुणलब्धजयपताकाकुलोन्नतिनिमित्तभूता दुहिता धर्म एवाऽव्यभिचारी बन्धुवर्गः धर्म एव विनीतः परिकरः धर्म एव नरेश्वरता धर्म एव चक्रवर्त्तित्वं धर्म एव विबुधभावः धर्म एवामरेश्वरता धर्म एव वज्राकारो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लावण्यापकर्णितभुवनो जरामरणविकारविकलः कायः धर्म एव समस्तशास्त्रार्थशुभशब्दग्रहणचतुरं श्रोत्रं धर्म एव भुवनालोकनक्षमे कल्याणदर्शने लोचने धर्म एव मनःप्रमोदहेतवोऽनर्घ्येया रत्नराशयः धर्म एव चित्ताह्लादविधायिनो विषघातनाद्यष्टगुणोपेताः कनककूटाः धर्म एव परनिराकरणदक्षं चतुरङ्गं बलं धर्म एवानन्तरतिसागरावगाहनहेतुभूतानि विलासस्थानानि । किं बहुना जल्पितेन धर्म एवैको निर्विघ्नानन्तसुखपरंपराकारणं नापरं किञ्चिदपीत्येवं च कथयति मधुरभाषिणि भगवति धर्मसूरौ भगवत्यस्य जीवस्य मनाग् चित्ताक्षेपः तद्वशेन विस्फारयतीक्षणयुगलं दर्शयति वदनप्रसन्नतां त्यजति विकथादीनि विक्षेपान्तराणि क्वचिद्भावितहृदयो विधत्ते सस्मितं वक्त्रकुहरं ददाति नखस्फोटिकां ततो भगवन्तः सूरयो मनाग् प्रविष्टरसं तमाकलय्येत्थमभिदधते । यदुत सौम्य स धर्मश्चतुर्विधो भवति । तद्यथा दानमयः शीलमयस्तपोमयो भावनामयश्चेति । अतो यदि भवतोऽस्ति सुखाकाङ्क्षा ततोऽयमनुष्ठातुं चतुर्विधोऽपि युज्यते । भवता दीयतां सुपात्रेभ्यो यथाशक्त्या दानं क्रियतां समस्तपापेभ्यो वा स्थूलपापेभ्यो वा प्राणातिपाताद्वा मृषावादाद्वा चौर्यकरणाद्वा परदारगमनाद्वा अपरिमितग्रहणाद्वा रात्रिभोजनाद्वा मद्यपानाद्वा मांसभक्षणाद्वा सजीवफलास्वादनाद्वा मित्रद्रोहाद्वा गुर्वङ्गनागमनाद्वा अन्यस्माद्वाशक्यपरिहारान्निवृत्तिः तथा विधीयतां यथाशक्ति कश्चित्तपोविशेषः भाव्यतामनवरतं शुभभावना भवता येन ते संपद्यन्ते निःसंशयमिहामुत्र च सकलकल्याणानीति । तदनेन यत्तदुक्तमासीत्कथानकं यथा महानसनि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्तकस्तं रोरं समाहूय भिक्षाचरोचिते भूभागे स्थापितवान् । ततस्तद्भिक्षादानार्थं परिजनमादिष्टवान् । तदनन्तरं तद्दया नाम तद्दुहिता सा परमान्नमादायातिसुन्दरं त्वरया तद्दानार्थमुपस्थितेति तत्सर्वं योजितं विज्ञेयम् । तथा हीह धर्मगुणवर्णनं जीवस्याकारणकल्पं विज्ञेयं तच्चित्ताक्षेपो भिक्षाचरोचितभूभागस्थापनतुल्यो द्रष्टव्यः धर्मभेदवर्णनं परिजनादेशसमतं मन्तव्यं तस्यैव गुरोर्या जीवस्योपरि कृपा सैव तद्दया नाम्नी दुहिता विज्ञेया । चतुर्विधधर्मानुष्ठानकारणं सुन्दरपरमान्नग्रहणसमानं विज्ञेयं तच्च सद्धर्माचार्यानुकम्पयैव जीवं प्रत्युपढौकयति नापरो हेतुरिति विज्ञेयम् । यत्पुनरभिहितं यदुताकारणसमनन्तरं तं तथाभूतमत्यादरमालोक्य स रोरश्चिन्तयति स्म यथा मामन्यदा भिक्षां प्रार्थयमानमपि लोका निराकुर्वन्ति तिरस्कारपूर्वं वा किञ्चिद्ददति । अधुना पुनरेषः सुवेषो नरेन्द्राकारः पुरुषः स्वयमागत्य मामाकारयति भिक्षा ते दीयत इति च मामुपप्रलोभयति तत्किमिदमाश्चर्यं ततस्तुच्छाभिप्रायवशेन पर्यालोचयतस्तस्य चेतसि परिस्फुरितं हन्त नैवैतत्सुन्दरं मम प्रतिभासते मन्मोषणार्थः खल्वेष प्रारम्भो यतो मृतप्रायमिदं भिक्षाया भाजनं मामकीनं तदेष विजने नीत्वा मां निश्चितमेतद्दाल्लयिष्यति । एवञ्च स्थिते किं मयाधुना विधेयं किमित एव स्थानात् सहसा नश्यामि उतोपविश्य तावद्भक्षयामीदं भाजनस्थं भोजनं आहोस्विन्न कार्यं मम भिक्षयेति प्रतिषेधं विधाय पदमपि न चलामि किं वा वञ्चयित्वैनं पुरुषं कुत्रचित् सत्वरं प्रविशामि कथं कुर्वतो ममास्मान्मोक्षो भविष्यतीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न जाने यावदेवं निष्ठितकुविकल्पमालाकुलचेताश्चिन्तयति तावत्तस्य प्रवर्त्तते प्रबलं भयं प्रसर्प्यति तृष्णा शुष्यति हृदयं विक्लीभवत्यन्तरात्मा स्तब्धातिरेकाभिभूतचित्तवृत्तेः संरक्षणानुबन्धि प्रादुर्भूतं महारौद्रध्यानं निरुद्धः करुणाग्रामप्रसरः मीलिते विलोचने नष्टा चेतना न जानीते क्वाहं नीतः कुत्र वा स्थितः केवलं निखात काष्ठकील इवोर्द्धाकारोऽवतिष्ठते सा तु तद्दया गृहाणेदं भोजनमिति भूयो भूयः समाकुला व्याहरति स्म। तथापि स निष्पुण्यको द्रमकः सर्वरोगकरं तुच्छं यत्तदात्मीयं कदशनं तत्संरक्षणानुबन्धेन नष्टात्मा तां कन्यकां समस्तरोगहरामृतास्वादपरमान्नदानार्थं व्याहरन्तीं वराको नावबुध्यते तदिदं समस्तं जीवेऽपि समानमवगन्तव्यम्। तथा हि। यदाऽस्य हितचिकीर्षया भगवन्तः सद्धर्मगुरवो विस्तरेण धर्मगुणानुपवर्ण्य पुनश्चतुर्विधधर्मानुष्ठानमुपदिशन्ति तदाऽयं जीवो मिथ्याज्ञानमहातमःकाचपटलतिमिरकामलावलेपलुप्तविवेकलोचनयुगलदीधितिप्रसरोऽनादिभवाभ्यस्तमहामिथ्यात्वोन्मादसन्तापविधुरितहृदयः प्रबलचारित्रमोहनीयरोगकदम्बकविक्लवचेतनस्तत्र विषयधनकलत्रादिकया गाढमूर्च्छयाभिभूतचित्तवृत्तिः सन्नेवं चिन्तयति यावदहं पूर्वं धर्माधर्मविचारपर्येषणां नाकर्षं तावदेते श्रमणाः क्वचिदुपलभ्यमाना अपि न मम वार्त्तामपि पृष्टवन्तो यद्यपि कथञ्चित् क्वचिदवसरे मां धर्मगोचरं किञ्चिद् ब्रूयुः तथाप्यनादरेण वचनं वा द्वे वा इदानीं पुनर्मां धर्माधर्मजिज्ञासापरमवगम्य गतोयमस्माकमादेशगोचरमति मत्वा स्वगलतालुशोषमवगणय्योच्चैर्ध्वनिना महता वचनरचनाटोपेन स्वयमपृष्ट

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवैष लोकप्रकाशः श्रमणो मम पुरतो धर्मगुणानुपवर्णयति मांचाक्षिप्तचित्तमुपलभ्य दानं दापयति शीलं ग्राहयति तपश्चारयति भावनां भावयति तदियतोऽकाण्ड एव स्फुटाटोपस्यास्य हन्त को गर्भार्थः अज्ञातमस्ति मे सुन्दरकलत्रसङ्ग्रहः विद्यते नानाकारो द्रविणनिचयः सम्भवति भूरिरूपो धान्यप्राग्भारः समस्ति सम्पूर्णं चतुष्पदकुप्यादिकं नूनं तज्ज्ञातमेतेन तद्देषोऽत्र तात्पर्यार्थो यदुत दीक्षा ते दीयते रजस्ते पात्यते बीजदाहस्ते क्रियते कुरु लिङ्गपूरणं विधेहि गुरुपादपूजनम् निवेदय स्वकलत्रस्वधनकनकादिकं समस्तसर्वस्वं गुरुपादेभ्यः। पुनस्तैरनुज्ञातमनुभवितेतस्त्वमेवं विदधानः पिण्डपातेन शिवीभविष्यसीत्येवं वचनरचनया विप्रतार्य शैवाचार्य इव मामेष श्रमणको मुमुषिषति यदि वा भूरिफलं सुवर्णदानं महोदयं गोदानमक्षय्यं पृथिवीदानं अतुलं पूर्त्तधर्मकरणमनन्तगुणं वेदपारगे दानं यदि पुनर्गौर्विज्ञायमाना निर्गतवत्सखुरमुखा सचेला कनकशृङ्गी रत्नमण्डिता सोपचारा द्विजेभ्यो दीयते ततश्चतुरुदधिमेखला सग्रामनगराकरा सशैलकानना पृथिवी तेन दत्ता भवति सा चाक्षय्यफला संपद्यत इत्येवं मुग्धजनवञ्चनपरैः कूटश्लोकरचितग्रन्थैर्मां विप्रलभ्य द्विजातिरिव नूनमेष श्रमणो मे द्रविणजातं जिहीर्षति। अथ वा। कारय रमणीयतरान् विहारान् वासय तेषु बहुश्रुतान् पूजय संघं प्रयच्छ भिक्षुभ्यो दक्षिणां मीलय सङ्घसम्बन्धिनि कोशे स्वीयं द्रविणजातं निक्षिप सङ्घसम्बन्धिन्येव कोष्ठागारे स्वधान्यसञ्चयं समर्पय सङ्घसम्बन्धिन्यामेव संज्ञातौ स्वकीयं चतुष्पदवर्गं भव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बुद्धधर्मसङ्घशरणः एवं ते कुर्वतोऽचिराद् बुद्धपदं भविष्यतीत्येवं वाचालविरचितमायाजालेनात्मीयशास्त्रसन्दर्भेण रक्तभिक्षुरिव मां विसंवाद्य निश्चितमेष श्रमणो मदीयसर्वस्वं लातुमभिकाङ्क्षति। यद्वा। क्रियतां सङ्घभक्तं भोज्यन्तामृषयो दीयन्तां सुन्दरखाद्यानि उपनीयन्तां सुखक्षेपणानि दानमेव गृहस्थस्य परमो धर्मः तत एव संपाद्यते संसारोत्तार इत्येवं मामुपप्रलोभ्य स्वशरीरपोषणपरो दिगम्बर इव मदीयधनमेष श्रमणो निर्वाहयिष्यति। अन्यथा कथमेवंविधोऽस्य ममोपरि प्रपञ्चकथनरूपोऽत्यादरः स्यात्तदिदमिह तत्त्वं तावदेवैते सुन्दराः श्रमणा यावन्नोपलभ्यन्ते यावच्चैतेषां न वशवर्त्तिभिर्भूयते वशवर्त्तिनं पुनर्मुग्धजनं श्रद्धालुमवगम्यैते मायाविनो नाना वचनरचनया विप्रतार्य मदीयसर्वस्वमपहरन्ति नास्त्यत्र सन्देहः। ततो मयाऽधुनानेन श्रमणेन प्रारब्धेन सता किं विधेयमित्यालोचयामि। किमदत्तप्रतिवचनः समुत्थाय गच्छामि। उत नास्त्येव धर्मानुष्ठानकरणे मम शक्तिरिति दीपयामि। आहोस्विच्चौरहरणादिभिः प्रलीनं मे द्रव्यजातं नास्त्येवाधुना किञ्चिन्न दीयते पात्रेभ्य इत्येवं प्रत्युत्तरयामि। उताहो न कार्यं मे तावकधर्मानुष्ठानेन न पुनर्मह्यं किञ्चिद्भवता कथनीयमित्येवमेनं श्रमणं निराकरोमि किं वा अकाण्डकथनजनितक्रोधसूचिकां भृकुटिं जनयामीति। न जाने कथमेष श्रमणो मद्वचनप्रवणमना निवर्त्त्यास्मादुरध्यवसायान्मम मोक्षं दास्यतीति। न पुनरसौ वराको गाढमूढात्मतया खल्वेतल्लक्षयति यथैते भगवन्तः सद्धर्माचार्या विदिततुषमुष्टिनिःसारसंसारगर्भार्था अतुलसन्तोषामृतहृष्टान्तःकरणा अवगत-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विषयविषविषमविपाका मोचकाङ्क्षिकतानेन चेतसा सर्वत्र समवृत्ततयाऽत्यन्तनिःस्पृहतया च सन्मार्गोपदेशदाने प्रवर्त्तमानाः सन्तो न देवेन्द्रद्रमकयोर्विशेषं लक्षयन्ति न महर्द्धिविबुधनिर्द्धनपुरुषयोर्विभागं कल्पयन्ति न चक्रेश्वररोरयोरन्तरं दर्शयन्ति नोदारपरमेश्वरकृपणनरयोरादरानादराभ्यां प्रवर्त्तन्ते समानमेषां चेतसि विवर्त्तते परमैश्वर्यं दारिद्र्येण तुल्या महार्हरत्नराशयो जरठपाषाणनिकरेण सदृशा उत्तप्तहाटककूटा लोष्टपूगेन सदृशा हिरण्यस्तोमा धूलिपुञ्जेन सन्निभो धान्यनिचयः चारराशेस्तुल्यं चतुष्पदकुप्यादिकं निःसारकचवरेण न विशेषो निर्जितरतिरूपाभिरपि ललितललनाभिः सह जरत्काष्ठस्तम्भानामिति। एवञ्च स्थिते। नैतेषां परहितकरणैकव्यसनितां विमुच्यापरसदुपदेशदाने प्रवर्त्तमानानां कारणमुपलभ्यते। यतः स्वार्थसम्पादनमपि परमार्थतः स्वाध्यायध्यानतपश्चरणकरणादिना द्वारान्तरेणैव सम्पद्यत एव। न तदर्थमप्येतेषामत्र प्रवृत्तिः। दुरापास्तावकाशा लाभादिका शेषाकाङ्क्षा। न चैतदेषकोऽन्ध्यान्धीकृतबुद्धिर्जानीते। ततोऽयं जीवोऽनवगतसद्गुरूदाराशयोऽत्यन्ततुच्छस्वचित्तदुष्टताऽनुमानेन तच्चित्तमपि तथारूपं परिकलयन् महामोहवशेन तानलदर्शनैः शैवद्विजातिभी रक्तभिक्षुदिगम्बरादिभिस्तुल्यान् कल्पयति। सम्भवन्ति च भिन्नकर्मग्रन्थेरपि दर्शनमोहनीयपुञ्जत्रयकरणेन यथा पुनर्मिथ्यात्वपुञ्जे वर्त्ततेऽयं जीवस्तदैवंविधाः कुविकल्पा इति। ततश्च। तैराकुलीकृतहृदयस्यास्य जीवस्य पुनः प्रसर्पति मिथ्यात्वविषं ततस्तद्वशगोऽयं जीवः शिथिलयति मौनीन्द्रदर्शनपक्षपातं विमुञ्चति पदार्थजिज्ञासामवधीरयति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्धर्मनिरतं जनं बकमन्यते निर्विचारकलोकं प्रमादयति प्राग् प्रवृत्तं सत्कर्त्तव्यलेशं परित्यजति भद्रकभावं रज्यते नितरां विषयेषु पश्यति तत्त्वबुड्या तत्साधनं धनकनकादिकं गृह्णाति तथोपदिशन्तं गुरुं वञ्चकबुड्या नाकर्णयति तद्वचनं भाषते धर्माबर्णवादान् उद्घट्टयति धर्मगुरूणां मर्मस्थानानि लगति प्रतीपं कूटवादेन निराक्रियते पदे पदे गुरुभिः । ततश्चासौ चिन्तयति सुरचित-ग्रन्थप्रपञ्चा एते श्रमणा न निराकर्त्तुं मादृशैः पार्यन्ते ततो मामलीकविकल्पजालेन विप्रतार्य पुनः करिष्यन्त्येते मायावितथात्मभक्ष्य-स्थानमतो दूरत एव मयैते वर्जनीयाः स्वगृहाद्दारणीया दृष्टा अपि न सम्भाषणीया नामापि न सोढव्यमेतेषामित्येवं कदन्नकल्प-धनविषयकलत्रादिके मूर्च्छितहृदयस्तत्संरचणप्रवणोऽयं जीवः सदुप-देशदायकान् महामोहवशगो वञ्चकत्वेन कल्पयन् रौद्रध्यानमा-पूरयति ततो नष्टविवेकचेतनस्तैः सद्धर्माचार्यैरूर्ध्वाकारनिखातकाष्ठ-कीलककल्पो लक्ष्यते । अत एव च तेषां सम्बधिन्या दयया दीय-मानं तदानीं सुन्दरपरमान्नकल्पं सदनुष्ठानोपदेशं बराकोऽयं जीवो न जानीते न चेतःपरं बिवेकिनां विस्मयकरमस्ति । यदेष जीवो महानरकगर्भपातहेतौ धनविषयादिके गृद्धात्मानन्तसुखमोक्षाक्षेप-कारणं सदनुष्ठानं सद्गुरुदयोपनीतमवधीरयति । यथा च तेन महानसनियुक्तकेन तत्तथाभूतमसंभाव्यं व्यतिकरमवलोक्य चिन्तितं यदुत किं पुनरेष रोरो दीयमानमादरेणेदं परमान्नं न गृह्णाति नूनमयमस्य पापोपहतात्मतया न योग्य इति । तदत्रापि तुल्यं विज्ञेयम् । तथा हि । सद्गुरूणामपि तं तथाविधं विस्तरधर्मोप-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देशनयाऽन्यथा वा विनष्टभद्रकभावं विपरीतचारिणं जीवमुपलभ्य भवत्येवम्भूतो भावो यदुत न भाजनमेषोऽकल्याणभाजनतया भगवद्धर्मस्य नोचितो कुगतिगामितया सुगतिगमनस्य न परिकर्मणीयो दुर्दलकल्पतया सद्धर्मचेतसां ततोऽत्र मोहोपहतचेतसि विफलो मे परिश्रम इति। यथा च पुनर्विमृशता तेन रसवतीपतिना निश्चितं यदुत नास्य वराकस्यायं दोषः यतो बहिरन्तश्चायं रोगजालेन परिवेष्टित इति कृत्वा वेदनाविह्वलो न किञ्चिच्चेतयति। यदि पुनरेष नीरोगः स्यात् ततो योऽयं कदन्नलवलाभेनापि तुष्यति सोऽमृतास्वादमेतत्परमान्नं दयमानं कथन्न गृह्णीयादिति। तदेतदाचार्यस्यापि पर्यालोचयतो मनसि वर्त्तत एवेति। यदुत। यदेष जीवो गृध्यति विषयादिषु गच्छति कुमार्गेण नादत्ते दीयमानं सदुपदेशं नैषोऽस्य वराकस्य दोषः किं तर्हि मिथ्यात्वादीनां भावरोगाणां तैर्विसंस्थुलचेतनोऽयं न किञ्चिज्जानीते यदि पुनरेष तद्विकलः स्यात् तत्कथमात्मनो हितं विमुच्यात्माहिते प्रवर्तेत। यच्च तेन महानसनियुक्तेन पर्यचिन्ति। यथा कथं पुनरेष रोरो नीरोगः स्यात् ततो मनसि निरूपयता तेन पुनः पर्यकल्पि। अये विद्यत एवास्य रोगनिराकरणोपायः। यतोऽस्ति मम चारुभेषजत्रयं तद्यथा एकं तावद्विमलालोकं नाम परमाञ्जनं तद्विधानेन प्रयुज्यमानं समस्तनेत्ररोगान्नाशयति सूक्ष्मव्यवहितातीतभाविभावविलोकनदक्षं चक्षुः संपादयति। तथा द्वितीयं तत्त्वप्रीतिकरं नाम सत्तार्थोदकं तत्पुनर्विधिना खाद्यमानं समस्तगदव्राततानवं विधत्ते। दृष्टेश्चाविपरीतार्थग्रहणचतुरतां कुरुते विशेषतः पुनरुन्मादमुद्दल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यति तृतीयं पुनरेतदेव कन्यकोपनीतं महाकल्याणकं नाम परमान्नमेतत्पुनः सम्यङ् निषेव्यमानं निःशेषरोगगणं समूलकाषं कषति । तथा पुष्टिं जनयति धृतिं वर्द्धयति बलमुज्ज्वलयति वर्णमुत्कर्षयति मनःप्रसादं संपादयति वयस्तंभं विधत्ते सवीर्यतां करोति ऊर्जित्यं प्रवणयति किम्बहुना अजरामरत्वमपि निःसन्देहमेतत्सन्निधापयति तस्मादनेनौषधत्रयेण सम्यगुपक्रम्यैनं तपस्विनं व्याधिभ्यो मोचयामीति तेन मनसि सिद्धान्तः स्थापितः । तदेतत्सद्धर्माचार्योऽपि जीवगोचरं समस्तं चिन्तयत्येव । तथा हि । यदा निश्चितं तेन प्राक्प्रवृत्तिदर्शनेन यथा भव्योऽयं जीव. केवलं प्रबलकर्म्मकलाकुलितचेताः सन्मार्गात्परिभ्रष्टस्तदा भवति गुरोरयमभिप्रायः यथा कथं पुनरेषोऽस्माद्रोगस्थानीयात् कर्मजालान्मोच्यते पर्यालोचयतश्च तात्पर्यपर्याकुलेन चेतसा सुदूरमपि गत्वा पुनरेतदेव ज्ञानदर्शनचारित्ररूपत्रयं भेषजत्रयकल्पं तन्मोचनोपायः प्रतिभासते नापरः । तत्रेह ज्ञानमञ्जनं विज्ञेयं तदेव परिस्फुटदर्शितया विमलालोकमुच्यते तदेव च नयनगदसन्दोहकल्पमज्ञानमुन्मूलयति तदेव च भूतभवद्भाविभावस्वभावाविर्भावनचतुरं जीवस्य विवेकचक्षुः संपादयति दर्शनं पुनः सत्तीर्थोदकं बोद्धव्यं तदेव जीवादिपदार्थगोचरश्रद्धानहेतुतया तत्प्रीतिकरमभिधीयते । यतश्च तदुदयसमये सर्वकर्मणामन्तःसागरोपमकोटीकोटिमात्रमवतिष्ठते समुत्पन्नं पुनः प्रतिक्षणं तत्तानि तनूकुरुते तेन समस्तगदतानवकारकं कर्मणामिह रोगकल्पत्वात् तदेव दृष्टिप्रख्यस्य ज्ञानस्य यथावस्थितार्थग्रहणचातुर्यमाधत्ते । तदेव च महोन्माददेश्यं मिथ्यात्वमुद्दलयतीति । चारित्रं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनरत्र परमान्नमवगन्तव्यं तस्यैव सदनुष्ठानं धर्मः सामयिकं विरतिरित्यादयः पर्यायाः। तदेव मोक्षलक्षणमहाकल्याणव्यवहितकारणतया महाकल्याणकमिति गीयते। तदेव च रागादिमहाव्याधिकदम्बकं समूलघातं हन्ति। तदेव च वर्णपुष्टिधृतिबलमनःप्रसादौजित्यवयःस्तंभसवीर्यतातुल्यानात्मगुणान् समस्तानाविर्भावयति। तथाहि। तज्जीवे वर्त्तमानं प्रभावो धैर्यस्य कारणमौदार्यस्याकरो गांभीर्यस्य शरीरं प्रशमस्य स्वरूपं वैराग्यस्यातुलहेतुर्वीर्योत्कर्षस्य आश्रयो निर्द्वन्द्वतायाः कुलमन्दिरं चित्तनिर्वाणस्य उत्पत्तिभूमिर्दयादिगुणरत्नानां किं चानेन यत्तदनन्तज्ञानदर्शनवीर्यानन्दपरिपूर्णमक्षयमव्यायमव्याबाधं धाम तदपि तत्सम्पाद्यमेवेति अतोऽजरामरत्वमपि तज्जनयतीत्युच्यते। तस्मादेनमनेन ज्ञानदर्शनचारित्रत्रयेण सम्यगुपक्रम्य जीवं क्लिष्टकर्मकलाजालान्मोचयामीति सद्धर्मगुरुरपि चित्तेऽवधारयति। ततो यथा तेन रसवतीपतिना शलाकाग्रे तदञ्जनं विन्यस्य तस्य द्रुमकस्य गाढशाधूनयतो ग्रीवामञ्जिते लोचने तदनन्तरमेव तेन प्रल्हादकतया शीततयाऽचिन्त्यगुणयोगितया चाञ्जनस्य पुनश्चेतना लब्धा ततश्चोन्मीलितं चक्षुः प्रशान्ता मनाङ् नेत्रबाधा विस्मितेन च तेन किमेतदितिचिन्तितम्। तदत्रैवं योजनीयं यदाऽयं जीवः प्रथमं प्रतिपद्य भद्रकभावं रोचयित्वा भगवच्छासनं नमस्कृत्यार्हद्बिम्बानि पर्युपास्य साधुलोकं विधाय धर्मपदार्थजिज्ञासां कृत्वा दानादिप्रवृत्तिमुत्पाद्य धर्मगुरूणामात्मविषयां पात्रबुद्धिं पुनः क्लिष्टकर्मोदयेन विस्तरधर्मदेशनादिकं किञ्चिन्निमित्तमासाद्य परिभ्रष्टपरिणामो भवति। ततश्च न गच्छति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चैत्यालये नालीयते साधूपाश्रये न वन्दते दृष्टमपि साधुलोकं नामन्त्रयति श्रावकजनं निवारयति खगृहे दानादिप्रवृत्तिं पलायते दूरदृष्टेभ्योऽपि धर्मगुरुभ्यः विधत्ते पृष्ठतस्तदवर्णवादादिकं ततस्तं तथाभूतं नष्टविवेकचेतनमवगम्य गुरवः स्वबुद्धिशलाकायां तत्प्रतिबोधोपायाञ्जनं निदधते । कथं बहिर्भूम्यादौ कथञ्चिदकाण्डदृष्टस्य कुर्वन्ति प्रियसंभाषणं दर्शयन्ति हितबुद्धिं प्रख्यापयन्त्यात्मसभावमुत्पादयन्त्यविप्रतारकप्रत्ययं पुरुषविशेषं तद्भावं चोपलक्ष्य वदन्ति च भद्र किं नागम्यते साधूपाश्रये किन्न विधीयते भवतात्महितं किं विफलीक्रियते मनुष्यभवः किन्न विज्ञायते शुभाशुभविशेषः किमेत्यनुभूयते पशुभावो भवता वयं हि भवत एवेदं पथ्यमिति भूयोभूयोऽभिदध्महे तदिदं सर्वं शलाकाञ्जनस्थापनकल्पं विज्ञेयं सज्ज्ञानहेतुतया कारणकार्योपचारादिति। तदेतदाकर्ण्य ततोऽसावष्टोत्तराणि विरचयन्नेवं ब्रूयात् भो भो श्रमणा गाढमक्षणिकोऽहं न सरति मे भगवत्समीपमागच्छतो निर्व्यापाराणां हि धर्मचिन्ता भवति मादृशां पुनरन्यचगतानां सीदति कुटुम्बादिकं न प्रवर्त्तते गृहेऽतिकर्त्तव्यतेति न वहति वाणिज्यं न संपद्यते राजसेवा विस्तरयति कृषिकर्मादिकमिति । तदेतत्समस्तं शिरोधूननमभिधीयते । ततस्तद्वचनमाकर्ण्य करुणापरीतहृदयाः सद्धर्मगुरवो यास्यत्येष वराकोऽकृतपुण्यकर्मा दुर्गतिमित्यतो नोपेक्षणीयः इत्यालोच्येत्थमाचक्षीरन् वत्स यद्यप्येवं तथापि मदनुरोधेन क्रियतां यदहं वच्मि। तद्वचनमेकं द्रष्टव्यास्त्वयाहोरात्रमध्येऽवश्यं तयोपाश्रयमागत्य सकृत्साधव इति । गृह्यतामभिग्रहो नान्यदहं किञ्चिदपि भवन्तं भणि-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्यामि। ततोऽसौ का गतिः प्रतिप्रवेशे पतित इत्यालोच्य तमभिप्रश्नं गृह्णीयात्। तदिदं सद्गुरुवचनप्रतिपत्तिकरणं प्राक्सलोचनाञ्जनपातनतुल्यं बोद्धव्यं ततस्तत्प्रभृति तदुपाश्रयं गच्छतः प्रतिदिनं सुसाधुसंपर्केण तेषां निष्कृत्रिमानुष्ठानदर्शनेन निस्पृहतादिगुणानालोकयतो निजपापपरमाणुदलनेन च तस्य याविवेककला संपद्येत सा नष्टा सती चेतना पुनरागता इत्यभिधीयते। यत्तु। भूयो भूयो धर्मपदार्थजिज्ञासनं तन्नयनोन्मीलनकल्पं विज्ञेयं यस्तु प्रतिक्षणमज्ञानविलयः स नेत्ररोगबाधोपशमतुल्यो मन्तव्यः। यः पुनर्बोधसद्भावे मनाक् चित्ततोषः स विस्मयाकारोऽवगन्तव्यः। यथा च तावति व्यतिकरे सम्पन्नेऽपि यत्तस्य द्रमकस्य तद्भिक्षारक्षणलक्षणमाकूतं बहुकालाभ्यास्ताभिनिवेशनप्रवर्त्तमानं न निःशेषतयाद्यापि निवर्त्तते। तद्वशीभूतचित्तस्य तं पुरुषं तद्ग्राहितया पुनः पुनः शङ्कते ततो नष्टुमभिलषति तदिहापि सम्भवतीत्यवगन्तव्यम्। तथा हि। यावदेषोऽद्यापि जीवः प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणे नाधिगमजसम्यग्दर्शनमाप्नोति तावद्व्यवहारतः श्रुतमात्रप्राप्तावपि स्वल्पविवेकतयास्यात्र धनविषयकलत्रादिके कदन्नकल्पे परमार्थबुद्धिर्न व्यावर्त्तते तदभिभूतचेतनस्य स्वचित्तानुमानेनातिनिःस्पृहहृदयानपि मुनिपुङ्गवानमी मामेते प्रत्यासन्नवर्त्तिनं किञ्चिन्मृगयिष्यन्त इत्येवं मुहुर्मुहुराशङ्कते ततस्तैः सह गाढपरिचयं परिजिहीर्षन्न तत्समीपे चिरं तिष्ठतीति। यत्पुनरभिहितं यदुत स महानसनियुक्तकस्तं द्रमकमञ्जनमाहात्म्येन संजातचेतनमुपलभ्याभिहितवान् भद्र पिबेदमुदकं येन ते स्वस्थाता सम्पद्यते स तु न जानेऽनेन

For Private And Personal Use Only

पीतेन मम किं संपत्स्यत इति शङ्काकुलाकूतस्तत्समस्ततापोपशम-कारणमपि तत्प्रीतिकरं तोयं न पातुमिच्छति स्म । ततस्तेन कृपापरीतचित्तेन बलात्कारेणापि हितं विधेयमिति मत्वा स्वसामर्थ्येन मुखमुद्घाट्य तस्य तत्सलिलं गालितं ततस्तदास्वादन-समनन्तरं तस्य मत्तोन्मादो नष्ट इव शेषरोगास्तानवं गता इव दाहार्त्तिरुपशान्ता चेति कृत्वा स्वस्थचित्त इवासौ विभाव्यते स्म तदिदं जीवेऽपि समानमवगन्तव्यम् । तत्र यदा गृहीतचरणं सुसा-धूपाश्रयमागच्छन्तं तत्सङ्कटेन संपन्नद्रव्यश्रुतमात्रतया सञ्जातविवेक-लवं विशिष्टतत्त्वश्रद्धानविकलं धनविषयादिषु परमार्थदर्शिनं तन्मूर्च्छया सुसाधूनपि तन्मार्गणतया शङ्कमानमत एव प्रबन्धधर्म-कथाकर्णनं परिहरन्तमेनं जीवमुपलभन्ते धर्मसूरयः । तदा तेषां दयालुतया भवेदभिसन्धिः यद्येष विशिष्टतरगुणभाजनं संपद्यते ततस्ते क्वचित्समीपवर्तिनं तमवगम्य तस्याकर्णयतोऽन्यं जनमुद्दिश्य सम्यग्दर्शनगुणान् वर्णयन्ति तस्य च दुर्लभतां प्रख्यापयन्ति तदङ्गी-कुर्वतां स्वर्गापवर्गादिकं फलमुपदर्शयन्ति इह लोकेऽपि परमचित्त-निर्वाणकारणतां तस्य सूचयन्ति तदेतत्सर्वं सञ्जातचैतन्यस्योदक-निमन्त्रणकल्पं विज्ञेयं ततोऽसौ तद्धर्मगुरुवचनं निशम्य दोलाय-मानबुद्धिरेवं चिन्तयेदेष श्रमणो वक्रस्तात्मीयसम्यग्दर्शनस्य गुण-जातमुपवर्णयति केवलं यदीदमहमङ्गीकरिष्ये ततो मामात्म-वशवर्त्तिनमवबुद्ध्य धनान्नादिकं प्रार्थयिष्यति ततः किं प्रयोजनं ममानेनादृष्टाशयादृष्टत्यागलक्षणेनात्मवञ्चनेनेति विचिन्त्याकर्णश्रुतं कृत्वा तन्नाङ्गीकुरुते तदिदमुदकनिमन्त्रितस्य तत्पानानिच्छासमान-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मवबोद्धव्यम्। ततो धर्मगुरवश्चिन्तयन्ति कः पुनर्बोधोपायोऽस्य भविष्यतीति। ततः पर्यालोचयन्तः निजहृदये विनिश्चित्यैवं बिदधते। क्वचिदवसरे तं साधूपाश्रयमागामुकमवगम्य जनान्तरोद्देशेनाग्रिमतरां प्रारभते मार्गदेशनां यदुत भो भो लोका विमुच्य विक्षेपान्तरमाकर्णयत यूयम्। इह चत्वारः पुरुषार्था भवन्ति तद्यथा अर्थः कामो धर्मो मोक्षश्चेति। तत्रार्थ एव प्रधानः पुरुषार्थ इति केचिन्मन्यन्ते। अत्रान्तरे स आगच्छेत्ततस्तस्याकर्णयतो वदन्ति गुरवः। तथा हि। अर्थनिचयकलितः पुरुषो लोके जराजीर्णशरीरोऽपि उन्मत्तपञ्चविंशतिकतरुणनराकारः प्रतीयते। अतिकातरहृदयोऽपि महासमरसङ्घट्टनिर्व्यूढसाहसोऽतुलबलपराक्रम इति गीयते। सिद्धमातृकापाठमात्रशक्तिविकलबुद्धिरपि समस्तशास्त्रार्थावगाहनचतुरमतिरिति बन्दिभिः पद्यते। कुरूपतया नितरामदर्शनीयोऽपि चाटुकरणपरायणैः सेवकनरैरवजितमकरकेतुरिति हेतुभिः स्थाप्यते। अविद्यमानप्रभावगन्धोऽपि समस्तवस्तुसाधनप्रवणप्रभावोऽयमिति सर्वत्र तद्धनलुब्धबुद्धिभिः प्रकाश्यते। जघन्यघटदासिकातनयोऽपि प्रख्यातोन्नतमहावंशप्रसूतोऽयमिति प्रणयिजनैः स्तूयते। आसप्तमकुलबन्धुतासम्बन्धविकलोऽपि परमबन्धुबुद्ध्याध्यारोपणसमस्तलोकैर्दृश्यते तदिदं समस्तमर्थस्य भगवतो विलसितम्। किञ्च। समाने पुरुषत्वे समसंख्यावयवाः पुरुषा यदेते दृश्यन्ते लोके यदुत एके दायकाः अन्ये तु याचकाः तथैके नरपतयोऽन्ये पदातयः तथैके निरतिशयशब्दाद्युपभोगभाजनमन्ये तु दुष्पूरोदरदरीपूरणकरणेऽप्यशक्ताः तथैके पोषका अन्ये पोष्या इत्यादयो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निःशेषविशेषा निजसद्भावासद्भावाभ्यामर्थेनैव संपाद्यन्ते तस्मादर्थ एव प्रधानः पुरुषार्थः ।

अत एवोच्यते ॥

अर्थाख्यः पुरुषार्थोऽयं प्रधानः प्रतिभासते ।
तृणादपि लघुं लोके धिगर्थरहितं नरम् ॥

तदेतदाचार्यवदनविनिर्गतमर्थवर्णनमनुश्रुत्य स जीवश्चिन्तयेत् अये शोभनः प्रस्तावः प्रारब्धः कथयितुं ततोऽवहितः शृणुयात् शृण्वन् बुध्येत बुध्यमानः स्वबोधसूचनार्थं ग्रीवां चालयेत् लोचने विस्फारयेत् वदनं विकाशयेत् चारु चार्विति शनैः शनैरभिदध्यात् । ततस्तैर्लिङ्गैः संजातमस्यश्रवणकुतूहलमिति भगवन्तो धर्मगुरवस्तं लक्षयेयुः । ततः सादरतरं पुनस्ते ब्रूयुः भो भो लोकाः काम एव प्रधानः पुरुषार्थ इत्यन्ये मन्यन्ते । तथा हि । न खलु ललितललनावदनकमलमकरन्दास्वादनचतुरचञ्चरीकताचरणमन्तरेण पुरुषः परमार्थतः पुरुषतां स्वीकुरुते । किं चार्थनिचयस्य कलाकौशल्यस्य धर्मार्जनस्य जन्मनश्च काम एव वस्तुतः परमं फलम् । कामविकलैः पुनः किमेतैः सुन्दरैरपि क्रियते । अन्यच्च । कामासेवनप्रवणचेतसां पुरुषाणां तत्सम्पादका धनकनककलत्रादयो योग्यतया स्वत एवोपतिष्ठन्ते संपद्यन्ते भोगिनां भोगा इति गोपालबालाबलादीनां सुप्रसिद्धमिदम् ।

अपि च ॥

स्मितं न लक्षेण वचो न कोटिभि-
र्न कोटिलक्षैः सविलाससमीचितम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवाप्यते ऽन्यैरद्‌योपगूहनं
न कोटिकोटयापि तदस्ति कामिनाम् ॥

अतः किन्न पर्याप्तं तेषां तस्मात्काम एव प्रधानः पुरुषार्थः ।
अत एवाभिहितम् ॥

कामाख्यः पुरुषार्थोऽयं प्राधान्येनैव गीयते ।
नीरसं काष्ठकल्पं हि धिक्कामविकलं नरम् ॥

तदेतदाकर्ण्य स जीवो हर्षप्रकर्षेण स्वहृदयादुत्कलितः प्रकाशमेवं ब्रूयात् साधु साधूदितं भट्टारकैः बहोः कालादद्य सुन्दरं व्याख्यानमारब्धं यद्येवं दिने दिने कथयथ ततो वयमच्छिन्ना अपि सन्तोऽवहितचित्ततयाकर्णयाम इति । तदेतद्धर्मगुरुभिः स्वसामर्थ्येन तस्य जीवस्य मुखमुद्घाटितमित्यवगन्तव्यम् । एवं च वदति तस्मिन् जीवे धर्मगुरूणामिदं मनसि वर्त्तते । यदुत पश्यताहो महामोहविजृंभितं यदेते तदुपहताः प्राणिनः प्रसङ्गकथितयोरप्यर्थकामकथयो रज्यन्ते न पुनर्यत्नतोऽपि कथ्यमानायां धर्मकथायाम् । तथा ह्येहास्माभिरर्थकामप्रतिबद्धचेतसां चुद्रप्राणिनामभिप्रायो वर्णितः । अयं तु वराकस्तत्रैव सुन्दरताबुद्धिं विधत्ते । तथाप्यस्य श्रवणाभिमुखीकरणेन सफलोऽस्मत्परिश्रमः सर्वथा मच्चिन्तितप्रतिबोधोपायबीजेन मुक्तोऽङ्कुरो भविष्यत्यस्य मार्गावतार इत्येवं स्वचेतस्यवधार्य तैरभिधीयते । भद्र वयं यथावस्थितवस्तुस्वरूपप्रकाशनं कुर्म एव नालीकं जल्पितुं जानीमः । ततोऽसौ प्रत्यायितचित्ततया ब्रूयादेवमेतद्भगवन्नास्त्यत्र सन्देहः गुरवोऽभिदध्युः यद्येवं भद्र तत्किमवधारितं भवतार्थकामयोर्माहात्म्यं सोऽभिदधीत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाढमवधारितं ततो गुरवो वदेयुः सौम्यैते चत्वारः पुरुषार्थाः कथयितुं प्रक्रान्ताः तत्रैव द्वयोः स्वरूपमभिहितमधुना तृतीयस्या-भिधीयते तदप्येकचित्तेन भवताकर्णनीयं स वदेदेष दत्ताव-धानोऽस्मि कथयन्तु भगवन्तः। ततो गुरवो ब्रूयुः। भो लोका धर्म एव प्रधानः पुरुषार्थ इत्यन्ये मन्यन्ते। तथा हि। तुल्ये जीवत्वे किमित्येके पुरुषाः कुलक्रमागतद्रविणोपचितेषु गुरुतर-चित्तानन्दसन्दर्भधामसु निःशेषजगदभ्यर्हितेषु कुलेषूपजायन्ते किमिति चान्ये पुरुषा एव धनगन्धसम्बन्धविकलेषु समस्तदुःख-भरभाजनेषु सर्वजननिन्दनीयेषु कुलेषूत्पद्यन्ते। तथा किमित्येक-जननीजनकतया सहोदरयोर्यमलयोश्च द्वयोः पुरुषयोरेष विशेषो दृश्यते यदुतैकस्तयोर्मध्ये रूपेण मीनकेतनायते प्रशान्ततया मुनि-जनायते बुद्धिविभवेनाभयकुमारायते गंभीरतया क्षीरनीरेश्वरायते स्थिरतया सुमेरुशिखरायते शौर्येण धनञ्जयायते धनेन धनदायते दानेन कर्णायते नीरोगतया वज्रशरीरायते प्रमुदितचित्ततया महर्द्धिविबुधायते। ततश्चैवं निःशेषगुणकलाकलापकलितोऽसौ सकलजननयनमनोनन्दनो भवति। द्वितीयः पुनर्बीभत्सदर्शनतया भुवनमुद्वेजयति दुष्टचेष्टतया मातापितरावपि सन्तापयति मूर्ख-शेखरतया पृथ्वीं विजयते तुच्छतयार्कशाल्मलीतूलमतिशेते चपलतया वानरलीलां विडम्बयति कातरतया मूषककदम्बकमधरयति निर्द्धन-तया रोराकारमाबिभर्त्ति कृपणतया ढक्कजातीयानतिलङ्घयति महारोगभराक्रान्ततया विक्लवं क्रन्दमानो जगतोऽप्यात्मनि कारुण्य-मुत्पादयति दैन्योद्वेगशोकाद्युपहतचित्ततया घोरमहानरकाकारं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्तापं स्वीकुरुते ततश्चैनं समस्तदोषभाजनतया लोकैः पापिष्ठोऽदृष्टोऽयमिति निन्द्यते ।

अन्यच्च ॥

द्वयोः पुरुषयोरनुपहतसत्वबुद्धिपौरुषपराक्रमयोर्निःशेषविशेषैस्तुल्यकत्वयोरर्थोपार्जनार्थं प्रवर्त्तमानयोः किमित्येको यद्यदारभते कृषिं पाशुपाल्यं वाणिज्यं राजोपसेवामन्यद्वा तदर्थं कर्म तत्तत्सफलतामुपगच्छति । इतरस्य पुनस्तदेव कर्म न केवलं विफलं संपद्यते किन्तर्हि पूर्वपुरुषोपार्जितमपि धनलवं वैपरीत्यापत्या प्रत्युत निःशेषयति । अन्यच्चेदमपि चिन्तनीयं यदुत द्वयोरेव पुरुषयोर्निरुपचरिताः पञ्चप्रकाराः शब्दादिविषयाः क्वचिदुपनमन्ते तत्र तयोरेकः प्रबलशक्तिः प्रवर्द्धमानप्रीतिस्ताननवरतमनुभवति । द्वितीयस्य पुनरकाण्ड एव किमिति कार्पण्यरोगादिकं कारणमुत्पद्यते येन वाञ्छन्नपि तानेव भोक्तुं न शक्नोतीति । न ह्येवंविधानां विशेषाणां जीवेषु जायमानानां परिदृष्टं किञ्चित्कारणमुपलक्ष्यते न चाकारणं किञ्चिद्भवितुमर्हति यदि पुनरकारणा एवंविधा विशेषा भवेयुः ततः सर्वदा भवेयुः यथाकाशं न वा कदाचिद्भवेयुर्यथाशशविषाणादयो यतश्चैते क्वचिद्भवन्ति क्वचिन्न भवन्ति तस्मान्नैते निष्कारणा इति गम्यते । अत्रान्तरे गृहीतार्थः स जीवो ब्रूयात् भगवन् किं पुनरेतेषामुत्पादकं कारणं ततो धर्मगुरवो वदेयुः भद्राकर्णय समस्तानामपि जीवगतानां सुन्दरविशेषाणां धर्म एवान्तरङ्गं कारणं भवति । स एव हि भगवानेनं जीवं सुकुलेषूत्पादयति निःशेषगुणमन्दिरतां नयति समस्तानुष्ठानान्यस्य सफलयति उपनतभोगा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनवरतं भोजयति अन्यांश्च समस्तशुभविशेषान् संपादयति तथा सर्वेषामपि जीवगतानामशोभनविशेषाणामधर्म एवान्तरङ्गं कारणं स एव हि दुरन्तोऽमुं जीवं दुष्कुलेषूत्पादयति निःशेषदोषनिवासतां प्रापयति सर्वव्यवसायानस्य विफलयति उपनतभोगोपभोगविघ्नभूतं शक्तिवैकल्यं जनयति अपरांश्चामनोज्ञाननन्तान् विशेषानस्य जीवस्याधत्ते तस्माद्यद्वलेनैताः समस्तसम्पदः स एव धर्मः प्रधानः पुरुषार्थः अर्थकामौ हि वाञ्छतामपि पुरुषाणां न धर्मव्यतिरेकेण संपद्येते धर्मवतां पुनरतर्कितौ स्वत एवोपनमेते । अतोऽर्थकामार्थिभिः पुरुषैः परमार्थतो धर्म एवोपादातुं युक्तस्तस्मात्स एव प्रधान इति यद्यप्यनन्तज्ञानदर्शनवीर्यानन्दात्मकजीवस्वरूपावस्थानलक्षणश्चतुर्थोऽपि मोक्षरूपः पुरुषार्थो निःशेषक्लेशराशिविच्छेदरूपतया स्वाभाविकस्वाधीनानन्दात्मकतया च प्रधान एव तथापि तस्य धर्मकार्यत्वात् तत्प्राधान्यवर्णनेनापि परमार्थभूतः सत्सम्पादको धर्म एव प्रधानः पुरुषार्थ इति दर्शितं भवति । तथा चाभ्यधायि भगवता धनदो धनार्थिनां धर्मः कामार्थिनां सर्वकामदो धर्म एवापवर्गस्य परम्पर्येण साधक इति । नातः प्रधानतरं किञ्चिदस्तीत्युच्यते ।

धर्माख्यः पुरुषार्थोऽयं प्रधान इति गम्यते ।
पापग्रस्तं पशोस्तुल्यं धिग् धर्मरहितं नरम् ॥

तदिदमाकर्ण्य स जीवोऽभिदधीत भगवन्नेतौ तावदर्थकामौ साक्षादुपलभ्येते योऽयं पुनर्भगवद्भिर्धर्मो वर्णितः स नास्माभिः क्वचिद्दृष्टः । ततो निदर्श्यतामस्य तत्स्वरूपमिति । ततो धर्मसूरिराचक्षीत । भद्र मोहान्धाः खल्वेनं न पश्यन्ति विवेकिनां पुनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्यक्ष एव धर्मः। तथा हि। सामान्येन तावद्धर्मस्य त्रीण्येव रूपाणि द्रष्टव्यानि भवन्ति। तद्यथा। कारणं स्वभावः कार्यं च। तत्र सदनुष्ठानं धर्मस्य कारणं तद् दृश्यत एव। स्वभावः पुनर्द्विविधः साश्रवोऽनाश्रवश्च। तत्र साश्रवो जीवे शुभपरमाणूपचयरूपः। अनाश्रवस्तु पूर्वोपचितकर्मपरमाणुविलयमात्रलक्षणः। स एष द्विविधोऽपि धर्मस्वभावो योगिभिर्दृश्यते अस्मादृशैरप्यनुमानेन दृश्यत एव। कार्यं पुनर्धर्मस्य यावन्तो जीवगताः सुन्दरविशेषास्तेऽपि प्रतिप्राणिप्रसिद्धतया परिस्फुटतरं दृश्यन्त एव। तदिदं कारणस्वभावकार्यरूपत्रयं पश्यता धर्मस्य किं न दृष्टं भवता येनोच्यते न दृष्टो मया धर्म इति। यस्मादेतदेव तृतीयं धर्मध्वनिनाभिधीयते केवलमेष विशेषो यदुत सदनुष्ठानं कारणे कार्योपचाराद्धर्म इत्युच्यते। यथा तन्दुलान् वर्षति पर्जन्य इति। स्वभावस्तु यः साश्रवो निगदितः स पुण्यानुबन्धिपुण्यरूपो विज्ञेयः। यः पुनरनाश्रवः स निर्जरात्मको मन्तव्यः। स एष द्विविधोऽपि स्वभावो निरुपचरितः साक्षाद्धर्म एवाभिधीयते।

यत्त्वमी जीववर्त्तिनः समस्ता अपि सुन्दरविशेषास्ते कार्ये कारणोपचाराद्धर्मशब्देन गीयन्ते यथा ममेदं शरीरं पुराणं कर्मेति। ततः पुनरेष जीवो ब्रूयात् भगवन्नत्र त्रये कतमत्पुनः पुरुषेणोपादेयं भवति। ततो धर्मगुरुरभिदधीत। भद्र सदनुष्ठानमेव तस्यैवेतरद्वयसम्पादकत्वात्। स ब्रूयात्। किं पुनस्तत्सदनुष्ठानम्। ततः सद्धर्मसूरयोऽभिदधीरन्। सौम्य साधुधर्मो गृहिधर्मश्च। तस्य पुनर्द्विविधस्यापि मूलं सम्यग्दर्शनम्। ततोऽयं जीवो वदेत्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगवन्नुपदिष्टमासीदेतत्सम्यग्दर्शनं प्राग्भवता किन्तु तदा मया नावधारितं तदधुना कथयत किमस्य स्वरूपमिति । ततः सङ्क्षेपेण प्रथमावस्थोचितमस्य पुरतो धर्मगुरवः सम्यग्दर्शनस्वरूपं वर्णयेयुः । यथा भद्र यो रागद्वेषमोहादिरहितोऽनन्तज्ञानदर्शनवीर्यानन्दात्मकः समस्तजगदनुग्रहप्रवणः सकलनिष्कलरूपः परमात्मा स एव परमार्थतो देव इति बुध्या तस्योपरियद्भक्तिकरणं तथा तेनैव भाषिता ये जीवा जीवपुण्यपापास्रवसंवरनिर्जरा बन्धमोक्षाख्या नवपदार्थास्ते अवितथा एवेति या प्रतिपत्तिस्तथा तदुपदिष्टे ज्ञान-दर्शनचारित्रात्मके मोक्षमार्गे ये प्रवर्तन्ते साधवस्त एव गुरवो वन्दनीया इति या बुद्धिस्तत्सम्यग्दर्शनं तत्पुनर्जीवे वर्त्तमानं प्रशम-संवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणैर्बाह्यलिङ्गैर्लक्ष्यते तथा तद-ङ्गीकृत्य जीवेन सत्त्वगुणाधिकक्लिश्यमाना विनयेषु मैत्रीप्रमोदका-रुण्यमाध्यस्थ्यानि समाचरणीयानि भवन्ति तथा स्थिरता भगवदा-यतनसेवा आगमकुशलता भक्तिः प्रवचनप्रभावना इत्येते पञ्चभावाः सम्यग्दर्शनं दीपयन्ति । तथा शङ्काकाङ्क्षाविचिकित्सापरपाषण्ड-प्रशंसासंस्तवश्चैते तु तदेवं दूषयन्ति तदेष सकलकल्याणावहो दर्शनमोहनीयकर्मक्षयोपशमादिनाविर्भूतः स्वच्छात्मपरिणाम एव विशुद्धसम्यग्दर्शनमभिधीयते । एवञ्च कथयता भगवता धर्मसूरिणा सम्यक्प्रत्यायितमानसस्तदनुभावादेव विलीनक्लिष्टकर्ममलः सो ऽयं जीवः सम्यग्दर्शनं प्रतिपद्येत । ततश्चैतत्सत्तीर्थोदकमिव तत्त्वप्रीति-करं धर्मगुरुभिर्बलाद्गालितमित्यवसेयं यतश्च तत्प्रभृति तत्प्रतिपत्तौ मिथ्यात्वं यदुदीर्णमासीत् तत्क्षीणं यत्पुनरनुदीर्णं तदुपशान्तावस्थं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतं केवलं तदपि प्रदेशानुभवेनानुभूयते तदेव चात्र महोन्माद-स्तस्मात्स नष्टप्रायो नैकान्तेन नाद्यापि नष्ट इति बोद्धव्यं यतश्च सम्यग्दर्शनलाभे समस्तान्यपि शेषकर्माणि तनुतां गच्छन्ति तान्येव च गदभूतानि। अतोऽयं जीवस्तत्प्राप्तौ संजातान्यगदतानव इत्युच्यते। यतश्चराचरजन्तुसंघातदुःखदाहदहनलादत्यन्तशीतः सम्यग्दर्शनपरिणामोऽयमतस्तत्सम्पत्तावयं जीवो विगतदाहार्त्तिः स्वस्थमानसो लक्ष्यत इति। यथा च तेन रोरेण स्वस्थीभूतचेतसा चिन्तितं यदुतायं पुरुषो ममात्यन्तवत्सलो महानुभावस्तथापि मया मोहोपहतेन पूर्ववञ्चकोऽयं हरिष्यत्यनेन प्रपञ्चेन मामकं भोजनमिति कल्पितस्ततो धिङ्मां दुष्टचिन्तकम्। तथा हि। यद्ययं हितोद्यतमतिर्न स्यात् ततः किमित्यञ्जनप्रयोगेण मम पटुदृष्टितां विहितवान् किमिति वा तोयपानेन स्वस्थतां संपादितवान् न चायं मत्तः कथञ्चिदुपकारमपेक्षते किं तर्हि महानुभावतैवैकास्य प्रवर्त्तिकेत्युक्तं तदेतज्जीवोऽपि संजातसम्यग्दर्शनः सद्धर्माचार्यगोचरं चिन्तयत्येव। तथा हि। यथावस्थितार्थदर्शितया तदायं जीवो विमुञ्चति रौद्रतां रहयति मदान्धतां परित्यजति कौटिल्यातिरेकं विजहाति गाढलोभिष्टतां शिथिलयति रागप्रकर्षं न विधत्ते द्वेषोत्कर्षः अपक्षिपति महामोहदोषम्। ततोऽस्य जीवस्य प्रसीदति मानसं विमलीभवत्यन्तरात्मा विवर्द्धते मतिपाटवं निवर्त्तते धनकनककलत्रादिभ्यः परमार्थबुद्धिः संजायते जीवादितत्त्वेष्वभिनिवेशः तनूभवन्ति निःशेषदोषाः ततोऽयं जीवो विजानीते परगुणविशेषं लक्षयति स्वकीयदोषजातमनुस्मरति प्राचीनामात्मावस्थामवबुध्यते तत्काल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाविनं गुरुविहितप्रयत्नमवगच्छति तन्माहात्म्यजनितामात्मयोग्यतां ततो यो जीवो मादृशः प्रागत्यन्तक्लिष्टपरिणामतया धर्मगुर्वादिविषयेऽप्यनेककुविकल्पकरणपरोऽभूत् स तदा लब्धविवेकश्चिन्तयति यदुताहो मे पापिष्ठता अहो मे महामोहान्धता अहो मे निर्भाग्यता अहो मे कार्पण्यातिरेकः अहो ममाविचारकत्वं येन मयात्यन्ततुच्छधनलवादिप्रतिबद्धान्तःकरणेन सता य एते भगवन्तः सर्वदा परहितकरणनिरतमतयो निर्दोषसन्तोषपोषितवपुषो मोक्षसुखलक्षणानि धनधनार्जनप्रवणान्तःकरणास्तुषमुष्टिनिःसारसंसारविस्तारदर्शिनः स्वशरीरपञ्जरेऽपि ममत्वबुद्धिरहिता मदीयधर्मगुरुप्रभृतयः साधवः किं ते हरिष्यन्ति ममानेन धर्मकथादिप्रपञ्चेन शठतया मां विप्रतार्य नूनमेते धनकनकादिकमिति प्रागनेकशः परिकल्पिताः । ततो धिङ् मामधमाधमदुष्टविकल्पकमिति । यदि ह्येते भगवन्तो मां प्रति परमोपकारकरणपरायणा न स्युस्ततः किमिति सुगतिनगरगमनसम्बन्धबन्धुरमव्यभिचारिणं मार्गमादेशयन्तः सम्यग्ज्ञानदानव्याजेन महानरकवर्त्तनीप्रवृत्तचेतोवृत्तिं मां निवारयन्ति स्म किमिति वा विपर्यासपर्यासितचेतसो मे सम्यग्दर्शनसम्पादनद्वारेण निजशेमुष्या निःशेषदोषमोषविशेषं विशेषतो विदधति स्म । न चैते निस्पृहतातिशयेन समलोष्टहाटकाः परहिताचरणव्यसनितया प्रवर्त्तमानाः कदाचिदुपकार्यात्मकाशात् कञ्चित्प्रत्युपकारमपेक्षन्ते । न चैतेषां परमोपकारकारिणां भगवतां मादृशैः स्वजीवितव्ययेनापि प्रत्युपकारः कर्त्तुं पार्यते आस्तां धनधान्यादिनेति । तावदेष जीवस्तदा संजातसम्यग्भावः पूर्वविहित-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वकीयदुश्चरितानुस्मरणेन पश्चात्तापमनुभवति सन्मार्गदायिनां च गुरूणामुपरि विपरीतशङ्कां विरहयति तदानेनैतदुक्तं भवति। इमे खल्वमी कुविकल्पाः प्राणिनो भवन्ति। तद्यथैके कुशास्त्रश्रवणवासनाजनिताः। यदुताण्डसमुद्भूतमेतत्त्रिभुवनं ब्रह्मादिकृतं प्रकृतिविकारात्मकं क्षणविनश्वरं विज्ञानमात्रं शून्यरूपं वा इत्यादयस्ते ह्याभिसंस्कारिका इत्युच्यन्ते। तथान्ये सुखमभिलषन्तो दुःखं द्विषन्तो द्रविणादिषु परमार्थबुद्ध्यवसायिनोऽत एव तत्संरक्षणप्रवणचेतसोऽदृष्टतत्त्वमार्गस्यास्य जीवस्य प्रवर्तन्ते यैरेष जीवोऽशङ्कनीयानि शङ्कते अचिन्तनीयानि चिन्तयति अभाषितव्यानि भाषते अनाचरणीयानि समाचरति। ते तु कुविकल्पाः सहजा इत्यभिधीयन्ते तत्राभिसंस्कारिकाः प्रथमसुगुरुसंपर्कप्रभावादेव कदाचिन्निवर्त्तेरन्नेते पुनः सहजा यावदेष जीवो मिथ्यात्वोपप्लुतबुद्धिस्तावन्न कथञ्चिन्निवर्तन्ते। यदि परमधिगमजसम्यग्दर्शनमेव प्रादुर्भूतमेतान्निवर्त्तयतीति। यत्पुनरभिहितं यदुत तस्य द्रमकस्य तस्मिन्नञ्जनसलिलदायके पुरुषे सञ्जातविश्रंभस्यापि महोपकारितां चिन्तयतस्तथापि तत्रात्मीये कदन्नके यात्यन्तमूर्छा सा गाढं भावितत्वान्न कथञ्चिन्निवर्तत इति। तदेतज्जीवेऽपि योजनीयम्। तथाहि। यद्यपि क्षयोपशमगतं ज्ञानावरणं दर्शनमोहनीयं च समुत्पन्नं सम्यग्ज्ञानं सम्यग्दर्शनं च। अतएव निवृत्ता भवप्रपञ्चगोचरा तत्त्वबुद्धिः संजातो जीवादितत्त्वाभिनिवेशः गृहीताः परमोपकारकारितया सम्यग्ज्ञानदर्शनदायिनो भगवन्तः सद्धर्मगुरवः। तथाप्यस्य जीवस्य यावत्ते समुदीर्णं कषायद्वादशकं यावच्च प्रबलमद्यापि

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नो कषायनवकं तावदनादिभवाभ्यासवासनापाटवपरायत्ततया प्रवर्त्तमानामेतेषु धनविषयकलत्रादिषु कदन्नकल्पेषु मूर्च्छामेष जीवो न निवारयितुं पारयति यतोऽस्य जीवस्य कुशास्त्रश्रवणसंस्कारजा महापङ्कसमुद्भूतं त्रिभुवनमेतदित्यादयो मोहवितर्काः प्रवर्त्तन्ते। ये च सहजा अपि धनादिषु परमार्थदर्शितया तत्संरक्षणगोचरा अशङ्कनीयेष्वपि गुर्वादिषु शङ्काकारिणो मिथ्यादर्शनोदयप्रभवाः कदभिप्रायाः प्रादुर्भवन्ति ते मरुमरीचिकावल्गुचुम्बिन इव जल-कल्लोलमालाप्रतिभासिनो मिथ्याज्ञानविशेषाः। तत्प्रत्यनीकार्थोप-स्थापकेन प्रमाणान्तरेण बाध्यमानाः सम्यग्दर्शनोत्पत्तिकाले निव-र्त्तन्ते। यः पुनरेष धनविषयादिषु मूर्च्छालक्षणो मोहः सोऽपूर्वरूपो यतोऽयं दिङ्मोह इव तत्त्वधियापि सार्द्धमव्याहत एवास्ते। अनेन हि मोहितोऽयं जीवो जानन्नपि सकलं कुशाग्रलग्नजललवतरलं न जानीते। पश्यन्नपि धनहरणस्वजनमरणादिकं न पश्यतीव। पटु-प्रज्ञोऽपि जडबुद्धिरिव चेष्टते। समस्तशास्त्रार्थविशारदोऽपि महा-मूर्खचूडामणिरिव वर्त्तते। ततश्चास्य जीवस्य प्रतिभाति मुक्तल-चारिता रोचते तस्मै यथेष्टचेष्टा बिभेत्ययं व्रतनियमनियन्त्रणायाः किम्बहुनोक्तेन न शक्नोत्ययं जीवस्तदा काकमांसभक्षणादपि निवृत्तिं विधातुमिति। एवं च स्थिते यत्तदुक्तं यदुत रोरं मूर्च्छातिरेकेण पुनः पुनः स्वभोजनभाजने दृष्टिं पातयन्तमुपलभ्य स धर्मबोधकरा-भिधानो रसवतीपतिस्तस्याभिप्रायमवगम्य मनाक् सपरुषमित्य-मभिहितवान् अरे द्रमक दुर्बुद्धे केयं भवतो विपरीतचारिता किमितीदं परमान्नं कन्यकया प्रयत्नेनापि दीयमानं त्वं नावबुद्ध्यसे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवन्त्यन्येऽपि पापिनो रोराः केवलं भवतां सदृशोऽन्यो निर्भाग्यो नास्तीति मे वितर्कः। यस्त्वमत्र तुच्छे कदन्नके प्रतिबद्धचित्तः सन्नमृतास्वादमेतन्मया दाप्यमानमपि परमान्नं न गृह्णाति। अन्यच्च। यतस्त्वमत्र भवने प्रविष्टस्तथेदं दृष्ट्वा मनागाह्लादितः परमेश्वरेण चावलोकितः तेन कारणेन भवन्तं प्रत्यादरोऽस्माकं ये पुनरस्मात्सद्मनो बहिर्वर्त्तन्ते जन्तवो ये चेदं विलोक्यमानं मोदन्ते ये च राजराजेन न निरीक्षितास्तेषां वयं न वार्तामपि पृच्छामो वयं हि सेवकधर्ममनुवर्त्तमानाय एव कश्चिन्महानृपतेर्वल्लभस्तस्यैव वाल्लभ्यमाचरामः। अयं चास्माकमवष्टंभोऽभूत्किलामूढलक्ष्योऽयं राजा न कदाचनापात्रे मतिं कुरुते यावता सोऽप्यस्मदवष्टंभोऽधुना भवता विपरीतचारिणा वितथ इव सम्पादितः। तदिदमवगम्य त्यजेदं वैपरीत्यं छिन्देदं कदन्नं गृहाणेदं परमान्नं यन्माहात्म्येनेते पश्य सर्वेऽत्र सद्मनि वर्त्तमाना जन्तवोऽमृततृप्ता इव मोदन्त इति एतदपि समस्तमत्र जीवव्यतिकरे सुगुरुराचरत्येव। तथाहि। यदायं जन्तुराविर्भूतज्ञानदर्शनोऽपि कर्मपरतन्त्रतया न स्तोकमात्रमपि विरतिं प्रतिपद्यते तदामुं तथाभूतं विषयेषु गाढं मूर्च्छितचित्ततयाभिरममाणमुपलभ्य सद्धर्मगुरूणां भवत्येवंविधोऽभिसन्धिः। यदुत केयमस्यात्मवैरिता किमित्ययं रत्नद्वीपप्राप्तनिर्भाग्यपुरुष इवानिर्घेयरत्नराशिसदृशानि व्रतनियमाचरणान्यवधीर्य जरत्काचशकलकल्पेषु विषयेषु प्रतिबन्धं विधत्ते। ततस्ते गुरवः प्रादुर्भूतप्रणयकोपा इव तं प्रमादपरं जीवमित्थमाचक्षते। अयि ज्ञानदर्शनविदूषक केयं भवतोऽनात्मज्ञता किमिति प्रतिक्षणमस्माना-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रारभ्यमानान् भवान्न लक्षयति दृष्टा बहवो ऽस्माभिरन्येप्यकल्याण-भाजनभूताः प्राणिनः केवलं तेषामपि मध्ये शेखरायितं भवता यतस्त्वं जानन्नपि भगवद्वचनं श्रद्दधानोऽपि जीवादिपदार्थसार्थं विद्यमानेऽपि मादृशे प्रोत्साहके लक्षयन्नपीदृशसामग्र्याः सुदुर्लभतां भावयन्नपि संसारदुरन्ततां परिकलयन्नपि कर्मदारुणतां बुध्यमानोऽपि रोगादिरौद्रतां तथापि समस्तानर्थसार्थप्रवर्तकेषु कतिपयदिवसवर्त्तिषु तुषमुष्टिनिःसारेषु विषयेषु सततं रज्यसे न पुनरस्माभिरनर्थगर्त्तपातिनं भवन्तमवगम्य दययोपदिश्यमानामेनां सकलक्लेशदोषविरेककारिणीं भागवतीं समस्तपापविरतिं भवानवहेलयापि विलोकयति अन्यच्चैतदपि न लक्षितं भवता यदर्थमेषोऽस्माकं भवन्तं प्रति महानादरः तदाकर्ण्य अत्रापि यत्कारणं यतस्त्वं सज्ज्ञानदर्शनयुक्ततया सर्वज्ञशासनाभ्यन्तरभूतो वर्त्तसे। यतश्च प्रथमावसरेऽपि भगवन्मतमवलोक्य जातस्ते प्रमोदः। तद्दर्शनेन च लक्षितास्माभिस्त्वयि भवन्ती परमात्मावलोकना ततो वयं भगवदनुगृहीतोयमिति कृत्वा तवोपर्यादरवन्तः। युज्यते च भगवदनुचराणां तदभिमतेषु पक्षपातः कर्त्तुम्। ये तु जीवाः सर्वज्ञशासनमन्दिरमद्यापि नावगाहन्ते कथञ्चित्प्रविष्टा अपि तत्र न तद्दर्शनेन हृष्यन्ति अत एव च परमात्मावलोकनाया बहिर्भूता लक्ष्यन्ते तांस्तथाभूताननन्तानपि जीवान् पश्यन्तोपि च यदुदासीनभावं भजामहे नोचितास्ते खल्वादरकरणस्य। अयं चेयन्तं कालं यावदवष्टंभोऽस्माकमासीत्। किलामुनोपायेन योग्याः सन्मार्गावतरणस्येति निश्चीयते। ते न कदाचन व्यभिचरन्ति यावता भवता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽयमनेकसत्त्वेषु सुनिश्चितोऽप्यस्माभिरुपायो विपरीतमाचरता व्यभिचारितो वर्तते। ततो भो दुर्मते मैवं विधेहि कुरुष्वाधुनापि यदहं वच्मि परित्यजेदं दौःशील्यं विहाय दुर्गतिपुरीवर्तनीकल्पामविरतिमुररीकुरु निर्द्वन्द्वानन्दसन्दोहदायिकां सर्वज्ञोपज्ञां ज्ञानदर्शनयोः फलभूतां विरतिमितरथा परमार्थतो ज्ञानदर्शने अपि निष्फले संपत्स्येते। इयं हि भागवती गृहीता सम्यक्पाल्यमाना सकलकल्याणपरम्परां संपादयति। यदि वा तिष्ठन्तु तावत् पारलौकिककल्याणानि किं न पश्यति भवानिदानीमेवैते भगवदुक्तविरतिरतचित्ताः सुसाधवो यदनन्तामृतरससदृशा इव स्वस्थाः सदा मानसेनावेदयितारो विषयाभिलाषजनितानां कामविकलतयौत्सुक्यप्रियविरहवेदनानामनभिज्ञातारो लोभमूलानां निष्कषायतया धनार्जनरक्षणनाशदुःखानां वन्दनीयास्त्रिभुवनस्य संसारसागरादुत्तीर्णमेवात्मानं मन्यमानाः सदा मोदन्ते। तदेवं भूतगुणेयं विरतिः किमात्मवैरितया नादीयते भवतेति। तदेतद्धर्मगुरुवचनमाकर्ण्य यथासौ द्रमकस्तास्मिन्पुरुषे संजाताविश्वासोऽपि तथाविर्भूतनिर्णयोऽपि यथात्यन्तहितकारी ममायं पुरुष इति। तथापि तस्य कदन्नस्य त्याजनवचनेन विक्लीभूतो दैन्यमालम्ब्येत्थमभिहितवान्। यदुत यदेतद्भदितं नाथैस्तत्समस्तमवितथं प्रतिभाति मे चेतसि। केवलमेकं वचनं विज्ञापयामि तदाकर्णयत यूयं यदेतन्मां भोजनं त्याजयन्ति भवन्तस्तत्प्राणेभ्योऽप्यभीष्टतमं नाहमेतद्विरहे क्षणमपि जीवामि महता च क्लेशेन मयेदमुपार्जितं किं च कालान्तरेऽपि निर्वाहकं ममैतद्भवदीयस्य पुनर्भोजनस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न जानेऽहं स्वरूपं किं चानेन ममैकदिनभाविनेति। तत्किमत्र बहुना जल्पितेन एष मे निश्चयो नैवेदं भोजनं मोक्तव्यं यदि विद्यमानेऽप्यस्मिन्नात्मीयं भवद्भिर्भोजनं दातुं युक्तं ततो दीयतामितरथा विनैव तेन सरिष्यतीति। तथायमपि जीवः कर्म्मपरतन्त्रतयाविद्यमानचरणपरिणामस्तद्धर्मगुरूणामग्रतः समस्तमपीदृशं जल्पत्येव अस्त्येव तदास्य गुरुषु विश्रंभः सञ्जातो ज्ञानदर्शनलाभेन संप्रत्ययः। तथापि न निवर्तते धनादिभ्यो गाढमूर्च्छा धर्मगुरवश्चारित्रं ग्राहयन्तस्तत्त्यागं कारयन्ति। ततोऽस्य जीवस्य संजायते दैन्यं ततोऽयं ब्रूते सत्यमेतत्सर्वं यदाज्ञापयन्ति भगवन्तः। किन्तु श्रूयतां भवद्भिरेका मदीया विज्ञप्तिका गृद्धोऽयमात्मा मदीयो गाढं धनविषयादिषु न शक्यते तेभ्यः कथञ्चिन्निवर्त्तयितुं म्रियेऽहं त्यागे नूनमेतेषाम्। महता च क्लेशेन मयैते समुपार्जितास्तत्कथमहमेतानकाण्ड एव मुञ्चामि। किं च। मादृशाः प्रमादिनो न युष्माभिरुपदिष्टाया विरतेः स्वरूपमवबुध्यन्ते। किन्तर्हि मादृशामिदमेव कालान्तरेऽपि धनविषयादिकं चित्ताभिरतिकारणं युष्मदीयं पुनरनुष्ठानं राधावेधकल्पं किं तेन मादृशां भगवतामप्यस्थान एवायं निर्बन्धः। तथाहि।

महतापि प्रयत्नेन तत्त्वे शिष्टेऽपि पण्डितैः।
प्रकृतिं यान्ति भूतानि प्रयासस्तेषु निष्फलः ॥१॥

अथैवमपि स्थिते भगवतामाग्रहः ततो दीयतामेतेषु धनविषयादिषु विद्यमानेषु यदि देयमात्मीयं चारित्रमितरथा पर्याप्तं ममानेनेति। ततश्चैवं वदति सत्यस्मिन् जीवे यथा तेन रसवती-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पतिना तं द्रमकं परमान्नग्रहणपराङ्मुखमवलोक्य चिन्तितं यदुत पश्यताहो मोहसामर्थ्यं यदेष रोरः सर्वव्याधिकरेऽत्र कदन्नके सक्त-बुद्धिर्मामकं परमान्नमवधीरयति निश्चितं च प्रागेव मया यथा नास्य वराकस्यायं दोषः किं तर्हि चित्तवैधुर्यकारिणां रोगाणाम्। अतः पुनरेनं शिक्षयामि विशेषेण वराकं यद्ययं प्रत्यागतचित्तः परमान्नमिदं गृह्णीयात् ततोऽस्य महानुपकारः संपद्येतेति। तथा सद्धर्मगुरवोऽपि चिन्तयन्ति यदुतापूर्वरूपोऽयमस्य जीवस्याहो महामोहः यदायमनन्तदुःखहेतौ रागादिभावरोगवृद्धिकरेऽस्मि-न्विषयधनादिके विनिविष्टबुद्धिर्जानन्नपि भगवद्वचनमजानान इव श्रद्दधानोऽपि जीवादितत्त्वमश्रद्दधान इव न मयोपदिश्यमानां निःशेषक्लेशविच्छेदकारिकां विरतिमुररीकुरुते। यदि वा नास्यायं तपस्विनो दोषः किन्तर्हि कर्मणामिति। तान्येवैनं जीवं विसं-स्थुलयन्ति। अतो नास्माभिरेतत्प्रतिबोधनप्रवृत्तैरस्याविधेयतामुप-लभ्य निर्वेदः कार्यः।

तथाहि।

> अनेकशः कृता कुर्याद्देशना जीवयोग्यताम्।
> यथा स्वस्थानमाधत्ते शिलायामपि मृद्घटः ॥१॥
> यः संसारगतं जन्तुं बोधयेज्जिनदेशिते।
> धर्मे हितकरस्तस्मान्नान्यो जगति विद्यते ॥२॥
> विरतिः परमो धर्मः सा चेन्मत्तोऽस्य जायते।
> ततः प्रयत्नसाफल्यं किं न लब्धं मया भवेत् ॥३॥

अन्यच्च।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महान्तमर्थमाश्रित्य यो विधत्ते परिश्रमम् ।
तत्सिद्धौ तस्य तोषः स्यादसिद्धौ वीरचेष्टितम् ॥४॥
तस्मात्सर्वप्रयत्नेन पुनः प्रत्याय्य पेशलैः ।
वचनैर्बोधयाम्येनं गुरुश्चित्तेऽवधारयेत् ॥५॥

ततो यथा तेन सूपकारेण तस्मै भिक्षाचराय निवेदिताः पुनर्विशेषतः कदन्नदोषा उपपादिता तस्य युक्तितस्त्याज्यरूपता दूषितं कालान्तरे तदभिप्रेतं तस्य निर्वाहकत्वं प्रशंसितमात्मीयं परमान्नं प्रकटितं तस्य सर्वदा दानं समुत्पादितो महाप्रभावाञ्जनसलिलदायकत्वनिदर्शनेनात्मविश्रंभातिरेको ऽभिहितश्चासौ द्रमकः किं बहुनानेन मुञ्चेदं स्वभोजनं गृहाणेदममृतकल्पं मदीयमन्नमिति । तथा सद्धर्मसूरयोऽपि सर्वं कुर्वन्ति ।
तथाहि ।

तेऽपि जीवाय निवेदयन्ति धनविषयकलत्रादे रागादिहेतुतां दीपयन्ति कर्मसञ्चयकारणतां प्रकाशयन्ति दुरन्तानन्तसंसारनिमित्ततां वदन्ति च यथा भद्र यत एव क्लेशेनापार्ज्यन्ते खल्वेते धनविषयादयः क्लेशेन चानुभूयन्ते पुनश्चागामिनः क्लेशस्य कारणभावं भजन्ते । अत एवैते परित्यागमर्हन्ति । अन्यच्च । भद्र तवाप्येते मोहविपर्यासितचेतसि सुन्दरबुद्धिं जनयन्ति यदि पुनस्त्वं चारित्ररसमास्वादयसि ततोऽस्माभिरनुक्त एव नैतेभ्यो मनागपि स्पृहसे को हि सकर्णकोऽमृतं विहाय विषमभिलषति यत्पुनरस्मदीयोपदेशसंपाद्यस्य चारित्रपरिणामस्य कादाचित्कत्वेनानिर्वाहकत्वं धनविषयकलत्रादेस्तु प्रकृतिभावगमनेन सदा भावितया च निर्वाह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कत्वं मन्यसे तदपि मा मंस्थाः यतो धनादयोऽपि धर्मरहितानां न सकलकालभाविनो भवन्ति भवन्तोऽपि न प्रेक्षापूर्वकारिणा निर्वाहकतयाङ्गीकर्तव्या न हि समस्तरोगप्रकोपनहेतुरपथ्यान्नं सकलकालभावुकमपि निर्वाहकमित्युच्यते सर्वानर्थसार्थप्रवर्त्तकाश्चैते धनादयः तस्मान्नैतेषु सुन्दरा निर्वाहकत्वबुद्धिः न चेयं प्रकृतिर्जीवस्य यतोऽनन्तज्ञानदर्शनवीर्यानन्दरूपोऽयं जीवः । अयं तु धनविषयादिषु प्रतिबन्धोऽस्य जीवस्य कर्ममलजनितो विभ्रम इति तत्त्ववेदिनो मन्यन्ते । अत एव चारित्रपरिणामोऽपि तावत्कादाचित्को यावज्जीववीर्यं नोल्लसति तदुल्लासे पुनः स एव निर्वाहको भवितुमर्हतीत्यतो विदुषा तत्रैव यत्नो विधेयः । तद्बलेनैव महापुरुषा अपहस्तयन्ति परीषहोपसर्गान् अवधीरयन्ति धनादिकं निर्दलयन्ति रागादिगणं उन्मूलयन्ति कर्मजालं तरन्ति संसारसागरं तिष्ठन्ति सततानन्देऽनन्तकालं शिवधाम्नीति । किं च । मत्संपादितेन ज्ञानेन किं न जनितस्तवाज्ञानतमोविलयः किं वा दर्शनेन नापास्तो विपर्याससवेतालो येन मद्वचनेऽप्यविश्रब्धबुद्धिरिव विकल्पं कुरुषे तस्माद्भद्र विमुच्येदं भववर्द्धनं धनादिकमङ्गीकुरु मम दययोपनीतमेतच्चारित्रं येन संपद्यते ते निःशेषक्लेशराशिविच्छेदः प्राप्नोषि च शाश्वतं स्थानमिति । ततो यथा महाप्रयत्नेनापि ब्रुवाणे तस्मिन् रसवतीपताविनरेणाभिहितं यदुत न मयेदं स्वभोजनं मोक्तव्यं यच्च सत्येव दीयते ततो दीयतामात्मभोजनमिति । तथायमपि जीवः सद्धर्मगुरुभिरेवं भूयो भूयोऽभिधीयमानोऽपि गलिरिव बलीवर्दः पादप्रसारिकामवलम्ब्येत्थमाचष्टीत ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगवन्नाहं धनविषयादिकं कथञ्चन मोक्तुं पारयामि यद्यच्च विद्यमानेऽपि भवति किञ्चिच्चारित्रं तन्मे दीयतामिति। ततो यथा विज्ञाय तस्य रोरस्याग्रहविशेषं स सूरिश्चिन्तयति स्म नास्येदानीमन्यः शिक्षणोपायोऽस्ति ततोऽस्मिन् सत्येव दीयतां पश्चाज्जातमदीयान्नगुणः स्वयमेवैतत्कदन्नमेष विहास्यति। एवं च विचिन्त्य दापितं तत्तेन भुक्तमितरेण तदुपयोगेन शान्ता बुभुक्षा तनूभूता रोगाः प्रवर्द्धितमञ्जनसलिलजनितादधिकतरं सुखं जातो मनःप्रसादः प्रादुर्भूता तद्दायके तत्र पुरुषे भक्तिः अभिहितश्चासौ तेन यथा भवानेव मे नाथो येनाहं भाग्यविकलोऽप्येवमनुकम्पित इति। तथा धर्मगुरवोऽप्येवं बह्वाग्रहत्वेनामुञ्चति धनविषयादिकमत्र जीवे परिकलयन्ति न शक्यते तावदयमिदानीं सर्वविरतिं ग्राहयितुं तदेवं स्थिते देशविरतिस्तावदस्मै दीयतां तत्पालनेनोपलब्धगुणविशेषः स्वयमेव सर्वसङ्गपरित्यागं करिष्यतीत्याकलय्य तथैव कुर्वन्ति तदनेनैतदुक्तं भवति।

अयमत्र क्रमः प्ररूप्य प्रथमं प्रयत्नतः सर्वविरतिं ततः सर्वथा तत्करणपराङ्मुखमुपलभ्य जीवं देशविरतिः प्ररूपणीया देया वा प्रथमं पुनर्देशविरतिप्ररूपणे क्रियमाणे तस्यामेव प्रतिबन्धं विदध्यादयं जीवः साधोश्च सूक्ष्मप्राणातिपातादावनुमतिः स्यादिति ततस्तस्या देशविरतेः पालनं परमान्नलेशभक्षणतुल्यं विज्ञेयं तदुपयोगेनैवास्य जीवस्य प्रशाम्यति मनाग् विषयाकाङ्क्षालक्षणा बुभुक्षा तनूभवन्ति रागादयो भावरोगाः प्रवर्द्धते ज्ञानदर्शनसंपादितात् समर्गलतरं स्वाभाविकस्वास्थ्यरूपं प्रशमसुखं संजायते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्भावनया मनःप्रसादः प्रादुर्भवति तद्दायकेषु गुरुषु परमोपकारिणो ममैत इति भावयतो भक्तिः अभिधत्ते च तानेष जीवस्तदानीम् । यदुत यूयमेव मे नाथा यैरहमेवं दुर्दान्तकल्पतया गाढमकर्मण्योऽपि स्वसामर्थ्येन कर्मण्यतां प्राप्य गुणभाजनतां नीत इति ।

ततस्तदनन्तरं यथा तेन सूदेन तं वनीपकमुपवेश्य मधुरवचनैस्तस्य मनःप्रल्हादयता वर्णिता महाराजगुणा दर्शितश्चात्मनोऽपि तद्भृत्यभावः ग्राहितः सोऽपि विशेषतस्तदनुचरत्वं समुत्पादितं तस्य महानृपतेरेव विशेषगुणेषु कुतूहलं कथितस्तत्परिज्ञानहेतुर्व्याधितनुभावः प्रकाशितं तस्यापि कारणं भेषजत्रयं समादिष्टः प्रतिक्षणं तस्य परिभोगः दीपितं तत्परिभोगबलेन महानरेन्द्राराधनं प्रतिपादितं महानरेन्द्राराधकानां तत्समानमेव महाराज्यमिति । तथा धर्मगुरवोऽपि ज्ञानदर्शनसंपन्नं प्रतिपन्नदेशविरतिमप्येनं जीवमुपलभ्य विशिष्टतरस्थैर्यसम्पादनार्थं समस्तमेतदाचरन्त्येव ।

तथाहि । ते तं प्रत्येवं ब्रूयुः यथा भद्र यदुक्तं भवता यदुत यूयमेव मे नाथा इति युक्तमेतद्भवादृशां किन्तु साधारणं नैवं वक्तव्यं यतो भवतोऽस्माकं च परमात्मा सर्वज्ञ एव भगवान् परमो नाथः स एव हि चराचरस्यास्य त्रिभुवनस्य पालकतया नाथो भवितुमर्हति विशेषतः पुनर्ये तत्प्रणीतेऽत्र ज्ञानदर्शनचारित्रप्रधाने दर्शने वर्त्तन्ते जन्तवस्तेषामसौ नाथः । अस्यैव किङ्करभावं प्रतिपद्य महात्मानः केवलराज्यासादनेन भुवनमप्यात्मकिङ्करं कुर्वन्ति । ये पुनः पापिष्ठाः प्राणिनस्तेऽस्य भगवतो नामापि न जानते । भाविभद्रा एव सत्त्वाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वकर्मविवरेणास्य दर्शनमासादयन्ति । यतश्च त्वमेतावतीं कोटि-मध्यारूढोऽतस्त्वया प्रतिपन्न एव भावतो भगवान् । केवलं तार-तम्यभेदेन सङ्ख्यातीतानि तस्य प्रतिपत्तिस्थानानि तेन विशेषप्रति-पत्तिनिमित्तमेषोऽस्माकं यत्नः यतः सामान्येन जानतेऽप्येनं भगवन्तं जन्तवः । सुगुरुसम्प्रदायमन्तरेण न विशेषतो जानते तदेवं ते गुरवस्तस्य जीवस्य पुरतो भगवद्गुणान् वर्णयन्ति तथात्मानमपि तत्किङ्करं दर्शयन्ति तं च जीवं विशेषतो भगवन्तं नाथतया ग्राहयन्ति भगवद्विशेषगुणेषु तस्य कौतुकमुत्पादयन्ति तज्ज्ञानो-पायभूतं रागादिभवरोगतानवं कथयन्ति तस्यापि कारणं ज्ञान-दर्शनचारित्ररूपत्रयं दीपयन्ति तस्य च प्रतिक्षणमासेवनमुपदिशन्ति तदासेवनेन भगवदाराधनं निवेदयन्ति भगवदाराधनेन परमपद-प्राप्तिं महाराज्यावाप्तिकल्पां प्रतिपादयन्ति । एवमपि कथयति हितकारिणि गृहीतगुणस्थिरताविधायिनि भगवति धर्मसूरौ यथाऽसौ वनीपकः सूपकारवचनमवगम्यात्मीयाकूतवशेनेत्थमभिहि-तवान् । यथा नाथाः किमनेनोक्तेन न शक्नोम्यहं कथञ्चनेदं कदन्नं मोक्तुमिति । तथायमपि जीवश्चारित्रमोहनीयेन कर्मणा विह्वली-भूतबुद्धिरेवं चिन्तयत् । अये यदेवं महता प्रबन्धेन पुनः पुनरेते भगवन्तो मम धर्मदेशनां कुर्वन्ति तन्नूनं मां धनविषयकलत्रादि-कमेतदेते त्याजयन्ति न चाहं त्यक्तुं शक्नोमि तत्कथयाम्येषां सद्भावं येन निष्कारणं भूयो भूयो भगवन्तःस्वगलतालुशोषमेते विदधते ततस्तथैव स जीवः स्वाभिप्रायं गुरुभ्यः कथयेदिति । ततो यथा तेन रसवतीपतिना चिन्तितं न मयायं स्वभोजनत्यागं कारितः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किन्तर्ह्यीदं भेषजत्रयमासेवस्वेत्युक्तस्तत्किमेवमेष भाषते। अथ स्वाभिप्रायविडम्बितोऽयं जानीते मदीयान्नत्याजननिमित्तमेतत् समस्तं वागाडम्बरमिति। ततो विहस्य तेनोक्तं भद्र निराकुलो भव नाधुना भवन्तं किञ्चित्त्याजयामि तवैव पथ्यमेतत्त्यजनमितिकृत्वा वयं ब्रूमो यदि पुनर्भवते रोचते ततोऽत्रार्थे अतः प्रभृति तूष्णीमाशिष्यामहे यत्पुनरेतदनन्तरमेव तव पुरतोऽस्माभिर्महा-राजगुणवर्णनादिकं विहितं कर्त्तव्यतया च तव किञ्चित्समादिष्टं तत्त्वया किं किञ्चिदवधारितं वा न वेति। तथा धर्मगुरवोऽपि सर्वमिदं चिन्तयन्ति वदन्ति च तच्च स्पष्टतरमिति स्वबुध्यैव योजनीयं ततो यथाऽसौ वनीपकोऽवादीत् यथा नाथ न मया किंञ्चिदत्र भवत्कथितमुपलक्षितं तथापि तावकैः कोमलालापैरुल्लसितो मनाग् मनसि प्रमोदः निवेदितश्च तेन वनीपकेन नाधुना किञ्चित्त्याजया-मीदं भवन्तं भोजनमिति सूदवचनश्रवणान्नष्टभयाकूतेन सता स्वचे-तसो वैधुर्यकारणभूतस्तस्य सूदस्य समचमादितः प्रभृति समस्तो-ऽप्यात्मवृत्तान्तः अभिहितश्चासौ सूपकारो यदुतैवं स्थिते यन्मया विधेयं तदाज्ञापयन्तु नाथा येनाधुनावधारयामीति। तथात्रापि विदिततच्चित्ता यदा धर्मगुरवो वदन्ति। यदुत न वयं भवन्तम-शक्नुवन्तं सर्वसङ्गत्यागं कारयामः केवलं यदिदं भवतः स्थिरीकरणार्थं मनेकशो भगवद्गुणवर्णनादिकं वयं कुर्मः। यच्च सम्यग्दर्शनज्ञाना-देशचारित्राणामङ्गीकृतानामेव भवता सातत्यमनुपालनादिकमुपदि-शामः। तदत्र भवान् किञ्चिदवधारयति वा न वेति। तदा वदत्येवं जीवो भगवन्नाहं सम्यक्किञ्चिदवधारयामि। तथापि यौष्माकीण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पेशलवचनैर्मोदितचित्तो यदा यदा कथयन्ति भगवन्तस्तदा तदा शून्यहृदयोऽपि विस्फारितेचणः किल बुध्यमान इवेत्याकर्णयंस्तिष्ठामि कुतः पुनर्मादृशां विशिष्टतत्त्वाभिनिवेशो यतोऽहं महतापि प्रयत्नेन तत्त्वमार्गं व्याचचाणेषु भगवत्सु सुप्त इव मत्त इवोन्मत्त इव सन्मूर्च्छनज इव शोकापन्न इव मूर्च्छित इव सर्वथा शून्यहृदयो न किञ्चिल्लचयामि यच्च मे चेतसो वैसंस्थुल्यकारणं तदाकर्णयन्तु भगवन्तः । ततः संजातपश्चात्तापोऽयं जीवो गुरुसमचं गर्हते स्वदुश्चरितानि जुगुप्सते स्वदुष्टभाषितानि प्रकटयति पूर्वकाल-भाविनः समस्तानपि कुविकल्पान् निवेदयत्यादितः प्रभृति निःशे-षमात्मवृत्तान्तमिति। वदति च जानाम्यहं भगवन्तो मम हितकर-णलालसाः सन्तो बहुशो निन्दन्ति विषयादिकं वर्णयन्ति सङ्गत्यागं प्रशंसन्ति तत्रस्थानां प्रशमसुखातिरेकं श्लाघन्ते तत्कार्यभूतं परमपदं तथापि कर्मपरतन्त्रतयाहं भचितबहुमाहिषदधिवृन्ताकसंघात इव निद्रां पीतामन्त्रपूततीव्रविष इव विह्वलतां धनविषयादिष्वना-दिभवाभ्याससवशेन भवन्तीं मूर्च्छां न कथञ्चिन्निवारयितुं पारयामि। तया च विह्वलीभूतचेतसो मे भगवतां सम्बन्धिनी धर्मदेशना महानिद्रावष्टब्धहृदयस्येव पुरुषस्य प्रतिबोधकनरोच्चारितां शब्दपरं-परां समाकर्णयतोऽपि गाढसुद्वेगकारिणीव प्रतिभासते । अथ च । तस्या माधुर्यं गाम्भीर्यमुदारतां परिणामसुन्दरतां च पर्यालोचयतः पुनरन्तरान्तरा चित्ताह्लादोऽपि संपद्यते। एतदपि पूर्वोक्तं यद् भगवद्भिरभ्यधायि यदुत नाशक्नुवन्तं भवन्तं वयं सङ्गत्यागं कारयाम इति । ततो मया नष्टभयवैधुर्येण भगवतां पुरतः कथयितुं

16

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शक्तिमितरथा यदा यदा भगवन्तो देशनायां प्रवर्त्तन्ते स्म तदा तदा मम चेतसि विकल्पः प्रादुरभूत्। अये स्वयं निःस्पृहास्तावदेते केवलं मां धनविषयादिकं त्याजयन्ति न चाहं हातुं शक्नोमि तदेष व्यर्थकः प्रयासोऽमीषामित्येवं चिन्तयन्नपि भयातिरेकान्न स्वाकूतमपि प्रकटयितुं पारितवानिति। तदेवं स्थिते यन्मया विधेयमेवंविधशक्तिना तत्र भगवन्तः प्रमाणमिति। ततो यथासौ पौरोगवस्तस्मै वनीपकाय पुनः प्रपञ्चतो निवेद्य प्राचीनमशेषमर्थं ततः स्वकीयभेषजत्रयस्य योग्यायोग्यविभागं पूर्वं महानरेन्द्रसंप्रदायितमाचचक्षे। तं चोवाच यथा भद्र कृच्छ्रसाध्यस्त्वमतो महायत्नमन्तरेण न रोगोपशमस्ते दृश्यते तस्मादत्रैव राजमन्दिरे प्रयतो भूत्वा ध्यायन्ननवरतमेनं समस्तगदोद्दलनचमवीर्यातिशयं महाराजेन्द्रं भेषजत्रयोपभोगं चाहर्निशं कुर्वाणस्तिष्ठ। इयं च तद्दया तव परिचारिका ततः प्रतिपन्नं समस्तं तेन स्थितः कियन्तमपि कालं विधायैकदेशे तद्भिक्षाभाजनमनारतं तदेव पालयन्निति तदिदमत्रैवं योजनीयम्। यदायं जीवः प्रागुक्तन्यायेन निवेद्य स्वाभिप्रायं गुरुभ्यः पुनरुपदेशं याचते तदा ते तदनुकम्पया पूर्वोक्तं पुनरपि समस्तं प्रतिपाद्य पश्चात्तस्य व्युत्पादनार्थं येनायं कालान्तरेणापि न व्यभिचरतीति धर्मसामग्र्याः सुदुर्लभतां दर्शयन्तो रागादीनां च भावरोगाणामतिप्रबलतां ख्यापयन्तः स्वातन्त्र्यपरिजिहीर्षया चात्मनः सांशयमित्यमाचचते यथा भद्र यादृशी सामग्री भवतः संपन्ना नाधन्यानामीदृशी कथञ्चन संपद्यते न हि वयमपात्रे प्रयासं कुर्मो यतो भागवतीयमाज्ञा योग्येभ्य एव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवेभ्यो ज्ञानदर्शनचारित्राणि देयानि नायोग्येभ्यः अयोग्यदत्तानि हि तानि न स्वार्थसंसाधकानि संजायन्ते प्रत्युत वैपरीत्यापत्त्यानर्थसन्ततिं वर्द्धयन्ति।

तथा चोक्तम्।

धर्मानुष्ठानवैतथ्यात्प्रत्यपायो महान् भवेत्।
रौद्रदुःखौघजनको दुःप्रयुक्तादिवौषधात् ॥१॥

ज्ञातं चास्माभिर्भगवदादिष्टं सुगुरुपारम्पर्यात् ज्ञातं भगवत्प्रसादादेव तदुचितानुचितानां जीवानां लक्षणं एतान्येव हि ज्ञानदर्शनचारित्राणि भगवता तेषां जीवानां सद्रूपपरिच्छेदकारकाणि प्रतिपादितानि तत्र येषामाद्यावस्थायामपि कथ्यमानानि तानि प्रीतिं जनयन्ति तत्त्वेविनस्त्वान्ये प्रतिभासन्ते ये च सुखेनैव तानि प्रतिपद्यन्ते येषां सेव्यमानानि च द्रागेव विशेषं दर्शयन्ति ते लघुकर्माणः प्रत्यासन्नमोक्षाः सुदारुवद्रूपनिर्माणस्य तेषां योग्यास्तथा भावरोगोच्छेदं प्रति सुसाध्यास्ते विज्ञेयाः। येषां पुनराद्यावसरे प्रतिपद्यमानानि तानि न प्रतिभान्ति तदनुष्ठानपरायणांस्त्वान्यान् येऽवधीरयन्ति सद्गुरुविहितमहाप्रयत्नेन च ये प्रतिबुध्यन्ते। तथा सेव्यमानानि तानि येषां कालक्षेपेण विशेषं दर्शयन्ति पुनः पुनरतिचारकानिश्चयेन ते गुरुकर्माणो व्यवहितमोक्षा मध्यमदारुवद्रूपनिर्माणस्य सद्गुरुपरिशीलनया ते योग्यतां प्रतिपद्यन्ते। तथा भावरोगोपशमं प्रति ते कृच्छ्रसाध्या मन्तव्याः। येभ्यः पुनरेतानि निवेद्यमानानि न कथञ्चन रोचन्ते प्रयत्नशतैरपि संपाद्यमानानि येषु न क्रमन्ते तदुपदेष्टारमपि प्रत्युत ये द्विषन्ति ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महापापा अभव्या अत एवैकान्तेन तेषामयोग्याः। तथा भाव व्याधिनिबर्हणं प्रत्यसाध्यास्तेऽवगन्तव्या इति। तदिदं सौम्य यद् भगवत्पादप्रसादेनास्माभिर्लक्षणमवधारितमनेन लक्षणेन यथा त्वमात्मस्वरूपं कथयसि यथा च वयं भवत्स्वरूपं लक्षयामः तथा त्वं परिशीलनागम्यः कृच्छ्रसाध्ये वर्त्तसे एवं च स्थिते न भवतो महाप्रयत्नव्यतिरेकेण रागादिरोगोपशममुपलभामहे तस्मादद्य यद्यपि न भवतः सर्वसङ्गत्यागशक्तिर्विद्यते ततोऽत्र वितते भागवते प्रवचने कृत्वा भावतोऽविचलमवस्थानं विहायाशेषकाङ्क्षाविशेषान् भगवन्तमेवाचिन्त्यवीर्यातिशयपरिपूर्णतया निःशेषदोषशोषणसहिष्णुमनवरतं चेतसि गाढभक्त्या व्यवस्थापयन् देशविरत एवावतिष्ठस्व केवलमनवरतमेतदेव ज्ञानदर्शनचारित्ररूपत्रयमुत्तरोत्तरक्रमेण विशिष्टं विशिष्टतरं विशिष्टतमं भवता यत्नेनासेवनीयमेवमाचरतस्तेन भविष्यति रागादिरोगोपशमो नान्यथेति। या चेयमीदृशी सदुपदेशदाने प्रवर्त्तमानानां भगवतां सद्धर्मगुरूणामस्य जीवस्योपरि दया सैवास्य परमार्थतः परिपालनक्षमा परिचारिका विज्ञेया। ततोऽयं जीवः प्रतिपद्यते तदानीं तद्गुरुवचनं करोति यावज्जीवं मयैतदेवं कर्त्तव्यमिति निश्चयं तिष्ठति देशविरतः कियन्तमपि कालमत्र भगवन्मतमन्दिरे पालयति धनविषयकुटुम्बाद्याधारभूतं भिक्षापात्रकल्पं जीवितव्यं तस्मिन्नवसरे। एवं च तिष्ठतस्तस्य यो वृत्तान्तः सोऽधुना प्रतिपाद्यते। तत्र यदुक्तम्। यदुत सा तद्दया ददाति तस्मै तच्चित्तयमहर्निशं केवलं तत्र कदन्ने मूर्च्छितस्य वनीपकस्य न तस्मिन्नादर इति। तदिहापि तुल्यमेवा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वसेयम्। तथा हि। गुरोः सम्बन्धिनी दया सम्पादयत्येवास्य जीवस्यानारतं विशेषतो ज्ञानादीनि। तथापि कर्मपरतन्त्रतया धनादिषु मूर्च्छितचित्तोऽयं न तानि सम्यग् बहु मन्यते।

अन्यच्च।

यथासौ कथानकोक्तो मोहवशेन तत् कुभोजनं भूरि भुङ्क्ते तद्दयादत्तं पुनः परमान्नमुपदंशकल्पं कल्पयति। तथायमपि जीवो महामोहाघ्रातमानसो धनोपार्जनविषयोपभोगादिषु गाढमाद्रीयते गुरुदययोपनीतं तु व्रतनियमादिकमनादरेणान्तरान्तरा सेवते वा न वा। यथासौ तद्दयोपरोधेन तदञ्जनं क्वचिदेव नेत्रयोर्निधत्ते तथायमपि जीवः सद्गुरुभिरनुकम्पया प्रेर्यमाणोऽपि यदि परं तदनुरोधेनैव प्रवर्त्तते तथा ज्ञानमभ्यस्यति तदपि क्वचिदेव न सर्वदा यथा चासौ तत्तीर्थोदकं पातुं तद्वचनेनैव प्रवर्त्तते तथायमपि जीवः प्रमादपरायत्ततयानुकम्पापरगुरुचोदनयैव सम्यग्दर्शनमुत्तरोत्तरविशेषैरुद्दीपयति न स्वोत्साहेनेति। यत्तु विशेषेण पुनरभिहितं यथा स वनीपकः संभ्रमेण तद्दयया भूरि वितीर्णं तत्परमान्नं स्तोकं भुक्त्वा शेषमनादरेण स्वभाजने विधत्ते तत्सान्निध्येन तत्कदन्नमभिवर्द्धते ततस्तद्भक्षयतोऽपि दिवानिशं न निष्ठां याति ततोऽसौ तुष्यति न च जानीते कस्येदं माहात्म्यं केवलं तत्र गृद्धात्मा भेषजत्रयस्य परिभोगं शिथिलयन् कालं नयति। तथा चापथ्यभोजिनस्तस्य ते रोगा नोच्छिद्यन्ते केवलं यदन्तरान्तरा तद्दयोपरोधेन तत्परमान्नादिकमसौ मनाग् प्राशयति तावन्मात्रेण ते रोगा याप्यावस्थां गतास्तिष्ठन्ति यदा पुनरनात्मज्ञतया भृशतर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मपथ्यं सेवते तदा ते रोगाः कचिदात्मीयं विकारं दर्शयन्तः शूलदाहमूर्च्छारोचकादीनि जनयन्ति ततस्तैरसौ बाध्यत इति। तदत्रापि जीवे समानमवबोद्धव्यम्।

तथा हि। यथा कचिदवसरे चातुर्मासकादौ दयापरीतचित्ता गुरवोऽस्य जीवस्य पुरतो विशिष्टतरविरतिग्राहणार्थमणुव्रतविधिं विस्फारयन्ति तदायं जीवः प्रबलचारित्रावरणतया मन्दवीर्योल्लासस्तीव्रसंवेगेन कानिचिदेव व्रतानि गृह्णाति तदिदं वशोर्दत्तस्य स्तोकभक्षणमभिधीयते। कानिचित्पुनर्व्रतानि दयापरीतगुरूपरोधेन मनसोऽनभिप्रेतान्यप्यङ्गीकरोति सोऽयं शेषस्य भोजने निक्षेपो द्रष्टव्यः। तच्च व्रताङ्गीकरणं मन्दसंवेगेनापि क्रियमाणमनुषङ्गत एव विषयधनादीन्यत्र भवे भवान्तरे वाभिवर्द्धयति तदिदं परमान्नसन्निधानेनेतरस्याभिवर्द्धनमभिहितम्। ते च तत्प्रभावसंपन्ना विषयादयो दृढकारणतयानवरतं भुञ्जानस्याप्यस्य जीवस्य न निष्ठां प्रतिपद्यन्ते। ततोऽयं जीवः सुरनरभवेषु वर्त्तमानस्तां तथाभूतामात्मविभूतिमुपलभ्य हर्षमुद्वहति। न चायं वराको लक्षयति यथैते धनविषयादयो धर्ममाहात्म्येन ममोपनमन्ते तत्किमत्र हर्षेण स एव भगवान् धर्मः कर्त्तुं युक्त इति ततोऽयमलक्षितसद्भावस्तेषु विषयादिषु प्रतिबद्धचित्तो ज्ञानदर्शनदेशचारित्राणि शिथिलयति। केवलं जानन्नप्यजानान इव मोहदोषेण निरर्थकं कालमतिवाहयति। एवं चास्य वर्त्तमानस्य द्रविणादिषु प्रतिबद्धमानसस्य धर्मानुष्ठाने मन्दादरस्य भूयसापि कालेन रागादयो भावरोगा नैव संक्षियन्ते किं तु तावतापि सदनुष्ठानेन गुरूपरोधतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्दसंवेगतयापि विधीयमानेनैतावान् गुणः संपद्यते। यदुत ते भावरोगा याप्यतां नीयन्त इति। य - - - रयं जीवोऽनात्मज्ञतया गाढतरं विषयधनादिषु गृद्धिं विधत्ते ततश्चादत्ते भूरिपरिग्रहं समारभते महाजालकल्पं वाणिज्यं समाचरति कृष्यादिकं विधापयति तथाविधानन्यांश्च सदारंभान् तदा ते रागादयो भावरोगाः प्रबलसहकारिकारणकलापमासाद्य नानाकारान् विकारान् दर्शयन्त्येव नानादरविहितमनुष्ठानमात्रं तत्र त्राणम्। ततश्चायं जीवः क्वचित्पीडयते अकाण्डशूलकल्पया धनव्ययचिन्तया क्वचिद्दन्दह्यते परेर्ष्यादाहेन क्वचिन्मुमूर्षुरिव मूर्च्छामनुभवति सर्वस्वहरणेन क्वचिद्बाध्यते कामज्वरसन्तापेन क्वचिच्छर्दिमिव कार्यते बलादुत्तमर्णैर्गृहीतधननिर्यातनां क्वचिज्जाड्यमिव संपद्यते जानतोऽप्यस्यैवंविधा प्रवृत्तिरिति प्रवादेन लोकमध्ये मूर्खत्वं क्वचित्ताम्यति हृत्पार्श्ववेदनातुल्यया इष्टवियोगानिष्टसम्प्रयोगादिपीडया क्वचित्प्रभवति प्रमत्तस्य पुनरपि मिथ्यात्वोन्मादसन्तापः क्वचिद्भवति सदनुष्ठानलक्षणे पथ्ये भृशतरमरोचकः तदेवमेवंविधैर्विकारैस्तावतीं कोटिमध्यारूढोऽपि खल्वेष जीवोऽपथ्यसेवनासक्तो बाध्यत इति।

ततस्तदनन्तरं यद्वाचि यदुत स वनीपकस्तया विकारैरुपद्रुतो दृष्टस्तद्दयया ततोऽपथ्यभोजितामधिकृत्योपलब्धस्तया तेनोक्तं नाहमभिलाषातिरेकेण स्वयमेतत्परिहर्तुमुत्सहे ततोऽमुतोऽपथ्यसेवनाद्वारणीयोऽहं भवत्या प्रतिपन्नं तया ततस्तद्वचनकरणेन जातस्तस्य मनाग् विशेषः केवलं सा यदाऽभ्यर्णे तदैवासौ तदपथ्यं परिहरति नान्यदा सा चानेकसत्त्वप्रतिजागरणाकुलेति न सर्वदा तत्सन्निधौ

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवति। ततोऽसौ मुत्कलोऽपथ्यमासेवमानः पुनरपि विकारैः पीड्यत एव। तदेतदत्रच जीवव्यतिकरे सदृशं वर्त्तते केवलं गुरोर्या जीवस्योपरि दया सैव प्राधान्यात्पार्थक्येन कर्त्री विवक्षिता। ततश्चायं परमार्थस्ते गुरवो दयापरीतचित्ताः प्रमादिनमेनं जीवमुपलभ्यानेकपीडापर्याकुलतया क्रन्दन्तमेवमुपालभन्ते यथा भोः कथितमेवेदं प्रागेव भवतो न दुर्लभाः खलु विषयासक्तचित्तैर्मनः सन्तापाः। न दूरवर्त्तिन्यो धनार्जनरक्षणप्रवणानां नाना व्यापदः। तथापि भवतस्तत्रैव गाढतरं प्रतिबन्धः। यत्पुनरेतदशेषक्लेशराशिमहाऽजीर्णविरेककारितया परमस्वास्थ्यकारणं ज्ञानदर्शनचारित्रत्रयं तदनादरेणावलोकयसि त्वं तदत्र किं कुर्मो वयं यदि किञ्चिद् ब्रूमस्ततो भवानाकुलीभवति ततो दृष्टवृत्तान्ता वयं भवन्तमनेकोपद्रवैरुपद्रूयमानं पश्यन्तोऽपि तूष्णीमास्महे न पुनराकुलताभयाद्भवन्तममार्गे प्रस्थितमपि वारयामः। आदरवतामेव पुंसां विरुद्धकर्माणि परिहरतां ज्ञानदर्शनदेशचारित्राण्यनुतिष्ठतां तानि विकारनिवारणयालं नानादरवताम्। यदा चास्माकं पश्यतामपि त्वं रागादिरोगैरभिभूयसे तदा भवद्गुरव इति कृत्वा वयमप्युपालंभभाजनं लोके भविष्याम इति। सोऽयं तद्दयाविहितस्तदुपालंभ इत्युच्यते। ततोऽयं जीवो गुरूनभिदधीत भगवन्ननादिभवाभ्यस्ततया मां मोहयन्ति मे तृष्णालौल्यादयो भावाः ततस्तद्वशगोऽहं न सदारंभपरिग्रहं जानन्नपि तद्दोषविपाकं मोक्तुं शक्नोमि। ततो भगवद्भिर्नाहमुपेक्षणीयो निवारणीयो यततोऽसत्प्रवृत्तिं कुर्वाणः कदाचिद्भवन्माहात्म्येनैव मे स्तोकस्तोका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दोषविरतिं कुर्वतः परिणतिविशेषेण सर्वदोषत्यागेऽपि शक्तिः संपत्स्यत इति । ततः प्रतिपद्यन्ते तद्वचनं गुरवः । चोदयन्ति प्रमाद्यन्तं क्वचिदवसरे संपद्यते प्राक् प्रवृत्तिपीडोपशमः तद्वचनकरणेन प्रवर्द्धन्ते ज्ञानादयो गुणास्तत्प्रसादेन सोऽयं तद्दयावचनकरणेन मनागारोग्यलवणः संजातो विशेष इत्युच्यते । केवलमयं जीवो विशिष्टपरिज्ञानविकलतया यदैव ते चोदयन्ति तदैव स्वहितमनुचेष्टते तच्चोदनाभावे पुनः शिथिलयति सत्कर्त्तव्यं प्रवर्त्तते निर्भरं भूयो सदारंभपरिग्रहकरणे । ततश्चोल्लसन्ति रागादयो जनयन्ति मनःशरीरविविधबाधाः । ततस्तदवस्थैव विकलतेति तेषां तु भगवतां गुरूणाम् । यथायं प्रस्तुतजीवः सच्चोदनादानद्वारेण परिपाल्यस्तथा बहवोऽन्येऽपि तथाविधा विद्यन्ते । ततश्च समस्तानुग्रहप्रवणास्ते कदाचिदेव विवक्षितजीवचोदनामाचरन्ति शेषकालं तु मुक्तलतया स्वाहितमनुतिष्ठन्तमेतं न कश्चिद्वारयति । ततश्चायमनन्तरोक्तोऽनर्थः संपद्यत इति । सोऽयं तद्दयासन्निधानविरहादपथ्यसेवनेन पुना रोगविकाराविर्भाव इत्यभिधीयते । ततो यथा पुनस्तेन द्रमकेण तस्मै सूदाय स्ववृत्तान्तं निवेद्येदमभिहितं यदुत नाथास्तथा यतध्वं यथा न मे स्वप्नान्तेऽपि पीडा जायते ततस्तेनोक्तम् । इयं तद्दया व्यग्रतया न सम्यक् तवापथ्यनिवारणं विधत्ते ततः करोम्येनां निर्व्यापां तव परिचारिकां केवलं तद्वचनकारिणा भवता भाव्यं ततः प्रतिपन्नं तत्तेन दत्ता तस्मै निःसाधारणा सद्बुद्धिर्नामपरिचारिका सूदेन । ततस्तद्गुणेन निवृत्तं तस्यापथ्यलाम्पट्यं ततस्तनूभूता रोगा निवृत्तप्रायास्तद्विकाराः संपन्ना मनाग् शरीरे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुखासिका वर्द्धितश्चानन्द इति तथैव व्यतिकरो जीवेऽपि समानो वर्त्तते।

तथा हि।

यथा धावन्नन्धो भित्तिस्तम्भादौ लब्धास्फोटो वेदनाविक्लवस्तामास्फोटवेदनां परस्मै कथयति। तथायमपि जीवो यदा गुरुनिवारिताचरणेन दृष्टापायत्वात् संजातप्रत्ययो भवति तदा तानेकप्रकारानपायान् गुरुभ्यो निवेदयति। यदुत भगवन्नहं यदा युष्मन्निवारणया न गृह्णामि स्तेनाहृतं न करोमि विरुद्धराजातिक्रमं नाचरामि वेश्यादिगमनं नानुतिष्ठामि तथाविधमन्यदपि धर्मलोकविरुद्धं न रज्यामि महारंभपरिग्रहयोः तदा मां लोकः साधुतया गृह्णाति मयि विश्रंभं विधत्ते श्लाघां चाचरति तथा न जानामि शरीरायासजनितं दुःखं संपद्यते हृदयस्वास्थ्यं धर्मश्चैवं तिष्ठतां सुगतिप्रापको भवतीति भावनया भवति चित्तानन्द इति। यदा तु युष्मन्निवारणा न भवति भवन्तो वा तामनपेक्ष्य निबन्धतया न जानन्ति मां गुरव इत्यभिप्रायेण धनमूर्च्छया गृह्णामि स्तेनाहृतादिकं विषयलौल्येन गच्छामि वेश्यादिकं समाचरामि तादृशमन्यदपि भगवन्निवारितं तदा लोकादश्लाघां राजकुलात्सर्वस्वहरणं शरीरखेदं मनस्तापमपरांश्च समस्ताननर्थानिह लोक एव प्राप्नोमि। पापंच दुर्गतिगर्त्तपातहेतुरेवं वर्त्तमानानां भवतीति चिन्तया दन्दह्यमानहृदयः क्षणमपि सुखं न लभेऽहमिति। तस्मान्नाथास्तथा कुरुध्वं यूयं यथाहमनवरतं युष्मद्वचनाचरणसन्नाहेन सततमेतस्मादनर्थशरजालाद्रक्षितो भवामीति। ततस्तदाकर्ण्य गुरवो ब्रूयुः भद्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्येतत्परप्रत्ययेनाकार्यवर्जनं कादाचित्कमेतत् केवलं तथापि क्रियमाणस्य तस्येतरस्य च दृष्ट एव भवता विशेषः । वयं चानेकसत्वोपकारकरणव्यग्रा न सदा सन्निहिता भवन्तं वारयितुं पारयामः । एवं च स्थिते न यावद्भवतः स्वकीया सद्बुद्धिः संपन्ना तावदेषास्मन्निवारिताचरणनिबन्धनानर्थपरम्परा भवन्तो न विनिवर्त्तते सद्बुद्धिरेव हि परप्रत्ययमनपेक्ष्य स्वप्रत्ययेनैव जीवमकार्यान्निवारयति । ततो मुच्यते ऽनर्थेभ्य इति । ततोऽयं जीवो ब्रूयात् । नाथाः सापि भवत्प्रसादादेव यदि परं मम संपत्स्यते नान्यथा । ततो गुरवोऽभिदध्युः भद्र दीयते सद्बुद्धिः वचनायत्ता हि सा मादृशां वर्त्तते केवलं दीयमानापि सा पुण्यभाजामेव जन्तूनां सम्यक् परिणमति नेतरेषां यतः पुण्यभाज एव तस्यामादरवन्तो जायन्ते नापरे तदभावभाविनो हि देहिनां सर्वेऽनर्थाः तदायत्तान्येव सकलकल्याणानि तस्यामेव च ये महात्मानो यतन्ते । त एव भगवन्तं सर्वज्ञमाराधयन्ति नेतरे तत्संपादनार्थः कल्वेष मादृशां वचनप्रपञ्चः । सद्बुद्धिविकलानां हि पुरुषाणां व्यवहारतः संजातान्यपि ज्ञानादीनि नासंजातेभ्यो विशिष्यन्ते स्वकार्याकरणात् । किंबहुनोक्तेन सद्बुद्धिविकलः पुरुषो न पशूनतिशेते तस्माद्यदि तेऽस्ति सुखाकाङ्क्षा दुःखेभ्यो वा यदि बिभेषि ततोऽस्यामस्माभिर्दीयमानायां सद्बुद्धौ यत्नो विधेयः । तस्यां हि यत्नवता समाराधितं वचनं बहुमतो भुवनभर्त्ता परितोषिता वयमङ्गीकृतं लोकोत्तरयानं परित्यक्ता लोकसंज्ञा समासेविता धर्मचारिता समुत्तारितो भवोदधिरात्मा भवतेति । ततो भगवतां सद्धर्मगुरूणामेवंविधवचोऽमृत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवाहप्रह्लादितहृदयोऽयं जीवस्तद्वचनं तथेति प्रतिपद्यते। ततस्ते तस्मै दद्युरुपदेशं यदुत सौम्येदमेवाच परमगुह्यं सम्यगवधारणीयं भवता यदुत यावदेष जीवो विपर्यासवशेन दुःखात्मकेषु धनविषयादिषु सुखाध्यारोपं विधत्ते सुखात्मकेषु वैराग्यतपःसंयमादिषु दुःखाध्यारोपं कुरुते तावदेवास्य दुःखसम्बन्धः। यदा पुनरनेन विदितं भवति विषयेषु प्रवृत्तिर्दुःखं धनाद्याकाङ्क्षानिवृत्तिः सुखं तदायमशेषेच्छाविच्छेदेन निराकुलतया स्वाभाविकसुखाविर्भावात् सततानन्दो भवति।

अन्यच्च। भवतोऽयं परमार्थः कथ्यते यथा यथायं पुरुषो निःस्पृहो भवति तथा तथास्य पात्रतया सकलाः संपदः संपद्यन्ते। यथा यथा संपदभिलाषी भवति तथा तथा तद्योग्यतामिव निश्चित्य तास्ततो गाढतरं दूरीभवन्ति। तदिदं निश्चित्य भवता सर्वत्र सांसारिकपदार्थसार्थे नास्था विधेया। ततस्ते स्वप्नदशायामपि पीडागन्धोऽपि मनःशरीरयोर्नैव संपत्स्यत इति। ततोऽयं जीवस्तमुपदेशममृतमिव गृह्णीयात्। ततस्ते धर्मगुरवः संपन्ना सद्बुद्धिरस्येति ज्ञात्वा नेदानीमेषोऽन्यथा भविष्यतीति तं प्रति निश्चिन्ता भवेयुरिति। ततः प्रादुर्भूतसद्बुद्धिरयं जीवो यद्यपि श्रावकावस्थायां वर्त्तमानः कुरुते विषयोपभोगमादत्ते धनादिकं तथापि यस्तत्राभिष्वङ्गोऽतिक्लिष्टकारणभूतः स न भवति ततो ज्ञानदर्शनदेशचारित्रेषु प्रतिबद्धान्तःकरणस्य तस्य ते द्रविणभोगादयो यावन्त एव संपद्यन्ते तावन्त एव सन्तोषमुत्पादयन्ति। ततोऽयं सद्बुद्धिप्रभावादेव तदानीं यथा ज्ञानादिषु यतते न तथा धनादिषु ततोऽपूर्वा न वर्द्धन्ते रागादयः तनूभवन्ति प्राचीनाः। तथा पूर्वोपचितकर्मपरिणतिवशेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्यपि क्वचिदवसरे काचिच्छरीरमनसोर्बाधा संपद्यते तथापि सा निरनुबन्धतया न चिरमवतिष्ठते ततो जानीते तदायं जीवःसन्तोषासन्तोषयोर्गुणदोषविशेषं संजायते चोत्तरगुणास्कन्दनेन चित्तप्रमोद इति ।

ततो यथा तेन वनीपकेन तया सद्बुध्या परिचारिकया सह पर्य्यालोचितं भद्रे किंनिमित्तः खल्वेष मम देहचेतसोः प्रमोदः । तथा च कदन्नलौल्यवर्जनं भेषजचर्यासेवनं च तस्य कारणमाख्यातं तच्च युक्तिश्चोपन्यस्ता तदिहापि समानमेव ।

तथा हि । सद्बुध्यैव सह पर्य्यालोचयंस्तेष जीवो लक्षयति । यदुत यदेतत्स्वाभाविकं देहमनोनिवृत्तिरूपं सुखमाविर्भूतं ममास्य निबन्धनं विषयादिष्वभिष्वङ्गत्यागो ज्ञानाद्याचरणं च । तथा हि । प्रागभ्यासवशेन विषयादिषु प्रवर्त्तमानोऽप्येष जीवः सद्बुद्धिकलितः सन्नेवं भावयति न युक्तमीदृशं विधातुं मादृशां ततो गृद्धिविकलतया निवर्त्तते चेतसोऽनुबन्धः ततः संपद्यते प्रशमसुखासिकेत्ययमत्र युक्त्युपन्यासो विज्ञेय इति । ततो यदुपलब्धसुखरसेन तेन रोरेण तस्याः परिचारिकायाः पुरतोऽभिहितं यदुत भद्रे सर्वथाधुना मुञ्चामीदं कदन्नं येनात्यन्तिकमेतत्सुखं मे संपद्यत इति । तयोक्तं चार्विदं केवलं सम्यगालोच्य मुच्यतां भवता यतस्तेऽत्यन्तवल्लभमेतद् ततो यदि मुक्तेऽपि तवात्र स्नेहबन्धोऽनुवर्त्तते तदरतरमस्यात्याग एव यतस्तीव्रलौल्यविकलतया भुञ्जानस्यापीदं भेषजचर्यासेवनगुणेनाधुना याप्यता ते विद्यते सापि चात्यन्तदुर्लभा यदि पुनरस्य सर्वत्यागं विधाय त्वमेतद्गोचरं स्मरणमपि करिष्यसि ततो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोगा भूयोऽपि कोपं यास्यन्ति तद्वचनमाकर्ण्य तस्य दोलायिता बुद्धिः किं करवाणीति न संजातो मनसि निश्चय इति तदिदमत्रापि जीवे तुल्यं वर्त्तते ।

यथा हि । यदायं सांसारिकार्थेषु चित्तानुबन्धत्रोटनेन ज्ञानाद्याचरणे दृढमनुरक्ततया गृहस्थावस्थायामपि वर्त्तमानो विज्ञातसंतोषसुखस्वरूपो भवति तदास्याविच्छिन्नप्रशमसुखवाञ्छया प्रादुर्भवत्येव सर्वसङ्गत्यागबुद्धिः पर्य्यालोचयति चात्मीयसद्बुध्या सार्द्धं यदुत किमहमस्य विधाने समार्थो न वेति । ततः सद्बुद्धिप्रसादादेवेदमेष लक्षयत्येव यथानादिभवाभ्यासवशेन स्वरसप्रवृत्तिरेष जीवो विषयादिषु ततो यदि निःशेषदोषनिवृत्तिलक्षणां भागवतीमपि दीक्षामुररीकृत्य पुनरयं तामनादिरूढकर्मजनितां प्रकृतिमनुवर्त्तमानो विषयादिस्पृहयाप्यात्मानं विडम्बयिष्यति । ततोऽस्यादित एव तदनङ्गीकरणं श्रेयस्करं यतस्तीव्राभिष्वङ्गरहितो विषयादिषु वर्त्तमानो गृहस्थोऽपि द्रव्यस्तवं ज्ञानाद्याचरणप्रधानं कुर्वाणः कर्माजीर्णजरणेन रागादिभावरोगतनुतामधिकृत्य याप्यतां लभते न चेयमप्यनादौ भवभ्रमणे क्वचिदवाप्तपूर्वानेन जीवेनातोऽत्यन्तदुर्लभेयं यदि तु प्रव्रज्यां प्रतिपद्य पुनर्विषयाद्यभिलाषं विधत्ते ततः प्रतिज्ञाताकरणेन दृढतरचित्तसंक्लेशप्राप्तेर्गुरुतररागाद्युद्रेकेण तामपि याप्यतां न लभते ततो यावदेवं निरूपयत्ययं जीवः तावदस्य चारित्रमोहनीयकर्मांशैरनुवर्त्तमानैर्विधुरिता सती पूर्वं प्रवृत्तापि सर्वसङ्गत्यागबुद्धिः पुनर्दोलायते ततः संपद्यते वीर्यहानिः ततोऽवलम्बते खल्वयमेवंविधानि कदालम्बनानि । यदुत सीदन्ति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावदधुना ममेदं कुटुम्बकं मन्मुखनिरीक्षकं चेदं न वर्त्तते मद्विरहे। अतः कथमकाण्ड एव मुञ्चामि यदि वाद्यप्यसंजातबलोऽयं तनयः अपरिणितेयं दुहिता प्रोषितभर्तृकेयं भगिनी मृतपतिका वा अतः पालनीया ममेयं तथा नाद्यापि गृहधूर्धरणक्षमोऽयं भ्राता जराजर्जरितशरीराविमौ मातापितरौ स्नेहकातरौ च गर्भवतीयं भार्या दृढमनुरक्तहृदया च न जीवति मद्विरहिता। अतः कथमेवं विसंस्थुलं परित्यजामि यदि वा विद्यते मे भूरिधननिचयः सन्ति बहवोऽधमर्णाः। अस्ति च सुपरीक्षितभक्तिर्भूयान् परिकरो बन्धुवर्गश्च तदयं पोष्यो मे वर्त्तते तस्मादुद्ग्राह्य द्रविणं लोकेभ्यः कृत्वा बन्धुपरिकराधीनं विधाय धर्मद्वारेण धनविनियोगमनुज्ञातः स्वरभसेन सर्वैर्मातापित्रादिभिर्विहिताशेषगृहस्थकृत्य एव दीक्षामङ्गीकरिष्ये किमनेनाकाण्डविड्वरेणेति।

अन्यच्च। यदिदं प्रव्रजनं नाम साक्षाद्बाहुभ्यां तरणमेतत् स्वयंभूरमणस्य वर्त्तते प्रतिस्रोतोगमनमेतद्गङ्गायाः चर्वणमेतद्योयवानां भक्षणमेतद्योगोलकानां भरणमेतत्सूक्ष्मपवनेन कम्बलमुत्कोत्थाः भेदनमेतत् शिरसा सुरगिरेः मानग्रहणमेतत्कुशाग्रेण नीरनिधेः नयनमेतदबिन्दुपातं धावता योजनशतं तैलापूर्णपात्र्या ताडनमेतत् सव्यापसव्यभ्रमणशीलाष्टचक्रविवरगामिना शिलीमुखेन वामलोचने पुत्रिकायाः भ्रमणमेतदनपेक्षितपादपातं निशातकरवालधारायामिति यतोऽत्र परिसोढव्याः परिषहाः निराकर्त्तव्या दिव्याद्युपसर्गाः विधातव्या समस्तपापयोगनिवृत्तिः वोढव्यो यावत्कथं सुरगिरिगुरुः शीलभारो वर्त्तयितव्यः सकलकालं माधुकर्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्त्तनयात्मा निष्टप्तव्यो विकृष्टतपोभिर्दृढः स्वात्मीभावमानितव्यः संयमः समुन्मूलयितव्या रागादयो निरोद्धव्यो चार्तमप्रसरः। किंबहुना। निहन्तव्योऽप्रमत्तचित्तैर्मोहमहावेताल इति मृदुशयनाहारलालितपालितं च मामकं शरीरं तथापरिकर्मितमद्यापि चित्तं तन्नैतावतः प्रायेण महाभारस्योद्वहने सामर्थ्यम्।

अथ वैतदपास्ति न यावत्सकलद्वन्द्वविच्छेदद्वारेण भागवती दीक्षाभ्युपगता न तावत्सम्पूर्णं प्रशमसुखमशेषक्लेशविच्छेदलक्षणो वा मोक्षोऽवाप्यत इति। न जानीमः किं कुर्महे ततोऽयमेवं जीवोऽनवाप्तकर्त्तव्यनिर्णयः सन्देहदोलारूढहृदयः कियन्तमपि कालं चिन्तयन्नेवावतिष्ठते।

ततो यदुक्तं यदुतान्यदा तेन वनीपकेन महाकल्याणकापूर्णोदरेण तत्कदन्नं लीलया कथञ्चित्प्राशितं ततस्तदुत्तरकालं भुक्तत्वात्तस्य यथावस्थितैरेव गुणैः कुथितत्वविरसत्वनिन्द्यत्वादिभिस्तदपि प्रतिभातं ततः संजातोऽस्य तस्योपरि व्यलीकीभावः ततस्त्यक्तव्यमेवेदं मयेति सिद्धान्तीकृत्य स्वमनसा तत्त्यागार्थमादिष्टा सद्बुद्धिः। तयाभिहितं धर्मबोधकरेण सार्द्धं पर्यालोच्य मुच्यतामेतदिति। ततस्तदन्तिके गत्वा निवेदितः स्वाभिप्रायो वनीपकेन तेनापि निकाचनापूर्वं त्याजितोऽसौ तत्कदन्नं क्षालितं विमलजलैस्तद्भाजनं पूरितं परमान्नेन विहितस्तद्दिने महोत्सवः जातं जनप्रवादवशेन तस्य वनीपकस्याभिधानं सपुण्यक इति। तदिदं वृत्तान्तान्तरमस्यापि जीवस्य दोलायमानबुद्धेस्तथा गृहस्थावस्थायां वर्त्तमानस्य कचित्संभवतीत्यवगन्तव्यम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा हि। यदायं जीवो विदितप्रशमसुखास्वादो भवति भव-प्रपञ्चाद्विरक्तचित्तस्तथापि केनचिदालम्बनेन गृहमधिवसति तदा करोत्येव विशिष्टतरं तपोनियमाभ्यासं स एष परमात्माभ्यवहारोऽभिधीयते। यत्तु तस्यामवस्थायामनादरेणार्थोपार्जनं कामासेवनं वा तल्लीलया कदशनप्राशनमिति विज्ञेयम्।

ततो यदा भार्या वा व्यलीकमाचरेत् पुत्रो वा दुर्विनीततां कुर्यात् दुहिता वा विनयमतिलंघयेत् भगिनी वा विपरीतचारितामनुचेष्टेत भ्राता वा धर्मद्वारेण धनव्ययं विधीयमानं न बहु मन्यते जननीजनकौ वा गृहकर्त्तव्येषु शिथिलोऽयमिति जनसमक्षमाक्रोशेतां बन्धुवर्गो वा व्यभिचारं भजेत परिकरो वाज्ञां प्रतिकूलयेत् स्वदेहो वातिलालितपालितोऽपि खलजनवद्रोगादिकं विकारमादर्शयेत् धननिचयो वा अकाण्ड एव विद्युल्लताविलसितमनुविदध्यात् तदास्य जीवस्य परमान्नदग्धस्येव कुभोजनमेष समस्तोऽपि संसारविस्तरः सुतरां यथावस्थितस्वरूपेण मनसि प्रतिभासयेत्। ततस्तदायं विविक्तेन चेतसा प्रादुर्भूतसंवेगस्सन्नेवं भावयेत्। अये यदर्थमहं विज्ञातपरमार्थोऽपि स्वकार्यमवधीर्य सदनमधिवसामि तदास्य स्वजनधनादेरेवंविधः परिणामः तथापि ममापर्यालोचितकारिणो नास्योपरि स्नेहमोहः प्रवर्त्तमानो निवर्त्तते। नूनमविद्याविलसितमेवेदं यदीदृशेऽप्यत्र चेतसः प्रतिबन्धः तत्किमर्थमनर्थव्यामूढहृदयः स्वल्वहमात्मानं वञ्चयामि। तस्मान्मुञ्चामीदं सकलं जम्बालकल्पं कोशिकाकारकीटस्येवात्मबन्धनमात्रफलं बहिरन्तरङ्गसङ्गकदम्बकं यद्यपि यदा यदा पर्यालोच्यते तदा तदा विषय-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नेहकलाकुलितचेतसि दुष्करोऽस्य त्यागः प्रतिभासते। तथापि त्यक्तव्यमेवेदं मया पश्चाद्यद्भाव्यं तद्भविष्यति। अथवा किमत्र यद्भाव्यं न भविष्यत्येव मे किञ्चित्परित्यक्तेऽस्मिन्नसुन्दरं किन्तर्हि निरुपमश्चित्तप्रमोद एव संजनिष्यते। ततो यावदेष जीवोऽत्र परिग्रहकर्दमे गज इव निमग्नोऽवसीदति तावदेवास्यायमतिदुस्त्यजः प्रतिभासते यदा पुनरयमेतस्मान्निर्गतो भवति तदायं जीवः सति विवेके नास्य धनविषयादेः संमुखमपि निरीक्षते को हि नाम सकर्णको लोके महाराज्याभिषेकमासाद्य पुनश्चाण्डालभावमात्मनोऽभिलषेत्। तदेवमेष जीवस्त्यक्तव्यमेवेदं मया नास्ति त्यजतः कश्चिदपाय इति स्थितपक्षं करोति। ततश्च पुनः सद्बुध्या पर्यालोचयन्नेवं निश्चिनुते। यदुत प्रष्टव्या मयात्र प्रयोजने सद्धर्मगुरवः। ततो गत्वा तत्समीपे तेभ्यः सविनयं स्वाकूतं निवेदयति ततस्ते तमुपबृंहयन्ति साधु भद्र सुन्दरस्तेऽध्यवसायः केवलं महापुरुषचुण्णोऽयं मार्गः त्रासहेतुः कातरनराणां ततोऽत्र प्रवर्त्तितुकामेन भवता गाढमवलम्बनीयं धैर्यं न खलु विशिष्टचित्तावष्टंभविकलाः पुमांसोऽस्य पर्यन्तगामिनः संपद्यन्ते सेयं निकाचना विज्ञेया ततोऽयं जीवस्तद्गुरुवचनं तथेति भावतः प्रतिपद्यते। ततो गुरवः सम्यक् परीक्ष्य सन्निहितगीतार्थैश्च सार्द्धं पर्यालोच्य योग्यतामेनं प्रव्राजयेयुरिति। ततश्च समस्तसङ्गत्यागकारणं कदन्नत्याजनतुल्यं वर्त्तते। आजन्मालोचनादापनपुरस्सरं प्रायश्चित्तेन तज्जीवितव्यस्य विशोधनं विमलजलैर्भाजनक्षालनकल्पं विज्ञेयम्। चारित्रारोपणं तु तस्यैव परमान्नपूरणसदृशमवगन्तव्यमिति। भवति च सद्गुरूपदेशप्रसादादेवास्य जीवस्य दीक्षाग्रहणकाले भव्यप्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोदहेतुश्चैत्यसंघादिपूजाप्रधानोऽन्येषामपि सन्मार्गप्रवृत्तिकारणभूतो महानुस्तव इति । तथा संजायते गुरूणामपि समुत्तारितोऽस्माभिरयं संसारकान्तारादिति भावनया चित्तपरितोषः । ततः प्रवर्द्धते तेषामस्योपरि गुरुतरा दया तत्प्रसादादेवास्य जीवस्य विमलतरीभवति सद्बुद्धिः ततस्तादृशसदनुष्ठानविलोकनेन लोकतो वर्णवादोत्पत्तिः संपद्यते प्रवचनोद्भासना । ततश्चेदं तेन समानं विज्ञेयं यदवाचि कथानके । यदुत ।

धर्मबोधकरो हृष्टस्तद्दयाप्रमदोद्धुरा ।
सद्बुद्धिर्वर्द्धितानन्दा मुदितं राजमन्दिरम् ॥

ततोऽङ्गीकृतमन्दराकारविरतिमहाभारमेनं जीवं तदा श्लाघन्ते भक्तिभरनिर्भरतया रोमाञ्चाञ्चितवपुषो भव्यलोकाः । यदुत धन्यः कृतार्थोऽयं सुलब्धमस्य महात्मनो जन्म यस्यास्य सत्प्रवृत्तिदर्शनेन निश्चीयते संजाता भगवदालोकना संपन्नः सद्धर्मसूरिपादप्रसादः तत एवाविर्भूता सुन्दरबुद्धिः ततः कृतोऽनेन वहिरन्तरङ्गसङ्गत्यागः स्वीकृतं ज्ञानादित्रयं निर्द्दलितप्राया रागादयः महापुण्यवतामेष व्यतिकरः संभवति। ततोऽयं जीवः सपुण्यक इति जनैस्तदा सयुक्तिकमभिधीयत इति । ततस्तदनन्तरं यदुक्तं यथा तस्य वनीपकस्यापथ्याभावेनास्ति परिस्फुटा देहे रोगपीडा यदि स्यात्पूर्वदोषजा क्वचिदवसरे सापि सूक्ष्मा भवति तथा झटिति निवर्त्तते तच्च चारुभेषजत्रयमनवरतमासेवते ततस्तस्य धृतिबलादीनि वर्द्धन्ते केवलं बहुत्वाद्रोगसन्ततेर्नाद्यापि नीरोगो भवति विशेषस्तु महान् संपन्नः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा हि ।

यः प्रेतभूतः प्रागासीद्गाढं बीभत्सदर्शनः ।

न तावदेष संपन्नो मानुषाकारधारकः ॥

तदत्रापि जीवे तुल्यं वर्त्तते । तथा हि । भावसारं परिमुक्तगृहादिद्वन्द्वस्यास्य कारणाभावान्न भवत्येवाभिव्यक्ता काचिद्रागादिबाधा । अथ कथंचित् प्रागुपचितकर्मोदयवशेन संजायते तथापि सा सूक्ष्मैव भवति न चिरकालमवतिष्ठते ततोऽयं लोकव्यापारादिनिरपेक्षोऽनवरतं वाचनाप्रच्छनापरावर्त्तनानुप्रेक्षाधर्मकथालक्षणपञ्चप्रकारस्वाध्यायविधानद्वारेण ज्ञानमभिवर्द्धयति प्रवचनोन्नतिकरशास्त्राभ्यासादिना सम्यग्दर्शनं स्थिरतां लंभयति विशिष्टतरतपोनियमाद्यनुशीलनया चारित्रमपि सात्मीयभावं नयति तदिदं भावतो भेषजत्रयसेवनमभिधीयते । ततस्तत्परिणत्या प्रादुर्भवन्त्येवास्य धीधृतिस्मृतिबलाधानादयो गुणविशेषाः केवलमनेकभवोपात्तकर्मप्रचयप्रभवा भूयांसः खलु रागादयो भावरोगाः । ततो नायमद्यापि नीरोगः संपद्यते किं तु रोगता न च विशेषो च्छत्तमः संजातः । तथा हि । योऽयं जीवो गाढमनार्यकार्याचरणरतिः स्वसंवेदनेन प्रागनुभूतः सोऽधुना धर्माचरणेन प्रीतिमनुभवन्ननुभूयत इति । ततो यथा भेषजत्रयोपभोगमाहात्म्येनैव रोरकालाभ्यस्ततुच्छताक्लीबतालौल्यशोकमोहभ्रमादीन् भावान् विरहय्य स वनीपको मनागुदारचित्तः संपन्न इत्युक्तं तथायमपि जीवो ज्ञानाद्यभ्यासप्रभावेनैवानादिकालपरिचितानपि तुच्छतादिभावानवधीर्य किञ्चिन्मात्रं स्फीतमानस इव संजात इत्युक्तमिति लक्ष्यते । यत्पुन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रभिहितं यदुत तेन वनीपकेन सा सद्बुद्धिः पृष्ठा हृष्टेन यथा भद्रे केन कर्मणा मयैतद्भेषजत्रयमवाप्तं तयोक्तं स्वयं दत्तमेवात्र लोके लभ्यते तदेतज्जन्मान्तरे क्वचिद्दत्तपूर्वं त्वयेति। ततस्तेन चिन्तितं यदि दत्तं लभ्यते ततः पुनरपि महता यत्नेन सत्पात्रेभ्यः प्रयच्छामि येनेदं सकलकल्याणहेतुभूतं जन्मान्तरेऽपि ममाचर्य्यं संपद्यत इति। तदिदमत्रापि जीवे समानं वर्त्तते। तथा हि। ज्ञानदर्शनचारित्राचरणजनितं प्रशमानन्दं वेदयमानोऽयं जीवः सद्बुद्धिप्रसादादेवेदमाकलयति। यदुत यदिदं ज्ञानादित्रयमशेषकल्याणपरम्परासंपादकमतिदुर्लभमपि मया कथंचिदवाप्तं नेदं प्राचीनाशुभाचरणव्यतिरेकेण घटते तदस्यानुगुणं विहितं मया प्रागपि किंचिदवदातं कर्म येनेदमासादितमिति ततश्चेयमाविर्भवत्यस्य चिन्ता। यदुत कथं पुनरेतत्सकलकालमविच्छेदेन मया लप्स्यते ततोऽयमेतद्दानमेवास्य लाभकारणं निश्चिनुते ततोऽवधारयत्येवं प्रयच्छामीदमधुना यथाशक्ति सत्पात्रेभ्यो येन संपद्यते मे समीहितसिद्धिरिति। यथा चासौ द्रमकस्तथा चिन्तयन्नपि महाराजाद्यभिमतोऽहमित्यवलेपेनेदं मन्यते। यदुत यदि मां कश्चिदागत्य प्रार्थयिष्यति ततोऽहं दास्यामि नेतरथेत्यभिप्रायेण च दित्सुरपि याचकं प्रतीक्षमाणश्चिरकालमवतिष्ठते स्म तत्र च मन्दिरे ये लोकास्तेषां तद्भेषजत्रयं चारुतरमस्त्येव। येऽपि तत्र तत्कालप्रविष्टतया तेन विकलास्त एव तद्भूरि लभन्ते। ततोऽसौ वनीपको दिशो निभालयन्नास्ते न कश्चित्तज्जिघृक्षया तत्समीपमुपतिष्ठत इति। तथायमपि जीवश्चिन्तयति। यदुत विद्यते मे भगवद्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोकना बहुमतोऽहं धर्मसूरिपादानां नूनमनवरतमनुवर्त्तते ममोपरि मदनुग्रहप्रवणा तद्दया समुन्मीलिता मे मनसि लेशतः सद्बुद्धिः श्लाघितोऽहं समस्तलोकैस्तद्द्वारेण ततः सपुण्यतया किल लोकोत्तमो वर्त्तेऽहमिति । अतो मिथ्याभिमानं वितनुते भवति चात्यन्तनिर्गुणस्यापि जन्तोर्महद्भिः कृतगौरवस्य चेतसि गर्वातिरेकोऽत्र चेदमेवोदाहरणम् । अन्यथा कथमयं जीवः समस्तजघन्यतामात्मनो विस्मृत्येत्थं प्रगल्भते ततोऽयं भावयति यदि मां विनयपुरस्सरं कश्चिदर्थितया ज्ञानादिस्वरूपं प्रश्नयिष्यति ततोऽहं तत्तस्मै प्रतिपादयिष्यामि नापरथा । ततस्तादृशाकूतविडम्बितोऽयं भूयांसमपि कालमवतिष्ठमानोऽत्र मौनीन्द्रप्रवचनेन कथंचित्तथाविधं प्रयच्छकमासादयति यतोऽत्र भावतो वर्त्तन्ते ये जीवास्ते स्वत एव ज्ञानदर्शनचारित्रत्रयं सुन्दरतरमाबिभ्रते नैवंविधसम्बन्धिनमुपदेशमुपेक्षन्ते यद्यप्यधुनैव लब्धकर्मविवराः सन्मार्गाभिमुखचित्तवृत्तयोऽद्यापि विशिष्टज्ञानादिरहिता विद्यन्तेऽत्र केचिज्जीवास्तेऽप्यमुष्य प्रस्तुतजीवस्य सम्मुखमपि निरीक्षन्ते यतोऽत्र भगवन्मते विद्यन्ते भूरितमा महामतयः सद्बोधादिविधानपटवोऽन्य एव महात्मानो येभ्यस्ते प्राणिनस्तज्ज्ञानदर्शनचारित्रत्रयमपरिक्लेशेन यथेच्छया प्राप्नुवन्ति ततोऽयं जीवोऽनासादिततदर्थी व्यर्थकमात्मगुणोत्सेकमनुवर्त्तमानश्चिरमप्यासीत् न कथञ्चन स्वार्थं पुष्णीयादिति । ततस्तदनन्तरं यथा तेन सपुण्यकेन सा सद्बुद्धिस्तद्दानोपायं परिपृष्टा तया चोक्तं भद्र निर्गत्य घोषणापूर्वकं भवता दीयतामिति । ततोऽसौ तत्र राजकुले घोषयन्नुच्चैःशब्देन । यदुत मदीयं भेषजत्रयं भो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोका लात लातेत्येवं पर्यटितः। ततस्तस्मात्पूत्कुर्वतः केचित्तथा-विधास्तुच्छप्रकृतयो गृहीतवन्तोऽन्येषां पुनर्महतां महास्यप्रायः प्रति-भासते स्म। हीलितश्चानेकाकारं ततो निवेदितस्तेन सद्बुद्धे-र्वृत्तान्तः तथाभिहितं भद्र भवतो रोरभावं स्मरन्तः खल्वेते लोका भद्रमनादरेणावलोकयन्ति तेन न गृह्णन्ति भवता दीयमानं ततो यदि भद्रस्य समस्तजनग्राहणाभिलाषः ततोऽयं तदुपायो मामेक श्चेतसि परिस्फुरति। यदुत निधायेदं भेषजत्रयं विशालायां काष्ठपात्र्यां ततस्तां महाराजसदनाजिरे यत्र प्रदेशे समस्तजनाः पश्यन्ति तस्मिन् विमुच्य ततो विश्रब्धमानसोऽवतिष्ठस्व का ते चिन्ता यतोऽज्ञातस्वामिभावाः साधारणमेतदिति बुद्ध्या तथाकृतं सर्वेऽपि ग्रहीष्यन्ति किं वा तेन यद्येकोऽपि सद्गुणः पुरुष[illegible]द-द्यात् ततो भविष्यति ते मनोरथपूर्त्तिरिति। ततस्तथैव कृतं समस्तं तत्तेनेति तथायमपि जीवोऽनासादितज्ञानादिनिक्षेपपात्रः सद्बुद्धि-पर्यालोचादेवेदं जानीते। यदुत न मौनमालम्बमानैः परेषां ज्ञानाद्याधानं विधातुं पार्यते न च ज्ञानादिसंपादनं विहायान्यः परमार्थतः परोपकारः संभवति। अवाप्तसन्मार्गेण च पुरुषेण जन्मान्तरेऽपि तस्या विच्छेदनमभिलषता परोपकारकरणपरेण भवितव्यं तस्यैव पुरुषगुणोत्कर्षाविर्भावकत्वात्। यतः परोपकारः सम्यक् क्रियमाणो धीरतामभिवर्द्धयति दीनतामपकर्षति उदार-चित्ततां विधत्ते आत्मंभरितां मोचयति चेतोवैमल्यं वितनुते प्रभुत्वमाविर्भावयति ततोऽसौ प्रादुर्भूतवीर्योल्लासः प्रणष्टरजोमोहः परोपकारकरणपरः पुरुषो जन्मान्तरेष्वप्युत्तरोत्तरक्रमेण चारुतरं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्मार्गविशेषमासादयति न पुनस्ततः प्रतिपततीति तदिदमवेत्य स्वयमुपेत्यापि ज्ञानादिस्वरूपप्रकाशने यथाशक्ति प्रवर्त्तितव्यं न पराभ्यर्थनमपेक्षणीयमिति ततोऽयं जीवोऽत्र भगवन्मते वर्त्तमानो देशकालाद्यपेक्षयापरापरस्थानेषु परिभ्रमन् महता प्रपञ्चेन कुरुते भवेभ्यो ज्ञानदर्शनचारित्ररूपमार्गप्रतिपादनं सेयं घोषणा विज्ञेया । ततस्तथा कथयतोऽस्मात् प्रस्तुतजीवाद्ये मन्दतरमतयस्ते तदुपदिष्टानि ज्ञानादीनि कदाचिद् गृह्णीयुः ये पुनर्महामतयस्तेषामेष दोषपुञ्जतां प्राक्तनीनामस्यानुस्मरतां हास्यप्रायः प्रतिभासते हीलोचितश्च तेषामयं जीवः । यत्तु न हीलयन्ति स तेषामेव गुणो न पुनरस्येति । ततोऽयं चिन्तयति कथं पुनरयं ज्ञानाद्युपदेशः सर्वानुग्राहको भविष्यतीति । ततः सद्बुद्धिबलादेवेदं लक्षयति । यदुत न साक्षान्मया दीयमानोऽयममीषां समस्तलोकानामुपादेयतां प्रतिपद्यते । तस्मादेवं करिष्ये । यदुत यान्येतानि ज्ञानदर्शनचारित्राणि भगवन्मतसारभूतानि प्रतिपाद्यानि वर्त्तन्ते तान्येकस्यां ग्रन्थपद्धतौ ज्ञेयश्रद्धेयानुष्ठेयार्थविरेचने विषयविषयिणोरभेदोपचारद्वारेण व्यवस्थाप्य ततस्तां ग्रन्थपद्धतिमत्र मौनीन्द्रे प्रवचने भव्यजनसमक्षं मुत्कलां मुञ्चामि ततस्तस्यां वर्त्तमानानि तानि समस्तजनादेयानि भविष्यन्ति ।

किं च ।

यद्येकस्यापि जन्तोस्तानि भावतः परिणमेयुः ततस्तत्कर्त्तुर्मे किं न पर्याप्तमिति । तदिदमवधार्यानेन जीवेनेयमुपमितिभवप्रपञ्चानाम कथा यथार्थाभिधाना प्रकृष्टशब्दार्थविकलतया सुवर्णपात्र्यादि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यवच्छेदेन काष्ठपात्रीस्थानीयाभिहितज्ञानदर्शनचारित्रभेषजत्रया-त्तथैव विधास्यते। तत्रैवं स्थिते भो भव्याः श्रूयतां भवद्भिरियमभ्यर्थना। यथा तेनापि रोरेण तथा प्रयुक्तं तद्भेषजत्रयमुपादाय ये रोगिणः सम्यगुपभुञ्जते ते नीरोगतामास्कन्दन्ति युज्यते च तत्तेषां ग्रहीतुं तस्य ग्रहणे रोरोपकारसंपत्तेः। तथा मादृशापि भगवदव-लोकनयावाप्तसद्गुरुपादप्रसादेन तदनुभावाविर्भूतसद्बुद्धितया यदस्यां कथायां विरचयिष्यते ज्ञानादित्रयं तल्लास्यन्ति ये जीवास्तेषां तद्रागादिभावरोगनिबर्हणं संपत्स्यत एव न खलु वक्तृगुणदोषानुपेक्ष्य-वाच्याः पदार्थाः स्वार्थसाधने प्रवर्त्तन्ते। तथा हि। यद्यपि स्वयं बुभुक्षाक्षामः पुरुषः स्वामिसंबन्धिनमाहारविशेषं तदादेशेनैव तदु-चितपरिजनाय प्रकटयन् भोजनायोत्सुकं कलयति तथाप्यसावा-हारविशेषस्तं परिजनं तर्पयत्येव न वक्तृदोषेण स्वरूपं विरहयति तथेहापि योजनीयम्। तथा हि। स्वयं ज्ञानाद्यपरिपूर्णेनापि मया भगवदागमानुसारेण निवेदितानि ज्ञानादीनि ये भव्यसत्वा ग्रहीष्यन्ति तेषां रागादिबुभुक्षोपशमेन स्वास्थ्यं करिष्यन्त्येव स्वरूपं हि तत्तेषामिति।

किं च।

यद्यपि भगवत्सिद्धान्तमध्यमध्यासीनमेकैकं पदमाकर्ण्यमाणं भा-वतः सकलं रागादिरोगजालं समुन्मूलयितुं पटिष्ठमेव स्वाधीनं च तदाकर्णनं भवतां तथा यद्यपि चिरन्तनमहापुरुषोपनिबद्धकथा-प्रबन्धश्रवणेनापि सद्भावनया क्रियमाणेन रागादित्रोटनं सुन्दरतरं संभवत्येव तथाप्यमुनोपायेन संसारसागरं तरितुकामे मयि परम-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करुणैकरसाः सन्तः प्रस्तुतकथाप्रबन्धमपि सर्वेऽपि भवन्तः श्रोतुमर्हन्तीति। तदेवमेतत्कथानकं प्रायः प्रतिपदमुपनीतं यत्पुनरन्तरान्तरा किञ्चिन्नोपनीतं तस्याप्यनेनैवानुसारेण स्वबुद्ध्योपनयः कार्यः। भवत्येव गृहीतसङ्केतानामुपमानदर्शनादुपमेयप्रतीतिरत एवेदं कथानकमादावस्यैवार्थस्य दर्शनार्थमुपन्यस्तं यतोऽस्यां कथायां न भविष्यति प्रायेण निरूपनयः पदोपन्यासस्ततोऽत्रशिक्षितानां सुखेनैव तदवगतिर्भविष्यतीत्यलमतिविस्तरेणेति।

इह हि जीवमपेक्ष्य मया निजं
यदिदमुक्तमदः सकले जने।
लगति संभवमात्रतया लघो
गदितमात्मनि चारु विचार्यताम्॥
निन्दात्मनः प्रवचने परमः प्रभावो
रागादिदोषगणदौष्ट्यमनिष्टता च।
प्राक्कर्मणामतिबहुश्च भवप्रपञ्चः
प्रख्यापितं सकलमेतदिहाद्यपीठे॥
संसारेऽत्र निरादिके विचरता जीवेन दुःखाकरे
जैनेन्द्रं मतमाप्य दुर्लभतरं ज्ञानादिरत्नत्रयम्।
लब्धे तत्र विवेकिनादरवता भाव्यं सदा वर्द्धते
तस्यैवाद्य कथानकेन भवतामित्येतदावेदितम्॥

**इत्युपमितिभवप्रपञ्चायां कथायां पीठबन्धो नाम प्रथमः प्रस्तावः समाप्तः।**

---

For Private And Personal Use Only

# अथ द्वितीयः प्रस्तावः ।

अस्तीह लोके सुमेरुरिवाकालप्रतिष्ठा नीरनिधिरिव महासत्वसेविता कल्याणपरंपरेव मनोरथपूरणी जिनप्रणीतप्रव्रज्येव सत्पुरुषप्रमोदहेतुः समरादित्यकथैवानेकवृत्तान्ता निर्जितत्रिभुवनेव लब्धश्लाघा सुसाधुक्रियेवापुण्यैरतिदुर्लभा मनुजगतिर्नाम नगरी। सा च कीदृशी उत्पत्तिभूमिर्धर्मस्य मन्दिरमर्थस्य प्रभवः कामस्य कारणं मोक्षस्य स्थानं महोत्सवानामिति। यस्यामुत्तुंगानि विशालानि विचित्रकनकरत्नभित्तिविच्छित्तिविचित्राणि अतिमनोहारितया परमदेवाध्यासितानि मेरुरूपाणि देवकुलानि। यस्यां चानेकाद्भुतवस्तुस्थानभूतत्वेनापहसितामरनिवासाः क्षितिप्रतिष्ठिताद्यनेकपुरकलिता भरतादिवर्षरूपाः पाटकाः। अत्युच्चतया कुलशैलाकाराः पाटकपरिक्षेपाः। यस्याश्च मध्यभागवर्त्ती दीर्घतराकारो विजयरूपावपणपंक्तिभिर्विराजितो महापुरुषकदम्बकसंकुलः शुभाशुभमूल्यानुरूपपण्यलाभहेतुर्महाविदेहरूपो विपणिमार्गः। यस्याश्च निरुद्धचन्द्रादित्यादिगतिप्रसरतयातीतः परचक्रलंघनायामानुषोत्तरपर्वताकारः प्राकारः। तस्मात्परतो यस्यां विस्तीर्णगंभीरा समुद्ररूपा परिखा। यस्यां च सदा विबुधाध्यासितानि भद्रशालवनादिरूपाणि नानाकाननानि। यस्यां च बहुविधजन्तुसंघातजलपूरवाहिन्यो महानदीरूपा महारथ्याः। यस्यां च समस्तरथ्यावताराधारभूतौ लवणकालोदसमुद्ररूपौ द्वावेव महाराजमार्गौ। यस्यां च महाराजमार्गप्रविभक्तानि जंबुद्वीपधातकीखण्डपुष्करवरद्वीपार्द्धरूपाणि

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वसन्ति चौण्येव पाटकमण्डलानि। यस्यां च लोकसुखहेतवः समुचितस्थानस्थायिनः कल्पद्रुमरूपा भूयांसः स्थानान्तरीयनृपतय इति।

अपि च ।

तस्याः कः कोटिजिह्वोऽपि गुणसंभारगौरवम् ।
शक्तो वर्णयितुं लोके नगर्याः किमु मादृशः ॥
यस्यां तीर्थकृतोऽनन्ताश्चक्रिकेशवशौरिणः ।
संजाताः संजनिष्यन्ते जायन्तेऽद्यापि केचन ॥
या चेह सर्वशास्त्रेषु लोके लोकोत्तरेऽपि च ।
अनन्तगुणसंपूर्णा दुर्लभत्वेन गीयते ॥
उच्चावचेषु स्थानेषु हिण्डित्वा श्रान्तजन्तवः ।
प्राप्ताः खेदविनोदेन लभन्ते यत्र निर्वृतिम् ॥
विनीताः शुचयो दक्षा यस्यां धन्यतमा नराः ।
न धर्ममपहायान्यन्नूनं चेतसि कुर्वते ॥
यस्यां नार्यः सदानार्यकार्यवर्जनतत्पराः ।
पुण्यभाजः सदा धर्मं जैनेन्द्रं पर्युपासते ॥
किंवात्र बहुनोक्तेन वस्तु नास्ति जगत्त्रये ।
तस्यां निवसतां सम्यक् पुंसां यन्नोपपद्यते ॥
सा हि रत्नाकरैः पूर्णा सा विद्याभूमिरुत्तमा ।
सा मनोनयनानन्दा सा दुःखौघविनाशिका ॥
साखिलाश्चर्यभूयिष्ठा सा विशेषसमन्विता ।
सा मुनीन्द्रसमाकीर्णा सा सुश्रावकभूषिता ॥
सा जिनेन्द्राभिषेकादितोषिताखिलभव्यका ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सापवर्गाय भव्यानां सा संसाराय पापिनाम् ॥
जीवोऽजीवस्तथा पुण्यपापाद्याः सन्ति नेति वा ।
अयं विचारः प्रायेण तस्यामेव विशेषतः ॥
यस्तस्यामपि संप्राप्तो नगर्यां पुरुषाधमः ।
न युज्यते गुणैर्लोकैः सोऽधन्य इति गण्यते ॥
तां विमुच्य न लोकेऽपि स्थानमस्तीह मानवाः ।
संपूर्णं यत्र जायेत पुरुषार्थचतुष्टयम् ॥१३॥

तस्यां च मनुजगतौ नगर्यामतुलबलपराक्रमः स्ववीर्याक्रान्त-भुवनत्रयः शक्रादिभिरप्रतिहतशक्तिप्रसरः कर्मपरिणामो नाम महानरेन्द्रः ।

यो नीतिशास्त्रमुल्लंघ्य प्रतापैकरसः सदा ।
तृणतुल्यं जगत्सर्वं विलोकयति हेलया ॥
निर्दयो निरनुक्रोशः सर्वावस्थासु देहिनाम् ।
स चण्डशासनो दण्डं पातयत्यनपेक्षया ॥
स च केलिप्रियो दुष्टो लोभादिभटवेष्टितः ।
नाटकेषु परां काष्ठां प्राप्तोऽत्यन्तं विचक्षणः ॥
नास्ति मल्लो जगत्यन्यो ममेति मदविह्वलः ।
स राजोपद्रवं कुर्वन्नधनायति कस्यचित् ॥
ततो हास्यपरो लोकान् नानाकारैर्विडम्बनैः ।
सर्वान्विडम्बयन्नुच्चैर्नाटयत्यात्मनाग्रतः ॥
तेऽपि लोका महान्तोऽपि प्रतापमसहिष्णवः ।
तस्य यद्यदसौ वक्ति तत्तत्सर्वं प्रकुर्वते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततश्च ।

काांश्चित्तारकरूपेणाक्रोशन्तो वेदनातुरान् ।
नर्त्तयत्यात्मनः प्रीतिं मन्यमानो मुहुर्मुहुः ॥
यथा यथा महादुःखैर्विक्लवांस्तानुदीक्षते ।
तथा तथा मनस्युच्चैरुल्लसत्येष तोषतः ॥
कांश्चिद्दर्पोद्धुरो भूत्वा स इत्थं बत भाषते ।
भयविक्लवचित्तत्वादाज्ञानिर्देशकारकान् ॥
अरे रे तिर्यगाकारं गृहीत्वा रंगभूमिषु ।
कुरुध्वं नाटकं तूर्णं मम चित्तप्रमोदकम् ॥

ततश्च ।

काकरासभमार्जारमूषकाकारधारकाः ।
सिंहचित्रकशार्दूलमृगवेषविडम्बकाः ॥
गजोष्ट्राश्वबलीवर्दकपोतश्येनरूपिणः ।
युकापिपीलिकाकीटमत्कुणाकारधारिणः ॥
अनन्तरूपास्तिर्यञ्चो भूत्वा तच्चित्तमोदनम् ।
ते नाटकं महाहास्यकारणं नाटयन्ति वै ॥
कुब्जवामनमूकान्धवृद्धबाधिर्यसंगतैः ।
तथान्यमानुषैः पात्रैर्नाटकं नाटयत्यसौ ॥
ईर्ष्याशोकभयग्रस्तैर्देववेषविडम्बकैः ।
विहितं नाटकं दृष्ट्वा स तुष्टो बत जायते ॥
तथा यथेष्टचेष्टोऽसौ पुनस्तानेव सुन्दरैः ।
आकारैर्योजयत्युच्चैर्लोकान्नाटककाम्यया ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विडम्ब्यमानास्ते तेन प्राणिनः प्रभविष्णुना ।
त्रातारमात्मनः कंचिन्न लभन्ते कदाचन ॥
स हि विज्ञापनातीतः स्वतन्त्रो यच्चिकीर्षति ।
तत्करोत्येव केनापि न निषिद्धो निवर्तते ॥

ततश्च ।

क्वचिदिष्टवियोगार्त्तं क्वचित्संगमसुन्दरम् ।
क्वचिद्रोगभराक्रान्तं क्वचिद्दारिद्र्यदूषितम् ॥
क्वचिदापद्गतानेकसत्त्वसंघातदारुणम् ।
क्वचित्संपत्समुद्भूतमहानन्दमनोहरम् ॥
विलंघ्य कुलमर्यादां प्रधानकुलपुत्रकैः ।
अनार्यकार्यकारित्वात् क्वचिद्दर्शित विस्मयम् ॥
क्वचिदनुरक्तभर्त्तारं मुञ्चद्भिः कुलटागणैः ।
नीचगामिभिराश्चर्यं दधानं सुकुलोद्गतैः ॥
क्वचित्कृतचमत्कारं नृत्यद्भिर्हास्यहेतुभिः ।
स्वागमोत्तीर्णकर्त्तव्यासक्तपाखण्डमण्डलैः ॥
तदेवंविधवृत्तान्तप्रतिबद्धमनाकुलम् ।
संसारनाटकं चित्रं नाटयत्येष लीलया ॥
रागद्वेषाभिधानौ द्वौ मुरजौ तत्र नाटके ।
दुष्टाभिसन्धिनामा तु तयोरास्फालको मतः ॥
मानक्रोधादिनामानो गायनाः कलकण्ठकाः ।
महामोहाभिधानस्तु सूत्रधारः प्रवर्त्तकः ॥
रागाभिलाषसंज्ञोऽत्र नान्दीमङ्गलपाठकः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनेकबिब्बोककरः कामनामा विदूषकः ॥
कृष्णादिलेश्यानामानो वर्णकाः पात्रमण्डनाः।
योनिः प्रविश्यत्पात्राणां नेपथ्यं व्यवधायकम् ॥
भयादिसंज्ञा विज्ञेयाः कंशिकास्तत्र नाटके।
लोकाकाशोदरा नाम विशाला रङ्गभूमिका ॥
पुद्गलस्कन्धनामानः शेषोपस्करसंचयाः।
इत्थं समग्रसामग्रीयुक्ते नाटकपेटके ॥
नानापात्रपरावृत्त्या सर्वलोकविडम्बिनम्।
अपरापररूपेण कुर्वाणोऽसौ प्रमोदते ॥
कंचात्र बहुनोक्तेन नास्ति तद्दस्तु किञ्चन।
यदसौ मनसोऽभीष्टं न करोति महानृपः ॥

तस्य चैवंभूतस्य त्रिगण्डगलितवनहस्तिन इव सर्वत्रास्खलितप्रसरतया यथेष्टचेष्टया विचरतो यथाभिरुचितकारिणः कर्मपरिणाममहानृपतेः समस्तान्तःपुरकुलतिलकभूता ऋतुलक्ष्मीणामिव शरलक्ष्मीः शरलक्ष्मीणामिव कुमुदिनी कुमुदिनीनामिव कमलिनी कमलिनीनामिव कलहंसिका कलहंसिकानामिव राजहंसिका बह्वीनां निर्यतियदृच्छाप्रभृतीनां देवीनां मध्ये निजरूपलावण्यवर्णविज्ञानविलासकलासादिभिर्गुणैरमणीयत्वेन प्रधानतमा कालपरिणतिर्नाम महादेवी। सा च तस्य नृपतेर्जीवितमिवात्यन्तवल्लभा आत्मीयचित्तवृत्तिरिव सर्वकार्येषु यत्कृतप्रमाणा सुमन्त्रिसंहतिरिव स्वयमपि किञ्चित्कुर्वता तेन प्रष्टव्या। सुमित्रसन्ततिरिव विश्वासस्थानं किं बहुना तदायत्तं हि तस्य सकलमधिराज्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिति। अतएव चन्द्रिकामिव शशधरो रतिमिव मकरध्वजो लक्ष्मीमिव केशवः पार्वतीमिव त्रिनयनस्तां कालपरिणतिं महादेवीं सकर्मपरिणामो महानरेश्वरो विरहकातरतया न कदाचिदेकाकिनीं विरहयति। किं तर्हि सर्वत्र गच्छंस्तिष्ठंश्चात्मसन्निहितां धारयति। सापि च दृढमनुरक्ता भर्त्तरि न तद्वचनं प्रतिकूलयति। परस्परानुकूलतया हि दम्पत्योः प्रेम निरन्तरं संपद्यते नान्यथा। ततस्तथा वर्त्तमानयोस्तयोर्गाढं निरूढमागतम्। प्रेमाविच्छिन्ना तद्विचलनाशंका। ततश्चासौ कालपरिणतिर्गुरुतया महाराजप्रसादस्योन्मादकारितया यौवनस्य तुच्छतया स्त्रीहृदयस्य चञ्चलतया तत्स्वभावानां कुतूहलतया तथाविधविजृम्भनस्य सर्वत्र लब्धप्रसराहं प्रभवामीति मन्यमाना युक्ता सुषमदुःषमादिभिः शरीरभूताभिः प्रियसखीभिः परिवेष्टिता समयावलिका मुहूर्त्तप्रहरदिनाहोरात्रपक्षमासर्त्त्वयनसंवत्सरयुगपल्योपमसागरोपमावसर्पिण्युत्सर्पिणीपुद्गलपरावर्त्तादिना परिकरेण विविधकार्यकरणक्षमास्मि लोकेऽहमिति संजातोत्सेकास्मिन्नेव कर्मपरिणाममहाराजप्रवर्त्तिते चित्रसंसारनाटके तस्यैव राज्ञो निकटोपविष्टा सती साहंकारमेवं निमन्त्रयति। यदुत यान्येतानि योनिजवनिकाव्यवहितानि पात्राणि तिष्ठन्ति मद्वचनेन निर्गच्छन्तु शीघ्रमेतानि निर्गतानि उद्गतरुदितव्यापाराणि रटन्तु मातुःस्तनं पुनर्धूलीधूसराणि रंगन्तु भूमौ पुनर्लुठमानानि पदे पदे परिस्खलन्तु चरणाभ्याम्। कुर्वन्तु मूत्रपुरीषविमर्द्दनबीभत्समात्मानम्। पुनरतिक्रान्तबालभावानि धारयन्तु कुमारताम्। क्रीडन्तु नाना-

20

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधक्रीडाविब्बोकैः। अभ्यस्यन्तु सकलकलाकलापकौशलम्। पुनरतिलंघितकुमारभावान्यध्यासयन्तु तरुणतां दर्शयन्तु मन्मथगुरूपदेशानुसारेण सकलविवेकिलोकहास्यकारिणोऽनपेक्षितनिजकुलकलंकाद्यपायान् कटाक्षविक्षेपादिसारान् नानाकारविलासलासविशेषानिति। प्रवर्तन्तां पारदार्यादिष्वनार्यकार्येषु। पुनरपगततारुण्यानि स्वीकुर्वन्तु मध्यमवयस्ताम्। प्रकटयन्तु सत्त्वबुद्धिपौरुषपराक्रमप्रकर्षम्। पुनरतिवाहितमध्यमवयोभावानि संश्रयन्तु जराजीर्णताम्। दर्शयन्तु वलीपलिताङ्गभङ्गकरणविकलत्वमलजंबालाविलशरीरताम्। समाचरन्तु विपरीतस्वभावताम्। पुनर्व्यवकलितसकलजीवितभावानि देहत्यागेन नाटयन्तु मृतरूपताम्। ततः पुनः प्रविशन्तु योनिजवनिकाभ्यन्तरे। अनुभवन्तु तत्र गर्भकलमलान्तर्गतानि विविधदुःखम्। पुनश्च निर्गच्छन्तु रूपान्तरमुपादाय कुर्वन्त्वेवमनन्तवाराः प्रवेशनिर्गमनम्। तदेवं सा कालपरिणतिर्महादेवी तेषां संसारनाटकान्तर्गतानां समस्तपात्राणामवस्थितरूपेण क्षणद्वयमप्यासितुं न ददाति किं तर्हि क्षणे क्षणे वराकाणि तान्यपरापररूपेण परावर्त्तयति। किं च तेषां नृत्यतां यान्युपकरणानि पुद्गलस्कंधनामानि पूर्वमाख्यातानि तान्यप्यतिचपलस्वभावतया सात्मनः प्रभुत्वं दर्शयन्ती क्षणे क्षणे अपरापररूपं भाजयति। तानि च पात्राणि किं क्रियते तत्र राजाप्यस्या वशवर्त्ती न चान्योऽस्तिकश्चिदात्मनो मोचनोपाय इति विचिन्त्य निर्गतिकानि सन्ति। यथा यथा सा कालपरिणतिराज्ञापयति तथा तथा नानाकारमात्मानं विडम्बयतीति। किं च। कर्मपरिणामादपि सकाशात्सा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालपरिणतिरात्मन्यधिकतरं प्रभुत्वमावेदयत्येव स्वचरितैः। तथाहि। कर्मपरिणामस्य संसारनाटकान्तर्भूतजन्तुसन्तानापरापररूपकरणगोचर एव प्रभावः। तस्याः पुनः कालपरिणतेः संसारनाटकव्यतिकरातीतरूपेष्वपि निर्वृतिनगरीनिवासिलोकेषु क्षणे क्षणे अपरापरावस्थाकरणचातुर्यं समस्त्येवेत्यतः सा संजातोत्सेकातिरेका किंन कुर्यादिति। तदेवमनवरतप्रवृत्तेन परमाद्भुतभूतेन तेन नाटकेन तयोर्देवीनृपयोर्विलोकितेन संपद्यते मनः प्रमोदः। तद्दर्शनमेव तौ स्वराज्यफलमवबुध्येते इति।

तयोश्च तिष्ठतोरेवमन्यदा रहसि स्थिता।
सहर्षं वीक्ष्य राजानं सा देवी तमवोचत॥

भुक्तं यन्नाथ भोक्तव्यं पीतं यत्पेयमञ्जसा।
मानितं यन्मया मान्यं साभिमानं च जीवितम्॥

नास्त्येव तत्सुखं लोके यस्य नास्वादितो रसः।
प्राप्तं समस्तकल्याणं प्रसादद्देवपादयोः॥

दृष्टं द्रष्टव्यमप्यत्र लोके यन्नाथ सुन्दरम्।
किन्तु पुत्रमुखं देव मया नाद्यापि वीक्षितम्॥

यदि तद्देवपादानां प्रसादादेव जायते।
ततो मे जीवितं श्लाघ्यमन्यथा जीवितं वृथा॥

नरपतिरुवाच।

साधु साधूदितं देवि रोचते मह्यमप्यदः।
समदुःखसुखो देव्या वर्त्तेऽहं सर्वकर्मसु॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं च ।

न विषादोऽत्र कर्त्तव्यो देव्या यस्मात्प्रयोजने ।
आवयोरेकचित्तत्वं यत्र तज्जायते ध्रुवम् ॥

कालपरिणतिरुवाच ।

चारु चारूदितं नाथैर्विहितो मदनुग्रहः ।
भविष्यतीत्यमेवेदं बद्धो ग्रन्थिरयं मया ॥
आनन्दजलपूर्णाक्षी भर्त्तुर्वाक्येन तेन सा ।
ततः संजातविश्रम्भा सतोषा समपद्यत ॥
अन्यदा पश्चिमे यामे रजन्याः शयनं गता ।
स्वप्ने कमलपत्राक्षी दृष्ट्वैवं सा व्यबुध्यत ॥
वदनेन प्रविष्टो मे जठरे निर्गतस्ततः ।
नीतः केनापि मित्रेण नरः सर्वाङ्गसुन्दरः ॥
ततो हर्षविषादाढ्यं वहन्ती रसमुत्थिता ।
तं स्वप्नं नरनाथाय साचचक्षे विचक्षणा ॥

नरपतिरुवाच ।

स्वप्नस्यास्य फलं देवि मम चेतसि भासते ।
भविष्यत्युत्तमः पुत्रस्तवानन्दविधायकः ॥
केवलं न चिरं गेहे तावके स भविष्यति ।
धर्मसूरिवचोबुद्धः स्वार्थसिद्धिं करिष्यति ॥

कालपरिणतिरुवाच ।

जायतां पुत्रकस्तावत्पर्याप्तं तावतैव मे ।
करोतु रोचते तस्मै यत्तदेव ततः परम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततश्चाविरभूद्गर्भस्तं वहन्त्या प्रमोदतः ।
अथ मासे तृतीयेऽस्याः संजातोऽयं मनोरथः ॥
अभयं सर्वसत्त्वेभ्यः सर्वार्थिभ्यो धनं तथा ।
ज्ञानं च ज्ञानशून्येभ्यश्चेद्यच्छामि यथेच्छया ॥
तथाविधविकल्पं तं निवेद्य वरभूभुजे ।
संपूर्णेच्छा ततो जाता कृत्वेष्टं तदनुज्ञया ॥
अथ संपूर्णकालेन मुहूर्त्ते सुन्दरेऽनघा ।
सा दारकं शुभं सूता सर्वलक्षणसंयुतम् ॥

ततः ससम्भ्रममुपगम्य निवेदितं दारकस्य जन्म नरपतये प्रियनिवेदिकाभिधानया दासदारिकया दत्तं च तेनाह्लादातिरेकसंपाद्यमनाख्येयमवस्थान्तरमनुभवता तस्यैव मनोरथाधिकं पारितोषिकं दानम्। दत्तश्चानन्दपुलकोद्भेदसुन्दरं देहं दधानेन महत्तमानामादेशः। यदुत भो भो महत्तमाः देवीपुत्रजन्माभ्युदयमुद्दिश्य घोषणापूर्वकं ददध्वमनपेक्षितसारासारविचाराणि महादानानि। पूजयत गुरुजनम्। संमानयत परिजनम्। पूरयत प्रणयिजनम्। मोचयत बन्धनागारम्। वादयतानन्दमर्द्दलसन्दोहम्। नृत्यत यथेष्टमुद्दामतया। पिबत पानम्। सेवध्वं दयिताजनम्। मा गृह्णीत शुल्कम्। मुञ्चत दण्डम्। आश्वासयत भीतलोकम्। वसन्तु सुखस्थचित्ताः समस्ता जनाः। नास्तिकस्यचिदपराधगन्धोऽपीति। ततो यदाज्ञापयति देव इति विनयनतोत्तमाङ्गैः प्रतिपद्य संपादितं तद्राजशासनं महत्तमैः। निर्वर्तितोऽशेषजनचमत्कारकारी जन्मदिनमहोत्सवः। प्रतिष्ठापितं समुचिते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काले दारकस्य नरनाथेन स्वचित्तेनैवं पर्यालोच्य यतोऽस्य गर्भावतारकाले जननी सर्वाङ्गसुन्दरं नरं वदनेन प्रविशन्तं दृष्टवती ततोऽस्य भवतु भव्यपुरुष इति नाम । ततस्तदाकर्ण्य देवी राजानमुवाच देवाहमपि पुत्रकस्य किंचिन्नाम कर्त्तुमभिलषामि तदनुज्ञानातु देव इति । नृपतिराह । देवि कः कल्याणेषु विरोधोऽभिधीयतां समीहितमिति । ततस्तयोक्तं यतोऽत्र गर्भस्थे मम कुशलकर्मकरणपक्षपातिनी मतिरभूत्ततोऽस्य भवतु सुमतिरित्यभिधानम् । ततो ऽहो चीरे खण्डक्षेपकल्पमेतद्देवीकौशलेन संपन्नं यद्भव्यपुरुषस्य सतः सुमतिरित्यभिधानान्तरमिति ब्रुवाणः परितोषमुपागतो राजा विशिष्टतरं नामकरणमहोत्सवं कारयामास । इतश्चास्ति तस्यामेव मनुजगतौ नगर्यामगृहीतसङ्केता नाम ब्राह्मणी । सा जनवादेन नरपतिपुत्रजन्मनामकरणवृत्तान्तमवगम्य सखीं प्रत्याह । प्रियसखि प्रज्ञाविशाले पश्य यच्छ्रूयते महाश्चर्यं लोके यथा कालपरिणतिर्महादेवी भव्यपुरुषनामानं दारकं प्रसूतेति । ततः प्रज्ञाविशालयोक्तं प्रियसखि किमत्राश्चर्यम् । अगृहीतसङ्केताह । यतो मयावधारितमासीत् किलैष कर्मपरिणाममहाराजो निर्बीजः स्वरूपेण । इयमपि कालपरिणतिर्महादेवी वन्ध्येति । इदानीं पुनरनयोरपि पुत्रोत्पत्तिः श्रूयत इति महदाश्चर्यम् । प्रज्ञाविशालाह । अयि मुग्धे सत्यमगृहीतसङ्केतासि यतो न विज्ञातस्त्वया परमार्थः । अयं हि राजा अविवेकादिभिर्मन्त्रिभिरतिबहुबीज इति माभूद्दुर्जनचक्षुर्दोष इति कृत्वा निर्बीज इति प्रकाशितो लोके । इयमपि महादेव्यनन्तापत्यजनयित्री तथापि दुर्जनचक्षुर्दोषभयादेव तैरेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्त्रिभिर्वन्ध्येति लोके प्रख्याप्येत । तथाहि । यावन्तः क्वचित्केचिज्जन्तवो जायन्ते तेषां सर्वेषामेतावेव देवीनृपौ परमवीर्ययुक्ततया परमार्थतया जननीजनकौ ।

अन्यच्च ।

किंन दृष्टं श्रुतं वा क्वचिदपि प्रियसख्या अनयोर्नाटकं पश्यतोर्यन्माहात्म्यम् । यदुत राजा समस्तपात्राणि यथेच्छया नारकतिर्यङ्नरामरगतिलक्षणसंसारान्तर्गतानेकयोनिलक्षप्रभवजन्तुरूपेण नाटयति । महादेवी पुनस्तेषामेव महाराजजनितनानारूपाणां समस्तपात्राणां गर्भावस्थितबालकुमारतरुणमध्यमजराजीर्णमृतगर्भप्रविष्टनिष्क्रान्तादिरूपाण्यनन्तवाराः कारयतीति । अगृहीतसङ्केताह । प्रियसखि श्रुतमेतन्मया किन्तु यदि नाम कर्मपरिणामस्य राज्ञः समस्तपात्रपरावर्तने सामर्थ्यं कालपरिणतेर्वा महादेव्यास्तेषामेवापरापरावस्थाकरणशक्तिः तत्किमेतावतैवानयोर्जननीजनकत्वं संभवति । प्रज्ञाविशालाह । अयि प्रियवयस्येऽत्यन्तमुग्धासि यतो गौरपीहाङ्कथितमवबुध्यते त्वं पुनः परिस्फुटमपि कथ्यमानं न जानीषे । यतः संसार एवात्र परमार्थतो नाटकम् । तस्य च यौ जनकावेतौ परमार्थतः सर्वस्य जननीजनकाविति । अगृहीतसङ्केताह । प्रियसखि यदि समस्तजगज्जननीजनकयोरपि देवीनृपयोर्देव्या वन्ध्यात्वं नृपस्य निर्बीजत्वं दुर्जनचक्षुर्दोषभयादविवेकादिभिर्मन्त्रिभिः प्रख्यापितं लोके तत्किमित्यधुनायं भव्यपुरुषोऽनयोः पुत्रतया महोत्सवकलकलेन प्रकाशित इति ।

प्रज्ञाविशालाह । समाकर्णयास्य प्रकाशने यत्कारणम् । अस्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यामेव नगर्यां शुद्धसत्यवादी समस्तसत्त्वसङ्घातहितकारी सर्वभावस्वभाववेदी अनयोश्च कालपरिणतिकर्मपरिणामयोर्देवीनृपयोः समस्तरहस्यस्थानेष्वत्यन्तभेद्यः सदागमो नाम परमपुरुषः। अस्ति च तेन सार्द्धं मम घटना। सचान्यदा दृष्टो मया सहर्षः। पृष्टो निर्बन्धेन हर्षकारणम्। तनोक्तम्। आकर्णय भद्रे यदि कुतूहलम्। येयं कालपरिणतिर्महादेवी अनया रहसि विज्ञापितो राजा यदुत निर्विण्णाहमनेनात्मनोऽलीकवन्ध्याप्रवादेन। यतोऽहमनन्तापत्यापि दुर्जनचर्चादोषभयाद्विवेकादिभिर्मन्त्रिभिर्वन्ध्येति प्रख्यापिता लोके ममैवापत्यान्यन्यजनापत्यतया गीयन्ते। सोऽयं खेदनिमित्तेन शाटकत्यागन्यायः। तदिदं वन्ध्याभावलक्षणं ममायशःकलङ्कं चालयितुमर्हति देवः। ततो नृपेणोक्तम्। देवि ममापि निर्बीजतया समानमेतत् केवलं धीरा भव। लब्धो मया अयशःपङ्कचालनोपायः। देव्याह। कतमोऽसौ। प्रभुराह। देव्यस्यामेव मनुजगतौ महाराजधान्यां वर्त्तमानया भवत्या मन्त्रिमण्डलवचनमनपेक्ष्य प्रकाश्यते प्रधानपुत्रस्य जन्म। क्रियते महानन्दकलकलः। ततश्चिरकालरूढमप्यावयोर्निर्बीजलवन्ध्याभावलक्षणमयशःकलकं चालितं भविष्यतीति। ततः सतोषया प्रतिपन्नं महाराजवचनं देव्या कृतं च यथालोचितं ताभ्याम्। ततः प्रज्ञाविशाले योऽयं भव्यपुरुषो जातः स ममात्यन्तवल्लभः। अस्य जन्मनाहमात्मानं सफलमवगच्छामीत्यतो हर्षमुपागत इति। ततो मयोक्तम्। शोभनं ते हर्षकारणम्। ततोऽयमनेन कारणेन भव्यपुरुषो देवीनृपपुत्रतया प्रकाशित इति। अगृहीतसङ्केतयोक्तम्। साधु वयस्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साधु सुन्दरमाख्यातं भवत्या नाश्रितो मे सन्देहः। यथा च त्वत्समीपमुपगच्छन्त्या मया हट्टमार्गे समाकर्णितो लोकप्रवादस्तथा देवीनृपयोः चालितमेवायशःकलङ्कमवगच्छामि। प्रज्ञाविशालयोक्तम्। किमाकर्णितं प्रियसख्या। तयोक्तम्। दृष्टो मया तत्र बहुलोकमध्ये सुन्दराकारः पुरुषः स च सविनयं पृष्टः पौरमहत्तमैः। भगवन् य एष राजदारको जातः स कीदृग्गुणो भविष्यतीति। तेनोक्तम्। भद्राः शृणुत। समस्तगुणभारभाजनमेष वर्द्धमानः कालक्रमेण भविष्यतीत्यतो न शक्यन्तेऽस्य सर्वे गुणाः कथयितुम्। कथिता अपि न पार्यन्तेऽवधारयितुम्। तथापि लेशोद्देशतः कथयामि। भविष्यत्येष निदर्शनं रूपस्य निलयो यौवनस्य मन्दिरं लावण्यस्य दृष्टान्तः प्रश्रयस्य निकेतनमौदार्यस्य निधिर्विनयस्य सदनं गाम्भीर्यस्य आलयो विज्ञानस्य आकरो दाक्षिण्यस्य उत्पत्तिभूमिर्दाक्ष्यस्य इयत्तापरिच्छेदः स्थैर्यस्य प्रत्यादेशगोचरो लज्जायाः उदाहरणं विषयप्रागल्भ्यस्य सङ्केता धृतिस्मृतिश्रद्धाविविदिषादिसुन्दरीणामिति। अन्यच्चानेकभवाभ्यस्तकुशलकर्मतया बालकालेऽपि प्रवर्त्तमानोऽयं न भविष्यति केलिप्रियः दर्शयिष्यति जने वत्सलतां समाचरिष्यति गुरुविनयं प्रकटयिष्यति धर्मानुरागं न करिष्यति लोलतां विषयेषु विजेष्यते कामक्रोधादिकमान्तरमरिषड्वर्गं नन्दयिष्यति भवतां चित्तानीति। ततस्तदाकर्ण्य सभयं सहर्षं च दिशो निरीक्षमाणैस्तैरभिहितमहो विषमशीलतया समस्तजनविडम्बनाहेतुभूतयापि कालपरिणत्या कर्मपरिणामेन चेदमेकं सुन्दरमाचरितम्। यदाभ्यामस्यां सकलदेशविख्यातायां मनु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगतौ नगर्यामेष भव्यपुरुषः सुमतिर्जनितः । चालितान्येतज्जन-नेनाभ्यामात्मनः समस्तदुश्चरितान्यपुत्रलायशश्चेति । तदिदं समस्त-मवहितचित्तया मयाकर्णितं तत एव संजातो मे मनसि वितर्कः कथं पुनरनपत्यतया प्रसिद्धयोर्देवीनृपयोः पुत्रोत्पत्तिः । को वैष पुरुषः सर्वज्ञ इव भविष्यत्कालभाविनीं राजदारकवक्तव्यतां समस्तां कथयतीति । ततश्चिन्तितं मया प्रियसखीमेतद्द्वयमपि प्रक्ष्यि-ष्यामि । कुशला हि सा सर्ववृत्तान्तानां तत्रापनीतो भवत्याः प्रथमः सन्देहः सांप्रतं मे द्वितीयमपनयतु भवती । प्रज्ञाविशाल-योक्तम् । वयस्ये कार्यद्वारेणाहमगच्छामि स एव मम परिचितः परमपुरुषः सदागमनामा तदाचचाणोऽवलोकितो भवत्या । यतः स एवातीतानागतवर्त्तमानकालभाविनो भावान् करतलगतामल-कमिव प्रतिपादयितुं पटिष्ठो नापरः । यतो विद्यन्तेऽस्यां मनुज-गतौ नगर्य्यामन्येऽपि तादृशा अभिनिबोधावधिमनःपर्यायकेवल-नामानश्चत्वारः परमपुरुषाः केवलं न तेषां परप्रतिपादनशक्ति-रस्ति । मूका हि ते चत्वारोऽपि स्वरूपेण । तेषामपि स्वरूपं सत्पुरुषचेष्टितमवलम्बमानः परगुणप्रकाशनव्यसनितया लोकसमच-मेष एव सदागमो भगवानुत्कीर्त्तयति । अगृहीतसङ्केतयोक्तम् । वयस्ये किं पुनः कारणमेष राजदारकोऽस्य सदागमस्यात्यन्तवल्लभः । किं चैतज्जन्मनात्मानमयं सफलमवगच्छतीति श्रोतुमिच्छामि । प्रज्ञाविशालयोक्तम् । एष हि महापुरुषतया सततं परोपकार-करणपरायणः समस्तजन्तुभ्यो हितमाचरत्येव । केवलमेते पापिष्ठाः प्राणिनो नास्य वचने वर्त्तन्ते ते हि न लचयन्ति वराका यदस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगवतो माहात्म्यम्। ततस्तेभ्यो हितमुपदिशन्तमप्येनं सदागमं केचिद् दूषयन्ति केचिदपकर्णयन्ति केचिदुपहसन्ति केचिदुपदिष्टाकरणशक्तिमात्मानो दीपयन्ति केचित्तद्वचनाद्दूरत एव चस्यन्ति केचित्तं प्रतारकधिया शंकन्ते केचित्तद्वचनमादित एव नावबुध्यन्ते केचित्तद्वचनं श्रुतमपि न रोचयन्ति केचित्तद्रोचितमपि नानुतिष्ठन्ति केचिदनुष्ठानमधिकृतमपि पुनः शिथिलयन्ति ततश्चैवं स्थितेनास्य सम्यक् संपद्यते परोपकारकरणलक्षणा समीहितसिद्धिः। ततोऽयमनया सततं प्राणिनामपात्रतया गाढमुद्वेजितः भवत्येव हि गुरूणामपि निष्फलतया कुपात्रगोचरो महाप्रयासश्चित्तखेदहेतुरयं तु राजदारको भव्यपुरुष इति पात्रभूतोऽस्य प्रतिभासते। भव्यपुरुषः सन्नपि यदि दुर्मतिः स्यात् ततो न पात्रतां लभेत। अयं तु राजदारको यतः सुमतिरतः पात्रभूत एवेति कृत्वामुष्य सदागमस्यात्यन्तवल्लभः।

अन्यच्चायं सदागमो मन्यते यतोऽस्य दारकस्यैवंरूपतया जनकत्वादेव सुन्दरः कर्मपरिणामः। जननीत्वादेव चानुकूला कालपरिणतिः। ततोऽयं विमुक्तबालभावः सुन्दरतया निजस्वभावस्य प्रत्यासन्नतया कल्याणपारम्पर्य्यस्य प्रमोदहेतुतयैवंविधपुरुषाणां मद्दर्शनमस्यामुपलभ्य नियमेनास्य भविष्यति मनस्येवंविधो वितर्कः। यथा सुन्दरेयं मनुजगतिर्नगरी यस्यामेष सदागमः परमपुरुषः प्रतिवसति। ममाप्यस्ति प्रायेण योग्यता काचित्तथाविधा यया तेन सह मीलकः संपन्नः। ततोऽमुं परमपुरुषं विनयेनाराध्यास्य सम्बन्धि ज्ञानमभ्यस्यामि। ततोऽनुकूलत्वाज्जननीजन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कयोस्ताभ्यां समर्पितो भविष्यति ममैष शिष्यः। ततोऽहमस्य संक्रामितनिजज्ञानः कृतकृत्यो भविष्यामीति बुध्यायं सदागमोऽस्य सुमतेर्भव्यपुरुषस्य जन्मना सफलमात्मानमवगच्छतीति। अत एव संजातपरितोषतया जनसमचं राजदारकगुणानेष वर्णयति। अगृहीतसङ्केतयोक्तम्। प्रियसखि किंपुनरस्य भगवतः सदागमस्य माहात्म्यं यदेते पापिष्ठसत्वा नाववुध्यन्ते। अनवबुध्यमानाश्च नास्य वचने वर्त्तन्ते इति। प्रज्ञाविशालयोक्तं वयस्ये समाकर्णय। य एव सर्वत्रानिवारितशक्तिप्रसरः कर्म्मपरिणामो महाराजो यथेष्टचेष्टया संसारनाटकमावर्त्तयमानः सततमीश्वरान् दरिद्रयति सुभगान् दुर्भगयति सुरूपान् कुरूपयति पण्डितान्मूर्खयति शूरान् क्लीबयति मानिनो दीनयति तिरश्चो नारकायति नारकान्मनुष्ययति मनुष्यान्देवयति देवान् पशुभावमानयति नरेन्द्रमपि कीटयति चक्रवर्त्तिनमपि द्रमकयति दरिद्रादीनीश्वरादिभावान् प्रापयति किम्बहुना यथेष्टं भावपरिवर्त्तनं विदधानो न क्वचित्प्रतिहन्यते। अयमप्यस्य भगवतः सदागमस्य संबन्धिनोऽभिधानादपि बिभेति गन्धादपि पलायते। तथाहि। तावदेष कर्म्मपरिणाम एतान्समस्तलोकान्संसारनाटकविडम्बनया विडम्बयति। यावदयं सदागमो भगवान् झंकारयति। यदि पुनरेष झंकारयेत्ततो भयातिरेकत्रस्तसमस्तगात्रो महासमरसंघट्टे कातरनर इव प्राणान् स्वयमेव समस्तानपि मुञ्चेत्। मोचितास्त्वानेनामुष्मादनन्ताः प्राणिनः। अगृहीतसङ्केतयोक्तम्। ते किमिति न दृश्यन्ते। प्रज्ञाविशालाह। अस्ति कर्म्मपरिणाममहाराजभुक्तेरतिक्रान्ता निर्वृतिर्नाम महानगरी।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्ते सदागमसङ्कारेण कर्म्मपरिणाममप्रभवन्तमात्मन्युपलभ्य मोचिता वयं सदागमेनेति मत्वा कर्म्मपरिणामशिरसि पाददानद्वारेणोड्डीय तस्यां गच्छन्ति। गताश्च तस्यां सकलकालं समस्तोपद्रवत्रासरहिताः परमसुखिनस्तिष्ठन्ति। तेन कारणेन ते नेह दृश्यन्ते। अगृहीतसङ्केतयोक्तम्। यद्येवं किमित्येष सर्वलोकान्न मोचयति। कदर्थिता ह्येते वराकाः। सर्वेऽप्यनेनातिविषमशीलतया कर्म्मपरिणामराजेन तन्न युक्तमस्य महापुरुषशेखरस्य सत्यामेवंविधशक्तौ तत्कदर्थनस्योपेक्षणमिति। प्रज्ञाविशालाह। सत्यमेतत्केवलं प्रकृतिरियमस्य भगवतः सदागमस्य। यथा वचनविपरीतकारिषु कुपात्रेष्ववधीरणां विधत्ते। ततस्तेनावधीरिताः सन्तो नाथरहिता इति मत्वा गाढतरं कर्म्मपरिणामराजेन कदर्थ्यन्ते। ये तु पात्रभूततयास्य निर्देशकारिणो भवन्ति तामेव स्वां प्रकृतिमनुवर्त्तमानः कर्म्मपरिणामकदर्थनायाः सर्वथायं मोचयति। येऽपि लोका भगवतोऽस्य सदागमस्योपरि भक्तिमन्तोऽप्यस्य सम्बन्धिवचनं तथाविधशक्तिविकलतया संपूर्णमनुष्ठातुं न शक्नुवन्ति किं तर्हि तन्मध्याद्बहुतमं बहुतरं बहुस्तोकं स्तोकतरं स्तोकतमं वा कुर्वन्ति भक्तिमात्रकं वास्योपरि विदधति। नाममात्रं वास्य गृह्णन्ति। यदि वा येऽस्य भगवतः संबन्धिनि वचने वर्तन्ते महात्मानस्तेषामुपरि धन्याः कृतार्थाः पुण्यभाजः सुलब्धजन्मान एत इत्यादि वचनलिङ्गगम्यं पक्षपातं कुर्वन्ति। यद्वास्य भगवतोऽभिधामात्रमप्यजानानाः प्रकृत्येव ये भद्रका भवन्ति। ततश्च मार्गानुसारिसद्बन्धन्यायेनानाभोगतोऽप्यस्य वचनानुसारेण वर्त्तन्ते तानप्येवंविधाननल्पविकल्पान् लोका-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेष कर्मपरिणामो महानरेन्द्रो यद्यपि संसारनाटके कियन्तमपि कालं नाटयति तथापि सदागमस्याभिप्रेता एत इति मत्वा नाधमपात्रभावं नारकतिर्यङ्कुमानुषकदमररूपं तेषां विधत्ते।

किंतर्हि केषांचिदनुत्तरसुररूपं दर्शयति। केषाञ्चिद् ग्रैवेयकामराकारं प्रकटयति। केषाञ्चिदुपरितनकल्पोपपन्नदेवरूपतां जनयति। केषाञ्चिदधस्तनकल्पोत्पन्नमहर्द्धिलेखकरणिं कारयति। केषाञ्चिदभुवि भूरूपतां लचयति। केषाञ्चिच्चक्रवर्तिमहामण्डलिकादिप्रधानपुरुषभावं भावयति। सर्वथा प्रधानपात्ररूपतां विहाय न कदाचिद्रूपान्तरेण तान्नर्त्तयति। तत्पर्याप्तमेतावतास्य भगवतः सदागमस्य माहात्म्येन। यदेवंविधसामर्थ्ययुक्तोऽप्येष कर्मपरिणामो महानृपतिरेतद्भयाक्रान्तहृदयः खल्वेवं वर्त्तते।

अन्यच्च कथ्यते तुभ्यं कौतुकं यदि विद्यते।
रूपं सदागमस्यास्य तद् बुध्यस्व मृगेचणे॥
एष एव जगन्नाथो वत्सलः परमार्थतः।
एष एव जगत्त्राणमेष एव सुबान्धवः॥
एष एव विपद्गर्त्ते पततामवलम्बनम्।
एष एव भवाटव्यामटतां मार्गदेशकः॥
एष एव महावैद्यः सर्वव्याधिनिबर्हणः।
एष एव गदोच्छेदकारणं परमौषधम्॥
एष एव जगद्दीपः सर्ववस्तुप्रकाशकः।
प्रमादराचसात्तूर्णमेष एव विमोचकः॥
एषोऽविरतिजम्बालकल्मषचालनचमः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एष एव च योगानां दुष्टानां वरणोद्यतः ॥
शुद्धादिचरटाक्रान्ते हृतधर्मधने जने ।
समर्थो भगवानेष नान्यस्तस्य विमोचने ॥
एष एव महाघोरनरकोद्धरणक्षमः ।
पश्चुलदुःखसंघातात्त्रायकोऽप्येष देहिनाम् ॥
एष एव कुमानुष्यदुःखविच्छेदकारणम् ।
एष एव कुदेवत्वमनःसन्तापनाशकः ॥
अज्ञानतरुविच्छेदे एष एव कुठारकः ।
एष एव महानिद्राद्रावणः प्रतिबोधकः ॥
एष स्वाभाविकानन्दकारणत्वेन गीयते ।
सातासातोदयोत्पाद्य मिथ्याबुद्धिविधूनकः ॥
एष एव गुरुक्रोधवह्निविध्यापने जलम् ।
एष एव महामानपर्वतोद्दलने पविः ॥
एष मायामहाव्याघ्रीघातने सरभायते ।
एष एव महालोभनीरदैः शोषणानिलः ॥
एष हास्यविकारस्य गाढं प्रशमनक्षमः ।
एष मोहोदयोत्पाद्यां रतिं निर्नाशयत्यलम् ॥
एष एवार्त्तिग्रस्ते जनेऽस्मिन्नमृतायते ।
एष एव भयोद्भ्रान्तसत्त्वसंरक्षणक्षमः ॥
एष शोकभराक्रान्तं संधीरयति देहिनम् ।
एष एव जुगुप्सादिविकारं शमयत्यलम् ॥
एष कामपिशाचस्य दृढमुच्चाटने पटुः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एष एव च मार्तण्डो मिथ्यात्वध्वान्तसूदनः ॥
एष एव चतुर्भेदजीवितोच्छेदकारणम् ।
यतो जीवं ततोऽतीते नयत्येष शिवालये ॥
शुभेतरेण या नाम्ना कृता लोकविडम्बना ।
छिन्ते तामेष लोकानामनङ्गस्थानदानतः ॥
सर्वोत्तमत्वं भक्तानां विधायाक्षयमव्ययम् ।
एष एव छिनत्युच्चैर्नीचैर्गोत्रविडम्बनाम् ॥
एष एव च दानादिशक्तिसन्दोहकारणम् ।
एष एव महावीर्ययोगहेतुरुदाहृतः ॥
अन्यच्च ये महापापा निर्भाग्याः पुरुषाधमाः ।
न ते सदागमस्यास्य नामापि बत मन्यते ॥
ततस्तेन नरेन्द्रेण ते पूर्वोक्तविधानतः ।
संसारनाटकेनोच्चैः कदर्थ्यन्ते निरन्तरम् ॥
य एव भाविकल्याणाः पुण्यभाजो नरोत्तमाः ।
ते सदागमनिर्देशं कुर्वन्ति महदादरात् ॥
ततोऽपकर्ण्य राजानं ते विडम्बनकारिणम् ।
संसारनाटकान्मुक्ता मोदन्ते निर्वृतौ गताः ॥
राजभुक्तौ वसन्तोऽपि राजानं तृणतुल्यकम् ।
सदागमप्रसादेन मन्यन्ते ते निराकुलाः ॥
किंवात्र बहुनोक्तेन नास्ति तद्वस्तु किंचन ।
सदागमेऽस्मिन् भक्तानां सुन्दरं यन्न जायते ॥
तदेतदस्य माहात्म्यं किंचिल्लेशेन वर्णितम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशेषतः पुनः कोऽस्य गुणानां वर्णनक्षमः ॥
ततः प्रज्ञाविशालाया वाक्यमाकर्ण्य विस्मिता ।
हृदये चिन्तयत्येवं सा सन्देहमुपागता ॥
यदिदं प्रियसख्या मे विहितं गुणवर्णनम् ।
यदि सत्यमिदं तेन नास्ति तुल्यस्ततोऽपरः ॥
अतः पश्यामि तं तावत्करोमि स्वं विनिश्चयम् ।
परप्रत्ययतो ज्ञाते न सन्देहो निवर्तते ॥

ततश्चैवं विचिन्त्य तया अगृहीतसङ्केतयाभिहिता प्रज्ञाविशाला । प्रियसखि सुनिश्चितं सत्यवादिनीमपि भवतीमधुनाहमनेन सदागमस्यासम्भावनीयगुणवर्णनेनानर्गलभाषिणीमिव परिकल्पयामि । भवन्ति च मे मनसि विकल्पाः किल परिचितमिति कृत्वा एषा वर्णयति । अन्यथा कथं कर्मपरिणामो महानरेन्द्रः कुतश्चिद्बिभियात् । कथं वैकच पुरुषे एतावान् गुणसंघातः संभाव्येत । न च प्रियसखी कदाचन मां विप्रलम्भयति । ततः सन्देहापन्नं दोलायते मे मन अतस्तमात्मपरिचितं परमपुरुषं विशेषतो दर्शयितुमर्हति मे भवती ।

प्रज्ञाविशालाह । सुन्दरमेतदभिप्रेतमेव मे हृदयस्याभिगमनीयो द्रष्टव्य एवासौ भगवान् । ततो गते द्वे अपि तन्मूलम् । दृष्टश्च ताभ्यां तस्य महाविजयरूपावपणपङ्क्तिभिर्विराजितस्यानेकमहापुरुषाकीर्णस्य महाविदेहरूपस्य विपणिमार्गस्य मध्ये वर्त्तमानः प्रधानजनपरिकरितो भूतभवद्भविष्यद्भावस्वभावाविर्भावनं कुर्वाणो भगवान् सदागमः । ततः प्रत्यासन्नीभूय प्रणम्य तच्चरणयुगलमुप-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्टे ते तन्निकटे । तदाकृतिदर्शनादेव संचक्रमाणं मुहुर्मुहुर्वि-लोकनादगृहीतसङ्केतायाः प्रनष्ट इव सन्देहो वर्द्धितचित्तानन्दः समुत्पन्नो विश्रम्भो मतात्मनः कृतार्थता तद्दर्शनेनेति । ततः प्रज्ञाविशालां प्रत्यभिहितमनया ।

अपि च ।

धन्यासि त्वं महाभागे सुन्दरं तव जीवितम् ।
यस्याः परिचयोऽनेन पुरुषेण महात्मना ॥
अहं तु मन्दभाग्यास्मि वञ्चितास्मि पुरा यया ।
न दृष्टोऽयं महाभागः पुरुषः पूतकल्मषः ॥
नाधन्याः प्राप्नुवन्तीमं भगवन्तं सदागमम् ।
निर्लक्षणनरो नैव चिन्तामणिमवाप्नुते ॥
संजाता पूतपापाहमधुना मृगलोचने ।
तव प्रसादाद्दृष्टेमं महाभागं सदागमम् ॥
त्वया कमलपत्राक्षि येऽस्य संवर्णिता गुणाः ।
ते तथैव मया सर्वे दर्शनादेव निश्चिताः ॥
नाहं विशेषतोऽद्यापि वेद्म्यस्य गुणगौरवम् ।
नास्त्यन्यः पुरुषोऽनेन तुल्य एतत्तु लक्षये ॥
आसीन्मे मन्दभाग्यायाः पुरेमं प्रति संशयः ।
गुणेषु दर्शनादेव सांप्रतं प्रलयं गतः ॥
निगूढचरितासि त्वं सत्यं सद्भाववर्जिता ।
यया न दर्शितः पूर्वं ममैषः पुरुषोत्तमः ॥
तत्सांप्रतं मयाप्यस्य भवत्या सह सुन्दरि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिने दिने समागत्य कर्त्तव्या पर्युपासना ॥
गुणाः स्वरूपमाचारं चित्ताराधनमुच्चकैः ।
त्वयास्य सर्वं चार्वङ्गि ज्ञातं कालेन भूयसा ॥
अतो ममापि तत्सर्वं निवेद्यं वल्गुभाषिणि ।
येनाहमेनमाराध्य भवामि तव सन्निभा ॥
ततः प्रज्ञाविशालाह चारुचारुदितं प्रिये ।
यद्येवं कुरुषे हन्त सफलो मे परिश्रमः ॥
अहो विशेषविज्ञानमहो वचनकौशलम् ।
अहो कृतज्ञता गुर्वी तवेयं चारुलोचने ॥
सङ्केताभावतो भद्रे न जानीषे सदागमम् ।
तथापि परमार्थेन योग्यता तव विद्यते ॥
एवं च कुर्वती नित्यं मया सार्द्धं विचारणम् ।
अज्ञातपरमार्थापि ज्ञाततत्त्वा भविष्यसि ॥
ततः संजाततोषे ते नमस्कृत्य सदागमम् ।
प्रियसख्यौ गते तावत्स्वस्थानं तच्च वासरे ॥
एवं दिने दिने सख्योः कुर्वत्योः सेवनां तयोः ।
सदागमस्य गच्छन्ति दिनानि किल लीलया ॥
अथान्यदा विशालाक्षी प्रोक्ता सा तेन धीमता ।
प्रज्ञाविशाला सानन्दं पुरुषेण महात्मना ॥
एष सर्वगुणाधारो भवत्या स्नेहनिर्भरः ।
बालकालात्समारभ्य कर्त्तव्यो राजदारकः ॥
गत्वा राजकुलं भद्रे विधाय दृढसङ्गतम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आवर्ज्य जननीचित्तं धात्री भव कथञ्चन ॥
त्वयि संजातविश्रम्भो येनायं राजदारकः ।
सुखं विवर्द्धमानोऽपि प्रयाति मम वश्यताम् ॥
ततो निक्षिप्य निःशेषमात्मीयं ज्ञानकौशलम् ।
सुपात्रेऽत्र भविष्यामि कृतकृत्योऽहमञ्जसा ॥
ततो यदादिशत्यार्य इत्युक्त्वा नतमस्तका ॥
प्रज्ञाविशाला तद्वाक्यमनुतस्थौ कृतादरा ॥
अथासौ भव्यपुरुषस्तां धात्रीं प्राप्य सुन्दराम् ।
लालमानः सुखेनास्ते देववद्दिवि लिलया ॥
क्रमात्संवर्द्धमानोऽसौ कल्पपादपसंनिभः ।
संजातः सर्वलोकानां लोचनानन्ददायकः ॥
ये ते सदागमेनोच्चैर्भाविनो वर्णिता गुणाः ।
आविर्भूताः समस्तास्ते कौमारे तस्य तिष्ठतः ॥
ततः परिचयं कर्तुं तया प्रज्ञाविशालया ।
नीतः सदागमाभ्यर्णं सोऽन्यदा राजदारकः ॥
स च तं वीक्ष्य पुण्यात्मा महाभागं सदागमम् ।
भाविभद्रतया धन्यः परं हर्षमुपागतः ॥
ततः प्रणम्य सद्भक्त्या निषण्णोऽसौ तदन्तिके ।
आकर्णितं मनोहारि तद्वाक्यममृतोपमम् ॥
आवर्जितो गुणैस्तस्य शशाङ्ककरनिर्मलैः ।
स भव्यपुरुषश्चित्ते ततश्चेदमचिन्तयत् ॥
अस्याहो वाक्यमाधुर्यमहो रूपमहो गुणाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहो मे धन्यता येन नरोऽयमवलोकितः ॥
धन्येयं नगरी यस्यां वसत्येष सदागमः ।
संजातः पूतपापोऽहं दर्शनादस्य धीमतः ॥
नूनमेष भवद्भूतभाविभावविभावनम् ।
भावतो भगवानुच्चैः करोत्येषा सदागमः ॥
तदेष सदुपाध्यायो यदि संपद्यते मम ।
ततोऽहमस्य नेदिष्ठो गृह्णामि सकलाः कलाः ॥
ततः प्रज्ञाविशालायास्तेनाकूतं निवेदितम् ।
जंनीजनकयोर्गत्वा तयापि कथितं वचः ॥
प्रादुर्भूतस्तयोस्तोषः प्रविधाय महोत्सवम् ।
ततः समर्पितस्ताभ्यां सोऽन्यदा शुभवासरे ॥

कथम् ।

कृतकौतुकसत्कारः परिपूज्य सदागमम् ।
स भव्यपुरुषस्तस्य शिष्यत्वेन निवेदितः ॥
सिताम्बरधरो धीरः सितभूषणभूषितः ।
सितपुष्पभरापूर्णः सितचन्दनचर्चितः ॥
ततो महाप्रमोदेन विनयेन विनेयताम् ।
प्रपन्नस्तस्य पुण्यात्मा कलाग्रहणकाम्यया ॥
ततो दिने दिने याति स पार्श्वे तस्य धीमतः ।
सदागमस्य जिज्ञासुः सार्द्धं प्रज्ञाविशालया ॥
अन्यदा हट्टमार्गेऽसौ लीलयास्ते सदागमः ।
स भव्यपुरुषोऽभ्यर्णे युक्तः प्रज्ञाविशालया ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स भूरिनरसङ्घातपरिवारितविग्रहः।
अशेषभावसद्भावं वदन्नास्ते सदागमः॥
अथागृहीतसङ्केता सख्याः पार्श्वे समागता।
नत्वा सदागमं सापि निषण्णा शुद्धभूतले॥
पृष्टा प्रियसखीवार्तां मानितो राजदारकः।
स्थिता सदागममुखं पश्यन्ती स्तिमितेक्षणा॥

इतश्चैककालमेवैकस्यां दिशि समुल्लसितो वा कलकलः। श्रूयते निरसविषमडिण्डिमध्वनिः। समाकर्ण्यते दुर्दान्तलोककृतोट्टहासः। ततः पातिता तदभिमुखा समस्तपर्षदा दृष्टिः। यावद्दिलिप्तसमस्तगात्रो भस्मना चर्चितो गैरिकहस्तकैः खचितस्तृणमषीपुण्ड्रकैर्विनाटितो लम्बमानया कणवीरमुण्डमालया विडम्बितो वक्षस्थले घूर्णमानया शरावमालया धारितातपत्रो जरत्पिटकखण्डेन बद्धलोप्त्रो गलैकदेशे आरोपितो रासभे वेष्टितः समन्ताद्राजपुरुषैः निन्द्यमानो लोकेन प्रकम्पमानशरीरः तरलतारमितश्चेतश्चातिकातरया भयोद्भ्रान्तहृदयो दशापि दिशो निरीक्षमाणो नातिदूरादेव दृष्टः संसारिजीवनामा तस्करः।

तं च दृष्ट्वा संजाता प्रज्ञाविशालायाः करुणा। चिन्तितमनया यदि परमस्य वराकस्यामुष्मात् सदागमात्सकाशात् त्राणं नान्यस्मात्कुतश्चित्ततो गता तदभिमुखम्। दर्शितोऽस्मै यत्नेन सदागमोऽभिहितं च। भद्रामुं भगवन्तं शरणं प्रतिपद्यस्वेति। स च सदागमसुपलभ्य सहसा संजाताश्वास इव किञ्चिच्चिन्तयन्ननाख्येयमवस्थान्तरं वेदयमानः। पश्यतामेव लोकानां निमीलिताक्षः पतितो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धरणीतले । स्थितः कियन्तमपि कालं निश्चलः । किमेतदिति विस्मिता नागरिकाः । लब्धा कथञ्चिच्चेतना ततः समुत्थाय सदागममुद्दिश्यासौ त्रायध्वं नाथास्त्रायध्वमिति महता शब्देन पूत्कृतवान् । ततो माभैषीरभयमभयं तवेत्याश्वासितोऽसौ सदागमेन ।

ततस्तदाकर्ण्य प्रपन्नोऽयं सदागमस्य शरणम् । अङ्गीकृतश्चानेनातो न गोचरोऽधुना राजशासनस्येति विचिन्त्य विदितसदागममाहात्म्याः सभयाः प्रत्यक्पदैरुपसृताः कम्पमानास्ते राजपुरुषाः स्थिता दूरदेशे । ततो विश्रब्धीभूतो मनाक् संसारिजीवः पृष्टोऽगृहीतसङ्केतया । भद्र कतमेन व्यतिकरेण गृहीतस्त्वमेभिः कृतान्तसदृशै राजपुरुषैरिति ।

सोऽवोचदलमनेन व्यतिकरेण । अनाख्येयः खल्वेष व्यतिकरः । यदि वा जानन्त्येवामुं व्यतिकरं भगवन्तः सदागमनाथाः किमाख्यातेन । सदागमेनोक्तम् । भद्र महत्कुतूहलमस्या अतस्तदपनोदार्थं कथयतु भवान् को दोषः । संसारिजीवेनोक्तं यदाज्ञापयन्ति नाथाः । केवलं जनसमक्षमात्मविडम्बनां कथयितुं न पारयामि । ततो विविक्तमादिशन्तु नाथा इति । ततः सदागमेन विलोकिता परिषत् स्थिता गत्वा दूरदेशे । प्रज्ञाविशालाप्युत्तिष्ठन्ती त्वमप्याकर्णयस्वेति भणित्वा धारिता सदागमेन । तस्याश्च निकटवर्त्ती सदागमवचनेनैव भव्यपुरुषोऽपि स्थित एव । ततस्तेषां चतुर्णामपि पुरतः केवलमगृहीतसङ्केतामुद्दिश्य प्रजल्पितोऽसौ संसारिजीवः ।

अस्तीह लोके आकाशप्रतिष्ठमनन्तजनाकुलमसंव्यवहारं नाम नगरम् । तत्र सर्वस्मिन्नेव नगरेऽनादिवनस्पतिनामानः कुलपुत्रकाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिवसन्ति । तस्मिंश्चास्यैव कर्म्मपरिणामस्य महानरेन्द्रस्य संबन्धिनावत्यन्ताबोधतीव्रमोहोदयनामानौ सकलकालस्थायिनौ बलाधिकृतमहत्तमौ प्रतिवसतः । ताभ्यां चात्यन्ताबोधतीव्रमोहोदयाभ्यां तत्र नगरे यावन्तो लोकास्ते सर्वेऽपि कर्म्मपरिणाममहाराजादेशेनैव सुप्ता इवास्पष्टचैतन्यतया मत्ता इव कार्याकार्यविचार शून्यतया मूर्च्छिता इव परस्परं लोलीभूततया मृता इव लक्ष्यमाणविशिष्टचेष्टाविकलतया निगोदाभिधानेष्वपवरकेषु निक्षिप्य संपिण्डिताः सकलकालं धार्यन्ते । अत एव च ते लोका गाढसम्मूढतया न किञ्चिच्चेतयन्ति । न भाषन्ते । न विशिष्टं चेष्टन्ते । नापि ते छिद्यन्ते । न भिद्यन्ते न दह्यन्ते । न क्लाव्यन्ते । न कुथ्यन्ते । न प्रतिघातमापद्यन्ते । न व्यक्तां वेदनामनुभवन्ति। नाप्यन्यं कंचन लोकव्यवहारं कुर्वन्ति । इदमेव च कारणमुररीकृत्य तन्नगरमसंव्यवहारमिति नाम्ना गीयते । तत्र नगरे संसारिजीवनामाहं वास्तव्यः कुटुम्बिकोऽभूवम् । गतश्च तत्र वसतो ममानन्तः कालः । अन्यदा दत्ता स्थाने तीव्रमोहोदयमहत्तमे तन्निकटवर्त्तिनि चात्यन्तताबोधबलाधिकृते प्रविष्टा समुद्रवीचिरिव मौक्तिकनिकरवाहिनी प्रावृट्काललक्ष्मीरिव समुन्नतपयोधरा मलयमेखलेव चन्दनगन्धधारिणी वसन्तश्रीरिव रुचिरपत्रतिलकाभरणा तत्परिणतिर्नाम प्रतीहारी ।

तया चावनितलन्यस्तजानुहस्तमस्तकया विधाय प्रणामं विरचितकरपुटमुकुलया विज्ञापितं देवैष सुगृहीतनामधेयस्य देवस्य कर्म्मपरिणामस्य संबन्धी तन्नियोगो नाम दूतो देवदर्शनमभिलषन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतीहारभूमौ तिष्ठति तदेवमवस्थिते देवः प्रमाणमिति। ततो निरीक्षितं तीव्रमोहोदयेन ससंभ्रममत्यन्ताबोधवदनम् । स प्राह । शीघ्रं प्रवेशयतु तं भवती । ततो यदाज्ञापयति देव इत्यभिधाय प्रवेशितः प्रतिहार्या तन्नियोगः । तेनापि सविनयमुपसृत्य प्रणतो महत्तमो बलाधिकृतस्वाभिनन्दितस्ताभ्यां दापितमासनम् ।

उपविष्टोऽसौ कृतोचिता प्रतिपत्तिः । ततो विमुच्यासनं बध्वा करमुकुलं कृत्वा ललाटतटे तीव्रमोहोदयेनोक्तम् । अपि कुशलं देवपादानां महादेव्याः शेषपरिजनस्य च । तन्नियोगेनोक्तम् । सुष्ठु कुशलम् । तीव्रमोहोदयेनोक्तम् । अनुग्रहोयमस्माकं यदत्र भवतः प्रेषणेनानुस्मृता वयं देवपादैरित्यतः कथय यदागमनप्रयोजनमिति । तन्नियोगेनोक्तम् । कोऽन्यो भवन्तं विहाय देवपादानामनुग्रहार्हः । आगमनप्रयोजनं पुनरिदम् । अस्ति तावदिदितैव भवतां विशेषेण माननीया प्रष्टव्या सर्वप्रयोजनेषु अलङ्घनीयवाक्या अचिन्त्यमाहात्म्या च भगवती लोकस्थितिर्नाम देवपादानां महत्तमभगिनी ।

तस्याश्च तुष्टैर्देवपादैः सकलकालमेषोऽधिकारो वितीर्णः । यथास्ति तावदेषोऽस्माकं सर्वदा परिपन्थी कथञ्चिदुन्मूलयितुमशक्यः सदागमः परमशत्रुः । ततोऽयमस्मद्बलमभिभूय क्वचिदान्तरान्तरा लब्धप्रसरतयास्मदीयभुक्तेर्निस्सारयति कांश्चिल्लोकान् । स्थापयति चास्माकमगम्यायां निर्वृतौ नगर्याम् । एवं च स्थिते विरलीभविष्यत्येष कालेन लोकः । ततः प्रकटीकरिष्यत्यस्माकमयशस्तत्र सुन्दरमेतत् । अतो भगवति लोकस्थिते त्वयेदं विधेयम् । अस्ति



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ममाविचलितरूपमेतदेव प्रयोजनमपेक्ष्य संरक्षणीयमसंव्यवहारं नाम नगरम्। ततो यावन्तः सदागमेन मोचिताः सन्तो मदीयभुक्ते-र्निर्गत्य निर्वृतिनगर्यां गच्छन्ति लोकास्तावन्त एव भगवत्या तस्मा-दसंव्यवहारनगरादानीय मदीयशेषस्थानेषु प्रचारणीयाः। ततः प्रचुरलोकतया सर्वस्थानानां सदागममोचितानां न कश्चिद्वार्त्तामपि प्रश्नयिष्यति। यतो न भवत्यस्माकं छायाम्लानिरिति। ततो महाप्रसाद इति कृत्वा प्रतिपन्नः सोऽधिकारो लोकस्थित्या। अहं च यद्यपि देवपादोपजीवी तथापि विशेषतो लोकस्थितेः प्रतिबद्धः। अतएव तद्द्वारेण तन्नियोग इति प्रसिद्धोऽहं लोके। मोचिताश्च कियन्तोऽपि सांप्रतं सदागमेन लोकाः। ततोऽहं भगवत्या लोकस्थित्या युष्मन्मूलं तावतां लोकानामानयनायेह प्रहित इति। एतदाकर्ण्य भवन्तः प्रमाणम्। ततो यदाज्ञापयति भग-वतीति प्रतिपन्नं तच्छासनं महत्तमेन बलाधिकृतेन च। ततो महत्तमेनोक्तम्। भद्र तन्नियोग तावदुत्तिष्ठ दर्शयामो भद्रस्यासं-व्यवहारनगरलोकप्रमाणम्। येन गतः सन् निवेदयसि त्वं देव-पादेभ्यः। कालान्तरेऽपि येन न भवति तेषां लोकविरलीभवनचिन्ता। तन्नियोगेनोक्तं यदाज्ञापयत्यार्यः। ततः समुत्थितास्त्रयोऽपि नगरं निरीक्षितुम्। दर्शिताः समुत्थितकरेण पर्यटता तीव्रमोहोदयेना-संख्येया गोलकनामानः प्रासादास्तन्नियोगस्य। तन्मध्यवर्त्तिनश्चासं-ख्येया एव दर्शिता निगोदनामानोऽपवरकाः। तेच विद्वद्भिः साधा-रणशरीराणीत्यभिधीयन्ते। तदन्तर्भूताश्च दर्शिता अनन्ता लोकाः। ततो विस्मितस्तन्नियोग उक्तो महत्तमेन भद्र दृष्टं नगरप्रमाणम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स प्राह। सुष्ठु दृष्टम्। ततः सहस्ततालमट्टहासेन विहस्य तीव्रमोहोदयेनोक्तम्। पश्यत विमूढतां सदागमस्य। स हि किल सुगृहीतनामधेयस्य देवस्य कर्मपरिणामस्य संबन्धिनं लोकं निर्वाहयितुमभिलषति। न जानीते वराकस्तत्प्रमाणम्। तथा ह्यत्र नगरे तावदसंख्येयाः प्रासादास्तेषु प्रत्येकमसंख्येया एवापवरकाः। तेषु चैकैकस्मिन्ननन्तलोकाः प्रतिवसन्ति। अनादिरूढश्चास्य सदागमस्यायं लोकनिर्वाहणाग्रहरूपो ग्रहः। तथापि तेनेयता कालेन निर्वाहयता यावन्तोऽत्रैकस्मिन्नपवरके लोकास्तेषामनन्तभोगमात्रं निर्वाहितम्। ततः केयं देवपादानां लोकविरलीभवनचिन्ता। तन्नियोगेनोक्तम्। सत्यमेतदस्त्येव चायं देवस्याप्यवष्टम्भः। विशेषतः पुनर्युष्मद्वचनमेतदहं कथयिष्यामि।

अन्यच्चोक्तं भगवत्या लोकस्थित्या यथा न भवता कालक्षेपः कार्यः। तत्संपाद्यतां शीघ्रं तदादेश इति। ततः स्थितावुत्सारके महत्तमबलाधिकृतौ। महत्तमेनोक्तम्। केऽत्र प्रस्थापना योग्या इति। अत्यन्ताबोधः प्राह। आर्य किमत्र बहुनालोचितेन ज्ञाप्यतामेष व्यतिकरो नागरलोकानाम्। दीयतां पटहकः। क्रियतां घोषणा। यथा देवकर्मपरिणामादेशेन कियद्भिरपि लोकैरितःस्थानात्तदीयशेषस्थानेषु गन्तव्यम्। अतो येषामस्ति भवतां तत्र गमनोत्साहस्ते स्वयमेव प्रवर्त्तन्तामिति। ततोऽनुकूलतया शेषस्थानानामुत्सङ्कलिता वयमिति च मत्वा भूयांसो लोकाः स्वयमेव प्रवर्त्तिष्यन्ते। ततो विशेषतो नेयलोकसंख्यां दृष्ट्वा तन्नियोगं तेषां मध्याद्येऽस्मभ्यं रोचिष्यन्ते तानेव तावत्संख्यान् प्रहिष्याम इति। महत्तमेनोक्तम्। भद्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वयमपि परिहितस्य भक्तिं न जानीषे त्वम् । यतोऽमीभिर्लोकैर्न कदाचिद्दृष्टं स्थानान्तरम् । अतो न जानन्ति तत्स्वरूपमपि किम्पुनस्तस्यानुकूलताम् । अनादिप्रवाहेण चात्रैव वसन्तो रतिमुपगताः खल्वेते । तथा नादिसम्बन्धेनैव रूढस्नेहाः परस्परं नेच्छन्ति वियोगम् । तथा हि । पश्यतु भद्रो येऽत्र लोका एकैकस्मिन्नपवरके वर्त्तन्ते तेऽतिस्निग्धतयात्मनो गाढं सम्बन्धमुपदर्शयन्तः समकमुच्छ्वसन्ति । समकं निःश्वसन्ति । समकमाहारयन्ति । समकं निर्हारयन्ति । एकस्मिन्म्रियमाणे सर्वे म्रियन्ते । एकस्मिन् जीवति सर्वेऽपि जीवन्ति । तत्कथमेते स्थानान्तरगुणज्ञानरहिता एवंविधप्रेमबद्धात्मानश्च स्वयमेव प्रवर्त्तिष्यन्ते । तस्मादपरः कश्चित्प्रस्थानोचितलोकपरिज्ञानोपायश्चिन्त्यतां भवतेति । ततः पर्याकुलीभूतो बलाधिकृतः किमत्र विधेयमिति । इतश्चास्ति भवितव्यता नाम मम भार्या सा च शाटिकाबद्धः सुभटो वर्त्तते । यतोऽहं नाममात्रेणैव तस्या भर्त्तेति प्रसिद्धः । परमार्थतः पुनः सैव भगवती मदीयगृहस्य शेषलोकगृहाणां च सम्बन्धिनीं समस्तामपि कर्त्तव्यतां तन्त्रयति । यतः सा अचिन्त्यमाहात्म्यतया स्वयमभिलषितमर्थं घटयन्ती नापेक्ष्यतेऽन्यसम्बन्धिनं पुरुषकारं सहायतया । न विचारयति पुरुषानुकूलप्रतिकूलभावम् । न गणयत्यवसरम् । न निरूपयत्यापद्गतम् । न निवार्यते सुरगुरुणापि बुद्धिविभवेन । न प्रतिस्खल्यते विबुधपतिनापि पराक्रमेण । नोपलभ्यते योगिभिरपि तस्याः प्रतिविधानोपायोऽत्यन्तमसम्भावनीयमप्यर्थं सा भगवती स्वकरतलवर्त्तिनमिव लीलया संपादयति । लक्षयति च प्रत्येकं समस्तलोकानां यस्य यदा यत्र यथा यावच्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोजनं कर्त्तव्यं ततस्तस्य तदा तत्र तथैव तावत्तदेव प्रयोजनं रचयन्ती न त्रिभुवनेनापि निवारयितुं पार्यते । किं च यदि शक्रचक्रवर्त्यादीनामपि कथ्यते यथा भद्रिका भवतामुपरि भवितव्यतेति । ततस्तेऽपि तुष्यन्ति हृदये दर्शयन्ति मुखप्रसादं विस्फारयन्ति विलोचने ददति कथकाय पारितोषिकं कुर्वन्त्यात्मनि बहुमानं कारयन्ति महोत्सवं वादयन्त्यानन्ददुन्दुभिं चिन्तयन्त्यात्मनः कृतकृत्यतां मन्यन्ते सफलं जन्मेति । किं पुनः शेषलोका इति । अथ तेषामपि शक्रचक्रवर्त्यादीनां कथ्यते यथा न भद्रिका भवतामुपरि भवितव्यतेति । ततस्ते कम्पन्ते भयातिरेकेण । प्रतिपद्यन्ते दीनताम् । कुर्वन्ति चणेन कृष्णमुखम् । निमीलयन्ति वीचणे रुष्यन्ति कथकाय । समाश्वास्यन्ते चिन्तया । गृह्यन्ते रणरणकेन । परित्यजन्ति शोकातिरेकेणेतिकर्त्तव्यताम् । आलोचयन्ति तत्प्रसादार्थमनेकोपायान् । किं बहुना । न लभन्ते तस्यामनुष्ठायां मनागपि चित्तनिर्वृतिम् । कथमेषापि पुनः प्रगुणीभविष्यतीत्युद्वेगेन । किं पुनः सामान्यजना इति । सा पुनर्भगवती यदात्मने रोचते तदेव विधत्ते । न परं विज्ञापयन्तं विलपन्तं प्रतिकुर्वन्तं वापेचते । अहमपि तद्भयोद्भ्रान्तचित्तो यदेव सा किञ्चित्कुरुते यथेष्टया चेष्टया तदेव बहु मन्यमानस्तस्याः पतिरपि कर्मकर इव जय देवि जय देवीति ब्रुवाणस्तिष्ठामि ।

अपि च ।

सा सर्वत्र कृतोद्योगा सा ज्ञातभुवनोचिता ।
सा जागर्त्ति प्रसुप्तेषु सा सर्वस्य निरूपिका ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा केवलं जगत्यत्रं विचरन्ती निराकुला ।
न कुतश्चिद्विभेत्युच्चैर्मत्तावद्गंधहस्तिनी ॥
सा कर्म्मपरिणामेन महाराजेन पूजिता ।
यतोऽनुवर्त्तयत्येव तामेषोऽपि प्रयोजने ॥
तथान्येऽपि महात्मानः कुर्वन्ति स्वं प्रयोजनम् ।
यान्तोऽनुकूलतां तस्या यत एतदुदाहृतम् ॥
बुद्धिरुत्पद्यते तादृग् व्यवसायश्च तादृशः ।
सहायास्तादृशाश्चैव यादृशी भवितव्यता ॥

तस्याश्च मदीयगृहिण्या भवितव्यतायाः सम्बन्धिनमेनं गुणसन्दोहं जानात्येव सोऽत्यन्तावोधो बलाधिकृतः। ततस्तस्य तदा पर्यालोचयतश्चेतसि परिस्फुरितम्। अये किमहमेवं सत्यभ्युपाये चिन्तयात्मानमाकुलयामि। यतो जानात्येव सा संसारिजीवपत्नी भवितव्यता येऽत्र प्रस्तापनोचिता लोकास्तेषां स्वरूपमिति। अतस्तामेवाहूय पृच्छामि। ततः कथितस्तीव्रमोहोदयाय तेन स्वाभिप्रायः सुन्दरमेतदिति बहुमतं तस्यापि तस्या आकारणम्। ततः प्रहितः पुरुषः समाहूता भवितव्यता। समागता वेगेन प्रवेशिता प्रतिहार्या। महाप्रभावेयं सर्वापि स्त्री किल देवतेति विचिन्त्य कृतं तस्याः पादपतनं वाचिकं महत्तमबलाधिकृताभ्याम्। अभिनन्दितौ तौ तयाशीर्वादेन। दापितमासनं उपविष्टा भवितव्यता। ततो बलाधिकृताभिमुखं महत्तमेन चालिता भ्रूलता। ततस्तेन कथयितुमारब्धस्तस्येतन्नियोगप्रतिकरः। ततो हसितं तया। स प्राह। भद्रे किमेतत्। भवितव्यताह। न किं चित्। बलाधि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृतेनोक्तं तत्किमकाण्डे हसितम् । भवितव्यताह । अतएव यतो न किञ्चिदिदम् । बलाधिकृतेनोक्तम् । कथं भवितव्यताह सत्यमत्यन्तावोधोऽसि यस्त्वमेनमपि व्यतिकरं मह्यं कथयसि । कृतोद्योगाहमेवंविधेषु व्यतिकरेषु । लक्षयाम्यनन्तकालभाविनोऽपि सर्वव्यतिकरानहम् । किं पुनः सांप्रतिकान् । अतो निष्प्रयोजनत्वान्न किञ्चिदेतत्त्वदीयकथनं ममेति । अत्यन्तावोधःप्राह । सत्यमिदम् । विस्मृतं मे तावकं माहात्म्यं सोढव्योऽयमेकोममापराधो भवत्या ।

अन्यच्च प्रस्थापय त्वमेव यत्र प्रस्थापनोचिता लोकाः । किं नो व्यापारेण । भवितव्यतयोक्तम् । एकस्तावदेष एव मदीयो भर्त्ता प्रस्थापनयोग्यः तथाऽन्ये च ये तज्जातीयाः । बलाधिकृतेनोक्तम् । त्वमेव जानीषे तत्किमत्रोक्तेन । ततो निर्गता भवितव्यता आगता मम समीपे कथितो व्यतिकरः । मयोक्तं यद्देवी जानीते । ततः समुच्चलितोऽहमन्ये च मज्जातीयास्तन्नियोगाभिप्रेतसङ्ख्यानुसारेण । उक्तौ च भवितव्यतया महत्तमबलाधिकृतौ । यदुत मया युवाभ्यां चामीभिः सह यातव्यम् । यतो भर्तृदेवता नारीति न मोक्तव्यो मया संसारिजीवो यतश्चास्ति युवयोरपि प्रतिजागरणीयमेकाक्षनिवासं नाम नगरम् । तत्रामीभिर्लोकैः प्रथमं गन्तव्यम् । अतो युज्यते युवाभ्यां सहैवामीषां तत्रासितुं नान्यथा । ततो यद्भवती जानीत इत्यभिधाय प्रतिपन्नं तद्वचनं महत्तमबलाधिकृताभ्याम् । प्रवृत्ताः सर्वेऽपि समागतास्तदेकाक्षनिवासं नगरम् । तत्र च नगरे महान्तः पञ्च पाटका विद्यन्ते । ततोऽहमेकं पाटकं कराग्रेण दर्शयता तीव्रमोहोदयेनाभिहितः । भद्र संसारिजीव

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिष्ठ त्वमत्र पाटके। यतोऽयं पाटकोऽसंव्यवहारनगरेण बहुतरं तुल्यो वर्त्तते।

ततो भविष्यत्यत्र तिष्ठतो धृतिरिति। तथाहि। यथा तत्रासंव्यवहारनगरे गोलकाभिधानानां प्रासादानां मध्यवर्त्तिनो ये निगोदाभिधाना अपवरकास्तेषु ये लोकाः प्रत्येकमनन्ताः संपीण्डिताः स्नेहानुबन्धेन प्रतिवसन्ति अत्रापि पाटके बहुतमा लोकास्तथैव प्रतिवसन्ति। केवलमसंव्यवहारनगरसम्बन्धिनो न क्वचिल्लोकव्यवहारेऽवतरन्तीति असंव्यावहारिका उच्यन्ते। ते हि यदि परं यूयमिव भगवत्या लोकस्थितेरादेशेन सकृदेवान्यस्थानेषु गच्छन्ति नान्यथा। एते एतेन पुनरस्य पाटकस्य संबन्धिनोलोकाः कुर्वन्ति लोकव्यवहारम्। समाचरन्ति शेषस्थानेषु गमागमं तेन सांव्यवहारिक इत्यभिधीयन्ते। तथा तेषामसंव्यवहारनगरसंबन्धिनामनादिवनस्पतय इति सर्वेषामपि सामान्याभिधानम्। एतत्पाटकसम्बन्धिनां तु वनस्पतय इत्येतावान् विशेषः। तथा प्रत्येकचारिणोऽपि प्रासादापवरकन्यायरहिता मुत्कलचारेणात्र विद्यन्ते तेऽसंख्येया लोकाः। ततस्तिष्ठ त्वमत्र पूर्वपरिचितनगरसमान एवायं पाटकस्तवेति। ततो मयोक्तं यदाज्ञापयति देवः। ततः स्थापितोऽहमेकस्मिन्नपवरके शेषलोकास्तु केनचिन्मदीयविधानेनैव स्थापितास्तत्रैव पाटके केचिन्मुत्कलचारेण। केचित्पुनर्नीताः पाटकान्तरेष्विति। ततोऽहं तत्र साधारणशरीरनाम्नि भद्रे अपवरके पूर्वोक्तस्थित्यैव सुप्त इव मत्त इव मूर्च्छित इव मृत इवानन्तलोकैः संपिण्डितैस्तैः समकमुच्छ्वसन् समकं निःश्वसन् समकमाहारयन् समकं निर्हारयन् स्थितोऽनन्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालमिति । अन्यदा कर्मपरिणाममहाराजादेशो नैवानुमतो महत्तमबलाधिकृताभ्यां निःसारितस्ततोऽपवरकन्यायाद् भवितव्यतया धारितस्तत्रैव पाटके पुनरसंख्यकालं प्रत्येकचारितयेति । इतश्च पूर्वमेव कर्मपरिणाममहाराजेन परिपृच्छ्य लोकस्थितिं समालोच्य सह कालपरिणत्या ज्ञापयित्वा नियतियदृच्छादीनामनुमते भवितव्यतायाः । अपेक्ष्य विचित्राकारं लोकस्वभावमात्मीयसामर्थ्यप्रभवैः परमाणुभिर्निष्पादिताः सर्वार्थकारिण्य एकभववेद्यसंज्ञाः प्रधानगुडिकाः । समर्पिता भवितव्यतायाः । सा चाभिहिता तेन । यथा भद्रे समस्तलोकव्यापारकरणोद्यता त्वं आन्तासि समस्तलोकानां क्षणे क्षणे नानाविधसुखदुःखादिकार्याणि संपादयन्ती ततो गृहाणामूर्गुडिकाः । ततस्त्वया तासामेकैकस्य सत्त्वस्य जीर्णायां जीर्णायामेकैकस्यां गुडिकायामन्या दातव्या । ततः संपादयन्त्येताः स्वयमेव विविधमप्येकत्र जन्मवासके वसत्सु प्रत्येकं सत्त्वेषु तवेष्टं सर्वं प्रयोजनमिति भविष्यति ते निराकुलता । ततः प्रतिपन्नं भवितव्यतया तद्राजशासनम् । विधत्ते च सकलकालं समस्तसत्त्वानां तथैव सा तं गुडिकाप्रयोगम् । ततोऽहं यदा तत्रासंव्यवहारनगरेऽभूवं तदा मम जीर्णायां जीर्णायामपरां सा गुडिकां दत्तवती । केवलं सूक्ष्ममेव मे रूपमेकाकारं सर्वदा तत्प्रयोगेण विहितवती । तत्र पुनरेकाक्षनिवासनगरे समागता तीव्रमोहोदयात्यन्ताबोधयोः कुतूहलमिव दर्शयन्ती । तेन गुडिकाप्रयोगेण ममानेकाकारं स्वरूपं प्रकटयति स्म ।

यतः कृतोऽहं तत्र पाटके वर्त्तमानः क्वचिदवसरे सूक्ष्मरूपः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रापि क्वचित्पर्याप्तकरूपः क्वचिदपर्याप्तकरूपः । तथा क्वचिदवसरे विहितोऽहं बादराकारः। तत्रापि क्वचित्पर्याप्तकरूपः क्वचिदपर्याप्तकरूपः। तथा बादरः सन् क्वचिदपवरकवर्त्ती क्वचित्प्रत्येकचारी। अत्रापि क्वचिदङ्कुराकारधारकः। क्वचित्कन्दरूपः। क्वचिन्मूलभाजी। क्वचित्त्वक्चारी। क्वचित्स्कन्धवर्त्ती। क्वचिच्छाखाचरः। क्वचित्प्रशाखागतः। क्वचित्प्रवालसंचरिष्णुः। क्वचित्पत्राकारः। क्वचित्पुष्पसंस्थः। क्वचित्फलात्मकः। क्वचिद्बीजस्वभावः। तथा क्वचिन्मूलबीजः। क्वचिदग्रबीजः। क्वचित्पर्वबीजः। क्वचित्स्कन्धबीजः। क्वचिद्बीजरुहः। क्वचित्सम्मूर्च्छनजः। तथा क्वचिद्वृक्षाकारः। क्वचिद्गुल्मरूपः। क्वचिल्लतात्मकः। क्वचिद्वल्लीस्वभावः। क्वचिद्धरितात्मक इति। तथारूपेण च वर्त्तमानं मामुपलभ्यान्यग्रामनगरसम्बन्धिनो लोकाः कम्पमानं भवितव्यतायाः समक्षमेव छिन्दन्ति भिन्दन्ति दलन्ति पिंषन्ति मोटयन्ति लुञ्चयन्ति तक्ष्णुवन्ति दहन्ति नानाकदर्थनाभिः कदर्थयन्ति तथापि भवितव्यता तत्रोपेक्षां कुरुते ।

ततोऽतिवाहिते तथाविधदुःखैरनन्तकाले जीर्णायां पर्यवसानकालदत्तायां गुडिकायां दत्ता भवितव्यतया ममान्या गुडिका। तत्प्रभावाद्गतोऽहं द्वितीयपाटके तत्र पार्थिवसंज्ञया लोकाः प्रतिवसन्ति। ततोऽहमपि तेषां मध्ये संपन्नः पार्थिवः। विडम्बितस्तत्र भवितव्यतयापरापरगुडिकादानद्वारेण सूक्ष्मबादरपर्याप्तकापर्याप्तकरूपतया कृष्णनीलश्वेतपीतलोहितवर्णादिरूपतया सिकतोपललवणहरितालमनःशिलाञ्जनशुद्धपृथिव्याद्याकारतया चासंख्येयं कालं तितिक्षितानि च तत्र पाटके वसता मया भेदनदलनचूर्णन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खण्डनदहनादीनि दुःखानि। ततः पर्यन्तगुडिकाजरणावसाने दत्ता भवितव्यतया ममान्या गुडिका गतोऽहं तन्माहात्म्येन तृतीये पाटके। तत्र चाप्याभिधानाः कुटुम्बिनः प्रतिवसन्ति । ततो ममापि तत्र गतस्य संपन्नमाप्यरूपम् । विगोपितस्तत्राप्यहं जीर्णायां जीर्णायामपरापरां गुडिकां दत्त्वारूपान्तरं संपादयन्त्या भवितव्यतया असंख्येयमेव कालम् ।

तथाहि । इतोऽहमवश्यायहिममहिकाहरतनुशुद्धोदकाद्यनेकभेदरूपो रूपरसगन्धस्पर्शभेदेन विचित्राकारस्तथा। सोढानि च तत्र पाटके वर्त्तमानेन मया शीतोष्णक्षारत्वचाद्यनेकशस्त्रसंपाद्यानि नानादुःखानि । ततस्तत्कालपर्यन्ते जीर्णायामन्यगुडिकायां दत्ता ममापरा गुडिका भवितव्यतया । गतोऽहं तत्तेजसा चतुर्थे पाटके तत्राप्यसंख्येयास्तेजस्कायनामानो ब्राह्मणाः प्रतिवसन्ति । ततोऽहमपि तेषां मध्ये भास्वरो वर्णेन उष्णः स्पर्शेन दाहात्मकः कायेन शुचिरूपः स्थानेन संपन्नस्तेजस्कायो ब्राह्मणः । प्रवृत्तश्च मम तत्र वसतो ज्वालाङ्गारमुर्मुराचिरलातशुद्धाग्निविद्युदुल्काशनिप्रभृतयो व्यपदेशाः । जातानि विध्यापनादितो नानादुःखानि । स्थितः सूक्ष्मबादरपर्याप्तकापर्याप्तकरूपतया विवर्त्तमानोऽसंख्येयं कालम् । दत्ता च तदन्ते ममापरा गुडिका पयन्तगुडिका जरणावसाने भवितव्यतया । गतोऽहं तदुपयोगेन पञ्चमपाटके । तत्राप्यसंख्येया वायवीयाभिधानाः क्षत्रियाः प्रतिवसन्ति । ततोऽहमपि तत्र गत उष्णशीतः स्पर्शेन अलक्ष्यश्चक्षुष्मतां रूपेण पताकाकारः संस्थानेन संजातो वायवीयः क्षत्रियः । आहतश्च तत्र वर्त्तमानोऽहमुत्कलि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कावातो मण्डलिकावातो गुञ्जावातो झञ्झावातः संवर्त्तकवातो घनवातस्तनुवातः शुद्धवात इत्यादिभिरभिधानैः । समुद्भूतानि तत्र मे शस्त्राभिघातनिरोधादीनि नानादुःखानि । विनाटितस्तत्रापि सूक्ष्मबादरपर्याप्तकापर्याप्तकाकाररूपतयाघूर्णमानोऽसंख्येयं कालं भवितव्यतया ।

इतस्तदवसाने जाते पर्यन्तगुडिकाजरणे दत्त्वापरां गुडिकां पुनर्नीतोऽहं प्रथमपाटके भवितव्यतया । स्थितस्तत्र पुनरनन्तं कालम् । ततः पुनरपरापरगुडिकाप्रयोगेणैव प्रापितो द्वितीयादिपाटकेषु । स्थितश्चैकैकस्मिन्नसंख्येयं कालम् । ततश्चानेन प्रकारेण तस्मिन्नेकाक्षनिवासे नगरे कारितोऽहमनन्तवाराः समस्तपाटकपर्यटनविडम्बनं तीव्रमोहोदयात्यन्तावोधयोः समक्षं भवितव्यतया । अन्यदा मनाक् प्रसन्नचित्तयाऽभिहितं यथार्यपुत्र स्थितो भूयांसं कालं त्वमत्र नगरे ततोऽपनयामि भवतः स्थानाजीर्णम् । नयामि भवन्तं नगरान्तरे । मयोक्तं यदाज्ञापयति देवी । तत्र प्रयुक्ता गुडिका भवितव्यतया। इतश्चास्ति विकलाक्षनिवासं नाम नगरम् । तत्र च त्रयप्रधानपाटका विद्यन्ते । तस्य नगरस्य परिपालकः कर्म्मपरिणाममहाराजनियुक्त एवोन्मार्गोपदेशो नाम महत्तमः । तस्य च माया नाम गृहिणी । ततोऽहं गुडिकामाहात्म्येन प्राप्तस्तत्र प्रथमे पाटके । तस्मिंश्च सप्तकुलकोटिलक्षवर्त्तिनोऽसंख्येया द्विहृषीकाभिधानाः कुलपुत्रकाः प्रतिवसन्ति । ततोऽहमपि संपन्नस्तेषां मध्ये द्विहृषीकः । ततो ऽपगता मे सा सुप्तमत्तमूर्च्छितमृतरूपता । जातो मनागभिव्यक्त चैतन्यः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततश्च ।

कृतोऽहं गुडिकादानद्वारेणैव ततस्तया ।
कृमिरूपोऽशुचिस्थाने महापापः स्वभार्यया ॥
मूत्रान्त्रक्लेदजम्बालपूरिते जठरे स्थितम् ।
मां पश्यन्ती विशालाची ततः सा परितुष्यति ॥
कदाचित्सारमेयादिदुर्गन्धिव्रणकोटरे ।
मामन्यकृमिजालेन संयुतं वीच्य मोदते ॥
वर्चीपघस्रराद्येषु लोलमानं सुदुःखितम् ।
मां दृष्ट्वा कृमिभावेन तुष्टाभूद्भवितव्यता ॥
जलूकाभावमापाद्य गुडिकादानतस्तथा ।
ममेत्थं चाकरोद्दुःखं हसन्ती सह मायया ॥
मायें पश्य मदीयस्य भर्त्तुः सामर्थ्यमीदृशम् ।
त्वमुन्मार्गोपदेशेन भर्त्तात्मा येन गर्विता ॥
चुधार्त्तो वारके चिप्तस्ततो निर्गत्य मत्पतिः ।
निःशेषं कर्षयत्येष व्रणारिं वीर्ययोगतः ॥
अन्यच्च त्यागसामर्थ्यं पश्य भर्त्तुर्ममेदृशम् ।
यदेष रक्तसर्वस्वं ददते हस्तधारिणे ॥
ततोऽगृहीतसङ्केते भद्रे भार्याविडम्बितः ।
उपहासेन तेनाहं द्विगुणं दुःखमागतः ॥
पुनश्च गुडिकां दत्त्वा कृत्वा शंखं महोदधौ ।
मामेषा शांखिकैश्छिन्नं रटन्तं वीच्य तुष्यति ॥
तदेवं पाटके तत्र वर्त्तमानः स्वभार्यया ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपरापररूपेण संख्यातीतं विडम्बित: ॥

अन्यदा पुनर्यथेष्टचेष्टयैव प्रयुक्ता भवितव्यतया ममान्यगुडिका। नीतोऽहं तत्सामर्थ्येन द्वितीये पाटके। तत्र चाष्टकुलकोटिलक्षवास्तव्या-यिनोऽसंख्येयास्त्रिकरणनामानो गृहपतयोऽधिवसन्ति । ततोऽहमपि तेषां मध्ये संपन्नस्त्रिकरणो गृहपति:।

ततश्च ।

यूकामत्कुणमत्कोटकुंथुरूपविवर्त्तिनम् ।
पिपीलिकादिरूपं च कृत्वा मां भवितव्यता ॥
पर्यटन्तं बुभुक्षार्त्तं पिष्यमाणं च बालकैः ।
दग्धं दृष्ट्वा तथा तोषादानन्दमवगाहते ॥
तदेवं पाटके तत्र गुडिकादानपूर्वकम् ।
असंख्यवाराः पापोऽहं कारितो नैकरूपताम् ॥
अथान्यदा पुनर्दत्ता गुडिका मे ऽवहेलया ।
तृतीये पाटके नीतस्तयैवोचितहेलया ॥
कोटिलक्षकुलानां च वसन्ति नव तत्र ये ।
असंख्यास्तेषु विद्यन्ते चतुरक्षाः कुटुम्बिनः ॥
ततोऽहमपि संजातश्चतुरक्षः कुटुम्बिकः ।
पतङ्गमक्षिकादंशवृश्चिकाकारधारकः ॥
सोढानि तत्र दुःखानि नानाकाराणि तिष्ठता ।
निर्विवेकजनादिभ्यो मर्दनादिविधानतः ॥
जीर्णे जीर्णे पुनर्दत्ता गुडिकामपरापराम् ।
असंख्यरूपैस्तत्रापि पाटके नाटितस्तया ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूयो भूयश्च तेष्वेव पाटकेषु विवर्त्तनम् ।
संख्यातीतानि वर्षाणां सहस्राणि विधापितः ॥

एवं च स्थिते ।

कश्चित्पर्याप्तरूपेण तथापर्याप्तरूपकः ।
तेषु त्रिष्वपि पल्याऽहं पाटकेषु विनाटितः ॥
अथान्यदा प्रहृष्टेन चेतसा भवितव्यता ।
ज्ञात्वा तदुचितं कालं ततः सेत्यदमभाषत ॥
आर्यपुत्र भवन्तं किं नयामि नगरान्तरम् ।
विकलाचनिवासेऽत्र नगरे नास्ति ते धृतिः ॥
मयोक्तं देवि यत्तुभ्यं रोचते तद्विधीयताम् ।
किमच बहुना त्वं मे प्रमाणं सर्वकर्मसु ॥
ततो जीर्णां मम ज्ञात्वा गुडिकामन्तवर्त्तिनीम् ।
नगरान्तरयानाय प्रयुक्ता गुडिका तया ॥
अथोन्मार्गोपदेशस्य प्रतिजागरणे स्थितम् ।
पञ्चाचपशुसंस्थानं नामास्ति नगरं परम् ॥
तत्र सार्द्धत्रिपञ्चाशत्कोटीलचप्रमाणके ।
वसन्ति कुलसंघाते लोकाः पञ्चाचनामकाः ॥
जलस्थलनभश्चराः स्पष्टचैतन्यसंयुताः ।
संज्ञिनस्तेऽभिधीयन्ते गर्भजा इति वा बुधैः ॥
ये पुनस्तत्र विद्यन्ते स्पष्टचैतन्यवर्जिताः ।
असंज्ञिन इति ख्यातास्ते सम्मूर्च्छनजा जनाः ॥
ततोऽहं तेषु संजातः स्पष्टचैतन्यवर्जितः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चाचो नाम विख्यातो गुडिकायाः प्रभावतः ॥
रटत्युच्चैर्विना कार्यं दर्दुराकारधारकः ।
केलिप्रियतया तत्र भार्ययाहं विनाटितः ॥

तत्र च सन्मूर्च्छनजमध्ये ।
रूपैरेवमसंख्येयैर्भ्रमयित्वा ततस्तया ।
विहितो गर्भजाकारधारकोऽहं महेलया ॥

ततश्च जलचरेषु वर्त्तमानः ।
गृहीतो धीवरैस्तत्र बिभ्राणो मत्स्यरूपताम् ।
छेदपाकादिभिर्दुःखं प्रापितोऽहं सहस्रशः ॥

तथा चतुष्पदस्थलचरेषु वर्त्तमानस्य ।
शशसूकरसारङ्गरूपमाबिभ्रतो मम ।
व्याधैर्भित्वा शरैर्गात्रं कृता नाना विकर्त्तनाः ॥

तथा भुजपरिसर्पोरःपरिसर्पेषु वर्त्तमानेन ।
गोधाहिनकुलादीनां रूपं धारयता चिरम् ।
अन्योन्यभक्षणाद् दुःखं प्राप्तं क्रूरतया मया ॥

तथा ।
काकोलूकादिरूपाणां पक्षिणां मध्यचारिणाम् ।
संख्यातीतानि दुःखानि सोढानि सुचिरं मया ॥
असंख्यजनसङ्कीर्णे तदेवं तत्र पत्तने ।
जलस्थलनभश्चारी संजातोऽहं कुले कुले ॥

अन्यच्च तस्मिन् पञ्चाक्षपशुसंस्थाने नगरे ।
सप्ताष्टवारारूपाणि नैरन्तर्येण कारितः ।
नीतस्ततोऽन्यस्थानेषु तत्रानीतः पुनस्तया ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं च स्थिते।

शेषेषु सर्वस्थानेषु गत्वा गत्वान्तरान्तरा।
मया तत्र पुरेऽनन्ताः कृता रूपविडम्बनाः॥

कालतस्तु।

स्थितश्च नैरन्तर्येण परं पल्योपमत्रयम्।
अहं तत्र पुरे किं चित्साधिकं पूर्वकोटिभिः॥
असंज्ञिसंज्ञिरूपेण पर्याप्तेतरभेदतः।
तदेवं नगरे तत्र नानाकारैर्विडम्बितः॥

अन्यदा कुरङ्गरूपः संपादितोऽहं भवितव्यतया। स्थितो यूथमध्ये तरलिततारं भयेन निरीक्षमाणो दशापि दिशः उत्प्लवमानस्तरुशिखराणीतश्चेतश्च पर्यटामि। यावदेकेन लुब्धककुमाकरेण कलध्वनिना प्रारब्धं गीतम्। ततस्तेनाक्षिप्तं मृगयूथम्। परित्यक्तमुत्प्लवनं। निरुद्धा चेष्टा। निश्चलीकृतानि लोचनानि। निवृत्तः शेषेन्द्रियव्यापारः। संजातः कर्णेन्द्रियमात्रनिमग्नोऽन्तरात्मा। ततो निष्पन्दमन्दीभूतं तत्तादृशं हरिणयूथमवलोक्याभ्यर्णीभूतो व्याधः। प्रगुणीकृतं कोदण्डम्। सन्धितस्तत्र शिलीमुखः। बद्धमालीढं स्थानकम्। ईषदाकुञ्चिता कन्धरा। समाकृष्टो बाणः कर्णान्तं यावत्। ततो मुक्तेन तेनाराङ्गागे वर्त्तमानोऽहं निर्भिद्य पातितो भूतले। अत्रान्तरे जीर्णा मे पूर्वदत्ता गुडिका। ततो जीर्णायां तस्यां हरिणभवनिबन्धनभूतायामेकभववेद्यायां गुडिकायां दत्ता ममान्या गुडिका भवितव्यतया। संपन्नस्तन्माहात्म्येनाहं करिवररूपः। वर्द्धितः कालक्रमेण संजातो यूथाधिपतिः। ततः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वभावसुन्दरेषु नलवनेषु अभीष्टतमेषु सल्लकीकिसलयेषु अत्यन्त-कमनीयेषु वनविभागेषु परिकरितः करेणुकावृन्देन चित्तानन्द-सन्दोहसागरमवगाहमानो यथेष्टचेष्टया विचरामि ।

यावदेकदाकाण्ड एव संत्रस्तं तत्करियूथम् । नश्यन्ति श्वाप-दानि । श्रूयते वेणुस्फोटरवः । प्रसर्पितं धूमवितानम् । ततः कि-मेतदिति निरीक्षितो मया पश्चाद्भागः । यावन्निकटीभूतो ज्वा-लामालाकुलो दवानलस्ततः प्रादुर्भूतं मे मरणभयम् । परित्यक्तं पौरुषम् । अङ्गीकृतं दैन्यम् । समाश्रिता आत्मम्भरिता । व्यप-गतोऽहङ्कारः । परित्यक्तं यूथम् । पलायितो गृहीत्वैकां दिशम् । गतः स्तोकं भूभागम् । तत्र चासीच्चिरन्तनग्रामपशुसंबन्धी विशालः शुष्कोऽन्धः कूपः । स च तटवर्त्तितृणव्यवहिततया भयाकुलतया च न लक्षितो मया धावता वेगेन । ततः प्रविष्टौ मम तत्राग्रपादौ । तन्निरालम्बतया पर्यस्तः पश्चाद्भागः । ततः पतितोऽहमुत्तानशरीर-स्तत्रान्धकूपे । संचूर्णितो गात्रभारेण मूर्च्छितः क्षणमात्रं लब्धा कथं-चिच्चेतना यावन्न चालयितुं शक्नोमि शरीरं प्रादुर्भूता च सर्वा-ङ्गीणा तीव्रवेदना ततः संजातो मे पश्चात्तापः । चिन्तितं च मया । यथेदृशमेव बुध्यते मादृशानाम् । ये प्रतिपन्नभृत्यभावं चिरकाल-परिचितमुपकारकमापन्निमग्नमनुरक्तमात्मवर्गं परित्यज्य कृतघ्नतया कुक्षिंभरितामुररीकुर्वन्तः पलायन्ते । अहो मे निर्लज्जताद्यापि किल यूथाधिपतिशब्दो रूढः । तत्किमनेनाधुना स्वचेष्टितानुरूप-मेवेदं मम संपन्नमतो न मया मनसि खेदो विधेयः । ततो-ऽनया भावनया प्रतिपन्नं मया मनाङ् माध्यस्थ्यम् । तितिक्षिता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवन्ती तीव्रापि वेदना। स्थितस्तद्वस्थः सप्तरात्रं यावत्। अत्रान्तरे तुष्टा ममोपरि भवितव्यता। ततस्तयाभिहितम्। साध्वार्यपुत्र साधु शोभनस्तेऽध्यवसायः। तितिक्षितं भवता परमं दुःखम्। तुष्टाहमिदानीं भवतो ऽनेन चेष्टितेन नयामि भवन्तं नगरान्तरे। मयाभिहितम्। यदाज्ञापयति देवी। ततो दर्शितस्तया सुन्दराकारः पुरुषः। अभिहितश्चायं यथार्यपुत्र तुष्टया मयायमधुना भवतः सहायो निरूपितः पुण्योदयो नाम पुरुषस्तदनेन सह भवता गन्तव्यम्। मयाभिहितं यदाज्ञापयति देवी।

अत्रान्तरे जीर्णा मे पूर्वदत्ता गुडिका। ततः प्रयुक्तान्यागुडिका भवितव्यतया। अभिहितं च तया। यथार्यपुत्र तव गतस्यायं पुण्योदयस्ते प्रच्छन्नरूपः सहोदरः सहचरश्च भविष्यतीति। एवं च वदति संसारिजीवे भव्यपुरुषः प्रज्ञाविशालायाः कर्णाभ्यर्णे स्थित्वेदमाह।

यथाम्ब कोऽयं पुरुषः किं वानेन कथयितुमारब्धम्। कानि चामूनि असंव्यवहारादीनि नगराणि का चेयं गुडिका। यैकैकवासके प्रयुक्ता सती नानाविधरूपाणि कारयति। विविधसुखदुःखादिकार्याणि दर्शयति। कथं वा पुरुषस्येयन्तं कालमेकत्रावस्थितिः। कथं चासंभावनीयानि मनुष्यस्य सतः कृमिपिपीलिकारूपाणि जायेरन्। तदिदं सकलमपूर्वालजालकल्पमस्य तस्करस्य चरितं मम प्रतिभासते तत्कथयाम्बिके कोऽस्य भावार्थ इति। प्रज्ञाविशालयोक्तम्। वत्स यदस्येदानींतनं विशेषरूपमुपलभ्यते तन्नानेन कथितम्। किं तर्हि सामान्यरूपेण संसारिजीवनामायं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरुषोऽतस्तद्देवानेनात्माभिधानमाख्यातमनेन चात्मचरितम्। सर्वमिदं घटमानकमेव निवेदयितुं प्रक्रान्तम्।

तथाहि।

असांव्यवहारिकजीवराशिरत्रासंव्यवहारनगरम्। एकेन्द्रियजातयः पञ्चापि पृथिव्यप्तेजोवायुवनस्पतिरूपास्तेषां स्थानं एकाक्षनिवासम्। विकलेन्द्रियाणां द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियलक्षणानां स्थानं विकलाक्षनिवासम्। पञ्चेन्द्रियं तिरश्चां निलयः पञ्चाक्षपशुसंस्थानम्। एकजन्मप्रायोग्यं कर्म्म प्रकृतिजालमेकभववेद्या गुडिकेत्युच्यते। तदुदयेन भवन्त्येव नानाविधरूपाणि। संपद्यन्ते एव विविधसुखदुःखानि कार्याणि। अजरामरश्चायं परुषः। ततो युक्तमेवाख्यानन्तमपि कालमवस्थानं संसारिजीवस्य चात्र भद्र भवत्येव कृमिपिपीलिकादिरूपाणि। किमत्राश्चर्यमथवा मुग्धबुद्धिरद्यापि वत्सो न जानीते यदस्य स्वरूपम्। वत्स न संभवत्येव भुवनोदरे तत्संविधानकम्। यदस्य संसारिजीवस्य संबन्धिना चरितेनावतरति। तद्वत्स निवेदयतु तावदेषः सर्वं यथावृत्तम्। पश्चात्तवाहमस्य भावार्थं निराकुला कथयिष्यामि। भव्यपुरुषेणोक्तम्। यदाज्ञापयत्यम्बेति।

उत्पत्तिस्तावदस्यां भवति नियमतो वर्यमानुष्यभूमौ
भव्यस्य प्राणभाजः समयपरिणतेः कर्म्मणश्च प्रभावात्।
एतच्चाख्यातमत्र प्रथममनुततस्तस्य बोधार्थमित्थं
प्रक्रान्तोऽयं समस्तः कथयितुमतुलो जीवसंसारचारः॥

स च सदागमवाक्यमपेक्ष्य भो
जडजनाय च तेन निवेद्यते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बुधजनेन विचारपरायण

स्तदनु भव्यजनः प्रतिबुध्यते ॥

प्रस्तावेऽत्र निवेदितं तदतुलं संसारविस्फूर्जितं

धन्यानामिदमाकलय्य विरतिः संसारतो जायते ।

येषां त्वेष भवो विमूढमनसां भोः सुन्दरो भासते

ते नूनं पशवो न सन्ति मनुजाः कार्येण मन्यामहे ॥

## इत्युपमितभवप्रपञ्चायां कथायां संसारिजीव-
## चरिते तिर्यग्गतिवर्णनो नाम
## द्वितीयः प्रस्तावः ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# तृतीयः प्रस्तावः।

भवप्रपञ्चस्तिर्यक्षु वर्त्तमानस्य देहिनः।
एष प्रोक्तो मनुष्यत्वे यत्स्यात्तदधुनोच्यते॥

संसारिजीव उवाच।

ततोऽहं भद्रेऽगृहीतसङ्केते समाख्यादितैकभववेद्यगुडिकः प्रवृत्तो गन्तुम्। इतश्चास्त्यस्यामेव मनुजगतौ नगर्यां भरताभिधानः पाटकः। तस्य च विशेषकभूतमस्ति जयस्थलं नाम नगरम्। तत्र च महानृपतिगुणसंपदालिङ्गितमूर्त्तिः पद्मो नाम राजा। तस्य च रतिरिव मकरकेतनस्य नन्दा नाम प्रधानदेवी। ततोऽहं तस्याः कुक्षौ प्रवेशितो भवितव्यतया स्थितस्तत्रोचितकालम्। निर्गतः सह पुण्योदयेन दृष्टो नन्दया संपन्नस्तस्याः पुत्रो मम जात इत्यभिमानो निवेदितः प्रमोदकुम्भाभिधानेन दासदारकेण नरपतये। प्रादुर्भूतः सुतो मे इति समुत्पन्नस्तस्याप्यनुशयः। हर्षविशेषादुल्लसितो गात्रेषु पुलकोद्भेदः। दापितं निवेदकदारकाय पारितोषिकम्। समादिष्टो मज्जन्ममहोत्सवः। ततो दीयन्ते महादानानि। मुच्यन्ते बन्धनानि। पूज्यन्ते नगरदेवताः। क्रियन्ते हट्टद्वारशोभाः। शोध्यन्ते राजमार्गाः। आहन्यन्ते आनन्दभेर्यः। आगच्छन्ति विशेषोज्ज्वलनेपथ्या राजकुले नागरकलोकाः। विधीयन्ते तदुपचाराः। प्रयुज्यन्ते समाचाराः। आस्फाल्यन्ते तूर्यसंघाताः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गीयन्ते धवलमङ्गलानि । नृत्यन्ति ललनालोकाः सह कञ्चुकिवामनकुब्जादिभिर्नरेन्द्रवृन्देनेति । ततश्चैवं वृत्ते जन्ममहानन्दे अतिक्रान्ते मासे तिरोधाय संसारिजीव इत्यभिधानं प्रतिष्ठितं मे नन्दिवर्द्धन इति नाम । जातो ममाप्यहमनयोः पुत्र इत्यभिमानः। ततो जनयन्नानन्दं जननीजनकयोः पञ्चभिर्धात्रीभिर्ललितः संपन्नोऽहं त्रिवार्षिकः ।

मम चासंव्यवहारनगरादारभ्य सकलं कालं द्विविधः परिकरोऽनुवर्त्तते । तद्यथा । अन्तरङ्गो बहिरङ्गश्च । तत्रान्तरङ्गपरिकरमध्येऽस्ति ममाविवेकिता नाम ब्राह्मणजातीया धात्री सापि प्रसूता मज्जन्मदिने जातो दारकः प्रतिष्ठितं तस्य नाम वैश्वानर इति । स चादित एवारभ्यानभिव्यक्तरूपतयासीदेव । केवलमधुनाभिव्यक्तरूपः संपन्नः । ततो मयासौ सह धारयन् वैरकलहाभिधानौ विषमविस्तीर्णौ चरणौ दधानः परिस्थूलकठिनह्रस्वेर्ष्यास्तेयाऽभिधाने जंघे समुद्वहन्ननुशयानुपशमनामानौ विषमप्रतिष्ठितावूरू बिभ्राणः पैशुन्यसंज्ञकमेकपार्श्वोन्नतं कटितटं दर्शयन् परमर्मोद्घट्टननामकं वक्रं विषमं लम्बमुदरं कलितोन्नस्तापनामकेनातिसङ्कटेनोरःस्थलेन युक्तः चारमत्सरसंज्ञाभ्यां विषमपरिह्रस्वाभ्यां बाहुभ्यां विराजमानः क्रूरतारूपया वक्रया सुदीर्घया च शिरोधरया विडम्ब्यमानोऽसभ्यभाषणादिरूपैर्वर्जितदन्तच्छदैर्विरलविरलैर्महद्भिर्दशनैर्विगोप्यमानस्तण्डलासहनत्वनामकाभ्यां शुषिरमात्ररूपाभ्यां कर्णाभ्यामुपहास्यस्थानं तामसभावसंज्ञया स्थानमात्रेण लक्ष्यमाणयातिचिपटया नासिकया बिभ्रद्वासुरताम् । रौद्रत्वनृशंसत्वसंज्ञाभ्यामतिरक्ततया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुञ्जार्द्धसंनिभाभ्यां वर्तुलाभ्यां लोचनाभ्यां विनाद्यमानोऽनार्याचरण-संज्ञकेन महता त्रिकोणेन शिरसा यथार्थीकुर्वाणो वैश्वानरतां परोपतापसंज्ञकेनातिपिङ्गलतया ज्वालाकलापकल्पेन केशभारेण दृष्टो वैश्वानरो ब्राह्मणदारक इति ।

ततोऽनादिपरिचयादाविर्भूतो मम तस्योपरि स्नेहः गृहीतो मित्रबुद्ध्या न लचिता परमार्थशत्रुरूपता। अविवेकितापुत्रोऽयमिति संपन्नास्योपरि गाढमन्तरङ्गपरिजनतया हितकारी ममायमिति बुद्धिः। ततो लचितस्तेन मदीयो भावः। अये करोत्येष ममोपरि राजपुत्रः प्रीतिं तदेनमुपसर्पामि । ततः समागतो निकटे समालिङ्गितोऽहं दर्शितः स्नेहभावः प्ररूढस्तावयोः प्रणयः लग्ना मैत्री । ततो यत्र यत्र क्वचिदहं संचरामि गृहे बहिश्च तत्र तत्र नासौ चणमपि मुञ्चतीति । ततो हृष्टो निजचित्तमध्ये ममोपरि पुण्योदयो वैश्वानरेण सह मैत्रीकरणेन । चिन्तितं च तेन । अये मम रिपुरेष वैश्वनरस्तथाप्येवमविशेषज्ञोऽयं नन्दिवर्द्धनो येन मामनुरक्तमवधीर्यानेन समस्तदोषराशिरूपेणात्मनोऽपि परमार्थवैरिणा सह मैत्रीं करोति ।

अथवा किमत्राश्चर्यं न लचयन्त्येव मूढाः पापमित्रस्वरूपम् । नावबुध्यन्ते तत्सङ्गतेर्दुरन्तताम् । न बहु मन्यन्ते तत्सङ्गनिवारकं सदुपदेष्टारम् । परित्यजन्ति तत्कृते सन्मित्राणि । प्रतिपद्यन्ते तद्वशेन कुमार्गम्। ते हि यदि परं धावन्तोऽन्धा इव कुड्यादौ गाढं स्फोटलाभेन पापमित्रसङ्गान्निवर्त्तन्ते। न परोपदेशेनेति। मूढश्चायं नन्दिवर्द्धनकुमारो योऽनेनापि सह साङ्गत्यं विधत्ते। तत्किं ममानेन

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निवारितेन । निर्दिष्टश्चाहमस्य भवितव्यतया । सहचरत्वेनावर्जितश्चाहमनेन करिरूपतायां वर्त्तमानेन वेदनासमुद्घातेऽपि निश्चलतया माध्यस्थभावनया । तस्मादेव नन्दिवर्द्धनकुमारः पापमित्रसङ्गतिपरोऽपि नाकाण्ड एव मम तावन्मोक्तुं युक्त इति पर्य्यालोच्यासौ पुण्योदयो दृष्टोऽपि मम पार्श्वे तदा प्रच्छन्नरूपतया सदा तिष्ठत्येव । जात्याश्चान्येऽपि बहिरङ्गा मम बहवो वयस्याः । ततस्तैः सार्द्धमनेकक्रीडाभिः क्रीडन्नहं प्रवर्द्धितुं प्रवृत्तः । प्रस्तुते च क्रीडने मत्तो महत्तमा अपि डिम्भाः प्रधानकुलजा अपि पराक्रमवन्तोऽपि मां वैश्वानराधिष्ठितमवलोक्य भयेन कम्पन्ते गच्छन्ति च मम प्रणतिं कुर्वन्ति चाटुकर्माणि प्रतिपद्यन्ते पदातिभावं धावन्ति पुरतो न प्रतिकूलयन्ति मद्वचनम् । किं बहुना । लिखितादपि मत्तो बिभ्यतीति । तस्य च सर्वस्यापि व्यतिकरस्याचिन्त्यमाहात्म्यतया प्रच्छन्नरूपोऽपि पुण्योदयः कारणम् । मम तु महामोहवशात्तदा चेतसि परिस्फुरितम् । यदुत तदेते वृहत्तमा अपि डिम्भा ममैवं कुर्वाणा वर्त्तन्ते सोऽयमस्य वरमित्रस्य वैश्वानरस्य गुणः । यतोऽयं सन्निहितः । स्वात्मीयसामर्थ्येन वर्द्धयति मम तेजस्वितायाम् । करोत्युत्साहम् । प्रोज्ज्वलयति बलम् । संपादयत्योजः । स्थिरीकरोति मनः । जनयति धीरताम् । विधत्ते शौण्डीरताम् । किं बहुना । समस्तपुरुषगुणैर्मामेष योजयति ।

ततोऽनया भावनया संजातो वल्लभतरो मे वैश्वानरः । ततः संजातोऽहमष्टवार्षिकः । समुत्पन्ना पद्मनृपतेश्चिन्ता ग्राह्यतामधुना कुमारः कला इति । ततो निरूपितः प्रशस्तदिवसः । समाहूतः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रधानः कलाचार्यः । पूजितोऽसौ विधिना । कृतमुचितकरणीयम् । समर्पितोऽहं तस्य पित्रा महतादरेणेति । समर्पिताश्च मदीयभ्रातरोऽन्येऽपि बहवो राजदारकाः प्रागेव तस्य कलाचार्यस्य । ततस्तैः सार्द्धमहं प्रवृत्तः कलाग्रहणं कर्त्तुम् । ततः संपूर्णतया सर्वोपकरणानां गुरुतया तातोत्साहनस्य हिततया कलाचार्यस्य निश्चिन्ततया कुमारभावस्य सन्निहिततया पुण्योदयस्योत्कटतया क्षयोपशमस्यानुकूलतया तदा भवितव्यताया अनन्यहृदयतया मया गृहीतप्रायः स्वल्पकालेनैव सकलोऽपि कलाकलापः ।

केवलमतिवल्लभतया सदा सन्निहितोऽसौ वैश्वानरः सनिमित्तमनिमित्तं वा करोति मम समालिङ्गनम् । ततस्तेन समालिङ्गितोऽहं न स्मरामि गुरूपदेशम् । न गणयामि कुलकलङ्कम् । न बिभेमि तातमनःखेदस्य । न लक्षयामि परमार्थम् । न जानाम्यात्मनोऽन्तस्तापम् । न वेद्मि कलाभ्यासनिरर्थकत्वम् । किन्तु तमेव वैश्वानरमेकं प्रियं कृत्वा तदुपदेशेन गलत्स्वेदबिन्दुरक्तीकृतलोचनो भुग्नभृकुटिः करोमि समस्तदारकैः सह कलहं विदधामि सर्वेषां मर्मोद्घाटनम् । उच्चारयाम्यसत्यवचनानि । न क्षमे तेषां मध्यस्थमपि वचनम् । ताडयामि प्रत्येकं यथा सन्निहितेन फलकादिना । ततस्ते सर्वेऽपि वैश्वानरालिङ्गितं मामवलोक्य भयेन त्रस्तमानसाः सन्तो वदन्त्यनुकूलं कुर्वन्ति चाटूनि आराधयन्ति मां पादपतनैः । किं बहुना । मदीयगन्धेनापि ते वीर्यवन्तोऽपि राजदारका नागदमनीहतप्रतापा इव विषधरा न स्वतन्त्वं चेष्टन्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्ते समुद्विग्नाः कम्पमाना बन्धनागारगता इव महादुःखेन जननीजनकानुरोधेन कलाग्रहणं कुर्वन्तः कालं नयन्ति। न कथयन्ति तं व्यतिकरं कलाचार्याय मा भूत्सर्वेषां प्रलय इति भावनया। तथापि नित्यसन्निहितत्वाल्लचयत्येव तन्नामकं चेष्टितं सकलं कलाचार्यः। केवलं दारकेषु दृष्टविपाकतया भयेन चस्तहृदयोऽसावपि न मम संमुखमपि शिचणार्थं निरीचिते। यदि पुनरन्यव्यपदेशेनापि मां प्रत्येष किञ्चिद् ब्रूयात्ततोऽहमेनमपि कलाचार्यमाक्रोशामि ताडयामि च। ततोऽसावपि मम राजदारकवद्वर्त्तते। ततो महामोहदोषेण मया चिन्तितम्। अहो मे वरमित्रस्य माहात्म्यातिशयः। अहो हितकारिता। अहो कौशलम्। अहो वत्सलता। अहो स्थिरानुरागः। यदेषसमालिङ्गनद्वारेण मम सवीर्यतां संपाद्य मामेवं सर्वत्राप्रतिहताज्ञं जनयति।

न च मां चणमपि मुञ्चतीति। तदेष मे परमो बन्धुरेष परमं शरीरमेष मे सर्वस्वमेष मे जीवितमेष एव मे परं तत्त्वमिति। अनेन रहितः पुरुषोऽकिंचित्करतया तृणपुरुषान्न विशिष्यते। ततश्चैवंविधभावनया संजातो मम वैश्वानरस्योपरिस्थिरतानुरागः। अन्यदा रहसि प्रवृत्ते तेन सह विश्रम्भजल्पे मयाभिहितं वरमित्र किमनेन बहुना जल्पितेन युष्मदायत्ता मम प्राणास्तदेते भवता यथेष्टं नियोजनीया इति।

ततश्चिन्तितं वैश्वानरेण अये सफलो मे परिश्रमो यदेष मम वशवर्त्ती वर्त्तते। दर्शितोऽनेनैवं वदता निर्भरोऽनुरागः। अनुरक्ताश्च प्राणिनः समाकर्णयन्ति वचनम्। ग्टण्हन्ति निर्विकल्पम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवर्त्तन्ते तत्र भावेन । संपादयन्ति क्रियया । तदिदमत्र प्राप्तकालमिति विचिन्त्य तेनाभिहितं कुमार ।

एवमेतत्कः खल्वत्र सन्देहः । यत्र गृहीतहृदयसद्भावानामपि मादृशां पुरतः कुमारोऽप्येवं मन्त्रयति । महाप्रसादोऽत्र कारणम् । स हि हर्षोत्कर्षाज्ज्ञातार्थमपि वाक्यं बलाद्भाणयति । तत्किमनेन करोमि कुमारस्याहमत्रयान प्राणान् । एष एवमेतन्नियोगो मयाभिहितम् । कथं तेनोक्तं जानाम्यहं किंचिद्रसायनम् । मयाभिहितं करोतु वरवयस्यः । तेनोक्तं यदाज्ञापयति कुमारः । ततः कृतानि तेन क्रूरचित्ताभिधानानि वटकानि समुपनीतानि मे रहसि वर्त्तमानस्य । अभिहितश्चाहं कुमार एतानि मदीयसामर्थ्यप्रभवानि वर्त्तन्ते वटकानि । कुर्वन्त्युपयुज्यमानानि वीर्योत्कर्षसंपादनेन पुरुषस्य सर्वं यथेष्टं दीर्घतरं चायुष्कम् । तस्माद् गृहाण त्वमेतानि ।

अत्रान्तरे लघुध्वनिना कक्षान्तरस्थितेन केनाप्यभिहितम् । भविष्यति नवाभिमते स्थाने कोऽत्र सन्देहः । न श्रुतं तन्मया । श्रुतं वैश्वानरेण । ततः संपत्स्यते मम समीहितम् । यास्यत्येष वटकोपयोगेन महानरके । भविष्यति तत्र गतस्यास्य दीर्घमायुष्कम् । कथमन्यथैवंविधः शब्दो महानरक एव ममाभिहितं स्थानमिति भावनया तुष्टोऽसौ चित्तेन । मयाभिहितं किं न संपद्यते मे भवादृशि वरमित्रेऽनुकूले । तदाकर्ण्य द्विगुणतरं परितुष्टोऽसौ समर्पितानि वटकानि गृहीतानि मया । अभिहितं च तेन कुमारायमपरो मम प्रसादो विधेयः कुमारेण यदुत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मयावसरे संज्ञिते न निर्विकल्पमेतेषां मध्यादेकं वटकं भक्षितव्यं कुमारेणेति । मयाभिहितं किमत्र प्रार्थनया । निवेदित एवाय-मात्मा वरमित्रस्य । वैश्वानरेणाभिहितम् । महाप्रसादोऽनुगृहीतोऽहं कुमारेणेति । इतश्च तातेन सर्वत्र विश्वसनीयो नियुक्तो राजवल्लभो दारकः । यदुत अरे विदुर समादिष्टो मया कुमारः । यथानन्यमनस्केन भवता कलाग्रहणं विधेयम् । अहमपि न द्रष्टव्योऽहमेव भवन्तमागत्य द्रक्ष्यामि । तदेवं स्थिते मम राज्यकार्यव्याकुलतया कदाचित्तत्समीपे गमनं न संपद्येत ततो भवता प्रतिदिनं कुमारशरीरवार्ता मम संपादनीया विदुरेणोक्तम् यदाज्ञापयति देवः ततः संपादयता तेन तद्राजशासनं लक्षितः स सर्वोऽपि मदीयो राजदारककलाचार्यकदर्थनव्यतिकरः । तथापि मनःक्षतिभयेन कियन्तमपि कालं न कथितोऽसौ ताताय अतिभरमवलोक्य निवेदितोऽन्यदा ततश्चिन्तितं तातेन नैष विदुरस्तावदसत्यं भाषते । न चापि कुमारः प्रायेणैवंविधमाचरति तत्किमत्र तत्त्वं भविष्यतीति न जानीमहे । यदि च कलाचार्यस्यापि कदर्थनं विधत्ते कुमारो निष्पन्नं ततः कलाग्रहणप्रयोजनमिति चिन्तया समुद्विग्नोऽभूत्तातश्चित्तेन पुनश्चिन्तितमनेनेदम् । अत्र प्राप्तकालं पृच्छामि तावत्कलाचार्यमेव यथावस्थितम् । ततो निश्चित्य वृत्तान्तं तन्निवारणोपाये यत्नं करिष्यामि ततः प्रेषितस्तदाकारणाय सबहुमानं विदुरः समागतः कलाचार्यः । अभ्युत्थितस्तातेन दापितमासनं विहिता परिचर्या ततस्तदनुज्ञातविष्टरोपविष्टेन तातेनाभिहितं आर्य बुद्धिसमुद्र अपि समुत्सर्पति कलाग्रहणं कुमाराणाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेनाभिहितं देव बाढमुत्सर्पति युष्मदनुभावेन तातेनाभिहितं किं परिणताः काश्चिन्नन्दिवर्द्धनकुमारस्य कलाः कलाचार्येणाभिहितं सुष्ठु परिणताः देव निष्पन्न एव कलासु नन्दिवर्द्धनकुमारः। तथाहि। स्वीकृतमनेन समस्तमपि लिपिज्ञानं स्वयं पृष्ठमिव गणितं उत्पादितमिवात्मना व्याकरणं चेत्रीभूतमस्य ज्योतिषं सात्मीभूतमष्टाङ्गमहानिमित्तं व्याख्यातमन्येभ्यश्छन्दोऽनेन अभ्यस्तं नृत्तं शिक्षितं गेयं प्रणयिनीवास्य हस्तशिक्षा वयस्येव धनुर्वेदः मित्रमिव वैद्यकं निर्देशकारीव धातुवादः अनुचराणीव नरलक्षणादीनि आधेयविक्रेयाणि पत्रच्छेद्यादीनि। किं बहुना नास्ति सा काचित्कला या कुमारमासाद्य न प्राप्ता परां काष्ठामिति।

ततः प्रादुर्भवदानन्दोदकपरिपूरितनयनयुगलेनाभिहितं तातेन आर्य एवमेतत् किमत्राश्चर्यम् किं वार्ये कृतोद्योगे न संपद्यते कुमारस्य धन्यः कुमारो यस्य युष्मादृशा गुरवः बुद्धिसमुद्रेणोक्तं देव मामैवमादिश केऽत्र वयं युष्मदनुभावोऽयं तातेनाभिहितं आर्य किमनेनोपचारवचसा युष्मत्प्रसादेनैवास्मदानन्दसन्दर्भदायिकां संप्राप्तः कुमारः सकलगुणभाजनताम्। बुद्धिसमुद्रेणोक्तं यद्येवं ततो देवकर्त्तव्येषु नियुक्तैरनुचरैर्न वञ्चनीयाः स्वामिन इति पर्यालोचनया किंचिद्देवं विज्ञापयितुमिच्छामि तच्च युक्तमयुक्तं वा चन्तुमर्हति देवो यतो यथार्थं मनोहरं च दुर्लभं वचनम्। तातेनाभिहितं वदत्वार्यः यथावस्थितवचने कोऽवसरोऽत्रमायाः बुद्धिसमुद्रेणोक्तं यद्येवं ततो यदादिष्टं देवेन यथा सकलगुणभाजनतां संप्राप्तः कुमार इति तथैव स्वाभाविकं कुमारस्य स्वरूपं प्रतीत्य नास्त्यत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्देहः किन्तु सकलमपि कुमारस्य गुणसन्दोहं कलङ्केनेव शशधरं कण्टकेनेव तामरसं कार्पण्येनेव वित्तनिचयं नैर्लज्ज्येनेव स्त्रीजनं भीरुत्वेनेव पुरुषवर्गं परोपतापेनेव धर्मं वैश्वानरसंपर्केण दूषितमहमवगच्छामि ।

यतः सकलस्यापि कलाकलापकौशलस्य प्रशमोऽलङ्करणम् । एष तु वैश्वानरपापमित्रतया सन्निहितः सन्नात्मीयसामर्थ्येन तं प्रशमं कुमारस्य नाशयति ।

कुमारस्तु महामोहवशात्परमार्थवैरिणमप्येनं वैश्वानरं परमोपकारिणमाकलयति तदनेनेदृशेन पापमित्रेण यस्य प्रतिहतं ज्ञानसारं प्रशमामृतं कुमारस्य तस्य निष्फलो गुणप्राग्भार इति ।

ततस्तदाकर्ण्य तातो वज्राहत इव गृहीतो महादुःखेन ततस्ताते नाभिहितं भद्र वेदक परित्यजेदं चन्दनरससेकशीतलं तालवृन्तं न मामेष वह्निस्तापो बाधते गच्छ समाहूय कुमारं येनापनयामि तस्य पापमित्रसंसर्गवारणेन दुःसहमात्मनोऽन्तस्तापमिति ।

ततो विमुच्य तालवृन्तं चितिनिहितजानुकरमस्तकेन वेदकेनाभिहितं यदाज्ञापयति देवः किन्तु महाप्रयोजनमपेक्ष्य भविष्याम्यहमस्थापितमहत्तमः ततो न तत्र देवेन कोपः करणीयः । तातेनाभिहितं भद्र हितभाषिणि कः कोपावसरो वदतु विवक्षितं भद्रः। वेदकेनाभिहितं देव यद्येवं ततः कुमारपरिचयादेवावधारितमिदं मया यदुतायं वैश्वानरोऽन्तरङ्गभूतः कुमारस्य वयस्यो न शक्योऽधुना केनाप्यपसारयितुं गृहीतः कुमारेणात्यर्थं हितबन्धुबुध्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न शक्नोति तद्विरहे चणमप्यासितुं कुमारः यतो न लभते धृतिं गृह्यते रणरणकेन मन्यते तृणतुल्यमनेन रहितमात्मनम् ।

ततो यद्यप्ययं कुमारो वैश्वानरसंसर्गत्यागं प्रति किंचिदुच्यते ततोऽहमेवं तर्कयामि महान्तमुद्वेगं कुर्यात् आत्मघातादिकं वा विदध्यात् अन्यद्वा किंचिदकाण्डविड्वरमनर्थान्तरं संपादयेदित्यतो नाचार्थे किंचिद्वक्तुं कुमारमर्हति देवः । बुद्धिसमुद्रेणोक्तं देव सत्यमेव सर्वमिदं यदावेदितं वेदकेन ।

तथाहि। वयमपि कुमारस्य पापमित्रसंबन्धवारणे गाढमुद्युक्ताः सकलकालमास्महे चिन्तितं चास्माभिः यद्ययं कुमारोऽनेन वैश्वानर-पापमित्रेण वियुज्येत ततः सत्यं नन्दिवर्द्धनः स्यात् केवलमीदृशं कथंचिदनयोर्गाढनिरूढं प्रेम येन न शक्यतेऽधुना कुमारोऽनर्थभीरु-तया वियोजनं विधातुमित्यतोऽशक्यानुष्ठानरूपं कुमारस्य वैश्वानरेण सह मैत्रीवारणमिति मन्यामहे। तातेनाभिहितमार्य कः पुनरत्रो-पायो भविष्यति । बुद्धिसमुद्रेणोक्तम्। अतिगहनमेतत्। वयमपि न जानीमो विदुरेणाभिहितम्। देव श्रूयतेऽत्र कश्चिदतीतानागत-वर्त्तमानपदार्थवेदी समागतो जिनमतज्ञो नाम सिद्धपुत्रो महा-नैमित्तिकः स कदाचिदत्रोपायं लक्षयति । तातेनाभिहितं साध्व-भिहितं भद्र साधु शीघ्रं समाकार्यतां स भवता विदुरेणाभिहितं यदाज्ञापयति देव इति । निर्गतो विदुरः समागतो नैमित्तिकेन सह स्तोकवेलकया दृष्टो नैमित्तिकस्तातेन तुष्टश्चेतसा दापितमासनं कृतमुचितकरणीयं कथितो व्यतिकरः । ततो बुद्धिनाडीसंचारेण निरूप्य तेनाभिहितं महाराज न विद्यतेऽत्रान्यः कश्चिदुपायः। एक

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवात्र परमुपायो विद्यते दुर्लभश्चासौ प्रायेण। तातेनाभिहितं कीदृशः स इति कथयत्वार्यः। जिनमतज्ञेनाभिहितं महाराजाकर्णय।

अस्ति रहितं सर्वोपद्रवैर्निवासस्थानं समस्तगुणानां कारणं कल्याणपरंपराया दुर्लभं मन्दभागधेयैश्चित्तसौन्दर्यं नाम नगरम्।

तथाहि।

वसतां तत्र लोकानां नगरे पुण्यकर्मणाम्।
रागादिचरटाः सर्वे जायन्ते नैव बाधकाः॥
यतश्च क्षुत्पिपासाद्या बाधन्ते तत्र नो जनम्।
ततस्तदुच्यते धीरैः सर्वोपद्रववर्जितम्॥
ज्ञानादिभाजनं लोकस्तद्दर्शनैव जायते।
कलाकलापकौशल्यं न ततोऽन्यत्र विद्यते॥
भवन्त्यौदार्यगाम्भीर्यधैर्यवीर्यादयो गुणाः।
वसतां तत्र तत्सर्वगुणस्थानमतो मतम्॥
यतश्च वसतां तत्र धन्यानां संप्रवर्तते।
उत्तरोत्तरभावेन विशिष्टा सुखपद्धतिः॥
न च संपद्यते तस्याः प्रतिपातः कदाचन।
कल्याणपद्धतेर्हेतुरतस्तन्नगरं मतम्॥
सर्वोपद्रवनिर्मुक्तं समस्तगुणभूषितम्।
कल्याणपद्धतेर्हेतुर्यत एव च तत्पुरम्॥
अतएव सदानन्दं तत्सपुण्यैर्निषेवितम्।
नगरं चित्तसौन्दर्यं मन्दभाग्यैः सुदुर्लभम्॥

तत्र च नगरेऽस्ति हितकारी सर्वलोकानां कृतोद्योगो दुष्ट-



For Private And Personal Use Only

निग्रहे दत्तावधानः शिष्टपरिपालने परिपूर्णः कोशदण्डसमुदयेन शुभपरिणामो नाम राजा।

यतोऽसौ सर्वलोकानां चित्तसन्तापवारकः।
तथा संपर्कमात्रेण महानन्दविधायकः॥
सदनुष्ठानमार्गेऽपि जन्तूनां स प्रवर्त्तकः।
अतो वीरजनैर्लोके हितकारी निगद्यते॥
रागद्वेषमहामोहक्रोधलोभमदभ्रमाः।
कामेर्ष्याशोकदैन्याद्या ये चान्ये दुःखहेतवः॥
दुष्टचेष्टतया नित्यं लोकसन्तापकारिणः।
तेषामुद्दलनं राजा स कुर्वन्नवतिष्ठते॥
ज्ञानवैराग्यसंतोषत्यागसौजन्यलक्षणाः।
ये चान्ये जनताह्लादकारिणः शिष्टसंमताः॥
तेषां स राजा सततं परिपालनतत्परः।
अस्ति निःशेषकर्त्तव्यव्यापारविमुखः सदा॥
धीधृतिस्मृतिसंवेगशमाद्यैः परिपूर्यते।
भाण्डागारं यतस्तस्य गुणरत्नैः प्रतिक्षणम्॥
दण्डश्च वर्द्धते तस्य चतुर्भेदबलात्मकः।
शीलाङ्गलक्षणैर्नित्यं रथदन्तिहयादिभिः॥
दुष्टानां निग्रहासक्तः शिष्टानां परिपालकः।
कोशदण्डसमृद्धश्च तेनासौ गीयते नृपः॥

तस्य च शुभपरिणामस्य राज्ञो गृहीतजयपताका शरीर-सौन्दर्येण विनिर्जितभुवनत्रयकलाकलापकौशलेनापहसितरतिवि-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्रमा विलासविस्तरेणाधरिताक्न्धतीमहात्म्यातिशया निजपतिभक्ति-
तया निष्प्रकम्पता नाम महादेवी ।

एकत्र सर्वायत्नेन कृतालङ्कारचर्चनम् ।
सुरासुरनरस्त्रैणं यत्स्यात्लोकेऽतिसुन्दरम् ॥
चोभार्थं मुनिसंघस्य कदाचिदुपतिष्ठते ।
अन्यस्यां दिशि संस्थाप्य सा देवी निष्प्रकम्पता ॥
आसक्तिर्मुनिचित्तानां तस्यामेवोपजायते ।
अतः शरीरसौन्दर्यात्सा गृहीतपताकिका ॥
रुद्रेन्द्रोपेन्द्रचन्द्राद्याः कलाकौशलशालिनः ।
ये चान्ये लोकविख्याता विद्यन्ते भुवनत्रये ॥
लोभकामादिभिः सर्वे जितास्ते भावशत्रुभिः ।
न कौशलमतस्तेषां विद्यते परमार्थतः ॥
तस्यास्तु देव्यास्तत्किंचित्कौशलं येन लीलया ।
तान्पराजयते तेन साभिभूतजगत्त्रया ॥
रतेर्विलासाः कामस्य केवलं तोषहेतवः ।
मुनयस्तु पुनस्तेषां न वार्त्तामपि जानते ॥
तस्याः सक्ताः पुनर्देव्या व्रतनिर्वाहणादयः ।
विलासा मुनिलोकस्य मानसाक्षेपकारिणः ॥
अतोपहसिता सत्यं स्वविलासै रतिस्तया ।
यथा च भर्त्तुर्भक्ता सा तथेदानीं निगद्यते ॥
आपन्निमग्नभर्त्तारं प्रक्राम्य निजजीवितम् ।
निर्वाहयति वीर्येण तेनासौ भर्त्तृवत्सला ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अरुन्धती पुनर्नैव पत्युः संरक्षणक्षमा ।
निष्प्रकम्पतया तस्मात् भर्त्तृभक्ततया जिता ॥
किंचेह बहुनोक्तेन राज्ञः कार्यप्रसाधनी ।
तस्य राज्ये परं सारा सा देवी निष्प्रकम्पता ॥

तयोश्च निष्प्रकम्पता शुभपरिणामयोर्देवीनृपयोरस्ति प्रकर्षः सुन्दराणामुत्पत्तिभूमिराश्चर्याणां मञ्जूषा गुणरत्नराशेः वपुर्वैलक्षण्येन मुनीनामपि मनोहारिणी क्षान्तिर्नाम दुहिता ।

यतः सा सततानन्ददायिनी पर्युपासिता ।
स्मरणेनापि निःशेषदोषमोषविधायनी ॥
निरीक्षते विशालाक्षी यन्नरं किल लीलया ।
पण्डितैः स महात्मेति कृत्वा गाढं प्रशस्यते ॥
आलिङ्गनं पुनस्तस्यामन्यो यो लप्स्यते नरः ।
स सर्वनरवर्गस्य चक्रवर्त्ती भविष्यति ॥
अतस्तारुतरं तस्या नान्या जगति विद्यते ।
प्रकर्षसुन्दराणां सा विद्वद्भिस्तेन गीयते ॥
सज्ज्ञानकेवलज्ञानमहर्द्धिप्रशमादयः ।
लोकानामद्भुता भावा ये चमत्कारकारिणः ॥
ते भवन्ति भविष्यन्ति भूताश्चानन्तशो यतः ।
तत्प्रसादेन सत्वानां तामाराधयतां सदा ॥
उत्पत्तिभूमिः सा तस्मादाश्चर्याणामुदाहृता ।
यथा च रत्नमञ्जूषा तथेदानीं निबोधत ॥
दानशीलतपोज्ञानकुलरूपपराक्रमाः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्यशौचार्जवालोभवीर्यैश्वर्यादयो गुणाः ॥
ये केचित्सुन्दरा लोके वर्त्तन्ते रत्नरूपिणः ।
क्षान्तिरेवहि सर्वेषां तेषामाधारतां गता ॥
तेनासौ रत्नमञ्जूषा विद्वद्भिः परिकीर्त्तिता ।
क्षान्तिहीना गुणाः सर्वे न शोभन्ते निराश्रयाः ॥

अथवा ।

क्षान्तिरेव महादानं क्षान्तिरेव महातपः ।
क्षान्तिरेव महाज्ञानं क्षान्तिरेव महादमः ।
क्षान्तिरेव महाशीलं क्षान्तिरेव महाकुलम् ॥
क्षान्तिरेव महावीर्यं क्षान्तिरेव पराक्रमः ।
क्षान्तिरेव च सन्तोषः क्षान्तिरिन्द्रियनिग्रहः ॥
क्षान्तिरेव महाशौचं क्षान्तिरेव महादया ।
क्षान्तिरेव महारूपं क्षान्तिरेव महाबलम् ॥
क्षान्तिरेव महैश्वर्यं क्षान्तिर्धैर्यमुदाहृता ।
क्षान्तिरेव परं ब्रह्म सत्यं क्षान्तिःप्रकीर्त्तिता ॥
क्षान्तिरेव परा मुक्तिः क्षान्तिः सर्वार्थसाधिका ।
क्षान्तिरेव जगद्वन्द्या क्षान्तिरेव जगद्धिता ॥
क्षान्तिरेव जगज्ज्येष्ठा क्षान्तिः कल्याणदायिका ।
क्षान्तिरेव जगत्पूज्या क्षान्तिः परममङ्गलम् ॥
क्षान्तिरेवौषधं चारु सर्वव्याधिनिवर्हणम् ।
क्षान्तिरेवारिनिर्नाशं चतुरङ्गं महाबलम् ॥
किंचात्र बहुनोक्तेन क्षान्तौ सर्वं प्रतिष्ठितम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतएव तु सा कन्या मुनिलोकमनोहरा ॥
कुर्यादीदृशरूपायां को न चित्तं सचेतनः ।

अन्यच्च ।

यस्य चित्तं समारोहेदिलसन्ती स्वलीलया ।
सा कन्या धन्यतां प्राप्य सोऽपि तद्रूपतां व्रजेत् ॥
अतः सम्यग्गुणाकांक्षी कः सकर्णो न तां हृदि ।
कुर्यात्कन्यां सदाकालं सर्वकामसमर्पिकाम् ॥

एवं च स्थिते ।

सा गुणोत्कर्षयोगेन कन्या सर्वाङ्गसुन्दरा ।
अस्य वैश्वानरस्योच्चैः प्रतिपक्षतया स्थिता ॥
तस्या दर्शनमात्रेण भीतभीतः सुविक्लवः ।
एष वैश्वानरो मन्ये दूरतः प्रपलायते ॥
निःशेषदोषपुञ्जोऽयं सा कन्या गुणमन्दिरम् ।
साक्षादग्निरयं पापः सा पुनर्हिमशीतला ॥
सहावस्थानमेवं हि नानयोर्विद्यते क्वचित् ।
विरोधभावात्तेनैवमस्माभिरभिधीयते ॥
यद्येष कन्यां तां धन्यां कुमारः परिणेष्यति ।
अनेन पापमित्रेण तदा मैत्रीं विहास्यति ॥

अत्रान्तरे चिन्तितं विदुरेण अये अनेन जिनमतज्ञेन नैमित्तिकेनेदमभिहितं यथा चित्तसौन्दर्ये यः शुभपरिणामः तस्य या निष्प्रकम्पता तज्जनिता या क्षान्तिः सैवामुं नन्दिवर्द्धनकुमारस्यानेन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पापमित्रेण वैश्वानरेण सह संसर्गं निवारयितुं समर्था नान्यस्तन्नि-वारणे कश्चिदुपाय इति तत्सर्वमनेन युक्तमुक्तम्।

अथवा किमत्राश्चर्यं न हि जिनमतज्ञः कदाचिदयुक्तं भाषते ततस्तन्निमित्तकवचनमाकर्ण्य तातेनावलोकितं पार्श्ववर्त्तिनो मतिधनस्य महामन्त्रिणो वदनम्। स्थितोऽसौ प्रह्वतरोऽभिहितस्तातेन आर्य मतिधन श्रुतमेतद्भवता मतिधनेनाभिहितं देव श्रुतं ताते-नाभिहितं आर्य यद्येवं ततो महदिदं मम चित्तोद्वेगकारणं यद्येष विशिष्टजनस्पृहणीयोऽपि कुमारस्य गुणकलापः पापमित्रसम्बन्ध-दूषितो निष्फलः संपन्न इति तद्गच्छ शीघ्रं प्रेषय चित्तसौन्दर्ये वचनविन्याससकुशलान् प्रधानमहत्तमान् शाहय तद्देशासम्भवीनि प्राभृतानि इति। उपदिश गच्छतां तेषां निरन्तरसम्बन्धकरणपटू-न्युपचारवचनानि याचय कुमारार्थं शुभपरिणामं चान्तिदारिका-मिति। मतिधनेनाभिहितं यदाज्ञापयति देव इति निर्गन्तुं प्रवृत्तो मतिधनः जिनमतज्ञेनाभिहितं महाराज अलमनेनारम्भेण न खल्वेवंविधगमनयोग्यं तन्नगरं तातेनाभिहितं आर्य कथं जिनमतज्ञे-नाभिहितं महाराज समस्तान्येवात्र लोके नगरराजभार्यापुत्र-मित्रादीनि वस्तूनि द्विविधानि भवन्ति तद्यथान्तरङ्गाणि बहिर-ङ्गाणि च तत्र बहिरङ्गेष्वेव वस्तुषु भवादृशां गमनाज्ञापनादिव्यापारो नान्तरङ्गेषु एतच्च नगरं राजा तत्पत्नी दुहिता च सर्वमन्तरङ्गं वर्त्तते तन्न युज्यते तत्र महत्तमप्रेषणं तातेनाभिहितं आर्य कः पुनस्तत्र प्रभवति जिनमतज्ञेनाभिहितं योऽन्तरङ्ग एव राजा ताते-नाभिहितं आर्य कः पुनरसौ जिनमतज्ञेनाभिहितं महाराज

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्म्मपरिणामः तस्य हि शुभपरिणामस्य कर्मपरिणामेनैव भटभुक्त्या दत्तं तन्नगरम् । अतस्तदायत्तोऽसौ वर्त्तते तातेनाभिहितं आर्य किं भवत्यसौ कर्म्मपरिणामो मादृशामभ्यर्थनाविषयो जिनमतज्ञेनाभिहितं महाराज नैतदेवं स हि यथेष्टकारी प्रायेण नापेक्षते सत्पुरुषाभ्यर्थनां न रज्यते सदुपचारवचनेन न गृह्यते परोपरोधेन नानुकम्पते दृष्ट्वाप्यापद्गतं जनं केवलमसावपि कार्यं विदधानः पृच्छति महत्तमभगिनीं लोकस्थितिं पर्यालोचयति स्वभार्यां कालपरिणतिं कथयत्यात्मीयमहत्तमाय स्वभावाय । अनुवर्त्तते नन्दिवर्द्धनकुमारस्य समस्तभवान्तरानुयायिनीं प्रच्छन्नरूपां भार्यां भवितव्यतां बिभेति कियन्मात्रं नन्दिवर्द्धनकुमारवीर्यादपि स्वप्रवृत्तौ।

ततश्चैवंविधमन्तरङ्गपरिजनं स्वसंभावनया सन्मान्य एष कर्म्मपरिणाममहाराजः कार्यं कुर्वाणो न बहिरङ्गलोकं रटन्तमपि गणयति किंतर्हि यदात्मने रोचते तदेव विधत्ते तस्मान्नायमभ्यर्थनोचितः किंतु यदास्य प्रतिभासिष्यते तदा स्वयमेव कुमाराय दापयिष्यति शुभपरिणामेन क्षान्तिदारिकामिति । तातेनाभिहितं आर्य हतास्तर्हि वयं यतो न ज्ञायते कदा चित्तस्य प्रतिभासिष्यते अस्मिंस्तानपसारिते पापमित्रे कुमारस्य समस्तगुणविफलतया न किंचिदस्माकं जीवतीति कृत्वा जिनमतज्ञेनाभिहितं महाराजालं विषादेन किमत्र क्रियते यदीदृशमेवेदं प्रयोजनमिति ।

तथाहि

नरः प्रमादी शक्येऽर्थे स्यादुपालम्भभाजनम् ।
अशक्यवस्तुविषये पुरुषो नापराध्यति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि च।

योऽशक्येऽर्थे प्रवर्त्तेत अनपेक्ष्य बलाबलम्।
आत्मनश्च परेषां च स हास्यः स्याद्विपश्चिताम्॥
तदत्रैवं स्थिते कार्ये यद्भविष्यत्तथा परम्।
भवतां त्यक्तचिन्तानामासितुं युज्यते ध्रुवम्॥
अन्यच्च कथ्यते किं चिच्चेतसः स्वास्थ्यकारणम्।
निरालम्बनतामेत्य माभूद्दैन्यं भवादृशाम्॥

तातेनाभिहितं आर्य साधूक्तं समाश्वासिता वयमनेन भवता पश्चिमवचनेन तत्कथय किं तदस्माकं चेतसः स्वास्थ्यकारणमिति जिनमतज्ञेनाभिहितं महाराज अस्त्यस्य कुमारस्य प्रच्छन्नरूपः पुण्योदयो नाम वयस्यः स यावदस्य पार्श्ववर्त्ती तावदेष वैश्वानरः पापमित्रतया यं यमनर्थं कुमारस्य संपादयिष्यति स सोऽस्य प्रत्युतार्थरूपतया पर्यवस्यतीति तदाकर्ण्य मनाक् स्वस्थीभूतस्तातः। अत्रान्तरे दिनकरमम्बरतलस्य मध्यभागमारूढं निवेदयन्नाडिकाच्छेदप्रहतपटहनादानुसारी समुत्थितः शङ्खशब्दः। पठितं कालनिवेदकेन।

न क्रोधात्तेजसो वृद्धिः किं तु मध्यस्थभावतः।
दर्शयन्निति लोकानां सूर्यो मध्यस्थतां गतः॥

तातेनाभिहितमये मध्याह्नसमयो वर्त्तते ततः समुत्थातव्यमिदानीमिति कृत्वा विसर्जितो राजलोकः पूजितौ कलाचार्यनैमित्तिकौ प्रस्थापितौ स बहुमानं ततो नैमित्तिकवचनादशक्यानुष्ठानमेतदिति जातनिर्णयेनापि तातेन मोहहेतुतयापत्यस्नेहस्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समादिष्टो विदुरः। यदुत परीक्षितव्यो भवता कुमाराभिप्रायः किं शक्यतेऽस्मात्पापमित्राद्वियोजयितुं कुमारो न वेति। विदुरेणाभिहितं यदाज्ञापयति देवः। ततः समुत्थितस्तातः कृतं दिवसोचितं कर्त्तव्यं द्वितीयदिने समागतो मम समीपे विदुरो विहितप्रणामो निषण्णो मदन्तिके पृष्टो मया भद्र ह्यः किन्नागतोऽसि विदुरेण चिन्तितं अये समादिष्टस्तावदहं देवेन यथा लक्षयितव्यो भवता कुमाराभिप्रायः ततोऽहमस्मै यत् तत्साधुभ्यः सकाशादाकर्णितमासीन्मया दुर्जनसंसर्गदोषप्रतिपादकमुदाहरणं तत्कथयामि ततो विज्ञास्यते खल्वेतदीयोऽभिसन्धिरित्येवं विचिन्त्य विदुरेणाभिहितम्। कुमार किंचिदाश्चर्यमभून्मयाभिहितं कीदृशं विदुरेणाभिहितं कथानकमाकर्णितं मयाभिहितं वर्णय कीदृशं तत्कथानकं विदुरेणाभिहितं वर्णयामि केवलमवहितेन श्रोतव्यं कुमारेण मयाभिहितम् एष दत्तावधानोऽस्मि विदुरेणाभिहितं अस्त्यस्यामेव मनुजगतौ नगर्यामस्मिन्नेव भरताभिधाने पाटके क्षितिप्रतिष्ठितं नाम नगरं तत्रास्ति वीर्यनिधानभूतः कर्मविलासो नाम राजा तस्य च द्वे अग्रमहिष्यौ शुभसुन्दरी अकुशलमाला च तत्र शुभसुन्दर्याः पुत्रोऽस्ति मनीषी नाम। बालोऽकुशलमालायास्तौ च मनीषिबालौ संप्राप्तकुमारभावौ नानाकारेषु काननादिषु क्रीडारसमनुभवन्तौ यथेष्टचेष्टया विचरतः। अन्यदा स्वदेहाभिधाने कानने नातिदूरादेव दृष्टस्ताभ्यां कश्चित्पुरुषः। स च तयोः पश्यतोरेव समारूढस्तच्छ्रयाभिधानं वल्मीकं निबद्धस्तेन मूर्द्धनामकतरुशाखायां पाशको निमितः शिरोधरायां प्रवाहितश्चात्मा ततो सा साहसं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मा साहसमिति वदन्तौ प्राप्तौ ससंभ्रमं तत्समीपं कुमारौ छिन्नः पाशको बालेन ततः संमोहविक्लवो भग्नलोचनश्च पतितोऽसौ पुरुषो भूतले समाल्हादितो वायुदानेन कुमाराभ्यां लब्धा चेतना उन्मीलिते लोचने निरीक्षिता दिशो दृष्टौ कुमारौ अभिहितस्ताभ्यां भद्र किमेतदधमपुरुषोचितं भवता व्यवसितं किं वा भद्रस्येदृशाध्यवसायस्य कारणमिति कथयतु भद्रो यद्यनाख्येयं न भवति। ततो दीर्घदीर्घं निश्वस्य पुरुषेणाभिहितम्। अलमस्मदीयकथया न सुन्दरमनुष्ठितं भद्राभ्यां यदहमात्मदुःखानलं निर्वापयितुकामो भवद्भ्यां धारितः तदधुनापि न कर्त्तव्यो मे विघ्न इति ब्रुवाणः समुत्थितः पुनरात्मानमुल्लम्बयितुमसौ पुरुषो धृतो बालेन अभिहितश्च। भद्र-कथय तावदस्माकमुपरोधेन स्ववृत्तान्तं ततो यद्यलब्धप्रतीकारः स्या त्ततो यदुचितं तत्कुर्याः। पुरुषेणाभिहितं यदि निर्बन्धस्ततः श्रूयतां आसीन्मम शरीरमिव सर्वस्वमिव जीवितमिव हृदयमिव द्वितीयं भवजन्तुर्नाम मित्रं स चातिस्नेहनिर्भरतया न क्षणमात्रमपि मां विरहयति किं तर्हि सकलकालं मामेव लालयति पालयति पृच्छति च मां क्षणे क्षणे। यदुत भद्र स्पर्शन किं तुभ्यं रोचते ततो यद्यदहं वदामि तत्तदसौ भवजन्तुर्मम वयस्यो वत्सलतया संपादयति न कदाचिन्मत्प्रतिकूलं विधत्ते। अन्यदा मम मन्दभाग्यतया दृष्टस्तेन सदागमो नाम पुरुषः। पर्यालोचितं च सह तेन किंचिदेकान्ते भवजन्तुना भावितचित्तेन। हृष्ट इव लक्ष्यते ततस्तत्कालादारभ्य शिथिलीभूतो ममोपरि स्नेहबन्धः। न करोति तथा लालनां न दर्शयत्यात्मबुद्धिं न प्रवर्त्तते मदुपदेशेन न मम वार्त्तामपि प्रश्नयति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्युत मां वैरिकमेव मन्यते दर्शयति विप्रियाणि सकलं प्रतिकूलमासेवते ततो मया चिन्तितं हा हन्त किमेतत् न मया किंचिदस्य व्यलीकमाचरितं किमित्ययमकाण्ड एव भवजन्तुः षष्ठिकापरावर्त्तित इवान्यथा संवृत्तः । हा हतोऽस्मि मन्दभाग्य इत्याराटयमानो वज्राहत इव पिष्ट इव हृतसर्वस्व इव शोकभराक्रान्तमूर्त्तिः प्राप्तोऽहं दुःखातिरेकं लक्षितं च कथंचित्पर्यालोचयता मया अये सर्वोऽप्ययं सदागमपर्यालोचजनितोऽनर्थव्यतिकरो विप्रतारितोऽयं मम वयस्योऽनेन पापेन स चोन्मूलयन्निव मम हृदयं पुनः पुनस्तेन सदागमेन सह रहसि पर्यालोचयति तं निवारणार्थं रटन्तमपि मां नाकर्णयति यथा यथा च भवजन्तोः सदागमपर्यालोचः सुतरां परिणमति तथा तथा मामेष नितरां शिथिलयति ततः प्रवर्द्धते मे गाढतरं दुःखं अन्यदा दृढतरं पर्यालोच्य सदागमेन सह किंचिदेकान्ते चोटितो मया सह संबन्धः सर्वथैव भवजन्तुना परिच्छिन्नोऽहं चित्तेन त्यक्तानि मम वल्लभानि मद्वचनेनैव गृहीतानि यानि पूर्वं कोमलतूलीगण्डपिधानादिसनाथानि शयनानि विरहितानि हंसपक्ष्मादिपूरितान्यासनानि मुक्तानि वृहतिकाप्रावाररल्लिकाचीनांशुकपटांशुकादीनि कोमलवस्त्राणि प्रत्याख्यातानि मम सुखदायीनि शीतोष्णर्त्तुप्रतिकूलतया सेव्यानि कस्तूरिकागुरुचन्दनादीनि विलेपनानि वर्जितः सर्वथा ममाह्लादातिरेकसंपादकः कोमलतनुलताकलितो ललनासंघातस्ततः प्रभृति स भवजन्तुः करोति केशोत्पाटनं शेते कठिनभूमौ धारयति शरीरे मलं परिधत्ते जरच्चीवराणि वर्जयति दूरतः स्नीगाचसङ्गं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथंचिद्दापन्ने तस्मिन्करोति प्रायश्चित्तं सहते माघमासे शीतं गृह्णाति ज्येष्ठाषाढयोरातपं सर्वथा परमवैरिक इव यद्यत्किंचिन्मे प्रतिकूलं तत्सर्वमाचरति ततो मया चिन्तितं परित्यक्तस्तावत्सर्वथा-हमनेन गृहीतस्य शत्रुबुद्ध्या तथाप्यामरणान्ताः प्रणयाः सज्जना-नामिति वृद्धवादः। ततो यद्यप्ययमनेन सदागमपापमित्रेण विप्र-तारितो मामेवं कदर्थयति तथाप्यकाण्ड एव न मया मोक्तव्यो यतो भद्रकोऽयं ममात्मीयप्रकृत्या लचितो बहुना कालेन कृतानि भूयांसि ममानुकूलानि सदागममेलकजनितोऽयमस्य विपर्यासः। तत्कदाचिदपगच्छत्येष कालेन ततो भविष्यति ममोपरि पूर्ववदस्य स्नेहभावः। एवं पर्यालोच्य व्यवस्थितोऽहं बहिष्कृतोऽपि तेन भव-जन्तुना तस्यैव सम्बन्धिनि शरीराभिधाने प्रासादे महादुःखानु-भवेन कालमुदीक्षमाणो दुराशापाशावपाशितः सन् कियन्तमपि कालमिति।

अन्यदा सदागमवचनमनुवर्त्तमानस्तिरस्कृत्य मां पुरुषक्रियया निष्कास्य ततोऽपि प्रासादात्परमाधार्मिक इव निर्घृणतया मामा-क्रन्दन्तं तमवगणय्य रुष्ट इव तत्र यास्यामि यत्र भवन्तं लोचनाभ्यां न द्रक्ष्यामीत्यभिधाय गतः क्वचित्स चेदानीं निर्वृतौ नगर्यां प्राप्तः श्रूयते सा च मादृशामगम्या नगरी ततो मया चिन्तितं किम-धुनापि मम प्रियमित्रपरिभूतेन तद्विरहितेनाजागलस्तनकल्पेन जीवितेन ततस्तेदमध्यवसितमिति। बालेनाभिहितं साधु स्पर्शन साधु स्थाने भवतो व्यवसायः दुःसहं हि प्रियमित्रपरिभवदुःखं तद्विरहसन्तापश्च न शक्यतेऽन्यथा यापयितुम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाहि।

न शक्यः सहजात्सोढुं चमिणापि पराभवः।
कतकेन हि निर्मुक्तः पाषाणोऽपि प्रलीयते॥
मानिनां मित्रविरहे जीवितुं नैव युज्यते।
इदं हि नश्यता तूर्णं वासरेण निवेदितम्॥

अहो ते मित्रवत्सलता अहो ते स्थिरानुरागः अहो कृतज्ञता अहो साहसं अहो निर्मिथ्यभावतेति भवजन्तोः पुनरहो चणरक्तविरक्तता अहो ते कृतघ्नता अहो अलौकिकत्वं अहो मूढता अहो खरहृदयत्वं अहो अनार्यानुष्ठानप्रवृत्तिरिति केवलमेवमपि स्थिते ब्रवीम्यहमत्र किंचित्तदाकर्णयतु भद्रः। स्पर्शनेनाभिहितं वदतु निर्विकल्पमार्यः। बालेनाभिहितम्।

अलब्धप्रतीकाराणामभिमानावलम्बिनाम्।
खेदैकबद्धकचाणां युक्तमेतद्भवादृशाम्॥

तथापि मदनुग्रहेण धारणीया भद्रेण प्राणा इतरथा ममापीयमेव गतिः रञ्जितोऽहमनेन भवतो निष्कृत्रिममित्रवात्सल्येन दाक्षिण्यमहोदधयश्च सत्पुरुषा भवन्ति सत्पुरुषश्च भद्रकार्यतो गम्येत। अतः कर्त्तव्यमेवैतत् निर्विचारं ममाकं वचनं भद्रेण। यद्यपि चूतमनोरथा न चिच्छिनिकथा पूर्यन्ते तथापि मदनुकम्पया भवता मत्संबन्ध एव भवजन्तुविरहदुःखप्रतीकारबुद्ध्या मन्तव्यः। स्पर्शनेनाभिहितम्। साधु आर्य साधु धारिता एव भवतानुपकृतवत्सलेनातिस्निग्धवचनामृतसेकेनानेन स्वयमेव विलीयमाना मदीयप्राणाः। किमत्र वक्तव्यं नष्टौ मेऽधुना शोकसन्तापौ विस्तारित इव भवता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवजन्तुः शीतलीभूतं नयनयुगलं आह्लादितं चित्तं निर्वापितं मे शरीरं भवद्दर्शनेन किं बहुना त्वमेवाधुना भवजन्तुरिति ततः संजातस्तयोर्निरन्तरं स्नेहभावः। मनीषिणा चिन्तितं न खलु सहजोऽनुरक्तो वयस्यः केनचित्प्रेक्षापूर्वकारिणा पुरुषेण निर्दोषस्त्यज्यते। न च सदागमो निर्दोषं कदाचित्त्याजयति। स हि गाढं पर्यालोचितकारी श्रुतमस्माभिः। तदत्र कारणेन भवितव्यं न सुन्दरः खल्वेष स्पर्शनः प्रायेण तदनेन सह मैत्रीं कुर्वता विरूपमाचरितं बालेन एवं चिन्तयन्नेव मनीषी संभाषितः स्पर्शनेन कृतं मनीषिणापि लोकयात्रानुरोधेन संभाषणं संजाता तेनापि सह बहिश्छायया मैत्री स्पर्शनस्य। प्रविष्टाः सर्वेऽपि नगरे संप्राप्ता राजभवनं दृष्टो दत्तास्थानः कर्मविलासः सह महादेवीभ्यां कृतं पादपतनं जननीजनकानाम्। आनन्दितास्तैराशीर्वादेन दापितान्यासनानि नोपविष्टास्तेषु निषण्णा भूतले दर्शितः स्पर्शनः कथितस्तद्वृत्तान्तः प्रकाशितश्चात्मनश्च तेन सह मैत्रीभावः कुमाराभ्यां परितुष्टः कर्मविलासः चिन्तितमनेन मम तावदपथ्यसेवनमिव व्याधेरुपचयहेतुरेष स्पर्शनः दृष्ट एव मयानेकशः पूर्वं तत्सुन्दरमेतत्संपन्नं यदनेन सहानयोर्मैत्री संजातेति केवलं प्रकृतिरियं ममानादिरूढा वर्त्तते। यदुत योऽस्यानुकूलस्तस्य मया प्रतिकूलेन भवितव्यं यः पुनरस्य प्रतिकूलो निरभिष्वङ्गतया तस्य मया सुन्दरं वर्त्तितव्यं यः पुनरेकान्ततस्त्यजति स मयापि सर्वथा मोक्तव्य एव तदेवं स्थिते निरीक्ष्य निरीक्ष्य कुमारयोरेनं प्रतिचेष्टितं यथोचितं करिष्यामीति विचिन्त्याभिहितं कर्मविलासेन वत्सौ सुन्दरमनुष्ठितं भवद्भ्यां यदेष

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्पर्शनः प्राणत्यागं विदधानो धारितो मैत्रीकरणेन पुनः सुन्दरतरं क्षीरं खण्डयोगतुल्यौ हि वत्सयोरनयोः सार्द्धं संबन्धः। अकुशलमालया चिन्तितं अहो मे धन्यता भविष्यत्येतत्संबन्धेन मम यथार्थं नाम यो ह्यस्य स्पर्शनस्यानुकूलः स ममात्यन्तवल्लभः स एव च मां वर्द्धयति पालयति मदीयस्नेहफलं चानुभवति नेतरः बहुशोऽनुभूतपूर्वमेतन्मया एष मदीयस्तनुरेनं प्रति मुखरागेण गाढमनुकूलो लक्ष्यते। ततो भविष्यति मनोरथपूर्त्तिरिति विचिन्त्य तया बालं प्रत्यभिहितं वत्स सुन्दरमनुष्ठितं अवियोगो भवतु भवतः सुमित्रेणेति शुभसुन्दर्या चिन्तितं न सुन्दरः खल्वेष मम तनयस्य पापमित्रसम्बन्धः रिपुरेष परमार्थेन कारणमनर्थपरम्परायाः यतुरयं ममापि सहजो वर्त्तते कदर्थिताहमनेन बहुशः पूर्वं नास्त्येव मयास्य च सहावस्थानं केवलमेतावानत्र चित्तसन्धारणाहेतुः यदेष मदीयपुत्रोऽमुं प्रति मुखच्छायया दृष्टिविकारेण च विरक्त इव लक्ष्यते ततो न प्रभविष्यति प्रायेण ममायं पापो यदि वा न ज्ञायते किं भविष्यति विषमः खल्वेष दुरात्मा इत्याद्यनेकविकल्पमालाकुलमानसापि गंभीरतया मौनेनैव स्थिता शुभसुन्दरी। अत्रान्तरे संजातो मध्याह्नः उपसंहृतमास्थानं गताः सर्वेऽपि स्वस्थानेषु तद्दिनादारभ्य प्रवर्द्धते बालस्य स्पर्शनेन सह स्नेहाबन्धः चकितस्तिष्ठति सर्वथा मनीषी न गच्छति विश्रंभं स्पर्शनस्तु सदा सन्निहिततया कुमारयोरन्तर्बहिश्च न पार्श्वं मुञ्चति ततः पर्यटन्ति ते सहिता एव नानास्थानेषु क्रीड़न्ति विविधक्रीडाभिस्ततो मनीषिणा चिन्तितं कीदृशमनेन स्पर्शनेन सह विचरतां सर्वत्राविश्रब्धचित्तानां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुखं न चैष तावदद्यापि सम्यग् लक्ष्यते कीदृशस्वरूप इति न चाज्ञातपरमार्थैरेष निर्द्धारयितुं संगृहीतुं वा पार्यते। तदिदमत्र प्राप्तकालं गवेषयामि तावदस्य मूलशुद्धिं ततो विज्ञाय यथोचितमाचरिष्यामीति स्थापितः सिद्धान्तस्ततः समाहूतो रहसि बोधो नामाङ्गरक्षः। अभिहितश्चासौ भद्र ममास्य स्पर्शनस्योपरि महानविश्रंभः तदस्य मूलशुद्धिं सम्यगवबुध्य शीघ्रमावेदय। बोधेनाभिहितं यदाज्ञापयति कुमार इति निर्गतो बोधः। ततोऽभ्यस्तसमस्तदेशभाषाकौशलो बहुविधवेषविरचनाचतुरः स्वामिकार्यबद्धकक्षो लब्धलक्ष्योऽनुपलक्ष्यश्च प्रहितस्तेनात्मीयः प्रभावो नाम पुरुषः प्रणिधिः आदिष्टश्चासौ प्रस्तुतप्रयोजनं ततो विविधदेशेषु कियन्तमपि कालं पर्यट्य समागतः सोऽन्यदा प्रविष्टो बोधसमीपे विहितप्रणामो निषण्णो भूतले बोधेनापि विधायोचितां प्रतिपत्तिमभिहितोऽसौ भद्र वर्णयात्मीयवृत्तान्तम्। प्रभावः प्राह यदाज्ञापयति देवः। अस्ति तावदहमितो निर्गत्य गतो बहिरङ्गेषु नानादेशेषु न लब्धो मया तत्र प्रस्तुत प्रवृत्तिगन्धोऽपि। ततो गतोऽहमन्तरङ्गेषु जनपदेषु तत्र च दृष्टमेकत्र मया भिल्लपल्लीकल्पमाकीर्णं समन्तात्कामादिचरटैर्निवासः पापिष्ठलोकानामाकरो मिथ्याभिमानस्य हेतुरकल्याणपरम्परायाः अवष्टब्धं सततं विततेन तमसा रहितं प्रकाशलेशेनापि राजसचित्तं नाम नगरम्। तत्र च चूडामणिश्चरटचक्रस्य कारणं समस्तपापवृत्तीनां वज्रपातः कुशलमार्गगिरेः दुर्जयः शक्रादीनामतुलबलपराक्रमो रागकेसरी नाम नरेन्द्रः। तस्य च चिन्तकः सर्वप्रयोजनानां अप्रतिहताज्ञः समस्तस्थानेषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निपुणो जगद्वशीकरणे कृताभ्यासो जन्तुविमोहने पटुबुद्धिः पापनीतिमार्गेषु अनपेक्षः स्वकार्यप्रवृत्तौ परोपदेशानां निक्षिप्तसमस्तराज्यभारो विषयाभिलाषो नामामात्यः। ततस्तस्मिन्नगरे यावदहं राजकुलस्याभ्यर्णभूभागे प्राप्तस्तावदकाण्ड एव समुल्लसितो-बहलः कोलाहलो निर्गच्छति घोषयता बन्दिवृन्देन प्रख्यापितमाहात्म्या लौल्यादिनरेन्द्राधिष्ठिता मिथ्याभिनिवेशादयो भूयांसः स्यन्दनाः पूरयन्ति गलगर्जितेन दिगन्तराणि राजमार्गमवतरन्तो ममत्वादयः करिवराः चलिता हेषारवेण बधिरयन्तो दिक्चक्रवालं अज्ञानादयो वरवाजिनो विराजन्ते गृहीतनानायुधा रणशौण्डीरतया वल्गमानाः पुरतो धावन्तश्चापलादयोऽसंख्येयाः पदातयः। ततः कन्दर्पप्रयाणकपटहशब्दाकर्णनसमनन्तरं खरपवनप्रेरितमेघजालमिव क्षणमात्रेणैव विलासध्वजमालाकुलं विब्बोकशंखकाहलाध्वनिपूरितदिगन्तरं मीलितमपरिमितं बलं ततस्तदवलोक्य मया चिन्तितं अये किमेतत् गन्तुमिव प्रवृत्तः क्वचिदयं राजा लक्ष्यते तत्किमस्य गमनप्रयोजनमिति यावद्वितर्काकुलस्तिष्ठामि तावद्दृष्टो मया पर्यन्तदारुणः स्वरूपेणादर्शकः संसारवैचित्र्यस्य बोधको विदुषां निर्वेदभूमिर्विवेकिनामविज्ञातस्वरूपो निर्विवेकैस्तस्यैव विषयाभिलाषस्य मन्त्रिणः संबन्धी विपाको नाम पुरुषः। ततः प्रियसंभाषणपूर्वकं पृष्टोऽसौ मया भद्र कथय किमस्य नरेन्द्रस्य प्रस्थानकारणं कुतूहलं मे विपाकेनाभिहितं आर्य यद्येवं ततः समाकर्णय पूर्वमिह क्वचिदवसरे सुगृहीतनामधेयेन देवेन रागकेसरिणाभिहितोऽमात्यो यदुत आर्य विषयाभिलाष तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथंचिद्विधेहि यथा मम समस्तमपि जगत् किङ्करतां प्रतिपद्यते मन्त्रिणाभिहितं यदाज्ञापयति देवः । ततो नान्यः कश्चिदस्य राजादिष्टप्रयोजनस्य निर्वर्त्तनक्षम इति मनसि पर्यालोच्य किं वाऽन्येन साधनेन बहुना क्लेशितेन साधयिष्यन्त्येतान्येवाचिन्त्यवीर्यतया प्रस्तुतप्रयोजनमिति संजातावष्टंभेन मन्त्रिणा गाढमनुरक्तभक्तानि विविधस्थानेषु निर्व्यूढसाहसानि स्वामिनि भृत्यतया लब्धजयपताकानि जनहृदयाक्षेपकरणपटूनि प्रत्यादेशः शूराणां प्रकर्षश्चटुलानां निकषभूमिः परवञ्चनचतुराणां परमकाष्ठा साहसिकानां निदर्शनं दुर्दान्तानां आत्मीयान्येव स्पर्शनादीनि पञ्च गृहीतानि मानुषाणि प्रहितानि जगद्वशीकरणार्थं ततो मया चिन्तितम् । अये लब्धं स्पर्शनस्य तावन्मूलोत्थानं विपाकेनाभिहितं ततो वितते जगति विचरद्भिस्तैर्वशीकृतप्रायं भुवनं वर्त्तते ग्राहितप्रायं रागकेसरिणः किङ्करतां केवलं महासत्त्वसमुदायानामिति विशेष इव तेषामुपद्रवकारी समुत्थितः । श्रूयते किल कश्चित् सन्तोषो नाम चरटो निर्वाहिताश्च तान्यभिभूय किल कियन्तोऽपि लोकास्तेन प्रवेशिताश्च देवभुक्तेरतिक्रान्तायां निर्वृतौ नगर्यामिति च श्रूयते ततो मया चिन्तितं व्यभिचरति मनागयमर्थो यतोऽस्माकं समक्षमेव मनीषिबालयोः स्पर्शनेन निर्वृतौ नगर्यां भवजन्तोर्गमनं सदागमबलेनाख्यातं अयं तु स्पर्शनादीन्यभिभूय सन्तोषेण निर्वाहिता लोकाः स्थापिताश्च निर्वृतौ नगर्यामिति कथयति । तत्कथमेतदथवा किमनयाकाण्डपर्यालोचनयावहितस्तावदाकर्णयाम्यस्य वचनं पश्चाद्विचारयिष्यामि विपाकेनाभि-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हितं ततोऽयमाप्तलोकश्रुतेराकर्णितोऽद्य देवेन रागकेसरिणा स्पर्श-नाद्यभिभवव्यतिकरः । ततोऽतिदुःसहमश्रुतपूर्वं च स्वपदातिपरि-भववचनमाकर्ण्य कोपानलजनितरक्तलोचनयुगलेन विषमस्फुरिता-धरेण करालभृकुटिभङ्गकुण्डलीकृतललाटपट्टेनाबद्धनिरन्तरस्वेदबि-न्दुना निर्दयकराभिहितधरणीपृष्ठेन प्रलयज्वलनभास्वरं रूपमाबि-भ्रतामर्षवशपरिस्खलद्वचनेन देवेन रागकेसरिणाज्ञापितः परि-जनः । अरे त्वरितास्ताडयत प्रयाणकपटहं सज्जीकुरुत चतुरङ्गं बलम् । परिजनेनाभिहितं यदाज्ञापयति देवः । ततस्तथा देवमा-यास्यमानमवलोक्य विषयाभिलाषेणाभिहितं देव अलमावेगेन कियानसौ वराकः सन्तोषस्तानमादरस्य न खलु केसरी लीला-दलितत्रिगण्डगलितवरकरिनिकरो हरिणं व्यापादयतोद्दिश्या-यस्तचित्तो भवति देवेनाभिहितं सखे सत्यमिदं केवलं युष्म-न्मानुषकदर्थनां कुर्वता दृढमुद्वेजितास्तेन पापेन सन्तोषेण न खलु तमनुन्मूल्य मम मनसः सुखासिका संपद्यते । मन्त्रिणाभिहितं देव स्तोकमेतत् मुच्यतां संरम्भः । ततस्तद्वचनेन मनाक् स्वस्थीभूतो देवः कृतमरोषं गमनोचितं स्थापितः पुरतः स्नेहसलिलपूर्णः प्रेमाबन्धाख्यः कनककलशः उद्घोषितः केलिजल्पनामको जय जय शब्दः गीतानि चाटुवचनादीनि मङ्गलानि प्रहतं रतिकलहनामक-मुद्दामातोद्यवृन्दं निर्वर्त्तितान्यङ्गरागभूषणादीनि समस्तकौतुकानि प्रवृत्तो रथावरोहणार्थं देवः । अत्रान्तरे स्मृतमनेन अये न दृष्टो नाप्यदृष्टोऽद्यापि मया तातः । अहो मे प्रमत्तता अहो मे दुर्वि-नीतता अहो मे तुच्छत्वेन स्वल्पप्रयोजनेऽपि पर्याकुलता यत्तात-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पादवन्दनमपि विस्मृतमिति । ततो निवृत्त्य चलितस्तद्दर्शनार्थं देवो मयाभिहितं भद्र कः पुनरस्य तातस्ततो विपाकेनाभिहितं आर्य अतिमुग्धोऽसि यतस्त्वमेतावदपि न जानीषे यतोऽस्य देवस्य रागकेसरिणो बालाबलादीनामपि सुप्रतीतोऽनेकाद्भुतकर्म्मा भुवनत्रयप्रकटनाभिधानो महामोहो जनकः ।

तथा हि ।

महामोहो जगत्सर्वं भ्रामयत्येष लीलया ।
शक्राद्यो जगन्नाथा यस्य किङ्करतां गताः ॥
अन्येषां लंघयन्तीह शौर्याविष्टंभतो नराः ।
अज्ञानं तु जगत्यत्र महामोहस्य केचन ॥
वेदान्तवादिसिद्धान्ते परामात्मा यथा किल ।
चराचरस्य जगतो व्यापकेलन गीयते ॥
महामोहस्तथैवात्र स्ववीर्येण जगत्त्रये ।
देषाद्यशेषलोकानां व्यापकः समुदाहृतः ॥
तत एव प्रवर्त्तन्ते यान्ति तत्र पुनर्लयम् ।
सर्वे जीवाः परे पुंसि यथा वेदान्तवादिनाम् ॥
महामोहात्प्रवर्त्तन्ते तथा सर्वे महादयः ।
लीयन्तेऽपि च तत्रैव परमात्मा स वर्त्तते ॥

अन्यच्च ।

यज्ज्ञातपरमार्थोऽपि बुध्वा सन्तोषजं सुखम् ।
इन्द्रियैर्बाध्यते जन्तुर्महामोहोऽत्र कारणम् ॥
अधीत्य सर्वशास्त्राणि नराः पण्डितमानिनः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विषयेषु रताः सोऽयं महामोहो विजृंभते ॥
जैनेन्द्रमततत्त्वज्ञाः कषायवशवर्त्तिनः ।
जायन्ते यन्नरा लोके तन्महामोहशासनम् ॥
अवाप्य मानुषं जन्म लब्ध्वा जैनं च शासनम् ।
यत्तिष्ठन्ति गृहासक्ता महामोहोऽत्र कारणम् ॥
विस्रब्धं निजभर्त्तारं परित्यज्य कुलस्त्रियः ।
परेषु यत्प्रवर्त्तन्ते महामोहस्य तत्फलम् ॥
विलंघ्य च महामोहः स्ववीर्येण निराकुलः ।
कांश्चिद्विडम्बयत्युच्चैर्यतिभावस्थितानपि ॥
मनुष्यलोके पाताले तथा देवालयेष्वपि ।
विलसत्येष महामोहो गन्धहस्ती यथेच्छया ॥
सर्वथा मित्रभावेन गाढं विस्रब्धचेतसाम् ।
कुर्वन्ति वचनं यच्च महामोहोऽत्र कारणम् ॥
विलंघ्य कुलमर्यादां पारदार्येऽपि यन्नराः ।
वर्त्तन्ते विलसत्येष महामोहमहानृपः ॥
यत एव समुत्पन्ना जाताश्च गुणभाजनम् ।
प्रतिकूला गुरोस्तस्य वशे येऽस्य नराधमाः ॥
अनार्याणि तथान्यानि यानि कार्याणि कर्हिचित् ।
चौर्यादीनि विलासेन तेषामेष प्रवर्त्तकः ॥
इत्थं प्रभूतवृत्तान्तः परिपाल्य जगत्त्रयम् ।
वृद्धोऽहमधुना युक्तं किं ममेति विचिन्त्य च ॥
पार्श्वस्थितोऽपि शक्नोमि वीर्येण परिरक्षितुम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगत्तेन स्वपुत्राय राज्यं यच्छामि सांप्रतम् ॥
रागकेसरिणो दत्त्वा ततो राज्यं विचक्षणः ।
महामोहोऽधुना सोऽयं शेते निश्चिन्ततां गतः ॥
तथापीदं जगत्सर्वं प्रभावेन महात्मनः ।
तस्यैव वर्त्तते नूनं कोऽन्यः स्यादस्य पालकः ॥
तदेषोऽद्भुतकर्त्तव्यः प्रसिद्धोऽपि जगत्त्रये ।
महामोहनरेन्द्रस्ते कथं प्रष्टव्यतां गतः ॥

ततो मयाभिहितं भद्र न कर्त्तव्योऽत्र भवता कोपः पथिकः खल्वहं श्रुतस्तु मयापि महामोहः पूर्वं सामान्येन न पुनर्विशेषतो रागकेसरिजनकतया तदधुनापनीतं ममाज्ञानं भद्रेण । तदुत्तर-वृत्तान्तमव्याख्यातुमर्हति भद्रः विपाकेनाभिहितं ततो गतो देवः शीघ्रं जनकपादमूलं दृष्टोऽनेन तमःसंज्ञकेन लम्बमानेन भ्रूयुगुलेन अविद्याभिधानया प्रकम्पमानया गात्रयष्ट्या जराजीर्णकायस्तृष्णा-भिधानायां वेदिकायां विपर्यासनाम्नि विष्टरे महत्युपविष्टो महा-मोहः । ततः चितितलविन्यस्तहस्तमस्तकेन कृतं देवेन पादपतनं अभिनन्दितो महामोहेन निषीदतस्तु भूतले देवस्य दापितं महामोहेनासनं उपविष्टस्तत्र जनकसंभ्रमवचनेन देवः । पृष्टा शरीरकुशलवार्त्ता निवेदितस्तु प्रस्तुतव्यतिकरः । ततो महामोहे-नाभिहितं पुत्र ममाधुना जरच्चीवरस्येव पश्चिमो भावो वर्त्तते । ततो मदीयशरीरस्य पामापरिगतमूर्त्तेरिव करभस्य यद्दाह्यते तत्सारं ततो न युक्तं मयि तिष्ठति भवतः प्रस्थानं कर्त्तुं तिष्ठ त्वं विपुलं राज्यं विदधानो निराकुलचित्तोऽहमेव प्रस्तुतप्रयोजनं साधयिष्यामीति ।

For Private And Personal Use Only

देवेन कर्णौ पिधायाभिहितं तात मा मैवं वोचः शान्तं पापं प्रतिहतममङ्गलं अनन्तकल्पस्थायि भवतु यौष्माकं शरीरं न खलु युष्मदीयशरीरनिराबाधामात्रपरितोषिणि किङ्करजनेऽस्मिन्नेवमाज्ञापयितुमर्हति तातः। तत्किमनेन बहुना गच्छाम्यहं अनुजानीत यूयम्। महामोहः प्राह। जात मया तावद्गन्तव्यमेव भवतस्तु केवलमवस्थानेऽनुज्ञा इत्यभिधायोत्थितो महामोहः। ततो विज्ञाय निर्बन्धं देवेनाभिहितं तात यद्येवं ततोऽहमपि तातपादानुचरो भविष्यामि न प्रतिस्खलनीयस्तातेन। महामोहः प्राह। जात एवं भवतु न खलु वयमपि भवन्तं मोक्तुं क्षणमपि पारयामः केवलं गुरुतया प्रयोजनस्यैवं मन्त्रितमस्माभिस्तदधुनासुन्दरमिदं जातेन जल्पितं देवेनाभिहितं महाप्रमादस्ततस्तातोऽपि प्रस्थित इति ज्ञापितं समस्तनरेन्द्राणां देवेन प्रवर्त्तितं निःशेषं विशेषतो बलं ततः स्वयमेव महामोहनरेन्द्रो देवो रागकेसरी विषयाभिलाषादयः सर्वे मन्त्रिमहत्तमाः सवबलेन सन्तोषे चरटस्योपरि निग्रहेण चलिता इति वार्त्तया क्षुभितमेतत् समन्ताद्राजसचित्तं नगरम्। समुल्लसितोऽयं बहलः कलकलः तदिदं भद्र अस्य नरेन्द्रस्य प्रस्थानप्रयोजनमिति एतच्चातिकुतूहलिनं भवन्तमालोक्य मया निवेदितं इतरथातित्वरया मम वचनमात्रोच्चारणेऽपि नावसरोऽस्ति यतो ममाशानीके नियमः मयाभिहितं आर्य किमत्र वक्तव्यं परोपकारकरणव्यग्रा एव सत्पुरुषा भवन्ति। ते हि परे प्रियं कर्त्तुमुद्यताः शिथिलयन्ति स्वप्रयोजनं कुर्वन्ति स्वभुजोपार्जितद्रव्यव्ययं विषहन्ते विविधदुःखानि न गणयन्त्यात्मापदं ददति मस्तकं प्रक्रामन्ति प्राणान्

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परप्रयोजनमेव हि ते स्वप्रयोजनं मन्यन्ते ततश्चैवंविधैर्मदीयवचनैर्मनसि परितुष्टो नामयित्वा मदभिमुखमीषदुत्तमाङ्गं व्रजाम्यहमधुना इत्यभिधाय च कृतप्रणामो मया गतो विपाकः। मया चिन्तितं साधितप्रायं मयाधुना राजकार्यं यतः स्पर्शनस्य मूलशुद्धिमुपलभ्य भवतागन्तव्यमेतावानेव मम राजादेशः। तत्र यावन्तोऽनेन विपाकेन स्पर्शनादीनां गुणा वर्णितास्ते सर्वे तत्र स्पर्शने घटन्ते ममानुभवसिद्धमेतत् तस्मादेतदुपवर्णितमानुषपञ्चकस्याद्योऽसौ भविष्यति। लब्धा मया तस्य मूलशुद्धिः केवलमेकं मन्त्रौषव्यतिकरमद्यापि नावगच्छामि। एतावद्वितर्कयामि सदागमानुचर एवायं कश्चिद्भविष्यति अन्यथा पूर्वापरविरुद्धमेतत्स्यात्। अथवा किमनेन गच्छामि तावत् स्वामिपादमूलं निवेदयामि यथोपलब्धवृत्तान्तं ततो देव एवात्र यथोचितं विज्ञास्यतीत्यालोच्य समागतोऽहमेतदाकर्ण्य देवः प्रमाणमिति। बोधेनाभिहितं साधु प्रभाव साधु सुन्दरमनुष्ठितं भवता ततः सहैव प्रभावेण प्रविष्टो बोधः कुमारसमीपं कृतप्रणामेन च निवेदितः कुमाराय समस्तोऽपि प्रभावानीतवार्त्तावृत्तान्तः परितुष्टो मनीषी पूजितः प्रभावः पृष्टोऽन्यदा मनीषिणा स्पर्शनः। यदुत भद्र किं भवतः सदागमेनैव तेन भवजन्तुना सुमित्रेण सह विरहः संपादितः उत तत्र कश्चिदन्योऽप्यासीदिति। स्पर्शनेनाभिहितं आर्य आसीत् केवलमलं तत्कथया न खल्वहं भयविक्लवतया तस्य क्रूरकर्मणो नामाप्युच्चारयितुं शक्नोमि। स हि सदागमस्तस्य केवलं भवजन्तोरुपदेशं ददाति मत्कदर्थनविषयम् स तु तस्यैवानुचरः क्रूरकर्मा नानायातनाभिः साक्षान्मां कदर्थयति भवजन्तुं मत्तो विमु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खयति तेनैव चाहं शरीरप्रासादान्निःसारितो भवजन्तुश्च निवृत्तौ नगर्यां प्रापितः स एव तत्र कारणं पुरुषः सदागमस्य केवलमुपदेश-दाने व्यापारो मनीषिणाभिहितं भद्र किं तस्याभिधानं स्पर्शनः प्राह कथितमिदमार्यस्य मया नाहं भयाकुलतया तदभिधान-मुच्चारयामि। अत एव पूर्वमपि मया न युष्माकं तदाख्यातं किं चातिपापिष्ठोऽसौ ततोऽलं नामग्रहणेन पापिष्ठजनकथा हि क्रियमाणा पापं वर्द्धयति यशो दूषयति लाघवमाधत्ते मनो विप्लावयति धर्मबुद्धिं ध्वंसयतीति। मनीषिणाभिहितं तथापि महत्कुतूहलं तदभिधानश्रवणेऽस्माकं न चास्मदभ्यर्णे वर्त्तमानेन भवता तद्भयं विधातव्यं न च नामग्रहणमात्रेण किंचित्पापं न ह्यग्निरित्युक्ते मुखदाहः संपद्यते। ततो विज्ञाय निबन्धं तरलिततारं दशापि दिशोऽवलोकयता स्पर्शनेनाभिहितं आर्य यद्येवं ततः सन्तोष इति तस्य दुर्नामकस्य नाम मनीषिणा चिन्तितं सम्यगु-पलब्धा मूलशुद्धिरस्य स्पर्शनस्य प्रभावेण यतः सन्तोषव्यतिकर एवैकस्तत्राघटमानक आसीत् सोऽप्यधुना घटितः सम्यङ्मया पूर्वं वितर्कितं यथा न सुन्दरः खल्वेष स्पर्शनः प्रायेणेति यतो विषया-भिलाषप्रयुक्तोऽयं लोकवञ्चनप्रवणः पर्यटति तदशोभन एवायं तथापि प्रतिपन्नोऽयं मया मित्रतया दर्शितो बहिरिच्छायया स्नेहभावः क्रीडितमेकत्र बहुकालं तस्मान्न युक्तोऽकाण्ड एव परि-त्यक्तुं केवलं विज्ञातस्वरूपेणास्य मयाधुना सुतरां न कर्त्तव्यो विश्रंभो नाचरितव्यमस्यानुकूलं न समर्पणीयमात्मस्वरूपं न निवेद-नीयं गुह्यं नापि दर्शनीयो बहिर्भावो विषमप्रकृतिरेष वर्त्तते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततोऽनेन सह यापनया वर्त्तितव्यं पूर्वस्थित्यैव पर्यटितव्यं सर्वंच सहितेन कर्त्तव्यं चात्मीयप्रयोजनबोधकमस्य वचनं केवलमभिष्व-ङ्गोऽस्योपरि न कार्यो मया यावदस्य सर्वथा परित्यागावसरो भवति एवं वर्त्तमानस्य मे न भविष्यत्येष बोधक इति। स्थापितो मनीषिणा स्वचेतसि सिद्धान्तः। ततः पूर्वस्थित्यैव विलसन्ति ते स्पर्शनमनीषिबाला नानास्थानेषु व्रजन्ति दिनानि अन्यदा स्पर्शनेन कृतो जल्पप्रस्तावोऽभिहितं च तेन अरे किमत्र लोके सारं किं वा सर्वे जन्तवोऽभिलषन्ति। बालेनाभिहितं वयस्य किमत्र ज्ञातव्यं सुप्रसिद्धमिदं स्पर्शनः प्राह कथय किं तत् बालो जगाद वयस्य सुखं स्पर्शनः प्राह तत् किमिति तदेव सदा न सेव्यते बालेना-भिहितं कस्तस्य सेवनोपायः स्पर्शनेनोक्तं अहम्। बालो जगाद कथं स्पर्शनः प्राह अस्ति मे योगशक्तिः तयाहं प्राणिनां शरीर-मनुप्रविश्य बहिरन्तश्च कचिल्लीनस्तिष्ठामि ततश्च ते यदि भक्ति-पुरःसरं मामेव ध्यायन्ति कोमलललितस्पर्शनसंबन्धं कुर्वन्ति ततो निरुपमं सुखं लभन्ते तेनाहं सुखसेवनस्योपायो मनीषिणा चिन्तितं अये रचितोऽनेनावयोर्वञ्चनप्रपञ्चो बालेनाभिहितं वयस्य तत्किमियन्तं कालं नावेदितमिदमस्माकं अहो वञ्चिता वयमधन्याः सत्यप्येवंविधे सुखोपाये तदनासेवनेन अहो ते गंभीरता यदेवंविधामपि योग-शक्तिमात्मनो न प्रकटयसि तदिदानीमपि कुरु प्रसादं दर्शय कुतूहलं व्यापारय योगशक्तिं भवावयोः सुखसेवनहेतुरिति। ततः किं क्रियतामेतदिति दृष्टिविकारेणैव दर्शयता साकूतेन निरीक्षितं मनीषिणो वदनं स्पर्शनेन। ततः पश्यामि किं तावत् करोतीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सञ्चिन्त्य मनीषिणाभिहितं वयस्य क्रियतां बालभाषितं कोऽत्र विरोधः ततः स्पर्शनेन विरचितं पद्मासनं स्थिरीकृतः कायः परित्यक्तो बहिर्विक्षेपः निश्चलीकृता दृष्टिः समर्पिता नासिकाग्रे निबद्धं हृत्पौण्डरीके मानसं धृता धारणा संजाता तत्प्रत्ययैकताननता समापूरितं ध्यानं निरुद्धाः करणवृत्तयः आविर्भूतः स्वरूपशून्य इवार्थनिर्भासः संजातः समाधिः विहितोऽन्तर्धानहेतुः संयमः कृतमन्तर्द्धानं अनुप्रविष्टो मनीषिबालयोः शरीरं अधिष्ठितः स्वाभिहितप्रदेशः विस्मितौ मनीषिबालौ प्रवृत्ता द्वयोरपि कोमल-स्पर्शेच्छा ततो बालो मृदूनि शयनानि सुखान्यासनानि कोमलानि वसनानि अस्थिमांसत्वग्रोमसुखदायीनि संवाहनानि ललितल-लनानामनवरतसुरतानि शश्वद्विपर्यस्तवीर्याणि सुखस्पर्शविलेपनानि अन्यानि चोद्वर्त्तनस्नानादीनि स्पर्शनप्रियाणि गृद्धो मूर्च्छितः सततमासेवते तच्च शयनादिकं भस्मकव्याधिरिव भक्तपानं स्पर्शनः समस्तमुपभुंक्ते बालस्य तु गार्ध्यव्याधिविक्लवीभूतचित्तस्य सन्तोष-स्वरूपस्वास्थ्यविकलतया पामाकण्डूयनमिव परमार्थतस्तद्दुःखकारण-मेव तथाप्यसौ विपर्यासवशेन तदुपभोगे सति चिन्तयति अहो मे सुखं अहो मे परमानन्दः। ततो मिथ्याभावनया परमसुखसन्दर्भनिर्भरः किलाहमिति वृथा निमीलिताक्षोऽनाख्येयं रसान्तरमवगाहते। मनीषी पुनर्मृदुस्पर्शेच्छायां प्रवर्त्तमानायामेवं भावयति अये स्पर्शनजनितोऽयं मम विकारो न स्वाभाविकः परमरिपुश्चायं मम वर्त्तते सुनिर्णीतमिदं मया। ततः कथमयं सुखहेतुर्भविष्यतीति मत्वा तदनुकूलं न किंचिदाचरति। अथ

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथंचित्प्रतिपन्नोऽयं मित्रतयानुवर्त्तनीयस्तावदिति भावनया कालयापनां कुर्वाणस्तदनुकूलमपि किंचिदाचरति । तथापि तस्य लौल्यरोगविकलतया सन्तोषामृतस्वस्थीभूतमानसस्य रोगरहितशरीरस्येव सुपथ्यान्नं तच्छयनादिकमुपभुज्यमानं सुखमेवोत्पादयति । तथापि नासौ तत्राभिष्वङ्गं विधत्ते ततो न भवत्यागामिनोऽपि दुःखस्य बन्धः अन्यदा प्रकटीभूतः स्पर्शनः अभिहितोऽनेन बालः अपि वयस्य मदीयपरिश्रमस्यास्ति किंचित्फलं संपन्नस्ते कश्चिदुपकारः । बालः प्राह । सखेऽनुगृहीतोऽस्मि दर्शितो ममाऽचिन्त्याल्हादसंपादनेन भवता साक्षात्स्वर्गः ।

अथवा किमत्राश्चर्यं परार्थमेव निर्मितस्त्वमसि विधात्रा ।

तथा हि ।

परार्थमेव जायन्ते लोके नूनं भवादृशाः ।
मादृशानां तु संभूतिस्त्वत्प्रसादेन सार्थका ॥
इदं हि तेषां सौजन्यं यत्स्वभावेन सर्वदा ।
परेषां सुखहेतुत्वं प्रपद्यन्ते नरोत्तमाः ॥

स्पर्शनेन चिन्तितं अये संपन्नस्तावदेष मे निर्व्यभिचारः किङ्करः प्रतिपद्यते मयादिष्टमेष कृष्णं श्वेतं श्वेतं कृष्णमिति निर्विचारं एवं विचिन्त्य स्पर्शनेनाभिहितं वयस्य इयतैव नः प्रयोजनं चरितार्थोऽहमिदानीं भवदुपकारसंपत्त्येति ।

ततो मनीषिसमीपमुपगम्याभिहिमनेन सखे किं सार्थकः भवतोऽर्थसंपादनेन मदीयः प्रयास उत नेति मनीषिणोक्तं भद्र किमत्रोच्यतां अनाख्येयस्तावकोऽतिशयः स्पर्शनेन चिन्तितं अये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साभिप्रायकमेतद् दृष्टः खल्वेष मनीषी न शक्यते मादृशैः रञ्जयितुं लक्षितोऽहमनेन स्वरूपतः प्रायेण तस्मात्सलज्ज एव तावदास्तां नात्र बहुविकत्थनं श्रेयस्करमिति विचिन्त्य धूर्त्ततया कृता स्पर्शनेन काकली न दर्शितो मुखविकारोऽपि स्थितो मौनेनेति । इतश्च बालेनापि स्वमातुरकुशलमालायाः कथितः समस्तोऽपि रभसेन यो योगशक्तिपुरःसरं सुखसंपादनसामर्थ्यलक्षणः स्पर्शनव्यतिकरः । अकुशलमालोवाच । जात सूचितमिदमादावेव मया यथा सुन्दरस्तवानेन वरमित्रेण सार्द्धं संबन्धः हेतुः सुखपरंपरायाः किं चास्ति ममापीदृशी योगशक्तिरिति दर्शयिष्याम्यहमपि जातस्य कुतूहलं बालस्तूवाच यद्येवं ततो बहुतरमम्बायाः प्रसादेनास्मा-भिरद्यापि द्रष्टव्यम् । अकुशलमालोवाच तत्कथनीयं भवता यदा प्रयुज्यते योगशक्तिरिति ।

इतश्च मनीषिणापि स्वमातुः शुभसुन्दर्या निवेदितः सर्वोऽपि स्पर्शनवृत्तान्तः तयाभिहितं वत्स न चारुस्तवानेन पापमित्रेण सह संसर्गः कारणमेष दुःखपद्धत्तेः मनीषिणाभिहितं सत्यमेतत् केवलं न कर्त्तव्यमत्र भयमम्बया लक्षितो मयायं स्वरूपेण नाहमस्य यत्नवतोऽपि वञ्चनागोचरः केवलमस्य परित्यागकालं प्रतिपाल-यामि । यतः प्रतिपन्नोऽयं मया मित्रतया नाकाण्ड एव हातुं युक्तः । शुभसुन्दर्युवाच जात सुन्दरमिदमनुष्ठितं भवता अहो ते लोकज्ञता अहो प्रतिपन्नवात्सल्यं अहो नीतिपरता अहो गंभीरता अहो स्थैर्यातिरेकः ।

तथा हि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाकाण्ड एव मुञ्चन्ति सद्दोषमपि सज्जनाः।
प्रतिपन्नं गृहस्थायी तत्रोदाहरणं जिनः॥
प्रतिपन्नमकाले तु सद्दोषमपि यस्त्यजेत्।
स निन्द्यः स्यात्सतां मध्ये तत्रासौ स्वार्थसाधकः॥
यस्तु मूढतया काले प्राप्तेऽपि न परित्यजेत्।
सद्दोषं लभते तस्मात् स्वक्षयं नात्र संशयः॥
हेयबुद्ध्या गृहीतेऽपि ततो वस्तुनि बुद्धिमान्।
तत्त्यागावसरापेक्षी प्रशंसां लब्धुमर्हति॥

कर्मविलासराजस्तु महादेवीभ्यां सकाशात्तं कुमारव्यतिकरमाकर्ण्य परितुष्टो मनीषिणो रुष्टो बलस्य चित्तमध्ये बालेनापि ततः प्रभृति गाढतरं कोमलशयनसुरताद्यासेवनानि स्पर्शनप्रियाणि दिवानिशमाचरता परित्यक्तो राजकुमारोचितः शेषव्यापारः परिहृतं गुरुदेवपादवन्दनं विमुक्तं कलाग्रहणं शिथिलीकृता लज्जा अङ्गीकृतः पशुधर्मः ततोऽसौ न गणयति लोकवचनीयतां न रक्षति कुलकलङ्कं न जानीते स्वस्योपहास्यतां नोपेक्षते कुशलपक्षं न गृह्णाति सुदुपदेशान् केवलं यत्र कुत्रचित् नारीसङ्गमाशनमन्यदा किञ्चित्कोमलमुपलभते तत्र तत्राविचार्य तत्स्वरूपं लौल्यातिरेकेण प्रवर्त्तत एव। ततो मनीषी संजातकरुणस्तं शिक्षयति स्पर्शनस्य मूलशुद्धिमाचष्टे वञ्चकोऽयमिति दीपयति भ्रातर्नास्य विश्वसनीयं परमरिपुरेष स्पर्शन इति तं बालं पुनः पुनश्चोदयति। बालः प्राह मनीषिन्नलमनेनादृष्टार्थेन प्रलापेन य एष मे वरवयस्योऽनन्तागाधसुखसागरावगाहने हेतुः स एव ते परमरिपुरिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कैषा भाषा । मनीषिणा चिन्तितं मूढः खल्वेष न शक्यते निवारयितुमतोऽलमेतन्निवारणेन स्वरक्षणे मया यत्नो विधेयः ।

तथा हि ।

अकार्यवारणोद्युक्तो मूढे यः परिखिद्यते ।
वाग्विस्तरो वृथा तस्य भस्मन्याज्याहुतिर्यथा ॥
नोपदेशशतेनापि मूढोऽकार्यान्निवर्त्यते ।
शीतांशुग्रसनात्केन राहुर्वाक्यैर्निवारितः ॥
अकार्ये दुर्विनीतेषु प्रवृत्तेषु ततः सदा ।
न किंचिदुपदेष्टव्यं सता कार्यावधीरणा ॥
इत्यालोच्य स्वयं चित्ते हित्वा बालस्य शिक्षणम् ।
स्वकार्यकरणोद्युक्तो मनीषी मौनमाश्रितः ॥

इतश्च तस्यैव कर्मविलासस्य राज्ञोऽस्ति सामान्यरूपा नाम देवी तस्याश्चाभीष्टतमोऽस्ति मध्यमबुद्धिर्नाम दारको वल्लभतमो मनीषिबालयोः क्रीडितस्ताभ्यां सह भूयांसं कालं स च प्रयोजनवशाद्राजादेशेनैव देशान्तरं गत आसीत् तदानीमागतः। दृष्टौ मनीषिबालौ सह स्पर्शनेन आलिङ्गितस्ताभ्यां स्पर्शनेन ततः सकौतुकेन मध्यमबुद्धिना कर्णाभ्यर्णे निधाय वदनं पृष्टो बालः क एष इति निवेदितो बालेनास्य यथा स्पर्शननामायमचिन्त्यप्रभावोऽस्मत्सहचर इति। मध्यमबुद्धिरुवाच कथं ततः कथितो बालेन सर्वोऽपि व्यतिकरः संजातो मध्यमबुद्धेरपि स्पर्शनस्योपरि स्नेहभावः बालेनाभिहितं भद्र स्पर्शन दर्शयास्य स्वकीयं माहात्म्यं स्पर्शनः प्राह एष दर्शयामि । ततः प्रयुक्ता योगशक्तिः कृतमन्तर्द्धानं अधिष्ठितं मध्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मबुद्धेः शरीरं विस्मितो मध्यमबुद्धिः प्रवृत्ता कोमलस्पर्शेच्छा उपभुक्तानि ललितशयनसुरतादीनि संजातश्चित्ताल्हादः प्रीणितो मध्यमबुद्धिः प्रकटीभूतः स्पर्शनः पृष्टं स्वप्रयाससाफल्यमनुगृहीतोऽहं भवतेति निवेदितं सरभसेन मध्यमबुद्धिना । ततः पाचीभूतोऽयमपि न दूरयायी वर्त्तत इति विचिन्तितं स्पर्शनेन। मनीषिणा चिन्तितं वशीकृतप्रायोऽयमपि मध्यमबुद्धिरनेन पापेन स्पर्शनेनातो यद्युपेदृशं गृह्णाति ततः शिचयाम्येनं माभूदस्य मुग्धतया वराकस्य वञ्चनमिति । ततो रहसि मध्यमबुद्धिरभिहितो मनीषिणा । भद्र न भद्रकोऽयं स्पर्शनो विषयाभिलाषः प्रयुक्तोऽयं लोकानां वञ्चकः पर्यटति । मध्यमबुद्धिरुवाच कथं ततः कथिता मनीषिणा बोधप्रभावोपलब्धा समस्तापि तस्य स्पर्शनस्य मूलशुद्धिः। मध्यमबुद्धिना चिन्तितं स्वानुभवसिद्धा मम तावदस्य स्पर्शनस्य संबन्धिनी वत्सलता अचिन्त्यप्रभावता सुखहेतुता च अयमपि च मनीषी नायुक्तभाषी तन्न जानीमः किमत्र तत्त्वं किं वा वयमेवंस्थिते कुर्म इति । अथवा किमनेन चिन्तितेन तावदम्बां पृच्छामि तदुपदिष्टमाचरिष्यामीति विचिन्त्य गतः सामान्यरूपायाः समीपं कृतं पादपतनं अभिनन्दितस्तया निविष्टः चितितले निवेदितो व्यतिकरः सामान्यरूपयोक्तं वत्स तावत्त्वयाधुना स्पर्शनमनीषिणोर्द्वयोरपि वचनमनुवर्त्तयतोभयाविरोधेन मध्यस्थतयैव स्थातुं युक्तं कालान्तरे पुनर्य एव बलवत्तरः पचः स्यात् स एवाश्रयणीयः ।

तथा हि ।

संशयापन्नचित्तेन भिन्ने कार्यद्वये सता ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्यः कालविलम्बोऽत्र दृष्टान्तो मिथुनद्वयम् ॥

मध्यमबुद्धिरुवाच । अम्ब किं तन्मिथुनद्वयं सामान्यरूपयोक्तं पुत्राकर्णय। अस्ति तथाविधं नाम नगरं तत्र ऋजुर्नाम राजा तस्य प्रगुणा नाम महादेवी तयोर्मकरध्वजाकारो मुग्धो नाम तनयः तस्य च रतिसन्निभा अकुटिला नाम भार्या ततस्तयोर्मुग्धाकुटिलयोरन्योन्यबद्धानुरागयोर्विषयसुखमनुभवतोर्व्रजति कालः। अन्यदा वसन्तसमये उपरितनप्रासादभूमिकावासभवने व्यवस्थितः प्रभाते उत्थितो मुग्धकुमारो मनोहरविविधविकसितकुसुमवनराजिराजितं गृहोपवनमुपलभ्य संजातक्रीडाभिलाषो भार्यामुवाच देवि अतिरमणीयेयमुपवनश्रीः तदुत्तिष्ठ गच्छावः कुसुमोच्चयनिमित्तं आनयाव एनां अकुटिलयाभिहितं यदाज्ञापयत्यार्यपुत्रः ततो गृहीत्वा मणिखचिते कनकसूर्पिके गते गृहोपवनं प्रारब्धः कुसुमोच्चयो मुग्धः प्राह देवि पश्यावस्तावत्कः कनकसूर्पिकां झटिति पूरयति व्रज त्वमन्यस्यां दिशि अहमत्रस्यां व्रजामीति अकुटिलयाभिहितं एवं भवतु गतौ कुसुमोच्चयं कुर्वाणौ परस्परं दर्शनपथातीतयोर्गहनान्तरयोः। अत्रान्तरे कथंचित्तं प्रदेशमायातं व्यन्तरदेवमिथुनकं कालज्ञो देवो विचक्षणा देवी तेन च गगनतले विचरतावलोकितं तन्मानुषमिथुनं ततोऽचिन्त्यतया कर्मपरिणतेरतिसुन्दरतया तस्य मानुषमिथुनस्यापर्यालोचितकारितया मन्मथस्य मदनजननतया मधुमासस्यातिरमणीयतया प्रदेशस्य केलिबहुलतया व्यन्तरभावस्यातिचपलतयेन्द्रियाणां दुर्निवारतया विषयाभिलाषस्यातिचटुलचारितया मनोवृत्तेस्तथाभवितव्यतया च तस्य वस्तुनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालज्ञस्याभूदकुटिलायां तीव्रोऽनुरागः तथैव च मुग्धस्योपरि विचक्षणायाः। ततः किलैनां वञ्चयामीति बुद्ध्या कालज्ञेनाभिहिता विचक्षणा। देवि व्रज त्वमग्रतः तावद्यावदहमितो राजगृहोपवनाद्देवार्चननिमित्तं कतिचित्कुसुमान्यादायागच्छामि सा तु मुग्धहृदयतया स्थिता मौनेन गतोऽकुटिलाभिमुखं कालज्ञोऽवतीर्णो घनतरगहने अदर्शनीभूतो विचक्षणायाश्चिन्तितमनेन अये किं पुनः कारणमाश्रित्येदं मिथुनं परस्परतो दवीयोदेशवर्त्ति वर्त्तते। ततः प्रयुक्तमनेन विभङ्गज्ञानं लक्षितं तयोर्दूरीभवनकारणं ततोऽयमेवात्रोपाय इति विचिन्त्य कृतमनेन देवशक्त्यात्मनो वैक्रियं मुग्धरूपं निर्वर्त्तिता कनकसूर्पिका भृता कुसुमानां गतोऽकुटिलासमीपं ससंभ्रममाह च जितासि प्रिये जितासि ततः कथमार्यपुत्रो झटित्येवायातो जिताहमपि विलक्षीभूता मनागकुटिला कालज्ञेनाभिहितं प्रियेऽलं विषादेन स्वल्पमिदं कारणं केवलं निर्वर्त्तितोऽधुना कुसुमोच्चयो व्रजावोऽमुष्मिन्नुपवनविभूषणे कदलीलतागृहे प्रतिपन्नमनया ततो गत्वा कृतमाभ्यां तत्र पल्लवशयनीयम्। इतश्च विचक्षणया चिन्तितं अये गतस्तावदेष कालज्ञः ततो यावदयं नागच्छति यावच्चेयं नारी दूरे वर्त्तते तावदवतीर्य मानयाम्येनं रतिवियुक्तमकरकेतनाकारं तरुणं करोम्यात्मनो जन्मनः साफल्यं लक्षितस्तानयापि विभङ्गज्ञानेनैव तयोर्दूरीभवनहेतुस्ततो विधायाकुटिलारूपं कुसुमभृतकनकसूर्पिका गता मुग्धसमीपम्। आह च जितोऽस्यार्यपुत्र जितोऽसि। ततः ससंभ्रमं तां निरीक्ष्य मुग्धः प्राह प्रिये सुष्टु जितः किमधुना क्रियतां विचक्षणयोक्तं यदहं वदामि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुग्धः प्राह किं तत् विचक्षणाह व्रजामो लताभवनं मानयामो विशेषतः सद्उपवनश्रियं प्रतिपन्नमनेन ततो गत्वा तौ विचक्षणा-मुग्धौ तत्रैव कदलीलताग्टहके दृष्टं तन्मिथुनं निरीक्षितं विस्मिताभ्यां परस्पराभिमुखं मिथुनाभ्यां न दृष्टस्तिलतुषत्रिभागमात्रेऽपि स्वेतरयोर्विशेषः मुग्धेन चिन्तितम्। अये भगवतीनां वनदेवतानां प्रसादेन द्विगुणोऽहं संपन्नो देवी च तदिदं महदभ्युदयकारणं तं निवेदयामीदं ताताय ततो निवेद्य स्वाभिप्रायमितरेषां गच्छाम-स्तावत्तातसमीपम्। इत्यभिधायोत्थितो मुग्धः चलितं चतुष्टयमपि प्रविष्टं ऋजुराजास्थाने। तद्विलोक्य विस्मितो राजा महादेवी परिकरश्च किमेतदिति पृष्टो मुग्धः स प्राह वनदेवताप्रसादः ऋजुराह कथं ततः कथितो मुग्धेन व्यतिकरः ऋजुना चिन्तितम्। अहो मे धन्यता अहो मे देवतानुग्रहः ततो हर्षातिरेकेण समा-दिष्टस्तेनाकालमहोत्सवो नगरे दापितानि महादानानि विधापि-तानि नगरदेवतापूजनानि स्वयं च राजा राजमण्डलमध्यस्थः प्राह एकेन सुतेन सुतद्वयं वध्वा जातमथो वधूद्वयं खादतपिबताथ सज्जना गायत वादयताथ नृत्यत ततः प्रगुणापि महादेवी एत-देव नरेन्द्रोक्तमनुवदन्ती वादितानन्दमर्द्दलसन्दोहबधिरितदिगन्ता विहितोर्ध्वभुजा नर्त्तितुं प्रवृत्ता द्विगुणाहं संपन्नेति गता हर्षम-कुटिला प्रनृत्ताः शेषान्तःपुरिकाः प्रमुदितं नगरं वृत्तो हृहता विमर्द्दन महानन्द इति। केवलिप्रियतया हृष्टः कालज्ञः केवलं चिन्तितमनेन का पुनरेषा द्वितीया योषित् संजातेति उपयुक्तो-ऽज्ञाने ज्ञातमनेन सैवैषा मदीयभार्या विचक्षणेति ततः संजातः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रोधः चिन्तितमनेन मारयाम्येनं दुराचारं पुरुषम्। एषा पुनरमरतया न शक्यते मारयितुं तथाप्येवं पीडयामि यथा न पुनः परपुरुषगन्धमपि प्रार्थयते एवं कृतनिश्चयस्याप्यस्य कालज्ञस्य तथाभवितव्यतया प्रवृत्तार्थपर्यालोचना स्फुरितं चित्ते यथा न सम्यग् चिन्तितमिदं मया। न पीडनीया तावद्विचक्षणा यतोऽहमपि न शुद्धाचारो ममापि समानोऽयं दोषः मारणमपि मुग्धस्य न युक्तं यतो मारितेऽस्मिन्नन्यथाभावं विज्ञाय न भजते मामकुटिला विरज्यते सुतरां विचक्षणा तत्किमकुटिलां गृहीला-दृष्टस्वकलत्रधर्षणः इतोऽपक्रमामि एतदपि नास्ति यतोऽकाण्डप्रस्था-नेन स्वाभाविकोऽयमिति लक्षितविकारा कदाचिदकुटिला मां न भजते तथा रहितस्य पुनर्गमनमनर्थकमेव तस्मादीर्ष्याधर्मं परि-त्यज्य कालविलम्ब एवात्र श्रेयानिति। विचक्षणयापि चिन्तित मये स एवायं मदीयभर्त्ता कालज्ञोऽनेन रूपेण स्थितः कुतोऽन्य-स्यात्र संभव इति ततः कथमस्य पुरतःपरपुरुषेण सह तिष्ठामीति संजातलज्जा। अयमन्यां भजत इति समुत्पन्नेर्ष्याद्ःशकमेवं स्थिते स्थातुमित्याविर्भूतकुलभावागताया अपि न काचिदर्थसिद्धिरिति स्थानेनात्मानं तोषयन्ती न चान्या गतिरस्तीति निरालम्बा सापि यद्भविष्यत्तया कालविलम्बमेवाश्रित्य तत्रैव स्थिता। तत्प्रभृत्यदर्शित-वैक्रियौ परित्यक्तेर्ष्याधर्मौ देवमायया समस्तमानुषकर्त्तव्यान्याचरन्तौ प्रत्येकं द्वयं भजमानौ स्थितौ विचक्षणाकालज्ञौ प्रभूतकालम्। अन्यदा मोहविलयाभिधाने कानने सातिशयज्ञानादिरत्नाकरो बहुशिष्यपरिकरः समागतः प्रतिबोधको नामाचार्यः। निवेदितो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नरेन्द्रायोद्यानपालेन ततः सपौरजनो निर्गतस्तद्वन्दनार्थं राजा। भगवतोऽपि देवैर्विरचितं कनककमलं दृष्टस्तत्रोपविष्टस्तेभ्यो धर्ममाचक्षाणो भगवान्नरपतिना शिलातलविलुलितमौलिना वन्दितं तत्पादारविन्दं शेषमुनयश्चाभिनन्दिताः कर्मविटपिपाटनपटिष्ठ-निष्ठुरकुठारायमाणेन धर्मलाभाशीर्वादेन भगवता शेषयतिभिश्च उपविष्टो भूतले। कालज्ञादयोऽपि प्रयुज्य समस्तं वन्दनादिविनयं यथास्थानमुपविष्टाः प्रस्तुता भगवता विशेषतो धर्मदेशना दर्शिता भवनिर्गुणता वर्णिताः कर्मबन्धहेतवः निन्दितः संसारचारकावासः श्लाघितो मोक्षमार्गः ख्यापितः शिवसुखातिशयः कथिता विषयाभिष्वङ्गस्य भवभ्रमणहेतुशिवसुखप्रतिरोधिका दुरन्तता ततस्तद्भगवद्वचनामृतमाकर्ण्य विचक्षणाकालज्ञयोर्विदलितं मोहजालमाविर्भूतः सम्यग्दर्शनपरिणामः समुज्ज्वलितः कर्मेन्धनदहनप्रवणः सुदुश्चरितपश्चात्तापानलः। अत्रान्तरे तयोः शरीराभ्यां निर्गते रक्तकृष्णे: परमाणुभिर्घटितशरीरा बीभत्सा दर्शनेन भीषणा स्वरूपेण उद्वेगहेतुर्विवेकिनां एका स्त्री भगवतः प्रतापं सोढुमक्षमा निर्गत्य पर्षदः पश्चान्मुखी स्थिता दूरवर्त्तिनि भूभागे स्थिता पश्चात्तापार्द्रीकृतहृदयतयागताश्रुसलिलौ समकमेव विचक्षणाकालज्ञौ पतितौ भगवच्चरणयोः। कालज्ञेनाभिहितं भगवन्नधमाधमोऽहं येन मया विप्रतारिता स्वभार्या आचरितं पारदार्यं द्रुग्धः सरलहृदयो मुग्धो जनितो नरेन्द्रमहादेव्यादीनां व्यलीकसुतव्यामोहः वञ्चितोऽयं परमार्थनात्मा तस्य ममैवंविधपापकर्मणः कथं शुद्धिर्भविष्यतीति। विचक्षणयोक्तं ममापि कथं यतः समाचरितं पापिष्ठया मयापीदं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वं किं वा निवेद्यते दिव्यज्ञानस्य प्रत्यक्षमेवेदं समस्तं भगवतः। भगवानाह । भद्रौ न कर्त्तव्यो युवाभ्यां विषादो न भद्रयोर्दोषोऽयं निर्मलं भवतोः स्वरूपं तावाहतुः कस्य पुनर्दोषोऽयं भगवानाह येयं युष्मच्छरीरान्निर्गत्य दूरे स्थिता नारी तस्याः। तावाहतुः भगवन् किन्नामिकेयं भगवताभिहितं भद्रौ भोगतृष्णेयमभिधीयते विचक्षणाकालज्ञाभ्यामभिहितं भगवन् कथं पुनरियमेवंविधदोष-हेतुः भगवताभिहितं भद्रौ श्रूयताम् ।

रजनीव तमिस्रस्य भोगतृष्णैव सर्वदा ।
रागादिदोषवृन्दस्य सर्वस्यैषा प्रवर्त्तिका ॥
येषामेषा भवेद्देहे प्राणिनां पापचेष्टिता ।
तेषामकार्येषु मतिः प्रसभं संप्रवर्त्तते ॥
तृणकाष्ठैर्यथा वह्निर्जलपूरैर्यथोदधिः ।
तथा न तृप्यत्येषापि भोगैरासेवितैरपि ॥
यो मूढः शमयत्येनां किल शब्दादिभोगतः ।
जले निशीथिनीनाथं स हस्तेन जिघृक्षति ॥
मोहादेनां प्रियां कृत्वा भोगतृष्णां नराधमाः ।
संसारसागरे घोरे पर्यटन्ति निरन्तके ॥
सदोषेयमिति ज्ञात्वा ये पुनः पुरुषोत्तमाः ।
स्वदेहगेहान्निःसार्य चित्तद्वारं निरुन्धते ॥
ते सर्वापद्रवैर्मुक्ताः प्रलीनाशेषकल्मषाः ।
आत्मानं निर्मलीकृत्य प्रयान्ति परमं पदम् ॥
येऽनया रहिताः सन्तस्ते वन्द्या भुवनत्रये ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वशे गताः पुनर्येऽस्याः साधुभिस्ते विगर्हिताः ॥
अनुकूला भवन्त्यस्या ये मोहादधमा नराः ।
तेषामेषा प्रकृत्यैव दुःखसागरदायिका ॥
प्रतिकूला भवन्त्यस्या ये पुनः पुरुषोत्तमाः ।
तेषामेषा प्रकृत्यैव सुखसन्दोहकारिका ॥
तावन्मोचं नरो द्वेष्टि संसारं बहु मन्यते ।
पापिष्ठभोगतृष्णेयं यावच्चित्ते विवर्त्तते ॥
यदा पुनर्विलीयेत कथंचित्पुण्यकर्मणाम् ।
एषो भवस्तदा सर्वो धूलिरूपः प्रकाशते ॥
तावच्चाशुचिपुञ्जेषु योषिदङ्गेषु मूढधीः ।
कुन्देन्दीवरचन्द्रादि कल्पनां प्रतिपद्यते ॥
यावदेषा शरीरस्था वर्त्तते भोगतृष्णिका ।
तदभावे मनस्तेषु न स्वप्नेऽपि प्रवर्त्तते ॥
समाने पुरुषत्वे च परकिङ्करतां गताः ।
निन्द्यं यत्कर्म कुर्वन्ति भोगतृष्णात्र कारणम् ॥
येषां पुनरियं देहान्निर्गता सुमहात्मनाम् ।
निर्द्धना अपि ते धीराः शक्रादेरपि नायकाः ॥
किंचित्तामससंमिश्रै राजसैः परमाणुभिः ।
निर्वर्त्तितशरीरेयं गीता तन्त्रान्तरेष्वपि ॥
तदेषा भवतो पापा पापकर्मप्रवर्त्तिका ।
अतोऽस्या एव दोषोऽयं विद्यते नैव भद्रयोः ॥
स्वरूपेण सदा भद्रौ निर्मलौ परमार्थतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एषैव सर्वदोषाणां कारणत्वेन संस्थिता ॥
इह स्थातुमशक्लिष्टा एषा दूरस्थिताधुना।
भवन्तौ मत्समीपाच्च निर्गच्छन्तौ प्रतीचते ॥

विचक्षणाकालज्ञाभ्यामभिहितं भगवन् कदा पुनरस्याः सकाशा-दावयोर्मोक्षः भगवानाह भद्रौ नेह भवेऽद्यापि भवद्भ्यामियं सर्वथा त्यक्तुं न शक्या केवलमस्य निर्द्दलने महामुद्गरायमाणं प्रादुर्भूतं भवतोः सम्यग्दर्शनं तदुद्दीपनीयं पुनः पुनः सुगुरुसंनिकर्षेण नाचर-णीयमस्या भोगतृष्णाया अनुकूलं लक्षयितव्यो मनसि विवर्त्तमानो-ऽस्या सम्बन्धी विकारः निराकरणीयोऽसौ प्रतिपक्षभावनया ततः प्रतिक्षणं तनुतां गच्छती न भविष्यतीयं शरीरेऽपि वर्त्तमाना भवतोर्बाधिका भवान्तरे पुनरस्याः सर्वथा त्यागसमर्थौ भविष्यतो भवन्ताविति। तदाकर्ण्य ततो महाप्रसाद इति वदन्तौ विचक्षणा-कालज्ञौ पतितौ भगवच्चरणयोः ततोऽमुं व्यतिकरमालोक्य श्रुत्वा च भगवद्वचनं ऋजुप्रगुणामुग्धाकुटिलानामपि प्रादुर्भूतः पश्चात्ता-पेन सह विशुद्धाध्यवसायः ऋजुप्रगुणाभ्यां चिन्तितमहो अलीक-सुतवधूद्विगुणतव्यामोहेन निरर्थकं विडम्बितं विहिता सुतवध्वो-रुन्मार्गप्रवृत्तिरावाभ्यामिति। मुग्धेन चिन्तितं अहो कृतं मया परस्त्रीगमनेन कुलस्य दूषणं अकुटिलया चिन्तितं बत संजातं शील-खण्डनमिति। ततश्चतुर्णामपि स्थितमेतच्चित्ते। यदुत निवेदयाम एवंस्थितमेवेदं भगवतां एत एवास्य दुश्चरितस्य प्रतिविधानमुप-देक्ष्यन्ति। अत्रान्तरे चतुर्णामपि शरीरेभ्यो निर्गतैः परमाणुभि-र्घटितशरीरं शुक्लं वर्णेन परिगतं तेजसाल्हादकं लोचनानां प्रीणकं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेतसामुपलभ्यमानं मया रचितानि मया रचितानि यूयमिति ब्रुवाणमेकं डिम्भरूपं सहर्षं भगवन्मुखमीक्ष्यमाणं स्थितं सर्वेषां पुरतः तावत्तदनुमार्गेणैव कृष्णं वर्णेन बीभत्समाकारेण उद्वेगहेतुः प्राणिनां तथैव निर्गतं द्वितीयं डिम्भरूपं तस्माच्च तदाकाररूपधरमेव क्लिष्टतरं प्रकृत्या संजातमन्यदपि तृतीयं डिम्भरूपं तच्च वर्द्धितुमारब्धं ततः शुक्लडिम्भरूपेण मस्तके हस्ततलप्रहारं दत्त्वा तद्वर्द्धमानं निवार्य प्रकृत्या धारितं निर्गते च भगवदनुग्रहात् द्वे अपि ते कृष्णे डिम्भरूपे ततो भगवताभिहितं भो भद्राणि यद्भवद्भिश्चिन्तितं यथा कृतमस्माभिर्विपरीताचरणमिति न तच्च भवद्भिर्विषादो विधेयः यतो न भवतामेष दोषो निर्मलानि यूयं स्वरूपेण तैरभिहितं भगवन् कस्य पुनरेष दोषो भगवानाह यदिदं शुक्लानन्तरं भवच्छरीरेभ्यो निर्गतं कृष्णवर्णं डिम्भरूपमस्यायं दोषः तान्याहुः भगवन् किन्नामकमिदं भगवतोक्तमज्ञानमिदमुच्यते तैरुक्तं भगवन् यदिदमेतस्मादज्ञानात्प्रादुर्भूतं द्वितीयं कृष्णडिम्भरूपमनेन च शुक्लरूपेणास्फोट्य वर्द्धमानं धारितमेतत्किन्नामकं भगवानाह पापमिदं तान्याहुरस्य शुक्लडिम्भरूपस्य तर्हि किमभिधानं भगवतोक्तं आर्जवमिदमभिधीयते ततस्तान्याहुः भगवन् कीदृशमिदमज्ञानं कथं चेदं पापमेतस्माज्जातं किमिति चानेनार्जवेनेदं विवर्द्धमानं धारितमिति सर्वं विस्तरतः श्रोतुमिच्छामो भगवानाह यद्येवं ततः समाकर्णयत यूयम् ।

यत्तावदिदमज्ञानं युष्मद्देहाद्विनिर्गतम् ।
एतदेव समस्तस्य दोषवृन्दस्य कारणम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनेन वर्त्तमानेन शरीरे जन्तवो यतः ।
कार्याकार्यं न जानन्ति गम्यागम्यं च तत्त्वतः ॥
भक्ष्याभक्ष्यं न बुध्यन्ते पेयापेयं च सर्वथा ।
अन्धा इव कुमार्गेण प्रवर्त्तन्ते ततः परम् ॥
ततो निबोध्य घोराणि कर्माण्यज्ञातसम्बलाः ।
भवमार्गे निरन्तेऽत्र पर्यटन्ति सुदुःखिताः ॥
अज्ञानमेव सर्वेषां रागादीनां प्रवर्त्तकम् ।
स्वकार्ये भोगतृष्णापि यतोऽज्ञानमपेक्षते ॥
अज्ञानविरहेणैव भोगतृष्णा निवर्त्तते ।
कथंचित्संप्रवृत्तापि झटित्येव निवर्त्तते ॥
सर्वज्ञः सर्वदर्शी च निर्मलोऽयं स्वरूपतः ।
अज्ञानमलिनो ह्यात्मा पाषाणात्र विशेष्यते ॥
याः काश्चिद्देव मर्त्येषु निर्वाणे च विभूतयः ।
अज्ञानेनैव ताः सर्वा हृताः सन्मार्गरोधिना ॥
अज्ञानं नरको घोरस्तमोरूपतया मतम् ।
अज्ञानमेव दारिद्र्यमज्ञानं परमो रिपुः ॥
अज्ञानं रोगसंघातो जराप्यज्ञानमुच्यते ।
अज्ञानं विपदः सर्वा अज्ञानं मरणं मतम् ॥
अज्ञानविरहेणैष घोरसंसारसागरः ।
अत्रापि वसतां पुंसां बाधकः प्रतिभासते ॥
याः काश्चिदनवस्थाः स्युर्यास्तोन्मार्गप्रवृत्तयः ।
यच्चासमंजसं किंचिदज्ञानं तत्र कारणम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त एव हि प्रवर्त्तन्ते पापकर्मसु जन्तवः ।
प्रकाशाच्छादकं येषामेतच्चेतसि वर्त्तते ॥
येषां पुनरिदं चित्ताच्छन्यानां विनिवर्त्तते ।
शुभ्रीभूतान्तरात्मानस्ते सदाचारवर्त्तिनः ॥
वन्द्यास्त्रिभुवनस्यापि भूत्वा भावितमानसाः ।
अशेषकल्मषोन्मुक्ता गच्छन्ति परमं पदम् ॥
एतच्चाज्ञानमत्रार्थे सर्वेषां भवतां समम् ।
संजातं तेन दोषोऽयमस्यैव न भवादृशाम् ॥
डिम्भरूपमनेनैव द्वितीयं पापनामकम् ।
सर्वत्र जन्यते तस्माद्वापि जनितं किल ॥
एतद्धि सर्वदुःखानां कारणं वर्णितं बुधैः ।
उद्वेगसागरे घोरे हठादेतत्प्रवर्त्तकम् ॥
मूलं संक्लेशजालस्य पापमेतदुदाहृतम् ।
न कर्त्तव्यमतः प्राज्ञैः सर्वं यत्पापकारणम् ॥
हिंसानृतादयः पञ्च तत्त्वाश्रद्धानमेव च ।
क्रोधादयश्च चत्वार इति पापस्य हेतवः ॥
वर्जनीयाः प्रयत्नेन तस्मादेते मनीषिणा ।
ततो न जायते पापं तस्मान्नो दुःखसंभवः ॥
युष्माकं पुनरज्ञानाज्जातं पापमिदं यतः ।
अज्ञानमेव सर्वेषां हिंसादीनां प्रवर्त्तकम् ॥
वर्द्धमानमिदं पापमार्जवेन निवारितम् ।
यद्‌च कारणं सम्यक् कथ्यमानं निबोधत ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आर्जवं हि स्वरूपेण शुद्धाशयकरं परम् ।
वर्द्धमानमतः पापं वारयत्येव देहिनाम् ॥
एतच्चार्जवमत्रार्थे सर्वेषां वर्त्तते समम् ।
अज्ञानजनितं पापं युष्माकममुना जितम् ॥
रचितानि मया यूयमत एव मुहुर्मुहुः ।
सहर्षमेतदाचष्टे डिंभरूपं स्मिताननम् ॥
धन्यानामार्जवं येषामेतच्चेतसि वर्त्तते ।
अज्ञानादाचरन्तोऽपि पापं ते स्वल्पपापकाः ॥
यदा पुनर्विजानन्ति ते शुद्धं मार्गमंजसा ॥
तदा विधूय कर्माणि चेष्टन्ते मोक्षवर्त्मनि ॥
आजीवनं ततो धन्यास्ते शुभ्रीभूतमानसाः ।
निर्मलाचारविस्ताराः पारं गच्छन्ति संसृतेः ॥
तदेवंविधभावानां भद्राणां बुध्यतेऽधुना ।
अज्ञानपापे निर्धूय सम्यग्धर्मनिषेवणम् ॥
उपादेयो हि संसारे धर्म एव बुधैः सदा ।
विशुद्धो मुक्तये सर्वं यतोऽन्यद्दुःखकारणम् ॥
अनित्यः प्रियसंयोग इहेर्ष्याशोकवत्सलः ।
अनित्यं यौवनं चापि कुत्सिताचरणास्पदम् ॥
अनित्याः संपदस्तीव्रक्लेशवर्गसमुद्भवाः ।
अनित्यं जीवितं चेह सर्वभावनिबन्धनम् ॥
पुनर्जन्म पुनर्मृत्युर्हीनादिस्थानसंश्रयः ।
पुनः पुनश्च यदतः सुखमत्र न विद्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकृत्या सुन्दरं ह्येवं संसारे सर्वमेव यत् ।
अतोऽत्र वद किं युक्ता कचिदास्था विवेकिनाम् ॥
मुक्ता धर्मं जगद्वन्द्यमकलङ्कं सनातनम् ।
परार्थसाधकं धीरैः सेवितं शीलशालिभिः ॥
ततो भागवतं वाक्यं श्रुत्वेदममृतोपमम् ।
संसारवासात्तैः सर्वैः स्वं स्वं चित्तं निवर्त्तितम् ॥
राजाह क्रियते सर्वं यदादिष्टं महात्मना ।
प्रगुणाह महाराज किमद्यापि विलम्ब्यते ॥
चारु चारूदितं तात सम्यगम्ब प्रजल्पितम् ।
युक्तमेतदनुष्ठानं मुग्धेनैव प्रभाषितम् ॥
हर्षात्फुल्लसरोजाक्षी तथापि गुरुलज्जया ।
तदुक्तं बहु मन्वाना वधूर्मौनेन संस्थिता ॥

ततः पतितानि चत्वार्यपि भगवच्चरणयोः ऋजुराजेनोक्तं वत्स संपादयामो यदादिष्टं भगवता। भगवानाह उचितमिदं भवादृश-भव्यानां ततः पृष्टो भगवाननेन प्रशस्तदिनं राज्ञा भगवतोक्तं अद्यैव शुद्धातीति ततस्तत्क्षणेनैव नरेन्द्रेण दापितानि महादानानि कारितानि देवपूजनानि स्थापितः शुभाचाराभिधानः स्वतनयो राज्ये राज्ये जनितो नागरिकजनानां चित्तानन्द इति।

ततो निर्वर्त्त्य कर्त्तव्यं प्रव्रज्याकरणोचितम् ।
गुरुणार्पितसद्भावं दीक्षितं च चतुष्टयम् ॥
ततस्ते कृष्णरूपे द्वे डिम्भे तूर्णं पलायिते ।
शुक्लरूपं पुनस्तेषां प्रविष्टं तनुषु क्षणात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालज्ञेन ततश्चित्ते सभार्येण विचिन्तितम्।
पश्चाहो धन्यतामीषां सुलब्धं जन्मजीवितम्।
एतैर्भागवती दीक्षा यैः प्राप्ता पुण्यकर्मभिः॥
दुरन्तोऽप्यधुना मन्ये तैस्तीर्णोऽयं भवोदधिः।
चारित्ररत्नादेतस्मात्संसारोत्तारकारणात्॥
वयं तु देवभावेन व्यर्थकेनात्र वञ्चिताः।

अथ वा।

मिथ्यात्वोद्दलनं यस्मादस्माभिरपि सांप्रतम्।
दुर्लभं भवकोटीभिः प्राप्तं सम्यक्त्वमुत्तमम्॥
अतोऽस्ति धन्यता काचिदस्माकमपि सर्वथा।
नरो दारिद्र्यभाङ् नैव लभते रत्नपुञ्जकम्॥
ततः सहर्षौ तौ सूरेः प्रणम्य चरणद्वयम्।
तेनानुशिष्टौ स्वस्थानं संप्राप्तौ देवदम्पती॥
प्रविष्टा भोगतृष्णापि शरीरे गच्छतोस्तयोः।
शुद्धसम्यक्त्वमाहात्म्यात् केवलं सा न बाधिका॥
विचक्षणाह कालज्ञमन्यदा रहसि स्थिता।
आर्यपुत्र यदा दृष्ट्वा त्वयाहं कृतवञ्चना॥
तदा किं चिन्तितं सोऽपि स्वाभिप्रायं न्यवेदयत्।
विचक्षणाह सत्यस्त्वं कालज्ञ इति गीयसे॥
तेनापि पृष्टा सोवाच पर्यालोच्य तदाननम्।
कालज्ञः प्राह सत्येव त्वमप्यत्र विचक्षणा॥
यतः कालविलम्बेन क्रियमाणेन वल्लभे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भोगा भुक्ताः स्थिता प्रीतिर्जातं नाकाण्डविड्वरम् ॥
प्राप्तो धर्मो नृपादीनामुपकारः कृतो महान् ।
ततः कालविलम्बोऽयं फलितोऽत्यर्थमावयोः ॥
विचक्षणाह कोवाच सन्देहो नाथ वस्तुनि ।
किं वा न जायते चारु पर्यालोचितकारिणाम् ॥
ततः प्रीतिसमायुक्तौ संजातौ देवदम्पती ।
सद्धर्मलाभादात्मानं मन्यमानौ कृतार्थकम् ॥
इदं पुत्र मया तुभ्यं कथितं मिथुनद्वयम् ।
संदिग्धेऽर्थे विलम्बेन कालस्य गुणभाजनम् ॥

ततश्च ।

संदिग्धेऽर्थे विधातव्या भवता कालयापना ।
पश्चाद् बहुगुणं यच्च तदेवाङ्गीकरिष्यते ॥

मध्यमबुद्धिराह यथाज्ञापयत्यम्बा ।

ततो मनीषिणो वाक्यं स्मरतो नास्य जायते ।
प्रीतिबन्धो दृढं तत्र स्पर्शने भाववैरिणि ॥
बालालापैः पुनस्तत्र स्नेहबुद्धिः प्रवर्त्तते ।
दोलायमानोऽसौ चित्ते कुरुते कालयापनाम् ॥
इतश्च तेन बालेन सा प्रोक्ता जननी निजा ।
अम्ब संदर्शयात्मीयं योगशक्तिबलं मम ॥
तयोक्तं दर्शयाम्येषा पुत्र त्वं संमुखो भव ।
ततः सा ध्यानमापूर्य प्रविष्टा तच्छरीरके ॥
अथाकुशलमालायां प्रवेशानन्तरं पुनः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स बालः स्पर्शनेनापि गाढं हर्षादधिष्ठितः ॥
ततः शरीरे तौ तस्य वर्त्तमानौ क्षणे क्षणे ।
अभिलाषं मृदुस्पर्शे कुरुतस्तीव्रवेदनाम् ॥
परित्यक्तान्यकर्त्तव्यस्तावन्मात्रपरायणः ।
स बालः सुरतादीनि दिवा रात्रौ च सेवते ॥
कुविन्दडोम्बमातङ्गजातीयास्वपि तद्वशः ।
अतिलौल्येन मूढात्मा ललनासु प्रवर्त्तते ॥
ततोऽकर्त्तव्यनिरतं सत्कर्त्तव्यपराङ्मुखम् ।
तं बालं सकलो लोकः पापिष्ठ इति निन्दति ॥
अज्ञोऽयं गतलज्जोऽयं निर्भाग्यः कुलदूषणः ।
स एव निन्द्यमानोऽपि मन्यते निजचेतसि ॥
स्पर्शनाम्बाप्रसादेन ममास्ति सुखसागरः ।
लोको यद्वक्ति तद्वक्तु किमेतज्जल्पचिन्तया ॥
अथाकुशलमालापि निर्गत्य परिपृच्छति ।
कीदृशी मामकी जाता योगशक्तिर्विभाति ते ॥
स प्राहानुगृहीतोऽस्मि निर्विकल्पोऽहमम्बया ।
सुखसागरमध्येऽत्र यथाहं संप्रवेशितः ॥
अन्यच्चाम्ब त्वया नित्यं मदनुग्रहकाम्यया ।
न मोक्तव्यं शरीरं मे यावज्जीवं स्वतेजसा ॥
अथाकुशलमालाह यत्तुभ्यं वत्स रोचते ।
तदेव सततं कार्यं मया मुक्तान्यचेष्टया ॥
स्वाधीनां तां निरीक्ष्यैवं बालेन परिचिन्तितम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्पर्शनोऽपि ममायत्तः सामग्री सर्वसाधिका ॥
अहो मे धन्यता लोके नास्त्यतो बत मादृशः ।
ततोऽसौ गाढहृष्टात्मा स्वानुरूपं विचेष्टते ॥
अथ निन्दापरे लोके स्नेहविक्लवमानसः ।
लोकापवादभीरुत्वान्मध्यबुद्धिः प्रभाषते ॥
बालेन युज्यते कर्त्तुं तव लोकविरुद्धकम् ।
अगम्यागमनं निन्द्यं सपापं कुलदूषणम् ॥
स प्राह विप्रलब्धोऽसि नूनं मित्र मनीषिणा ।
स्वर्गे विवर्त्तमानं मां नेच्छसे कथमन्यथा ॥
ये मूढा जातिदोषेण कोमलं ललनादिकम् ।
नेच्छन्ति ते महारत्नं मुञ्चन्ति स्थानदोषतः ॥
तदाकर्ण्य ततश्चित्ते कृतं मध्यमबुद्धिना ।
नैष प्रज्ञापनायोग्यो व्यर्थो मे वाक्परिश्रमः ॥
एवं च तिष्ठतां तेषां बालमध्यमनीषिणाम् ।
अथान्यदा समायातो वसन्तो कृतमन्मथः ॥
संजाताः काननाभोगाः सुमनोभरपूरिताः ।
भ्रमद्भ्रमरझङ्कारतारगीतमनोहराः ॥
कामिनीहृदयानन्ददायकं प्रियसन्निधौ ।
विजृम्भते वनान्तेषु काककोकिलकूजितम् ॥
प्रोत्फुल्लकिंशुकाग्रेषु पुष्पभारोऽतिरिक्तकः ।
वियोगदलितस्त्रीणां पिशितप्रकरायते ॥
मञ्जर्यः सहकाराणामामोदितदिगन्तराः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्टा वसन्तराजेन धूलिक्रीडां प्रकुर्वते ॥
देवकिन्नरसम्बन्धिमिथुनैः कथिता वने ।
भ्रमेण नाकान्मर्त्त्यस्य तदानीं रमणीयता ॥
वल्लर्यो निर्भरीभूत्वा बद्धा दोला गृहे गृहे ।
मदनोद्दीपनमदः प्रवृत्तो मलयानिलः ॥
अथेदृशे वसन्तेऽसौ सह मध्यमबुद्धिना ।
क्रीडार्थं निर्गतो बालः कामकालप्रमोदितः ॥
जनन्या देहवर्त्तिन्या संयुक्तः स्पर्शनेन च ।
गतो लीलाधरं नाम सोद्यानं नन्दनोपमम् ॥
तस्यास्ति मध्यभूभागे शुभ्रशृङ्गो महालयः ।
जनतानयनानन्दः प्रासादस्तुङ्गतोरणः ॥
कामिनीहृदयाह्लादकारको रतिवल्लभः ।
जनैः प्रतिष्ठितस्तत्र देवो मकरकेतनः ॥
इतश्च तस्य देवस्य पूजासत्कारकारणम् ।
तिथिक्रमेण संजाता दिने तत्र त्रयोदशी ॥
कन्यकावरलाभाय वध्वः सौभाग्यवृद्धये ।
दुर्भगास्तु पतिप्रेममोहेन हृतमानसाः ॥
मोहान्धाः कामिनोऽभीष्टयोषित्सम्बन्धसिद्धये ।
गृहीतार्चनिकाः कामपूजनार्थं समागताः ॥
ततो बालो महारोलं तत्राकर्ण्य सविस्मयः ।
प्रविष्टः कामसदनं सह मध्यमबुद्धिना ॥
दृष्टस्तत्र रतेर्नाथः प्रणतो भक्तिपूर्वकम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूजितश्च प्रयत्नेन संस्तुतो गुणकीर्त्तनैः ॥
अथ प्रदक्षिणां तस्य ददानो देवसद्मनः ।
बालो ददर्श पार्श्वस्थं गुप्तस्थाने व्यवस्थितम् ॥
तस्यैव रतिनाथस्य देवस्य कृतकौतुकम् ।
संवासभवनं रम्यं मन्दमन्दप्रकाशकम् ॥
कुतूहलवशेनाथ दारिं संस्थाप्य मध्यमम् ।
मध्ये प्रविष्टः सहसा स बालस्तस्य सद्मनः ॥
अथ तत्र सुविस्तीर्णां सपर्यङ्कां सतूलिकाम् ।
मृदूपधानसंपन्नां कोमलामलचेलिकाम् ॥
सुप्तेन रतियुक्तेन क्रान्तमध्यां मनोभुवा ।
स ददर्श महाशय्यां देवानामपि दुर्लभाम् ॥
ततो मन्दप्रकाशत्वात् संवासभवनस्य सः ।
किमेतदिति संचिन्त्य शय्यां पस्पर्श बालकः ॥
इतश्चेतश्च हस्तेन स्पृशता सुचिरं मुदा ।
ततो विभावितानेन शय्येषा मकरध्वजौ ॥
विचिन्तितं च तत्स्पर्शकौमल्यहृतचेतसा ।
अहो कोमलता मन्ये नान्यत्र भवतीदृशी ॥
ततः शरीरवर्त्तिन्या जनन्या स्पर्शनेन च ।
प्रेर्यमाणः स्वकीयेन चापलेन च दूषितः ॥
स बालश्चिन्तयत्येवमानयामि यथेच्छया ।
एनां कोमलिकां शय्यां सुप्ताहं क्षणमात्रकम् ॥
देवः सुप्तोऽत्र मदनो रतियुक्तो न चिन्तितम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपायो देवशय्यायां सुप्तस्येति न भावितम् ॥
दृष्टस्य लाघवं लोकैरिति नैव नमस्कृतम् ।
विज्ञातं नेति संपत्स्ये हास्यो मध्यमबुद्धितः ॥
अनालोच्यायतिं मोहात् केवलं सुप्त एव सः ।
आरुह्य शय्यां तां दिव्यां कृतं बालविचेष्टितम् ॥
ततस्तस्यां विशालायां शय्यायां बहुमानसः ।
इतश्चेतश्च कुर्वाणः सर्वाङ्गाणि पुनः पुनः ॥
अहो सुखमहो स्पर्शस्तथाहो धन्यता मम ।
चिन्तयन्निति शय्यायां लुठमानः स तिष्ठति ॥
इतश्च नगरे तत्र बहिरङ्गो नृपोत्तमः ।
अन्योऽप्यस्ति महातेजाः प्रख्यातः शत्रुमर्दनः ॥
तस्यास्ति पद्मपत्राक्षी प्राणेभ्योऽपि सुवल्लभा ॥
प्रधानकुलसंभूता देवी मदनकन्दली ।
गृहितार्चनिका सा च परिवारेण संयुता ॥
आयाता तत्र सदने कामदेवस्य पूजिका ।
देवकोष्ठस्थितं सा च संपूज्य मकरध्वजम् ॥
संवासभवनस्थस्य प्रविष्टा तस्य पूजिका ।
प्रविशन्तीमुदीक्ष्यासौ तां स्तौति कृतनिश्चयः ॥
लज्जाभयाभ्यां निश्चेष्टो बालः काष्ठमिव स्थितः ।
ततो मन्दप्रकाशे सा भवने मृगलोचना ॥
हस्तस्पर्शेन शय्यायां देवमर्चयते किल ।
चन्दनेन च कुर्वन्त्या रतिकामविलेपनम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स बालः सर्वगात्रेषु स्पृष्टः कोमलपाणिना ।
ततोऽकुशलमालाया वशेन स्पर्शनस्य च ॥
स बालश्चिन्तयत्येवं विपर्यासितमानसः ।
यादृशोऽयं मृदुस्पर्शो हस्तस्यास्यानुभूयते ॥
नानुभूतो मया तादृग् जन्मन्यपि कदाचन ।
अहो मयान्यस्पर्शेषु सौन्दर्यं कल्पितं वृथा ॥
नातः परतरं मन्ये त्रिलोकेऽप्यस्ति कोमलम् ।
इतश्च कामदेवस्य परिचर्यां विधाय सा ॥
स्वस्थानं प्रगता काले राज्ञी मदनकन्दली ।

ततोऽसौ बालः कथं ममेयं स्त्री संपत्स्यत इति चिन्तया विक्लीभूतहृदयोऽनाख्येयमन्तस्तापातिरेकं वेदयमानो विस्मृतात्मा तस्यामेव शय्यायां मुञ्चन् उष्णोष्णान् दीर्घदीर्घान् निःश्वासान् मूर्च्छित इव मूक इव मत्त इव हृतसर्वस्व इव तप्तशिलायां निक्षिप्तमत्स्यक इव इतश्चेतश्च परिवर्त्तमानो विचेष्टते ततो द्वारे वर्त्तमानेन मध्यमबुद्धिना चिन्तितं अये किमेत्येष बालोऽस्मात् संवासभवनादियतापि कालेन न निर्गच्छतीति किं वा करोतीति प्रविश्य तावन्निरूपयामि। ततः प्रविष्टो मध्यमबुद्धिर्लक्षिता हस्तस्पर्शेन कामशय्या हृतमस्यापि हृदयं तत्कोमलतया ततो विमलीभूतदृष्टिना तेन दृष्टः शय्यैकदेशे विचेष्टमानस्तदवस्थो बालश्चिन्तितमनेन अहो किमनेनेदमकार्यमाचरितं न युक्तं देवशय्यायामधिरोहणं न खलु रतिरूपविभ्रमापि गुर्वङ्गना सतां गम्या भवति तथेयं शय्या सुखदापि देवप्रतिमाधिष्ठितेति कृत्वा केवलं वन्दनीया न पुनरु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पभोगमर्हतीति ततश्चोत्थापितोऽनेन बालो यावन्न किञ्चिज्जल्पति मध्यमबुद्धिराह अहो अकार्यमिदं न युक्तं देवशय्यायामधिरोहणमित्यादि तथापि न दत्तमुत्तरं बालेन। अत्रान्तरे प्रविष्टस्तद्देवकुलाधिष्ठायको व्यन्तरो बद्धस्तेनाकाशबन्धैः बालः पतितो भूतले समुत्पादितास्य सर्वाङ्गीणा तीव्रवेदना ततो मुमूर्षन्तमुपलभ्य कृतो मध्यमबुद्धिना हाहारवः ततः किमेतदिति संभ्रमेण चलितो देवकुलाभिमुखं लोको निःसारितो व्यन्तरेण वासभवनाद् बहिर्बालो महास्फोटेन चिप्तो भूतले भग्ननयनः कण्ठगतप्राणोऽसौ दृष्टो लोकेन तदनुमार्गेण दीनमनस्को निर्गतो मध्यमबुद्धिः किमेतदिति पृष्टोऽसौ जनेन लज्जया न किंचिज्जल्पितमनेन ततोऽवतीर्य कंचित्पुरुषं व्यन्तरेण कथितो जनेभ्यस्तदीयव्यतिकरः ततो देवापथ्यकारीति पापिष्ठोऽयमिति धिक्कारितोऽसौ बालो मकरध्वजभक्तैः कुलदूषणोऽयमस्माकं विषतरुरिव संपन्न इति गर्हितः स्वजातीयैः अनुभवतु पापकर्मणः फलमिदानीमित्याक्रोशितः सामान्यलोकैः कियदेतदसमीचितकारिणां समस्तानर्थभाजनत्वात् तेषामित्यपकर्णितो विवेकिलोकैः ततोऽसौ व्यन्तरः कृतविकृतरूपः सन्नाह चूर्णनीयोऽयं दुरात्मा भवतां पुरतो मयाधुना बाल इति ततः कृतहाहारवः प्रसीदतु प्रसीदतु भट्टारको ददातु भ्रातृप्राणभिचामिति ब्रुवाणः पतितो व्यन्तराधिष्ठितपुरुषपादयोर्मध्यमबुद्धिस्तत्करुणापरीतचेतसा लोकेनाप्यभिहितो व्यन्तरो यदुत भट्टारक मुच्यतामेकवारं तावदेष न पुनः करिष्यतीति । ततो मध्यमबुद्धिकरुणया लोकोपरोधेन च मुक्तोऽसौ व्यन्तरेण बालो लब्धा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेतना मुल्कलीभूतं शरीरं निःसारितस्तूर्णं देवकुलात् मध्यमबुद्धिना नीतः कृच्छ्रेण स्वभवनं ज्ञातोऽयं व्यतिकरः परिकरात्कर्मविलासेन चिन्तितमनेन कियदेतदद्यापि मयि प्रतिकूले बालस्य यद्भविष्यति तन्न लक्षयन्त्येते लोकाः ततोऽभिहितः कर्मविलासेन परिकरः किमस्माकं दुर्विनीतचिन्तया नोचितः सोऽनुग्रास्ते न वोढव्यस्तदीयः केनापि व्यापारः परिकरेणोक्तं यदाज्ञापयति देव इति । पृष्टोऽसौ मध्यमबुद्धिना बालः । भ्रातर्न किञ्चित्तेऽधुना शरीरके बाधते बालेनाभिहितं न शरीरके केवलं प्रवर्द्धते ममान्तस्तापो मध्यमबुद्धिराह जानासि किन्निमित्तोऽयं ततो वामशीलतया कामस्य बालः प्राह न जानामि केवलं द्वारस्थेन भवता तत्र संवासभवनेऽभिप्रविशन्ती गच्छन्ती वा किं विलोकिता काचिन्नारी न वा मध्यमबुद्धिराह विलोकिता बालेनोक्तं तत्किं लक्षिता कासाविति भवता मध्यमबुद्धिराह सुष्ठु लक्षिता सा हि शत्रुमर्दनस्य राज्ञो भार्या मदनकन्दलीत्युच्यते तदाकर्ण्य कथं सा मादृशामिति चिन्तया दीर्घदीर्घतरं निःश्वसितं बालेन तदर्थो ऽस्यायमिति लक्षितो मध्यमबुद्धिना चिन्तितमनेन तत्रापि स्थाने तावदस्यायमभिनिवेशो जनयत्येवं सा मदनकन्दली सुन्दरतरातिशयेन स्वगोचरमभिलषितं यतो द्वारशाखालग्नेन मयाप्यतिसङ्कटतया कामसंवासभवनद्वारस्य निर्गच्छन्त्यास्तस्या मदनकन्दल्याः संवेदितोऽङ्गस्य स्पर्शो न तादृशः प्रायेणान्यवस्तुनः स्पर्शो भुवने विद्यते दोलायितं ममापि तदभिसरणगोचरं मनस्तदानीमासीत् किंतु न युक्तं कुलजानां परस्त्रीगमनं तस्मान्निवारयाम्येनमपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदि निवर्त्तते मद्वचनेन ततः स बालं प्रत्याह किमद्याप्यविद्या भवतः किं न दृष्टमिदानीमेव फलमविनयस्य भवता किमधुनैव विस्मृतं यत्कण्ठगतप्राणः कथंचिन्मोचितस्त्वं मया दुर्विनयकुपितात् भगवतो मकरध्वजात् ततो निवर्त्तस्वास्मादुरध्यवसायात् नयनविषं नागशिरोरत्नशूचिकल्पा हि सा मदनकन्दली तां प्रार्थयतस्ते केवलं भस्मीभाव एव न पुनः काचिदर्थसिद्धिः बालेन चिन्तितं अये लक्षितोऽहमनेन तत्किमधुनाभिप्रायगोपनेन ततस्तेनोक्तं यद्येवं ततः किं ब्रूषे मोचितस्त्वं मया न पुनर्ब्रूषे यथा गाढतरं मारित इति यतस्तेन कामेन युष्मद्वचनेन मां मुञ्चता केवलं मे शरीरवेदनामात्रमपसारितं हृदये पुनर्निक्षिप्तो वितर्कपरंपरारूपः प्रज्वलितखदिराङ्गारराशिस्तेन ममेदं दह्यते समन्ताच्छरीरं यद्यहं कामबन्धनकाल एवामरिष्यं नैतावन्तमन्तस्तापमन्वभविष्यं ततो भवता मोचयता मत्कृत महानयमनर्थः संपादित इति नाधुना ममैनाममृत-सेकायमानां मदनकन्दलीं विरहय्यान्यथास्यान्तस्तापस्योपशमः किं-बहुनात्र जल्पितेनेति । ततो लक्षितो मध्यमबुद्धिनास्या निवर्त्तको निर्बन्धः स्थितोऽसौ तूष्णींभावेन । अत्रान्तरे गतोऽस्तं सविता बालहृदयादिव समुल्लसितं तमःपटलं लंघितः प्रथमः प्रदोषः निः-संचारीभूतो लोकः ततोऽविचार्य कार्याकार्यं समुत्थितो बालो निर्गतः स्वकीयभवनात् अवतीर्णो राजमार्गं प्रवृत्तः शत्रुमर्दनराजकु-लाभिमुखं गन्तुं गतः कियन्तमपि भूभागमितश्च स्नेहवशेन किमस्य संपत्स्यत इति चिन्तया निर्गतस्तदनुमार्गेण मध्यमबुद्धिः । दृष्टो बालेन गच्छता कश्चित्पुरुषः । तेन चास्फोट्यबद्धोऽसौ मयूरबन्धेन

34

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कूजितं बालेन प्राप्तः प्राप्त इति ब्रुवाणः प्राप्त इव मध्यमबुद्धिः। ततः समुत्पाट्य बालं पश्यत एव मध्यमबुद्धेः समुत्पतितः पुरुषोऽम्बरतलमारटतश्च बालस्य स्थगितं वदनं प्रवृत्तः पश्चिमाभिमुखो गन्तुं ततो मध्यमबुद्धिरपि अरे रे दुष्ट विद्याधर क्व यासि गृहीत्वा मदीयभ्रातरमिति। चार्वीं मुञ्चन्नाकृष्टखड्गः प्रस्थितो भूमौ तदनुमार्गेण निर्गतो नगरात् अदर्शनीभूतः पुरुषो निराशीभूतो मध्यमबुद्धिः। तथापि बालस्नेहानुबन्धेन किल क्वचिन्मोच्यतीतिबुद्ध्या नासौ धावन्नुपरमति धावत् एव लंघिता रजनी ततोऽनुपानत्कतया विद्धोऽनेककण्टककीलकैः परिगतः श्रमेण क्षामो बुभुक्षया पीडितः पिपासया विह्वलः शोकेन अध्यासितो दैन्येन अनेकंग्रामनगरेषु पृच्छन् वार्त्तां भ्रान्तोऽसौ सप्ताहोरात्रं तत्रापि प्राप्तः कुशस्थलं नाम नगरं स्थितस्तस्य बहिर्भागे दृष्टोऽनेन जीर्णान्धकूपः ततः किं ममाधुना भ्रातृविकलेन जीवितेनेति प्रक्षिप्याम्यत्रात्मानमिति संचिन्त्य बद्धा मध्यमबुद्धिना निर्बोलगमनार्थमात्मगलके शिला दृष्टं तन्नन्दननाम्ना राजपुरुषेण ततो मा साहसं मा साहसमिति ब्रुवाणः प्राप्तोऽसौ तत्समीपं धारितः कूपतटोपान्तवर्त्ती मुञ्चन्नात्मानं मध्यमबुद्धिरनेन विमोचितः शिलां निवेशितो भूतले पृष्टश्च भद्र किमितीदमधमपुरुषोचितं भवता व्यवसितं ततः कथितोऽनेन बालवियोगव्यतिकरः। नन्दनेनाभिहितं भद्र यद्येवं ततो मा विषादं कार्षीः भविष्यति भ्रात्रा सार्द्धं प्रायेण मीलको मध्यमबुद्धिराह कथं नन्दनेनोक्तं समाकर्णय अस्त्यत्र नगरेऽस्माकं स्वामी हरिश्चन्द्रो नाम राजा स च प्रतिक्षणमुपद्रूयते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विजयमाठरशंखादिभिः प्रात्यन्तिकैर्मण्डलहरैर्नृपतिभिः। इतश्चास्ति रतिकेलिर्नाम विद्याधरः परममित्रम्। अन्यदा समागतेन प्रचूपद्रुतमवलोक्य देवं तेनाभिहितं ददामि तुभ्यमहं क्रूरविद्यां यत्प्रभावेण त्वमेतैर्न परिभूयसे देवेनाभिहितं अनुग्रहो मे ततः कारयित्वा षाण्मासिकीं पूर्वसेवामितो दिनादष्टमे दिने नीतः क्वचित्तेन देवो हरिश्चन्द्रः कारितो विद्यासाधनमानीतो द्वितीयदिने सह पुरुषेण हता तस्य पुरुषस्य मांसरुधिरेण होमक्रिया सप्तदिनानि विद्यायाः पश्चात्सेवामुक्तोऽसावधुना पुरुषः स एव प्रायस्ते भ्राता भविष्यतीति मे वितर्कः । स च ममैव समर्पितोऽधुना देवेन। मध्यमबुद्धिराह भद्र यद्येवं ततो यद्यस्ति ममोपरि दया भवतस्ततस्तमानय तावदिहैव पुरुषं येनाहं प्रत्यभिजानामीति ततश्चैवं करोमीत्यभिधाय गतो नन्दनः समायातः समुत्पाद्य गृहीत्वा बालं दृष्टोऽस्थिमात्रावशेष उच्छ्वासनिःश्वासोपलक्ष्यमाणजीवितो निरुद्धवाक्प्रसरो मध्यमबुद्धिना बालः प्रत्यभिज्ञातः कृच्छ्रेण। अभिहितो नन्दनः भद्र स एवायं मम भ्रातेति सत्यं नन्दनस्त्वमसि। अनुगृहीतोऽहं भवता। नन्दनः प्राह। भद्र राजद्रोह्यमिदं भवत्करुणया मयाध्यवसितम्। अन्यच्चाधुना गतेन मया किलाकर्णितं यथा किल रात्रौ राजा पुनस्तर्पयिष्यति रुधिरेण विद्यां भविष्यत्यनेन पुरुषेण प्रयोजनमिति तदिदमत्रगम्य मम यद्भवति तद्भवतु भवद्भ्यां तु तूर्णमपक्रमितव्यं ततो यदाज्ञापयति भद्रो रक्षणीयश्च यत्नेन भद्रेणात्मेत्यभिधाय समुत्पाटितो बालः प्रवृत्तो गन्तुं मध्यमबुद्धिः । ततो भयविधुरहृदयो धावन्नहर्निशं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेगेन क्वचित्प्रदेशे बालं पाययन्नुदकं समाल्हादयन् वायुना प्रीण-यन्नशनादिरसेनागणयन्नात्मनः शरीरपीडां महता क्लेशजालेन प्रापः स्वस्थानं मध्यमबुद्धिः । गतानि कतिचिद्दिनानि जातो मनाक् सबलो बालः पृष्टो मध्यमबुद्धिना भ्रातः किं भवतानुभूतं स प्राह इतस्ताव-दुत्क्षिप्तोऽहं बद्धा भवतः पश्यत एव गगनचारिणा नीतः कृतान्त-पुराकारमतिभीषणतयैकं श्मशानं दृष्टस्तत्र प्रज्वलिताङ्गारभृताग्नि-कुण्डपार्श्ववर्त्ती मया पुरुषः ततस्तंप्रति तेनाम्बरचरेणाभिहितं महाराज सिद्धं ते समीहितं लब्धोऽयं मया प्रस्तुतविद्यासिद्धेरुचितः सलक्षणः पुरुषः । इतरेणोक्तं महाप्रसादः ततोऽभिहितो नभश्चरेण स पुरुषः यदुतैकैकस्मिन् विद्याजापपर्यन्ते मया दत्ताहुतिरग्नौ भवता प्रक्षेप्तव्या प्रतिपन्नमनेन प्रारब्धो जापः । ततो विद्याधरेणा-कृष्टा यमजिह्वेवातितीक्ष्णा भास्वराकारा शस्त्रिका तया चो-त्कर्त्तिता मदीयपृष्ठात्तेन दीर्घा मांसपेशी निष्पीड्य तत एव प्रदेशात् निर्गालितं रुधिरं भृतश्चुलुकः । अत्रान्तरे समाप्तमितरस्यैकं विद्यापरावर्त्तनं समर्पिता विद्याधरेण सा रुधिरमांसमयी तस्या-हुतिः प्रतिक्षिप्ता तेनाग्निकुण्डे । पुनः प्रारब्धो जापः ततश्चैवं सोऽम्बर-चरो मदीयं शरीरं परापरप्रदेशान्नरकपाल इव नारकस्यारटतो मे मांसपेशीमुत्कर्त्तयति तं प्रदेशं निष्पीड्य रुधिरं निर्गालयति तस्य चुलुकं भृत्वा साधकायाहुतये ददाति स च विद्यापरावर्त्तन-समाप्तौ गृहीत्वा हुताशने प्रक्षिपति । ततो वेदनाविह्वलो मूर्च्छया पतितोऽहं भूतले विद्याधरस्तु प्रगुणशरीरतया हृष्टो निष्करुणो गाढतरं मां विकर्त्तयति । अत्रान्तरेऽट्टहासैर्हसितमिव प्रलयमेघै-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुलगुलितमिव समुद्रेण प्रचलितेव पृथिवी रसितं दीप्तजिह्वाभिः शिवाभिः प्रवृत्तं च विकृतरूपैर्वैतालैः निपतितं रुधिरवर्षं ततश्चैवंविधेषु रौद्रेषु विभीषिकाविशेषेषु सत्स्वप्यक्षुभितचित्तस्य राज्ञोऽभिमुखीभूता सा क्रूरविद्या समाप्तं जापस्याष्टशतं ततः सिद्धाहं भवत इति वदन्ती प्रकटीभूता विद्या प्रणता साधकेन प्रविष्टा तच्छरीरे ततः समुत्कर्त्तितशरीरं निष्पीडितरुधिरबीभत्सं करुणमारटन्तं मामुपलभ्य स राजा मयि जातसदयः कृतोऽनेन दन्तसीत्कारः ततो वारितोऽसौ विद्याधरेणाभिहितं च तेन राजन्नेष एवास्या विद्यायाः कल्पो यदुत न कर्त्तव्यास्योपरि दया ततो विद्याधरेण लिप्तं मे केनचिल्लेपेन शरीरं ततोऽहं समन्ताद्दन्दह्यमान इव तीव्रवन्हिना चूर्ण्यमान इव वज्रेण पीड्यमान इव यन्त्रेण प्रविष्टो वेदनाप्रकर्षं तथापि सुबद्धं न गतमेतन्मे हतजीवितं संजातं मे क्षणेन तेन लेपेन दवदग्धस्थाणुकल्पं शरीरं समुत्पाटितस्ताभ्यां नीतस्तत्र नगरे खादितश्च स्वयंभुनिमित्तमाल्लभोजनं शून्यं मे शरीरं ततो भूयस्तेनैव विधिना मदीयमांसं रुधिराहुतिभिस्तेन राज्ञा दत्तमष्टशतमष्टशतं विद्याया जापस्य सप्तदिनानीति दृष्टश्च तदवस्थोऽहं भवता तदिदं भ्रातर्मयानुभूतं स्थितं च मम हृदये यदुत न प्रायेण नरकेऽप्येवंविधो दुःखविन्यासो यादृशो मयानुभूत इति। मध्यमबुद्धिराह हा भ्रातर्नोचितस्त्वमेवंविधदुःखानां अहो निर्घृणता विद्याधरस्य अहो रौद्रता विद्यायाः। अत्रान्तरे लोकाचारमनुवर्त्तमानो वार्त्तान्वेषणार्थमागतो मनीषी श्रुतस्तेन द्वारि स्थितेन तथा परिदेवमानो मध्यमबुद्धिः प्रविष्टो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽभ्यन्तरे कृतेतराभ्यामासनदानादिका प्रतिपत्तिः विहितं संभाषणं ततो मनीषिणाभिहितं मध्यमबुद्धे किमिति त्वं परिदेवयसे मध्यमबुद्धिराह भ्रातरलौकिकमिदं परिदेवनकारणं मनीषिणोक्तं कथं ततः कथितो मध्यमबुद्धिना समस्तोऽप्युद्यानगमनादिविद्याधरविकर्त्तनपर्यन्तो बालव्यतिकरः । ततः पूर्वमेव ज्ञातनिःशेषव्यतिकरेणापि मुग्धेनेव विस्मितेचणेन समस्तमाकर्ण्य मनीषिणाभिहितं किमीदृक् संपन्नं बालस्य हा न युक्तमिदं यदि वा कथितमिदं मया प्रागेवास्य यथा न सुन्दरोऽनेन स्पर्शनेन पापमित्रेण सार्द्धं संबन्धः तज्जनितेयमस्यानर्थपरंपरा ।

तथा हि । हेतुरसावनार्यकार्यसङ्कल्पस्य अनार्यकार्यसङ्कल्पे वर्त्तमानाः प्राणिनः संक्लिष्टतया चित्तस्य प्रबलतया पापोदयस्याप्राप्ताभिप्रेतार्था एव बडिशग्रहणप्रवृत्ता इव मत्स्यका निपतन्त्यापद्गहने लभन्ते मरणं न खल्वनुपायतोऽर्थसिद्धिः । अनुपायश्चाकार्यकार्यसंकल्पः सुखलाभानां स हि क्रियमाणो धैर्यं ध्वंसयति विवेकं नाशयति चित्तं मलिनयति चिरन्तनपापान्युदीरयति ततः प्राणिनं समस्तानर्थसार्थयोजियति । ततः कुतोऽनार्यसङ्कल्पात् सुखलाभगन्धोऽपीति । तस्मादिदं सर्वं सुदुश्चरितविलसितं बालस्य योऽयं मद्वचनं न विधत्ते किमत्र भवतः परिदेवितेनेति । बालः प्राह । मनीषिन्नलमनेनासम्बद्धप्रलापेन न खलु सत्पुरुषाणां महार्थसाधनप्रवृत्तानामप्यन्तराले व्यसनं मनो दुःखयति । यद्यापि तां कमलकोमलतनुलतां मदनकन्दलीं प्राप्नोमि ततः कियदेतद्दुःखं तदाकर्ण्य कालदृष्टवदसाध्योऽयं स तूपदेशमन्त्रतन्त्राणामित्याकलय्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनीषिणा गृहीतो दक्षिणभुजाग्रे मध्यमबुद्धिरुत्थाप्य ततः स्थानात् प्रवेशितः कक्षान्तरे अभिहितश्चासौ भ्रातर्यद्येष बालः सत्यं बाल इव नात्महितं जानीते तत्किं भवताप्यस्य पृष्ठतो विलग्नेन विनष्टव्यम्। मध्यमबुद्धिराह बोधितोऽहमिदानीं भवता योऽयं भवदुपदेशमपि लंघयति तेनालं मम बालेनेति। अन्यच्चातिलज्जनीयोऽयं व्यतिकरः तत्किमेष न ज्ञातस्तातेन मनीषिणाभिहितं न केवलेन तर्हि समस्तनगरोपेतेन भद्र केन हि प्रभातं पटकेनाच्छाद्यते। मध्यमबुद्धिराह। कथं ज्ञातो मनीषिणाभिहितं कामदेवभवनवृत्तान्तस्तावद्बहुलोकप्रतीत एव किं तस्य ज्ञास्यते विद्याहरणवृत्तान्तस्तु प्राप्त इति। तदीयहाहारवात् प्रबुद्धास्तदा लोकास्तैर्विज्ञाय नगरे प्रचारितो मध्यमबुद्धिना चिन्तितं अये किलाहं मातुः पुत्रोऽमुं व्यतिकरं गोपयामि यावता गाढतरं प्रकाशः संपन्नः सुप्रच्छन्नमपि हि विहितं प्रयोजनं प्रायः प्रकाशत एव लोके विशेषतः पापं तस्माद्दुर्बुद्धिरेषा प्राणिनां यया स्वाचरितं पापं प्रच्छादयन्ति। इदं हि केवलमधिकतरं मोहविलसितं सूचयतीत्येवं विचिन्त्य ततस्तेनाभिहितं मनीषिन्नमुं वृत्तान्तमुपलभ्य भवता किमाचरितं किं तातेन किमम्बाभ्यां किं वा नगरलोकेनेति श्रोतुमिच्छामि मनीषिणाभिहितं भ्रातः समाकर्णय मम तावदुपेक्षा निर्गुणेषु सतामिति भावनया संजातं बालं प्रति माध्यस्थ्यं तथा क्लिश्यमानेषु दयावन्तः सन्त इति पर्यालोचनया प्रादुर्भूता तवोपरि महती करुणा तथा मुक्तोऽहं पापमित्राभिष्वङ्गजनितानामेवंविधानामपायानामित्याकलनया संजातात्मन्यास्थाबुद्धिर्गुणा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धिकेषु प्रमोदवन्तो महात्मान इति विमर्शेन धन्यः पुण्यभागसौ भवजन्तुः येनायं समस्तानर्थहेतुः स्पर्शनः पापवयस्यः सर्वथा निराकृत इत्यालोचयतः समुल्लसितस्तं प्रति हर्षः । तातेन तु केवल-मट्टहासेन हसितं मयाभिहितं तात किमेतत् तातेनाभिहितं पुत्र यन्मयि प्रतिकूले संपद्यते तत्संपन्नं बालस्यातो मे हर्षः । हा जात क गतोऽसीति परिदेवितं सामान्यरूपया न सञ्जातो मामक-तनयस्यापाय इति हृष्टा चित्तेन मदीयजननी नगरस्य तु सम्पन्नो बालहरणेन प्रमोदः सञ्जाता त्वदीयगमनेन करुणा प्रादुर्भूतः स्व-स्यावस्था न दर्शनेन ममोपरि पक्षपातः । मध्यमबुद्धिराह कथमेतल्ल-क्षितं भवता मनीषिणाभिहितं निर्गतोऽहमासीत्तदा नगरे कुतू-हलेन भ्रमणिकया ततः श्रुता मया परस्परं जल्पन्तो लोकाः यदुताहो सुन्दरं संपन्नं यदसौ कलङ्कहेतुर्निजकुलस्य दुष्टोऽन्तःकर-णेन वर्जितो मर्यादया बहिर्भूतः सदाचारात् निरतः सततमगम्यग-मने अत एवोपतापकरो नगरस्य बालः केनापि महात्मनापहृत इति । अन्येनाभिहितं सुष्ठु सुन्दरमेवं तु सुन्दरतरं भवति यद्यसौ छिन्नो भिन्नो व्यापादितश्च श्रूयते यतस्तस्मिन्नेकान्ततः प्रलीने एव पापे नागरिकाणां शीलसंरक्षणं संपत्स्यते नान्यथा । अन्येनाभिहितं सुन्दरमिदं केवलं यदसौ मध्यमबुद्धिस्तपस्वी तस्य पृष्ठतो लग्नः क्लिश्यते तन्न चारु स हि विशिष्टप्रायः प्रतिभासतेऽस्माकं ततो-ऽपरः प्राह भद्र ये पापवृत्तानां वत्सला भवन्ति तेषां कीदृशी विशिष्टता न खलु जात्याकनकं श्यामिकया सह संसर्गमर्हति अत एव लभन्ते तद्द्वारेणैव दुःखपरंपराम् । अयमस्य लोके किम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चाश्चर्यं ये पुनरादित एव पापानुष्ठानाः शुभजनसंपर्कं रहयन्ति तेषां नैष दोषोऽनुयुज्यते अत्रार्थे अयमेव मनीषी दृष्टान्तः योऽयं महात्मा परिहृतपापप्रवणबालवात्सल्यो निष्कलङ्कं सुखेन जीवतीति ततस्तं लोकवादमाकर्णयता मयेदं लक्षितमिति। मध्यमबुद्धिना चिन्तितमये।

दोषेषु वर्त्तमानस्य नरस्यात्रैव जन्मनि।
नास्त्येव सुखगन्धोऽपि केवलं दुःखपद्धतिः॥
स हि दुःखभाराक्रान्तस्तावता नैव मुच्यते।
आक्रोशदानतस्तस्य लोकोऽन्यद्वैरिकायते॥
एकं स दुःखैर्निर्दग्धो द्वितीयं निन्दितो जनैः।
गण्डस्योपरि संजातः स्फोटो बालस्य दुर्मतेः॥
जनानां करुणास्थानं जातोऽहं बालमीलकात्।
कलितस्तादृशः प्रायः कैश्चित्तत्त्वविचारकैः॥
दुःखाकरः सतां निन्द्यो ममेदानीं विजानतः।
तस्मान्न युक्तः संसर्गो बालेन सह पापिना॥
गुणेषु वर्त्तमानस्य नरस्यात्रैव जन्मनि।
जायन्ते संपदः सर्वा यथास्यैव मनीषिणः॥
यथा ह्यकलङ्कः सुखी श्लाघनीयो विपश्चिताम्।
बालस्पर्शनसंसर्गभीरुत्वादेष वर्त्तते॥
तथापि लोका दोषेषु सततं विहितादराः।
गुणेषु शिथिलोत्साहा वर्त्तन्ते पापकर्मणा॥
तदेवं गुणदोषाणां विशेषं पश्यता मया।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणेषु यत्नः कर्त्तव्यो य आदिष्टो मनीषिणा ॥
ततश्चैवं विचिन्त्यासौ भाषते तं मनीषिणम् ।
न शक्यमधुना लोके प्रकाशमटितुं मया ॥
लोका मां प्रश्नयिष्यन्ति बालवृत्तान्तमञ्जसा ।
अतिलज्जाकरं तं च नाहमाख्यातुमुत्सहे ॥
अन्यच्च दुर्जना लोकाः श्रुत्वा मेऽन्तःकदर्थनाम् ।
तदीयां नितरां तुष्टा हसिष्यन्ति विशेषतः ॥
तस्माद्गातमर्ममात्रैव स्थातुं सद्मनि युज्यते ।
जनस्य विस्मरत्येतद्यावद्बालविचेष्टितम् ॥
मनीषिणोक्तं यत्तुभ्यं रोचते तद्विधीयताम् ।
केवलं पापमित्रीयः संपर्को वार्यते मया ॥

ततः क्वचिदपि बहिरनिर्गच्छंस्तत्रैव सदने स्थितो मध्यमबुद्धिः गतो मनीषी स्वस्थानम्। इतश्च बालशरीरादाविर्भूतः स्पर्शनोऽकुशलमाला च। अकुशलमालयाभिहितं साधु पुत्रक साधु यन्मत्तो जातोऽनुतिष्ठति तदनुष्ठितं भवता यतो निराकृतस्त्वयायमलीकवाचालो मनीषी। स्पर्शनेनाभिहितम्। अम्ब युक्तमेवेदृशमीदृशपुरुषाणामनुष्ठानं दर्शितः खल्वेवमाचरता प्रियमित्रेण मयि निर्भरोऽनुरागः। अथवा किमनेन निर्घटितेनेदानीं त्रयाणामप्यस्माकं भावसारं समस्तदुःखसुखता। ये तु इष्टदर्थसाधनप्रवृत्तानामप्यन्तराले विघ्ना भवन्ति तान् के गणयन्ति। बालः प्राह। वयमप्येतदेव ब्रूमः केवलमेतत्स मनीषी न जानाति। स्पर्शनेनाभिहितम्। किं तव तेन सुखविघ्नहेतुरसौ पापकर्मा भवतः। अयं जनोऽम्बाच केवलं ते सुखकारणम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बालः प्राह। कोऽत्र विकल्पो निःसन्दिग्धमिदं ततः कृतस्ताभ्यां योगशक्तिव्यापारपूर्वको भूयस्तदीयशरीरे प्रवेशः प्रादुर्भूतं मदनकन्दलीगोचरं भृशतरमौत्सुक्यं प्रवृत्तोऽन्तस्तापः प्रवृत्ता जृम्भिका पतितः शयनीये तत्र चानवरतमुद्वर्त्तमानेनाङ्गेन तथा विचेष्टमानो दृष्टोऽसौ मध्यमबुद्धिना समुत्पन्ना करुणा तथापि मनीषिवचनमनुस्मरता न पृष्टो वार्त्तामपि बालस्तेन। अत्रान्तरेऽस्तं गतो दिनकरः। ततः प्रथमप्रदोष एव निर्गतो बालः। अवधीरितो मध्यमबुद्धिना प्राप्तः शत्रुमर्दनराजकुलं प्रविष्टोऽभ्यन्तरे दृष्टं वासभवनं चलितस्तदभिमुखं ततः प्रचुरतया लोकस्य सान्धकारतया प्रदोषस्य व्यग्रतया प्राहारिकाणां कथंचिदलक्षित एवासौ प्रविष्टो वासभवनं विलोकितस्तन्मध्यभागः प्रकाशितो मणिप्रदीपैः सनाथो महार्हशयनेन। इतश्च तस्मिन्नवसरे सा मदनकन्दली तत्रस्थैव वासभवनस्यादूरवर्त्तिन्यां प्रसाधनशालिकायामात्मानं चर्चयन्ती तिष्ठति। ततस्तच्छून्यमवलोक्य स बालो बालतयैवारूढः शय्यायाम्। आः कोमलेति भावनया समुद्भूतो हर्षः चिन्तमुच्छीर्षकप्रावरणं किल तिरस्कीनो भविष्यति। यावदिहिताशेषप्रदोषकर्त्तव्यो विसर्जितास्थानिकलोकः कतिचिदाप्तपुरुषपरिकरो ज्वलत्प्रदीपदर्शितमार्गः समागतः शत्रुमर्दनस्तद्द्वारदेशे दृष्टः प्रविशन् बालेन ततोऽतितेजस्वितया शत्रुमर्दनस्य सत्त्वविकलतया हृदयस्य साध्वसहेतुत्वादकार्याचरणस्य प्रतिकूलतया कर्मविलासस्य स्वफलदानोन्मुखतयाकुशलमालायाः स्वविपाकदर्शनतया स्पर्शनस्य भयोत्कर्षेन वेपमानगात्रयष्टिर्निपतितो बालो भूतले ततोऽत्युच्चतया पर्यङ्कस्य कणकणतया मणिकुट्टिमस्य शिथि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वनिःसृष्टतया शरीरस्य समुत्थितो महानास्फोटरवः । किमेतदिति तूर्णतरं प्रविष्टो राजा दृष्टस्तेन कथमयमिह प्रविष्ट इति समुत्पन्नो मनसि वितर्कः । दृष्टमुच्छीर्षके प्रावरणं लचितं शय्यारोहणं दुष्टोऽयमिति संजातो निश्चयो मत्कलत्राभिलाषुकोऽयमिति च समुत्पन्नः क्रोधो विज्ञातं तस्य दैन्यं तथाप्यतिदुरात्मा खल्वयमपनयाम्यस्य दुर्विनयमिति बुद्ध्या दत्तो बालपृष्ठे निजचरणो राज्ञा आमोटितं पश्चान्मुखं भुजयुगलं बद्धो रारट्यमानस्तत्प्रावरणेनैव आहूतो विभीषणः अभिहितश्चासौ अरे एष पुरुषाधमो भवताद्यैव राजाजिरे यथाहमाकर्णयाम्यस्य करुणध्वनितं तथा समस्तरजनीं कदर्थनीयो विभीषणेनाभिहितं यदाज्ञापयति देवः । ततः समाकृष्टस्तेन गृहाच्चारट्यमानो बालो नीतोऽभ्यर्णराजप्राङ्गणे बद्धो वज्रकण्टकाकुले लोहस्तंभे त्रोटितः कशाघातैः सिक्तोऽग्निवर्णतैलबिन्दुभिः प्रवेशिता अङ्गुल्यादिष्वयःशलाकाः ततश्चैवंविधेषु नरकाकारेषु दुःखेषु विभीषणेनोदीर्यमाणेषु क्रन्दतो बालस्य लंघिता रजनी तदाक्रन्दरवेण श्रवणपरंपरया च किमेतदिति कुतूहलेन प्रभाते समागतं राजकुले नगरं दृष्टो बालः स एवायं पापिष्ठोऽद्यापि जीवतीत्यादिः प्रवृत्तः परस्परं नागरकाणां बहुविधस्तदाक्रोशजल्पः । तमाकर्णयतः शतगुणीभूतं तत्तस्य दुःखं कथितो नागरिकेभ्यो विभीषणेन रात्रिव्यतिकरः ततोऽहो धृष्टतास्येति गाढतरं प्रद्विष्टाः सर्वे विज्ञापितो महत्तमै राजा । यदुत यो देवपादानामेवमयमपथ्यकारी स तथा क्रियतां यथान्योऽप्येवं न करोतीति । अस्ति च तस्य राज्ञो भगवदर्हदागमावदातबुद्धिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुबुद्धिर्नामामात्यः केवलं तेन क्वचिदवसरे वरं प्रार्थितो राजा। यदुत हिंस्रकर्मणि नाहं पर्यालोचनीयो भवता प्रतिपन्नश्च स वरो नरपतिना ततः सुबुद्धिं पर्यालोच्यैव दत्तः शत्रुमर्दनेन राजपुरुषाणां नियमो यदुत कदर्थयित्वा बहुप्रकारमेनं नगरापसदं व्यापाद्यतेति। तदाकर्ण्य महाराज्यलाभ इव जातो जनानां प्रमोदातिशयः। ततः समारोपितो रासभे विडम्ब्यमानः शरावमालया समन्ताच्चूर्ण्यमानो यष्टिमुष्टिमहालोष्टप्रहारैं रोरूयमाणो विरसध्वनिना तुद्यमानो मनसि कर्णकटुकैराक्रोशवचनैर्महता कलकलेन समस्तेषु त्रिकचतुष्कचत्वरहट्टमार्गादिषु बंभ्रम्यमाणो विगोपितो बालः। ततो विशालतया नगरस्य प्रचण्डकप्रायत्वात्तस्य भ्रमणेनैवातिक्रान्तं दिनं सन्ध्यायां नीतो वध्यस्थानं उल्लंबितस्तरुशाखायां प्रविष्टो नगरं लोको भवितव्यताविशेषेण तस्य त्रुटितः पाशकः पतितो भूतले गतो मूर्च्छां स्थितो मृतरूपतया लुप्तो वायुना लब्धा चेतना प्रवृत्तो गृहाभिमुखं गन्तुं भूमिकषणेन कूजमानः। अत्रान्तरे अगृहीतसङ्केतयोक्तं हे संसारिजीव तत्र चितिप्रतिष्ठितपुरे प्रथमं भवता वीर्यनिधानभूतः कर्मविलासो नाम राजा निवेदितः। अधुना दशापराधप्रभविष्णुरेष शत्रुमर्दनो निवेद्यते तत्कथमेतदिति। संसारिजीवेनाभिहितं सुग्धे मयापि नन्दिवर्द्धनेन सता पृष्ट एवेदं विदुरस्ततो विदुरेणाभिहितं कुमारकर्मविलासस्त्वान्तरङ्गो राजा शत्रुमर्दनस्तु बहिरङ्गः तेन नास्ति विरोधः। यतो बहिरङ्गाणामेव राज्ञां दशापराधप्रभविष्णुता भवति बहिरङ्गनगरेषु नेतरेषां ते हि केवलं सुन्दरासुन्दरप्रयोजनानि जनानां प्रच्छन्नरूपा एव सन्तः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्ववीर्येण निर्वर्त्तयन्ति। तथा हि। कर्मविलासप्रतिकूलताजनितोऽयं बालस्य परमार्थतः सर्वोऽप्यनर्थः संपन्न इति। ततो मयाभिहितं अपगतोऽधुना मे सन्देहः अग्रतः कथय विदुरेणाभिहितम्। ततः कृच्छ्रेणातिक्रान्ते याममात्रे रजन्याः प्राप्तः स्वसदनं बालः इतश्चाकर्णितः प्रभात एव तदीयवृत्तान्तो मध्यमबुद्धिना। ततो बालस्नेहलेशस्यानुवर्त्तमानतया संजातो मनाग् विषादः चिन्तितमनेन हा किमीदृशं संपन्नं बालस्येति पुनपर्यालोचयतः प्रादुर्भूतोऽस्य मनसि प्रमोदः चिन्तितमनेन पश्यताहो मनीषिवचनकरणाकरणयोरिह लोक एवान्तरम्। तथाहि। तदुपदेशवर्त्तिनो मेऽधुना न संपन्नः क्लेशः नोद्गीर्णमयशः पूर्वं पुनर्विपरीतचारिणो द्वयमप्यासीत् बालस्य पुनरेकान्ततो मनीषिवचनविपरीताचरणनिरतस्य यत्संपद्यते दुःखसंघाता विजृम्भते जगत्ययशःपटहः संजायते मरणं तत्र किमाश्चर्यं तदस्ति ममापि काचिद्धन्यता यया मनीषिवचने बहुमानः संपन्न इति।

तथाहि।

नैवाभव्यो भवत्यत्र सतां वचनकारकः।
पङ्क्तिः कांकटुकेनैव जाता यत्नशतैरपि ॥
एवं भावयतश्चित्ते बालस्नेहं विमुञ्चतः।
प्रमोदपूर्णचित्तस्य लंघितं तस्य तद्दिनम् ॥
ततः समागते बाले लोकाचारानुवर्त्तनम्।
कुर्वता विहितं तेन तस्य संभाषणं किल ॥
पृष्टश्चाशेषवृत्तान्तं विषादगतबुद्धिना।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेनापि कथिता तस्मै बालेनात्मविडम्बना ॥
न शिक्षणस्य योग्योऽयं मत्वा मध्यबुद्धिना ।
ततस्तदनुरोधेन कृतेषत्परिदेवना ॥
ततश्चूर्णितसर्वाङ्गो दुःखविह्वलमानसः ।
तथा राजभयादुग्राद् बालस्तत्रैव संश्रितः ॥
प्रच्छन्नरूपः सततं न निर्गच्छति कुत्रचित् ।
एवं च तिष्ठतोः कालस्तयोर्भूयान् विलंघितः ॥

अथान्यदा निजविलसिताभिधाने जीर्णोद्याने गन्धहस्तीव वरकलभवृन्देन परिकरितः सातिशयगुणवता निजशिष्यवर्गेण प्रवाहः करुणारसस्य संतरणसेतुः संसारसिन्धोः परशुस्तृष्णालतागहनस्य अशनिर्मानपर्वतोद्दलने मूलमुपशमतरोः सागरः सन्तोषामृतस्य तीर्थं सर्वविद्यावताराणां कुलभवनमाचाराणां नाभिः प्रज्ञाचक्रस्य वडवानलो लोभार्णवस्य महामन्त्रः क्रोधभुजङ्गस्य दिवसकरो महामोहान्धकारस्य निकषोपलः शास्त्ररत्नानां दावानलो रागपल्लवदहने अर्गलाबन्धो नरकद्वाराणां देशकः सत्पथानां निधिः सातिशयज्ञानमणीनामायतनं समस्तगुणानां समवसृतस्तत्र पुरे प्रबोधनरपतिर्नामाचार्यः । इतश्च स्पर्शनं प्रतिकूलचारिणमुपलभ्य मनीषिणं प्रादुरभूत्कर्मविलासस्य तस्योपरि खरतरः पक्षपातः । ततोऽसौ शुभसुन्दरीं प्रत्याह प्रिये लक्षयस्येव तावदिदं भवती यथानादिरूढा प्रकृतिरियं मम वर्त्तते । यदुत योऽस्य स्पर्शनस्यानुकूलस्तस्य मया प्रतिकूलेन भाव्यं प्रतिकूलस्य पुनरनुकूलतया वर्त्तितव्यं मम च प्रतिकूलमाचरतः सर्वत्राकुशलमालोपकरणं अनु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कूलं विदधतः पुनर्भवती ममोपकरणं वर्त्तते तदेवं स्थिते स्पर्शनानुकूलचारिणो बालस्य दर्शितो मयाकुशलमालाव्यापारणद्वारेण कश्चिदात्मनः प्रतिकूलताफलविलेशः । अस्य तु मनीषिणः स्पर्शनप्रतिकूलवर्त्तिनो न मयाद्यापि निजानुकूलताफलविशेषो दर्शितो यद्यपि यदिदमस्य स्पर्शने निरभिष्वङ्गतया मृदुशयनसुरतादीन्यनुभवतः संपद्यते सुखम् । यच्चायं समुल्लसितो लोकमध्येऽयशःपटहो न च संपन्नः क्वचिदपायगन्धोऽपि विचरतस्तस्यास्य समस्तस्य व्यतिकरस्याहमेव भवत्यैवोपकरणभूतया कारणं तथापि मयि सप्रसादे नैतावन्मात्रमेवास्य फलमुचितम् । अतिप्रिये विशिष्टतरफलसंपादनार्थमस्य मनीषिणो यत्नं कुरुष्वेति । शुभसुन्दर्युवाच । साध्वार्यपुत्र साधु सुन्दरमभिहितं देवेन स्थितं ममापीदं हृदये योग्य एव मनीषी देवप्रसादानां तदेषानुतिष्ठामि यदाज्ञापितं देवेनेत्यभिधाय व्यापारिता शुभसुन्दर्या योगशक्तिः विहितमन्तर्धानं प्रविष्टा गता मनीषिशरीरे प्रादुर्भूतोऽस्य प्रमोदः । सिक्तमभृतसेकेनास्याशरीरं प्रवृत्ता निजविलसितोद्यानगमनेच्छा प्रस्थितस्तदभिमुखं चिन्तितमनेन कथमेकाकी गच्छामि बहुश्च कालो गृहप्रविष्टस्य तिष्ठतो मध्यमबुद्धेरतीतो विस्मृतोऽधुना लोकस्य बालवृत्तान्तो व्यपगतं तस्य लज्जाकारणम् । अतस्तमपि निजविलसितोद्याने नयामीति विचिन्त्य गतो मनीषी मध्यमबुद्धिसमीपं निवेदितं तस्मै निजाकूतम् । इतश्च कर्मविलासेन तस्यापि जननी सामान्यरूपा तत्फलविपाकसंपत्तये तथैव प्रोत्साहिता सा ह्यकुशलमालाशुभसुन्दर्योः साधारणवीर्या विचित्रफलदायिनी स्वरूपतो वर्त्तते । ततस्तयाधि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्ठितमूर्त्तेर्मध्यमबुद्धेरपि प्रवृत्ता तत्र गमनेच्छा बालस्तु भवताप्यवश्यं गन्तव्यमिति वदता बलामोटिकया प्रवर्त्तितो मध्यमबुद्धिना गतास्त्रयोऽपि निजविलसितोद्याने ।

अथ नानाविधैस्तत्र विलसन्तः कुतूहलैः ।
प्रमोदशेखरं नाम प्राप्तास्ते जिनमन्दिरम् ॥
तच्च मेरुवदुत्तुङ्गं विशालं साधुचित्तवत् ।
देवलोकाधिकं मन्ये सौन्दर्यौदार्ययोगतः ॥
युगादिनाथबिम्बेन श्रीमता तदधिष्ठितम् ।
समन्तादूरप्रोत्तुङ्गप्राकारपरिवेष्टितम् ॥
पुरतो लोकनाथस्य स्तोत्राणि पठतो मुदा ।
तत्र श्रावकलोकस्य ध्वनिमाकर्ण्य पेशलम् ॥
किमेतदिति संचिन्त्य कौतुकाक्षिप्तमानसाः ।
प्रविष्टा जैनसदने ते त्रयोऽपि कुमारकाः ॥
अथ दक्षिणमूर्त्तिस्थो देवाजिरविभूषणः ।
विनीतसाधुलोकस्य मध्यवर्त्ती तपोधनः ॥
जिनेन्द्रगदितं धर्ममकलङ्कं सनातनम् ।
संसारसागरोत्तारमाचक्षाणः सुदेहिनाम् ॥
प्रविशद्भिर्महाभागस्तैर्न्द्रवत्तारकैर्वृतः ।
प्रबोधनरतिर्धीरः स सूरिस्तैर्विलोकितः ॥
भाविभद्रतया जैनं बिम्बं नत्वा मनीषिणा ।
सूरिः शेषमुनीनां च विहितं पादवन्दनम् ॥
ततस्तदनुरोधेन मनाक् संशुद्धबुद्धिना ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवसाधुनमस्कारः कृतो मध्यमबुद्धिना ॥
पापमाहवयस्याभ्यामधिष्ठितशरीरकः ।
बालोऽकल्याणभाङ् नैव कस्यचित्प्रणतिं गतः ॥
किं तु ग्रामेयकाकारं बिभ्राणः स्तब्धमानसः ।
मनीषिमध्यमासन्ने सोऽपि गत्वा व्यवस्थितः ॥
अथ संभाषितास्तेऽपि धर्मलाभपुरःसरम् ।
गुरुणा कलवाक्येन निषण्णास्तत्र भूतले ॥
इतश्च सूरिवृत्तान्तः कथञ्चिल्लोकवार्त्तया ।
मन्त्रिणा जिनभक्तेन श्रुतस्तेन सुबुद्धिना ॥
ततः प्रोत्साहितस्तेन स राजा शत्रुमर्दनः ।
वन्दनार्थं मुनीन्द्रस्य प्रजाम इति भाषिणाम् ॥
विधूतपापमात्मानं वन्दनेन महात्मनाम् ।
साधूनां येऽत्र कुर्वन्ति ते धन्यास्ते मनीषिणः ॥
ततो मदनकन्दल्या सार्द्धमन्तःपुरैस्तथा ।
सुबुद्धिवचनाद्राजा निर्गतो मुनिवन्दकः ॥
ततः सर्वं पुरं तत्र नृपे चलति विस्मितम् ।
सैन्यं च गतमुद्याने कौतुकाकृष्टमानसम् ॥
निपत्य पादयोस्तत्र जिनस्य सबलो नृपः ।
प्रबोधनरतिं भक्त्या ववन्दे हृष्टमानसः ॥
प्रणम्याशेषसाधूंश्च दत्ताशीर्गुरुसाधुभिः ।
निषण्णो भूतले राजा विनयानम्रमस्तकः ॥
सुबुद्धिरपि जैनेन्द्रं पादपद्मकृतानतिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निरूपयति सर्वाणि देवकर्माणि यत्नतः ॥
देवपूजनसद्धूपदीपदानादिपूर्वकम् ।
भक्त्योत्कंठितसर्वाङ्गो भून्यस्तकरजानुकः ॥
दुर्लभं भवकान्तारे जन्तुभिर्जिनवन्दनम् ।
इति भावनया धन्यो निर्मलीभूतमानसः ॥
आनन्दजलपूर्णाक्षः क्षालयन्नात्मकिल्बिषम् ।
तथा भागवते बिम्बे न्यस्तदृष्टिर्विचक्षणः ॥
शक्रस्तवं शनैर्धीरः पठित्वा भक्तिनिर्भरः ।
पञ्चांगप्रणिपातान्ते निषण्णः शुद्धभूतले ॥
परस्परतिरोभूतकरशाखाविनिर्मिताम् ।
कोशाकारकरः कृत्वा योगमुद्रां समाहितः ॥
ततो भुवननाथस्य स्तोत्राणि कलया गिरा ।
स तदानीं पठत्येवं तदर्थार्पितमानसः ॥
नमस्ते जगदानन्द मोक्षमार्गविधायक ।
जिनेन्द्र विदिताशेष भावसद्भावनायक ॥
प्रक्षीणाशेषसंसारविस्तार परमेश्वर ।
नमस्ते वाक्पयातीत त्रिलोकनरशेखर ॥
भवाब्धिपतितानन्तसत्त्वसंतारकारक ।
घोरसंसारकान्तारसार्थवाह नमोऽस्तु ते ॥
अनन्तपरमानन्दपूर्णधामव्यवस्थितम् ।
भवन्तं भक्तितः साक्षात्पश्यतीह जनो जिन ॥
स्तुवतस्तावकं बिम्बमन्यथा कथमीदृशः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रमोदातिशयश्चित्ते जायते भुवनातिग ॥
पापाणुजनितस्तावत्तापः संसारिचेतसाम् ।
यावत्तेषां सदानन्दमध्ये नाथ न वर्त्तसे ॥
येषां पुनर्विधत्ते सा नाथ चित्तेषु देहिनाम् ।
पापाणवः क्षणात्तेषां ध्वंसमायान्ति सर्वथा ॥
ततस्ते द्राविताशेषपापपङ्कतया जनाः ।
सद्भावामृतसंसिक्ता मोदन्ते नाथ सर्वदा ॥
ते वराका न मुष्यन्तां रागादिचरटैः कथम् ।
येषां नाथ भवान्नास्ति तन्निसान्निध्यकारकः ॥
भवन्तमुररीकृत्य नाथ निःशङ्कमानसा ।
शिवं यतिमदादीनां विधाय गल्पादिकाम् ॥
न्यपतिष्यदिदं नाथ जगन्नरककूपके ।
अहिंसाहस्तदानेन यदि त्वं नाधरिष्यथाः ॥
विलीनसकलक्लेशं निर्विकारं मनोहरम् ।
शरीरं पश्यतां नाथ तावकीनमदो वरम् ॥
अनन्तवीर्य सर्वज्ञो वीतरागस्त्वमञ्जसा ।
न भासि यद्भव्यानां तत्तेषां पापजृम्भितम् ॥
रागद्वेषमहामोहसूचकैर्वीतकल्मष ।
हास्यहेतिविलासाक्षमालाद्यैर्हीन ते नमः ॥
अनन्तगुणसङ्कीर्णं कियद्वाच वदिष्यते ।
तावकस्तवने नाथ जडबुद्धिरयं जनः ॥
सद्भावोऽप्यथवा नाथ भवतैवावबुध्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदस्य करुणां कृत्वा विधातव्यो भवे भवे ॥
भवोच्छेदकरी नाथ भक्तिरात्मनि निश्चला ।
संस्तुत्यैवं जगन्नाथमुच्छाय जिनमुद्रया ॥
विधाय वन्दनं भूयः पञ्चाङ्गनमनादिकम् ।
तदन्ते प्रणिधानं च मुक्ता शुक्त्यातिसुन्दरम् ॥
कृत्वा कृतार्थमात्मानं मन्यमानः सुकर्मणा ।
सूरेः पादयुगं सिंचन्नानन्दोदकबिन्दुभिः ॥
वन्दनद्वादशावर्त्तं स ददौ दोषसूदनम् ।
कृतसामयिकोऽशेषसाधूनानम्य भक्तितः ॥
अवाप्तधर्मसाभोऽसौ निषसः शुद्धभूतले ।
पृष्टसूरितनूदन्ते सुबुद्धौ तत्र मन्त्रिणि ॥
अथाचार्या विशेषेण चक्रिरे धर्मदेशनाम् ।
कथितं भवनैर्गुण्यं वर्णिता कर्महेतवः ॥
प्रख्यापितं च निर्वाणं दर्शितं तस्य कारणम् ।
ततश्चामृतसंसेकचारुणा वचसा मुनेः ॥
जातास्ते जन्तवः सर्वे चित्तसन्तापवर्जिताः ।

अत्रान्तरे ।

नखांशुविशदं कृत्वा ललाटे करकुड्मलम् ।
जगाद भारतीसेनां स राजा शत्रुमर्दनः ॥
भगवन्नत्र संसारे नरेण सुखकामिना ।
किमादेयं प्रयत्नेन सर्वसम्पत्तिकारणम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूरिराह ।

आदेयोऽत्र महाराज धर्मः सर्वज्ञभाषितः ।
स एव भगवान् सर्वपुरुषार्थप्रसाधकः ॥
सोऽनन्तसुखसंपूर्णे मोक्षे नयति देहिनाम् ।
अनुषङ्गेण संसारे स हेतुः सुखपद्धतेः ॥

नरपतिरुवाच यद्येवम् ।

कस्मात्सर्वे न कुर्वन्ति तं सर्वसुखसाधनम् ।
धर्मं संसारिणः किं वा क्लिश्यन्ते सुखकाम्यया ॥

सूरिराह ।

सुखाभिलाषः सुकरो दुष्करोऽसौ नृपोत्तम ।
यतो जितेन्द्रियग्रामस्तं साधयति मानवः ॥
अनादिभवकान्तारे प्राप्तानि परमं बलम् ।
दुर्मेधाभिर्न शक्यन्ते जेतुं तानीन्द्रियाणि वै ॥
तेनैव जन्तवो मूढाः सुखमिच्छन्ति केवलम् ।
धर्मं पुनः सुदूरेण त्यजन्ति सुखकारणम् ॥

नरपतिरुवाच ।

येषां जयमशक्तिष्ठाः कर्त्तुं नो पारयन्त्यमी ।
धर्मतः प्रपलायन्ते ततो जीवाः सुखैषिणः ॥
कानि तानीन्द्रियाणीह किंस्वरूपाणि वा मुने ।
कथं वा दुर्जयानीति श्रोतुमिच्छामि तत्त्वतः ॥

मुनिरुवाच ।

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च पञ्चमम् ।
एतानि तानि राजेन्द्र हृषीकाणि प्रचक्षते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्टैः स्पर्शादिभिस्तोषो द्वेषवृद्धिस्तथेतरैः ।
एतत्स्वरूपमेतेषामिन्द्रियाणां नृपोत्तम ॥
दुर्जयानि यथा तानि कथ्यमानं मयाधुना ।
दत्तावधानस्त्वं सर्वमनुश्रुत्यावधारय ॥
अनेकभटसङ्कीर्णे समरे योधयन्ति ये ।
मत्तमातङ्गसंघातमेतैस्तेऽपि विनिर्जिताः ॥
अङ्गुल्यग्रे निधायेदं भुवनं नाटयन्ति ये ।
शक्रादयोऽतिशक्तिष्ठास्तेऽप्यमीभिर्वशीकृताः ॥
हिरण्यगर्भवैकुंठमहेश्वरपुरःसराः ।
एतैर्निराकृताः सन्तः सर्वेऽकिङ्करतां गताः ॥
अधीत्य सर्वशास्त्राणि परमार्थविदो जनाः ।
एभिर्विधुरिताः सन्तश्चेष्टन्ते बालिशा इव ॥
एतानि हि स्ववीर्येण ससुरासुरमानुषम् ।
वराकमिव मन्यन्ते सकलं भुवनत्रयम् ॥
दुर्जयानि ततोऽमूनि हृषीकाणि नराधिप ।
एवं सामान्यतः कृत्वा हृषीकगुणवर्णनम् ॥

ततश्च ।

ज्ञानालोकेन वृत्तान्तं बोधनार्थं मनीषिणः ।
सूरिर्बभाषे सद्दन्तदीधितिच्छुरिताधरः ॥

अथवा महाराज ।

तिष्ठन्तु तावच्छेषाणि हृषीकाणि जगत्त्रये ।
स्पर्शनेन्द्रियमेवैकं समर्थं बत वर्त्तते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतो न शक्यते लोकैर्जेतुमेकैकमप्यदः ।
लीलया जयतीदं तु भुवनं सचराचरम् ॥

नरपतिरुवाच ।

भगवंस्तस्य जेतारो नराः किं सन्ति कुत्रचित् ।
आहोस्विन्नैव विद्यन्ते भुवनेऽपि तथाविधाः ॥

मुनिरुवाच ।

राजन्नहि न विद्यन्ते केवलं विरला जनाः ।
ये चास्य विनिहन्तारस्तत्राकर्णय कारणम् ॥
जघन्यमध्यमोत्कृष्टास्तथोत्कृष्टतमा गुणैः ।
चतुर्विधा भवन्तीह पुरुषा भुवनोदरे ॥
तत्रोत्कृष्टतमास्तावद्यैरिदं स्पर्शनेन्द्रियम् ।
अनादिभवसम्बन्धलालितं पालितं प्रियम् ॥
जैनेन्द्रागमसम्पर्कादिज्ञाय बहुदोषकम् ।
ततः सन्तोषमादाय महासत्त्वैर्निराकृतम् ॥
गृहस्था अपि ते सन्तो ज्ञाततत्त्वा जिनागमे ।
स्पर्शनेन्द्रियलौल्येन नाचरन्ति कुचेष्टितम् ॥
यदा पुनर्विशेषेण तिष्ठन्त्येषां जिनागमः ।
स्पर्शनेन्द्रियसम्बन्धं त्रोटयन्ति तदाखिलम् ॥
यतो दीक्षां समादाय निर्मलीमसमानसाः ।
सन्तोषभावतो धन्या जायन्तेऽत्यन्तनिःस्पृहाः ॥
ततस्ते भवकान्तारनिर्विण्णा वीतकल्मषाः ।
स्पर्शनप्रतिकूलानि सेवन्ते धीरमानसाः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूमौ शयनलोचादिकायक्लेशविधानतः ।
ततः सुखस्पृहां छित्वा जायन्ते ते निराकुलाः ॥
ततः सकलकर्मांशक्लेशविच्छेदभाजनम् ।
भूत्वा ते निर्वृतिं यान्ति निर्जित्य स्पर्शनेन्द्रियम् ॥
तेनोत्कृष्टतमा राजन्निर्दिष्टास्ते विचक्षणैः ।
ये चैवमनुतिष्ठन्ति विरक्तास्ते जगत्त्रये ॥
ततो भागवतं वाक्यमाकर्ण्येदं मनीषिणः ।
अभूच्चेतसि सङ्कल्पस्तदानीं चारुचेतसः ॥
अये भगवता यादृग् वर्णितं स्पर्शनेन्द्रियम् ।
अत्यन्तविषमं लोके स्पर्शनस्तादृशः परम् ॥
यतो बोधप्रभावेन मम पूर्वं निवेदितः ।
यथान्तरङ्गनगरे वास्तव्योऽयं महाबलः ॥
तन्नूनं पुरुषव्याजसंस्थितं स्पर्शनेन्द्रियम् ।
अस्मान् प्रतारयत्येतदन्यथा कथमीदृशम् ॥
ततो भगवतादिष्टा ये चोत्कृष्टतमा नराः ।
कथितः स्पर्शनेनाऽपि भवजन्तुस्तथाविधः ॥
तथाहि मां निराकृत्य सदागमबलेन सः ।
सन्तोषान्निर्वृतिं प्राप्त इति तेन निवेदितम् ॥
तस्मादाख्यच सन्देहः साम्प्रतं पुरुषचयं ।
श्रुत्वाशेषं विजानामि यदच परमाचरम् ॥
अयं हि भगवान् सूरिर्भुवनं सचराचरम् ।
ज्ञानालोकेन जानीते सन्देहदलनः परम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावत्स चिन्तयत्येवं साकूतो विस्मितेक्षणः।
तावल्लक्षितचित्तेन पृष्टो मध्यमबुद्धिना॥

कथम्।

मनीषिन्नितरां चित्ते भावितस्त्वं विलोक्यसे।
किमत्र भवता किञ्चित्तत्त्वमवधारितम्॥
मनीषिणोक्तं किं भ्रातर्भवता किं न लक्षितम्।
किमेवं स्फुटवाक्येन कथयत्यपि सन्मुनौ॥
अनेन हि समादिष्टं यादृशं स्पर्शनेन्द्रियम्।
वयस्यस्तावकस्तादृक् स्पर्शनो नात्र संशयः॥
कथमेतत्ततः पृष्टे पुनर्मध्यमबुद्धिना।
आख्यातं कारणं तेन निःशेषं तु मनीषिणा॥
बालस्तु पापकर्मत्वात्केवलं वीचते दिशः।
अनादरपरस्तत्र हितेऽपि वचने गुरोः॥
अथ राज्ञः समीपस्था पिबन्ती वचनामृतम्।
आचार्योयं विशालाक्षी राज्ञी मदनकन्दली॥
सा दृष्टा तेन बालेन ततोऽस्य हृदि संस्थितम्।
नूनं मे हृदयस्येष्टा सेयं मदनकन्दली॥
यतोऽवदातमेतस्यास्तापनीयसमप्रभम्।
शरीरं दर्शनादेव मृदुतां सूचयत्यलम्॥
रक्तराजीवसच्छायं विभाति चरणद्वयम्।
अलक्षितसिराजालं कूर्मोन्नतमनुत्तमम्॥
बिभर्ति तोरणाकारं भवने साकरध्वजे।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जंघायुग्मं स्वसौन्दर्यादेतस्यास्तेन राजते ॥
मेखलायाः कलापेन बद्धमन्मथवारणम् ।
नितम्बबिम्बमेतस्या विशालमनुतायते ॥
भारेणैव वशीभूतो विराजितवलित्रयः ॥
एतस्या राजते मध्यो रोमराजिविभूषणः ॥
गंभीरा सज्जनस्येव हृदयं सुमनोहरा ।
राजते नाभिरेतस्याः सत्कामरसकूपिका ॥
वहत्येषा स्तनौ वृत्तौ पीवरौ कुंभविभ्रमौ ।
उत्तुङ्गकठिनौ चारू हृदयेन पयोधरौ ॥
अन्यच्च धारयत्येषा सुकुमारं मनोहरम् ।
पुण्यप्राग्भारसम्प्राप्यं रम्यं बाहुलताद्वयम् ॥
कराभ्यां निर्जितौ मन्ये नूतनौ रागसुन्दरौ ।
एतस्याश्चारुरूपाभ्यां रक्ताशोकस्य पल्लवौ ॥
दधत्यां पारिमाण्डल्यं कन्धरायां सुवेधसा ।
कृतं रेखात्रयं मन्ये त्रिलोकजयसूचकम् ॥
अधरो विद्रुमच्छेदसन्निभो भाति पेशलः ।
राजेते विलसद्दीप्ती कपोलौ कोमलामलौ ॥
ये कुन्दकलिकाकारा विलसत्किरणोत्कराः ।
एतस्या वदने दन्ता भान्ति ते भुवनत्रये ॥
सितासितं सुविस्तीर्णं तारराजिविराजितम् ।
पक्ष्मलं जनितानन्दमेतस्या लोचनद्वयम् ॥
उत्तुङ्गो नासिकावंशो भूषते दीर्घपक्ष्मले ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्या ललाटफलकैः कलितं बत राजते ॥
अनुरूपं करोमीति नूनं जातः प्रजापतेः ।
बहुमानो निजे चित्ते कृत्वास्याः श्रवणद्वयम् ॥
मालतीकुसुमामोदमोदितालिकुलाकुलः ।
अस्याः सुस्निग्धकुटिलः केशपाशो विराजते ॥
एतस्या मन्मथोल्लापानाकर्ण्य श्रुतिपेशलान् ।
मन्ये स्वविस्वरत्वेन लज्जिता किल कोकिला ॥
उच्चित्योच्चित्य यत्सारमेतस्या वरपुद्गलैः ।
धात्रा विनिर्मितं रूपमन्यथा कथमीदृशम् ॥
अतोऽस्यास्तादृशः स्पर्शो युक्त एव न संशयः ।
न जात्वमृतकुण्डेषु कटुत्वमवतिष्ठते ॥
एषाप्यभिलषत्येव मां यतोऽर्धनिरीक्षितैः ।
निरीक्षतेऽतिलोलाक्षी स्निग्धदृष्ट्या मुहुर्मुहुः ॥
एवंविधविपर्यासविकल्पाकुलमानसः ।
स बालोऽलीकसौभाग्यगर्वितो मूढतां गतः ॥

सूरिरुवाच ।

तदेवं कथितास्तावत्सर्वोत्कृष्टा मया नराः ॥
इदानीमुत्कृष्टानां यत्स्वरूपं तदुच्यते ॥

एवं च वदति भगवति सूरौ ।

चारुकं सूरिणा चाह परिचिन्त्य मनीषिणा ।
श्रोतव्यं भवताऽपीदं मध्यबुद्धिः प्रचोदितः ॥

सूरिरुवाच ।

For Private And Personal Use Only

उत्कृष्टास्ते नरा ज्ञेया यैरिदं स्पर्शनेन्द्रियम् ।
अवाप्य मानुषं जन्म सद्बुद्ध्यावधारितम् ॥
भाविभद्रतया तेषां परिस्फुरति मानसे ।
न चैतत्सुन्दरं हन्त जीवानां स्पर्शनेन्द्रियम् ॥
ततो बोधप्रभावेण लक्षयन्त्यपि ते नराः ।
कुर्वन्तोऽन्वेषणं तस्य मूलशुद्धिं परिस्फुटाम् ॥
ततो विज्ञाय ते तस्य लोकवञ्चनतां नराः ।
सर्वंच चकिता नैव विश्वसन्ति कदाचन ॥
न चानुकूलचारित्वं भजन्ति विजितस्पृहाः ।
ततस्तज्जनितैर्दोषैर्न युज्यन्ते विचक्षणाः ॥
शरीरस्थितिमात्रार्थमाचरन्तोऽपि तत्प्रियम् ।
तच्च गृद्धेरभावेन भवन्ति सुखभाजनम् ॥
प्राप्नुवन्ति यशः शुभ्रमिह लोकेऽपि ते नराः ।
स्वर्गापवर्गमार्गस्य निकटे तादृशाशयाः ॥
गुरवः केवलं तेषां नाममात्रेण कारणम् ।
मोक्षमार्गे प्रवर्तन्ते स्वत एव हि ते नराः ॥
अन्येषामपि कुर्वन्ति ते सन्मार्गावतारणम् ।
तद्वाक्यं ये प्रवर्तन्ते विज्ञाय गुणकारकम् ॥
ये पुनर्न प्रपद्यन्ते तद्वाक्यं बालिशा जनाः ।
तेषामनादरं कृत्वा ते तिष्ठन्ति निराकुलाः ॥
इत्थमेव भवन्त्येते देवाचार्यतपस्विनाम् ।
पूजासत्कारकरणे रतचित्ता महाधियः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं भाषिणि च भगवति प्रबोधनरतिसूरौ मनीषिणा चिन्तितम्।

यथेदमुत्कृष्टानां श्लाघितं चरितं नृणाम् ।
तथानुभवसिद्धं मे किंचिदात्मनि भासते ॥

मध्यमबुद्धिना चिन्तितम् ।

उत्कृष्टपुंसां यादृशा गुरुणा वर्णिता गुणाः ।
एते गुणाः परं सर्वे घटन्तेऽत्र मनीषिणि ॥

गुरुरुवाच ।

तदेवं तावदुत्कृष्टा वर्णिताः पुरुषा मया ।
अधुना मध्यमानां यत्स्वरूपं तन्निबोधत ॥
मध्यमास्ते नरा ज्ञेया यैरिदं स्पर्शनेन्द्रियम् ।
अवाप्य मानुषं जन्म मध्यबुद्ध्यावधारितम् ॥
स्पर्शनेन्द्रियसम्पाद्ये ते सुखे श्लद्धमानसाः ।
पण्डितैरनुशिष्टाश्च दोलायन्ते स्वचेतसा ॥
चिन्तयन्ति निजे चित्ते ते दोलायितबुद्धयः ।
विचित्ररूपे संसारे किमत्र बत कुर्महे ॥
भोगानेके प्रशंसन्ति रमन्ते सुखनिर्भराः
अन्ये शान्तान्तरात्मानो निन्दति विगतस्पृहाः ॥
तदत्र कतरो मार्गो मादृशामिह युज्यते ।
न लक्षयामोऽन्तश्चित्तं सन्देहमवगाहते ॥
तस्मात्कालविलम्बोऽत्र युक्तोऽस्माकं प्रयोजने ।
नैवैकपक्षनिक्षेपो विधातुमिह युज्यते ॥
एषा च जायते बुद्धिर्यां तेषां कर्मपद्धतिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्संकाशा नृणां यस्माद् बुद्धिः कर्मानुसारिणी ॥
ततस्ते स्पर्शनाद्यस्य मन्यन्ते सुखहेतुताम् ।
अनुकूले च वर्तन्ते किं तु नात्यन्तलोलुपाः ॥
ततो लोकविरुद्धानि नाचरन्ति कदाचन ।
स्पर्शनेन्द्रियलौल्येन नापायान् प्राप्नुवन्त्यतः ॥
विचक्षणोक्तं बुध्यन्ते विशेषं वचनस्य ते ।
अदृष्टदुःखास्तद्वाक्यं केवलं नाचरन्ति भोः ॥
मैत्रीं बालिशलोकेन कुर्वन्ति स्नेहनिर्भराम् ।
लभन्ते तद्विपाकेन रौद्रां दुःखपरंपराम् ॥
अवर्णवादं लोके च प्राप्नुवन्ति न संशयः ।
संसर्गः पापलोकेन सर्वानर्थकरो यतः ॥
यदा पुनः प्रपद्यन्ते विदुषां वचनानि ते ।
आचरन्ति च विज्ञाय तदीयां हितरूपताम् ॥
तदा ते विगताबाधा भवन्ति सुखिनो नराः ।
महापुरुषसम्पर्काल्लभन्ते मार्गमुत्तमम् ॥
पण्डिता इव ते नित्यं गुरुदेवतपस्विनाम् ।
बहुमानपराः सन्तः कुर्वन्त्यर्चनवन्दनम् ॥

तदिदमाचार्यीयं वचनमाकर्ण्य मध्यमबुद्धिना चिन्तितम् ।

य एते सूरिणा प्रोक्ता मध्यमानां गुणागुणाः ।
स्वसंवेदनसंसिद्धास्ते ममापि स्वगोचरे ॥

मनीषिणा चिन्तितम् ।

यदिदं सूरिणादिष्टं वचनैः सुपरिस्फुटैः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चरितं मध्यमानां तन्मद्दीये भ्रातरि स्थितम् ॥

सूरिरुवाच ।

तदेवं कथितास्तावन्मध्यमानां गुणागुणाः ।
जघन्यनरसम्बन्धि स्वरूपमधुनोच्यते ॥
जघन्यास्ते नरा ज्ञेया यैरिदं स्पर्शनेन्द्रियम् ।
अवाप्य मानुषं जन्म बन्धुबुद्ध्यावधारितम् ॥
परारिरूपतामस्य न जानन्त्येव ते स्वयम् ।
परेषामिति रुष्यन्ति विदुषां हितभाषिणाम् ॥
स्पर्शनेन्द्रियसम्पाद्ये पामाकण्डूयनोपमे ।
परमार्थेन दुःखेऽपि सुखलेशेऽपि ग्टध्नवः ॥
स्वर्गोऽयं परमार्थोऽयं मोक्षोऽयं सुखसागरः ।
अस्माभिरिति मन्यन्ते विपर्यासवशं गताः ॥
ततो हार्दं तमस्तेषां प्रविसर्पति सर्वतः ।
विवेकालोकवाह्यास्ते वर्धन्ते रागरश्मयः ॥
गाढतत्पक्षपातत्वात् ध्याध्मीभूतबुद्धयः ।
कुर्वन्तोऽनार्यकार्याणि वार्यन्ते केन ते ततः ॥
धर्मलोकविरुद्धानि निन्दितानि पृथग्जनैः ।
कार्याण्याचरतां लोकः प्रभुभावं प्रपद्यते ॥
कुलं चन्द्रांशुविशदं ते कुर्वन्ति मलीमसम् ।
आत्मीयचरितैः पापाः प्रयान्ति जनवाच्यताम् ॥
अगम्यगमनासक्ता निर्मर्यादा नराधमाः ।
अर्कतूलादपि परं ते जने यान्ति लाघवम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुर्लभः स्त्र्यादिविषयः कथञ्चिदसदाग्रहः।
यदा पुनर्विवर्तेत हृदयेऽतिमहाग्रहः॥
तदा ते यान्ति दुःखानि यास्तु लोके विडम्बनाः।
प्राप्नुवन्ति न शक्यन्ते ता व्यावर्णयितुं गिरा॥
केवलं गदितुं शक्यमियदेव समासतः।
लभन्ते ते नराः सर्वा लोके दुःखविडम्बनाः॥
प्रकृत्यैव भवन्त्येते गुरुदैवतपस्विनाम्।
प्रत्यनीका महापापा निर्भाग्या गुणदूषणाः॥
सन्मार्गपतितं वाक्यमुपदिष्टं हितैषिणा।
केनचिन्न प्रपद्यन्ते ते महामोहदूषिताः॥

ततश्चेदं मुनेर्वाक्य विनिश्चित्य मनीषिणा।
विचिन्तितमिदं चित्ते तथा मध्यमबुद्धिना॥
स्पर्शनेन्द्रियलुब्धानां यदेतदुपवर्णितम्।
नृणां वृत्तं जघन्यानां सूरिभिर्विशदाचरैः॥
तदेतत्सकलं बाले प्रतीतं स्फुटमावयोः।
नाप्रतीतं वदन्त्येते यदि वा वरसूरयः॥
बालेन तु गुरोर्वाक्यं न मनागपि लक्षितम्।
तस्यां मदनकन्दल्यां चिप्तचित्तेन पापिना॥

सूरिरुवाच।

तदेवं भो महाराज जघन्यनरचेष्टितम्।
निवेदितं मया तुभ्यं तच्चेदमभिधीयते॥
एते जघन्या भूयांसो भुवने सन्ति मानवाः।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतरे तु यतः लोकाः सकलेऽपि जगत्त्रये ॥
स्पर्शनेन्द्रियजेतारो विरला भुवने नराः ।
तेनास्माभिरिदं पूर्वं भवद्भ्यः प्रतिपादितम् ॥

नरपतिरुवाच ।

धर्मं यतो न कुर्वन्ति स हेतुः प्रतिपादितः ।
भगवन्नाशितोऽस्माकं भवद्भिः संशयो महान् ॥

अत्रान्तरे तु सुबुद्धिमन्त्रिणाऽभिहितं। भगवन् य एते जघन्यमध्यमोत्कृष्टोत्कृष्टतमरूपतया चतुर्भेदाः पुरुषाः पश्चानुपूर्व्या भगवद्भिः स्वरूपतो व्याख्याताः एते किमेवंस्वरूपाः प्रकृत्यैव भवन्ति आहोस्विदेवंविधस्वरूपजनकमेतेषां किञ्चित्कारणमस्तीति कथयन्तु भगवन्तः। भगवानाह। महामन्त्रिन्नाकर्णय। न तावत्प्राकृतमिदमेतेषां स्वरूपं किं तर्हि कारणजं। तत्र ये तावदुत्कृष्टतमाः पुमांसः प्रतिपादिताः ते केवलमुत्कृष्टेभ्यो निष्पन्नस्वप्रयोजनतया भिद्यन्ते न परमार्थेन। यतस्त एवोत्कृष्टा यदावाप्य मनुष्यभावं विज्ञाय भवस्वरूपमाकलय्य मोक्षमार्गं तदासेवनेन दलयित्वा कर्मजालं निराकृत्य स्पर्शनेन्द्रियं निर्वृतिं प्राप्ता भवन्ति तदोत्कृष्टतमा इत्यभिधीयन्ते। निर्वृतौ च तेषां स्वरूपेणावस्थानं। तामवस्थामपेक्ष्य न किञ्चिज्जनकमस्ति। तेनोत्कृष्टतमानां पुरुषाणां न कश्चिज्जनको जननी वा। एते पुनर्जघन्यमध्यमोत्कृष्टाः पुरुषाः संसारोदरविवरवर्त्तिनः स्वकर्मविचित्रतया जायन्ते। तस्मात्स एव कर्मविलासस्तेषां जनकः। तच्च कर्म त्रिविधं वर्तते। तद्यथा। शुभमकुशलं सामान्यरूपं च। तत्र या कर्मपद्धतिः शुभतया सुन्दरी सा शुभसुन्दरी मनुष्यत्वेनोत्कृष्टानां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जननी। या पुनरकुशलकर्ममाला (सा) जघन्यमनुष्याणां जननी। या पुनः कुशलाकुशलतया सामान्यस्वरूपा कर्मपद्धतिः सा मध्यमनराणां जनयित्री विज्ञेयेति॥ मनीषिणा चिन्तितम्। अये न केवलं गुणैश्चरितेन चैतेऽस्माकमुत्कृष्टमध्यमजघन्याः पुरुषाः समानरूपा भगवद्भिर्व्याख्याताः किं तर्हि जननीजनकव्यतिकरोऽपि अस्माकमेतैः सह तुल्य एव भगवता दर्शितः। तस्मान्नूनमेतद्रूपैरेवास्माभिर्भवितव्यम्। तथाहि। योऽसौ भवजन्तुर्मां निराकृत्य निर्वृतिं प्राप्त इति स्पर्शनेनास्मभ्यं निवेदितो न तस्य तेन जननी जनको वा कश्चिदाख्यातः। तस्मादुत्कृष्टतमोऽसाविति निश्चीयते। अस्माकं पुनस्त्रयाणामपि कर्मविलासो जनकः भगवदादिष्टाभिधाना एव जनन्यः। तस्मादिदमत्रावसीयते यदुत जघन्यो बालो मध्यमो मध्यमबुद्धिः उत्कृष्टोऽहमिति॥ सुबुद्धिनाभिहितं। भगवन्नेतेषामुत्कृष्टतमादीनां पुरुषाणां किं सर्वदावस्थितमेव रूपं परावर्त्तोऽपि भवति। भगवानाह। महामन्त्रिन् उत्कृष्टतमानां तावदवस्थितमेव रूपं न कदाचिदन्यथाभावं ते भजन्ते। इतरेषां पुनरनवस्थितं स्वरूपं यतः कर्मविलासायत्ताः खल्वेते वर्तन्ते। विषमशीलश्चासौ प्रकृत्या कदाचिदुत्कृष्टानपि मध्यमयति जघन्ययति वा मध्यमानपि चोत्कृष्टयति जघन्ययति वा जघन्यानपि मध्यमयति उत्कृष्टयति वा। तस्मादनेन कर्मविलासेन मुक्तानामेवैकरूपता भवति नेतरेषाम्॥ मनीषिणा चिन्तितम्। एतदपि घटत एवास्मद्व्यतिकरे। तथाहि। विषमशील एवास्मज्जनको यतः कथितं तेनैव मे यथा मयि प्रतिकूले यदुपपद्यते तत्सम्पन्नं बालस्येति। ततश्च यो निजतनयस्यापि प्रतिकूलचारितया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवंविधां दुःखपरंपरां संपादयति स कथमन्येषां धनायिष्यति ॥ सुबुद्धिनाभिहितम् भगवन्नुत्कृष्टतमाः पुरुषाः कस्य माहात्म्येन भवन्ति । गुरुराह न कस्यचिदन्यस्य किं तर्हि स्ववीर्येण । सुबुद्धिनाभिहितं । कस्तथाविधवीर्यलाभोपायः । मुनिराह । भागवती भावदीक्षा ॥ मनीषिणा चिन्तितं । अये यद्येवं ततो युज्यते ममोत्कृष्टतमस्य भवितुं । किमनयाशेषविडम्बनया । गृह्णाम्येनां भगवदादिष्टां भागवतीमेव दीक्षामिति ॥ भावतः सञ्जातो मनीषिणश्चरणपरिणामः । मध्यमबुद्धेरप्येवं गुरुमन्त्रिणोः परस्परजल्पमाकर्णयतः सञ्जातश्चरणाभिलाषः । केवलं नाह-मेतावतो नैष्ठिकानुष्ठानस्य क्षम इति विचिन्तितमेनेन । सुबुद्धिनाऽभिहितम् ।

भदन्त योऽयमस्माभिर्गृहिधर्मोऽभिधीयते ।
एष तादृशवीर्यस्य किं भवेत्कारणं न वा ॥

गुरुराह ।

स्यादेष पारंपर्येण तादृशस्यापि कारणम् ।
वीर्यस्य न पुनः साक्षाद्यतो मध्यजनोचितः ॥
उत्कृष्टतां करोत्येष साक्षात्सम्यङ् निषेवितः ।
ततस्तादृशवीर्यस्य पारंपर्येण साधकः ॥
अशेषक्लेशविच्छेदकारिका भवदारिका ।
तावद्भागवती दीक्षा दुर्लभैव सुनिर्मला ॥
किं तु श्रावकधर्मोऽपि भवतानवकारकः ।
अत्यन्तदुर्लभो ज्ञेयो महामात्य भवोदधौ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदेष परमार्थः ।

उत्कृष्टतमतां साक्षाद्वीर्यातिशययोगतः ।
प्रव्रज्या साधयत्युच्चैरेष तु व्यवधानतः ॥
तदाकर्ण्य ततश्चित्ते कृतं मध्यमबुद्धिना ।
युक्तो ममैषोऽनुष्ठातुं गृहिधर्मो जिनोदितः ॥

इतश्चाकुशलमालया स्पर्शनेन च मध्यवर्त्तितया विधुरितचित्तवृत्तेर्बालस्य विवर्धन्ते विपर्यासविकल्पाः । यदुताहो अस्या रूपातिशयः अहो सुकुमारता । अत्यर्थमभिमतोऽहमस्याः यतो विलोकयत्येषा मामर्द्धाक्षिविक्षेपैरेतदङ्गसङ्गसुखामृतास्वादानुभवनेनाधुना मे सफलं भविष्यति जन्मेति ॥ ततश्चैवंविधवितर्कपरंपरापर्याकुलीभूतचेतसस्तस्य विस्मृतमात्मस्वरूपं जातं मदनकन्दलीग्रहणैकतानमन्तःकरणं । ततोऽविचार्य कार्याकार्यमन्ध इव ग्रहगृहीत इव तस्यामेव मदनकन्दल्यां निश्चलविन्यस्तनयनमानसः पश्यत एव तावतो जनसमुदायस्य शून्यपादपातं तदभिमुखं धावति स्म । ततः किमेतदिति उत्थितो जनहाहारवः । प्राप्तोऽसौ मदनकन्दलीसमीपं । ततः सावेगं क एष इति निरीक्षितोऽसौ नरपतिना । लक्षितं दृष्टिविकारेण तदाकूतं । स एवायं पापो बाल इति प्रत्यभिज्ञातोऽनेन । सञ्जातास्य कोपारुणा दृष्टिः कृतं भासुरं वदनं । मुक्तो हुङ्कारः । ततो बालस्यादृष्टविपाकतया प्रादुर्भूतभयातिरेकस्य नष्टो मदनज्वरः प्रत्यागता चेतना समुत्पन्नं दैन्यं । ततः पश्चान्मुखं नष्टुं प्रवृत्तो यावच्छिथिलीभूतानि सन्धिबन्धनानि विलीयते शरीरं भग्नो गतिप्रसरः । तथापि कतिचित्पदानि कथञ्चिद्गत्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकम्पमानसर्वगात्र: पतितोऽसौ भूतले । अत्रान्तरे प्रकटीभूतः स्पर्शनो । निर्गतो भगवद्वग्रहात् । गतो दूरदेशे । स्थितस्तं प्रतीक्षमाणो । विरतः कलकलो । लज्जितौ मनीषिमध्यमबुद्धी बालचरितेन । ततः कोऽस्यापि वराकस्योपरि कोप इति विचिन्त्य शान्तीभूतो राजा । पृष्टोऽनेनाचार्यो । यदुत भगवन्नलौकिकमिदमस्य पुरुषस्य चेष्टितं अतीतमिव विचारणायाः अश्रद्धेयमनुभूतवृत्तान्तानाम् । तथाहि विमलज्ञानालोकेन साक्षाद्भूतसमस्तभुवनवृत्तान्तः पश्यत्येव भगवाननेन यत्पूर्वमाचरितमासीत् यच्चेदानीमध्यवसितं । तथापि ममेदमत्र कौतुकं । यदुत तत्पूर्वकमस्याचरणं कदाचिद्विचित्रतयासत्त्वचरितस्य संभाव्येत । इदमधुनातनं पुनर्महदिन्द्रजालमिव प्रत्यक्षमपि ममाश्रद्धेयं प्रतिभासते । यतो भगवति रागादिविषधरोपशमवैनतेये सन्निहितेऽपि कथमतिक्लिष्टजन्तूनामप्येवंविधोऽध्यवसायः संभवेदिति । भगवताभिहितं । महाराज न कर्त्तव्योऽत्रातिविस्मयो । यतो नास्य पुरुषस्य तपस्विनो दोषोऽयम् । नृपतिरुवाच । तर्हि कस्याऽयं दोषः । भगवानुवाच । दृष्टस्त्वयास्य शरीरान्निर्गत्य योऽयं बहिःस्थितः पुरुषः । नृपतिनाभिहितं । सुष्ठु दृष्टः । भगवानाह । यद्येवं ततो ऽस्यैवायं समस्तोऽपि दोषो । यतोऽस्य वशवर्त्तिनानेन पूर्वकमिदं समस्तमाचरितम् । अनेन हि वशीकृताः पुरुषास्तन्नास्त्येव किञ्चिज्जगति पापं यन्नाचरन्ति । तस्मान्नात्र किञ्चिदलौकिकं विचारातीतमश्रद्धेयं वा भवद्भिः संभावनीयम् । नरपतिरुवाच । यद्येवं ततः किमित्ययं पुरुषोऽमुं शरीरवर्त्तिनमात्मनोऽनर्थहेतुमपि धारयति स्म । भगवानाह । न जानात्येष वराकोऽस्य दुःशीलतां । परमरिपुरपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृहीतोऽयमनेन स्निग्धबन्धुबुद्ध्या । नरपतिरुवाच । किमत्र पुनः कारणं । भगवताऽभिहितं । अस्य शरीरे योगशक्तिद्वारेण कृतानुप्रवेशा अकुशलमाला नाम जननी । साऽत्र कारणम् ॥

किञ्च ।

यदिदमतिदुर्जयमधुनैव स्पर्शनेन्द्रियमस्माभिः प्रतिपादितं तद्रूप एवायमस्य स्पर्शनाभिधानः पापवयस्यो वर्तते । अयं तु जघन्यपुरुषो बालः । इयं च तदभिधानैव अकुशलकर्ममालारूपैव जननी । तदत्र किं न सम्भाव्येत । यच्चोक्तं भगवत्सन्निधानेऽपि कथमेवंविधाध्यवसायप्रादुर्भाव इति तदप्यत एव नाश्चर्यबुद्ध्या ग्राह्यं । यतो द्विभेदं जन्तूनां कर्म । सोपक्रमं निरुपक्रमं च । तत्र सोपक्रममेव महापुरुषसन्निधानादिना क्षयक्षयोपशमभावं प्रतिपद्यते न निरुपक्रमं । तद्वशगाश्च जन्तवस्तत्समीपेऽपि विरूपकर्माचरन्तः केन वार्यन्ते । तथाहि । येषामचिन्त्यपुण्यप्राग्भारवतां तीर्थकृतामिह जगति गन्धहस्तिनामिव विचरतां विहारपवनगन्धादेव क्षुद्राशेषगजकल्पा दुर्भिक्षेतिपरचक्रमारिवैरप्रभृतयः सर्व एवोपद्रवाः समधिकयोजनशतात् दूरत एव भज्यन्ते तेषामपि भगवतां सन्निधाने निरुपक्रमकर्मपाशावपाशिताः क्षुद्रसत्वा न केवलं नोपशाम्यन्ति किं तर्हि तेषामेव भगवतां तीर्थकृतां क्षुद्रोपद्रवकरणे प्रवर्तन्ते । श्रूयन्ते हि तथाविधा भगवतामप्युपसर्गकारिणो गोपसङ्गमकादयः पापकर्माण इति ॥

अन्यच्च ।

तेषामेव भगवतां देवविरचितसमवसरणानामध्यासितसिंहासनचतुष्टयानां मूर्त्तिमात्रदर्शनादेव प्राणिनां किल विलीयन्ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रागादयो विदलति कर्मजालं प्रशाम्यन्ति वैरानुबन्धाः विच्छिद्यन्तेऽलीकस्नेहपाशाः प्रलीयते विपरीताभिनिवेशो। यावता तत्रापि केषांचिदभव्यतया निरुपक्रमकर्मघनपटलतिरस्कृतविवेकदीधितिप्रसराणां वा न केवलं पूर्वोक्तगुणलेशदेशोऽपि न संजायते किं तर्हि प्रादुर्भवन्त्येवंविधा भगवन्तमधिकृत्य कुविकल्पाः। यदुताहो सिद्धमत्यमिन्द्रजालम् अहो अस्य लोकवञ्चनचातुर्यमहो गाढमूढता लोकानां यदेतेनाप्यलीकवाचालेनालजालरचनाचतुरेण प्रतार्यन्त इति॥ तदेवंस्थिते महाराज न किञ्चिदिदमत्यद्भुतं यदनेन पुरुषेण मत्सन्निधानेऽप्येवंविधमध्यवसितं। अयमपि हि निरुपक्रमयानया-कुशलमालया स्वदेहवर्त्तिन्या निजजनन्या प्रेर्यमाणोऽमुं स्पर्शनं सहचरमुररीकृत्यैवं चेष्टते। तस्मात्र भवद्भिर्विस्मयो विधेयः॥ सुबुद्धिनाभिहितं। भदंत न किञ्चिदिदमाश्चर्यं भगवदागमावदातधियामेवंविध एव निरुपक्रमकर्मपरिणामो नात्र सन्देहः। केवलमिदानीमेव भगवत्पादप्रसादादेव देवः खल्वेवंविधपदार्थेषु पुण्यबुद्धिर्भविष्यति। तेनैवं भगवन्तं विज्ञापयति॥ राजा सहर्षः प्राह। चार्वभिहितं सखे चारुरहो तेऽवसरभाषिता। ततो राजैव भगवन्तं प्रत्याह। यथ ाकोऽस्य पुनः पुरुषस्य परिणामो भविष्यति। भगवताभिहितं। इदानीं तावदेष दृष्टयुष्मत्कोपविपाकतया भयातिरेकग्रस्तहृदयो न किञ्चिच्चेतयते। गतेषु पुनरितो युष्मदादिषु प्रत्युपलब्धसंज्ञः सन्नेष भूयो ऽप्यधिष्ठास्यत अनेन स्पर्शनेन। ततो युष्मद्भयादेव कुत्रचिन्निर्देशे यामीत्याकूतेन प्रपलायमानो महता क्लेशेन यास्यत्येष कोल्लाकसन्निवेशे। तत्र च कर्मपूरकाभिधानस्य ग्रामस्य प्रत्यासन्नभूभागे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पथि श्रान्तः पिपासितो दूरत एव द्रक्ष्यति इहत्तडागं। ततः स्नानपानार्थं चलिष्यति तदभिमुखं। इतश्च पूर्वमेवागमिष्यति तत्र चण्डालमिथुनं। ततश्चण्डालस्तटाकतटवर्त्तिषु तरुगहनेषु पतत्रिगणमारणप्रवणः सञ्चाटटिष्यते। चण्डाली पुनर्विजनमिति कृत्वा स्नानार्थमवतरिष्यति तडागं। ततोऽवतीर्णायां तस्यां प्राप्स्यत्येष तस्य तीरं। ततोऽमुमुपलभ्य सा मातङ्गी स्पृश्यपुरुषोऽयं कलहयिष्यति मां सरोवरावतारणापराधमुद्दिश्येति भयेन निमंक्ष्यति सलिले। स्थास्यति पद्मखण्डे लीना। अयमपि मज्जनार्थमवतीर्य्यानाभोगेनैव यास्यति तत्समीपं। भविष्यति तया सार्द्धमाश्लेषो। वेदयिष्यते तदङ्गस्पर्शं। संजनिष्यते तस्योपरि लाम्पट्यमस्य कथयिष्यति सात्मनश्चण्डालभावं। तथापि करिष्यत्येष तस्याः शरीरग्रहणं बलामोटिकया। विधास्यते सा हाहारवं। तमाकर्ण्य धाविष्यति कुपितश्चण्डालो। विलोकयिष्यत्येनं तथावस्थितं। प्रज्वलिष्यति नितरां कोपानलेन। संधास्यति कोदण्डे शिलीमुखं। मारयिष्यति च अरे रे दुरात्मन्नधमपुरुष पुरुषो भवेत्याहूय स चण्डालः कम्पमानमेनमेकप्रहारेण। प्रहरिष्यति स च तं। तदाध्यासितो रौद्रध्यानेनेति मृत्वा च यास्यति नरकेषु। तेभ्योऽप्युद्वृत्तस्ततः कुयोनिषु पुनर्नरकेष्वेवाऽनन्तवारा। एवं दुःखपरम्परया स्थास्यत्यनन्तमपि कालं पतितः संसारचक्रे। पर्यासमीदृश्या दारुणतया॥ सुबुद्धिनाभिहितं। भदन्त किमेते स्पर्शनाकुशलमाले अस्यैव पुरुषस्य प्रभवतः आहोस्विदन्येषां प्राणिनां। भगवानाह। महामात्य केवलमत्र पुरुषेऽभिव्यक्तरूपे खल्वेते परमार्थतः सर्वेषां सकर्-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संसारिप्राणिनां प्रभवत एव । यतो योगिनीयमकुशलमाला योगेश्वरश्चायं स्पर्शनो । योगिनां च भवत्येवेदृशी शक्तिः यया क्वचिदभिव्यक्तरूपता क्वचिदनाविर्भूता वर्तते । नृपतिनाभिहितम् । भगवन्ननयोः किमस्मद्गोचरोऽप्यस्ति प्रभावो । भगवानाह बाढमस्ति ॥ ततो राजा मन्त्रिणं प्रत्याह । सखे पापयोरनयोरमर्दितयोः कीदृशी ममाद्यापि शत्रुमर्दनता । ततो न युक्तं यद्यपि भगवत्स-मीपस्थैरेवंविधं जल्पितुं तथापि दुष्टनिग्रहो राज्ञां धर्म इति कृत्वेदमभिधीयते । तदाकर्णयत्वार्यः । सुबुद्धिनाभिहितं । समादि-शतु देवो । राज्ञाभिहितमादिष्टमेतत्तावद्भगवता यथैते स्पर्शना-कुशलमाले अनेन पुरुषेण सह यास्यतः । ततो नेदानीं तावदेते वधमर्हतः । केवलं समाज्ञापय त्वमेते । यथा मद्विषयान्निर्गत्य युवाभ्यां दूरतोऽपि दूरं गन्तव्यं । मृतेऽप्यस्मिन् पुरुषे नास्माकीन-विषये प्रवेष्टव्यमितरथा युवयोरस्माभिः शारीरो दण्डः करिष्यते । अथैवमप्यादिष्टे पुनरेते अस्मद्विषये प्रविशेतां ततो भवता निर्विचारं लोहयन्त्रेण पीडनीये । एवमतिदुष्टयोरारटतोरप्यनयोरुपरि नेषदपि दया विधेया ॥ सुबुद्धिना चिन्तितं । अहो देवस्या-नयोरुपर्यावेगातिशयः । यतोऽस्य तद्वशेन विस्मृतं तदपि हिंस्र-कर्मणि न भवन्तं योच्य इति मद्गोचरं वरप्रदानं । भवतु तथापी-दमेव प्रतिबोधकारणं भगवन्तः कल्पयिष्यन्ति । मम त्वाज्ञाप्रति-पत्तिरेव ज्यायसीति विचिन्त्याभिहितमनेन । यदाज्ञापयति देवः ॥ ततः प्रपन्नोऽसौ तयोराज्ञापनार्थं सूरिणाभिहितं । महाराजा-लमनयोरेवं ज्ञापनेन । न खल्वेतयोरयमुन्मूलनोपायो । यतोऽन्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रङ्गलोकजातीये एते स्पर्शनाकुशलमाले । अन्तरङ्गलोकेषु च न प्रभवन्ति लोहयन्त्रादीनि । अगम्यरूपा हि ते बाह्यशस्त्राणां ॥ नृपतिरुवाच । भदन्त कस्तह्यनयोरन्यो निर्दलनोपायो भविष्यति । भगवताभिहितं । अप्रमादाभिधानमन्तरङ्गमेव यन्त्रमनयोर्निर्दलनोपायः । तद्धेते साधवोऽनयोरेव निष्पेषणार्थमहर्निशं वाहयन्ति । नृपतिरुवाच । कानि पुनस्तस्याप्रमादाभिधानस्य यन्त्रस्योपकरणानि । भगवानाह । यान्येत एव साधवः प्रतिक्षणमनुशीलयन्ति । नृपतिरुवाच । कथं । भगवतोक्तं । समाकर्णय यावज्जीवमेते नाचरन्ति । तनीयसीमपि परपीडां । न भाषन्ते सूक्ष्ममप्यलीकवचनं । न गृह्णन्ति दन्तशोधनमात्रमप्यदत्तं । धारयन्ति नवगुप्तिसनाथं ब्रह्मचर्यं । वर्जयन्ति निःशेषतया परिग्रहं । न विदधते धर्मोपकरणशरीरयोरपि ममत्वबुद्धिं नासेवन्ते रजन्यां चतुर्भेदमप्याहारजातं । आददते प्रवचनोपवर्णितं समस्तोपधिविशुद्धं संयमयात्रामात्रसिद्धये निरवद्यमाहारादिकं । वर्तन्ते समितिगुप्तपरिपूरितेनाचरणेन । पराक्रमन्ते विविधाभिग्रहकरणेन । परिहरन्त्यकल्याणमित्रयोगं । दर्शयन्ति सतामात्मभावं । न लंघयन्ति निजामुचितस्थितिं । नापेक्षन्ते लोकमार्गं । मानयन्ति गुरुसंहतिं । चेष्टन्ते तत्तन्त्रतया । आकर्णयन्ति भगवदागमं भावयतिमहायत्नेन । अवलम्बते द्रव्यापदादिषु धैर्यं । पर्यालोचयन्त्यागमिनमपायं । यतन्ते प्रतिक्षणमसपत्नयोगेषु । लक्षयन्ति चित्तविस्रोतसिकां । प्रतिविदधते चानागतमेव तस्याः प्रतिविधानं । निर्मलयन्ति सततमसङ्गताभ्यासरततया मानसं । अभ्यस्यन्ति योगमार्गं । स्थापयन्ति चेतसि परमात्मानं । निबध्नन्ति तत्र धारणां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परित्यजन्ति बहिर्विक्षेपं। कुर्वन्ति तत्प्रत्ययैकतानमन्तःकरणम् । यतन्ते योगसिद्धौ । आपूरयन्ति शुक्लध्यानं। पश्यन्ति देहेन्द्रियादिविविक्तमात्मानं । लभन्ते परमसमाधिं। भवन्ति शरीरिणोऽपि सन्तो मुक्तिसुखभाजनमिति । तदेवमेते महाराजमुनयोऽमूनि परपीडावर्जनादीनि मुक्तिसुखभाजनत्वपर्यवसानानि तस्याप्रमादनाम्नो यन्त्रस्योपकरणानि प्रतिक्षणमनुशीलयन्ति । ततोऽमूभिरनुशीलितैरत्यर्थं तद्दृढीभवति यन्त्रं। तदा भूतं च तदनयोः स्पर्शनाकुशलमालयोरपरेषामप्येवंजातीयानामन्तरङ्गभूतानां दुष्टलोकानां निष्पीडने क्षमं संपद्यते । तेन च निःपीडितास्तेऽन्तरङ्गलोका न पुनः प्रादुर्भवन्ति । ततो महाराज यद्येतन्निःपीडनाभिलाषोऽस्ति भवतस्तदिदमप्रमादयन्त्रं स्वचेतसि निधाय दृढवीर्ययष्ट्यावष्टभ्य खल्वेते निष्पीडनीये स्वत एव । न मन्त्रिणोऽप्यादेशो देयः । न खलु परेण निष्पीडिते अप्येते परमार्थतो निष्पीडिते भवतः ॥

एवं भगवति नृपतिगोचरमुपदेशं ददाने मनीषिणः कर्मेन्धनदाही शुभपरिणामानलो गतोऽभिवृद्धिं भगवद्वचनेन । केवलं पूर्वोत्तरवाक्ययोर्विषयविभागमनवधारयन् मनाक् ससन्देह इव विरचितकरमुकुलः स भगवन्तं प्रत्याह । भदन्त यासौ भगवद्भिर्भागवती भावदीक्षा वीर्योत्कर्षलाभहेतुतया पुरुषस्योत्कृष्टतमलं साधयतीति प्राक्प्रतिपादिता यच्चेदमिदानीं दुष्टान्तरङ्गलोकनिष्पीडनक्षमं सवीर्ययष्टिकमप्रमादयन्त्रं प्रतिपाद्यते अनयोः परस्परं कियान् विशेषः । भगवताभिहितं । भद्र न कियानपि विशेषः । केवलमनयोः शब्दो भिद्येत नार्थः । यतोऽप्रमादयन्त्रमेव परमार्थतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भागवती भावदीचेत्यभिधीयते । मनीषिणाभिहितं । ततो दीयतां भगवता सा भागवती भावदीचा यद्युचितोऽहं तस्याः । भगवानाह । बाढमुचितः सुष्ठु दीयते ॥ नृपतिनाभिहितं । भदन्त ममानेकसमरसंघट्टनिर्व्यूढसाहसस्यापीदमप्रमादयन्त्रं युष्मद्वचनतः श्रूयमाणमपि दुरनुष्ठेयतया मनसः प्रकम्पमुत्पादयत्येष पुनः कः कुतस्त्यो महात्मा येनेदं सहर्षेण महाराज्यमिव जिगीषुणाभ्युपगतमिति । भगवताभिहितं । महाराज मनीषिनामायमत्रैव चितिप्रतिष्ठिते वास्तव्यः । राज्ञा चिन्तितमये यदायं पापः पुरुषो मया व्यापादयितुमादिष्टस्तदा लोकैः श्लाघ्यमानः श्रुत एवासीन्मनीषी । यदुत रे एकस्मादपि पितुर्जातयोः पश्यतानयोरियान् विशेषः । अस्येदं विचेष्टितं स च तथाभूतो मनीषी महात्मेति । तदेष एव मनीषी प्रायो भविष्यति । अथवा भगवन्तमेव विशेषतः पृच्छामीति विचिन्त्याभिहितमनेन । भदन्त कौ पुनरस्यात्र नगरे मातापितरौ का वा ज्ञातय इति । भगवानाह । अस्यैव चितिप्रतिष्ठितस्य भोक्ता कर्मविलासो महानरेन्द्रः । सोऽस्य जनकस्तस्यैवायमहिषी शुभसुन्दरी नाम देवी सा जननी । तस्यैवेयमकुशलमाला भार्या । अयं च पुरुषो बालाभिधानः सुत इति । तथा योऽयं मनीषिणः पार्श्ववर्ती पुरुषः सोऽपि तस्यैव सामान्यरूपाख्या देव्यास्तनयो मध्यमबुद्धिरभिधीयते । एतावदेवात्रेदं कुटुम्बकं । शेषज्ञातयस्तु देशान्तरेष्वतः किं तद्वार्त्तया । नृपतिराह । किमस्य नगरस्य कर्मविलासो भोक्ता न पुनरहं । भगवानाह । बाढं । राजोवाच । कथं भगवानाह । समाकर्णय ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतस्तदाज्ञां सर्वेऽपि भीतकम्पितमानसाः ।
एते नागरिका नैव लंघयन्ति कदाचन ॥
तथापि राज्यहरणे तद्दाने वा यथेच्छया ।
शक्तोऽसौ न तथा तेऽत्र राजन्नाज्ञा प्रकाशते ॥
परमार्थेन तेनासौ भोक्तास्येत्यभिधीयते ।
यतः प्रभुत्वमाज्ञायां प्रभूणां किल गीयते ॥

नरपतिरुवाच ।

यद्येवं भगवन्नेष कस्मान्नेहोपलभ्यते ।
सूरिणाभिहितं राजन् समाकर्णय कारणम् ॥
यतः कर्मविलासोऽयमन्तरङ्गो महानृपः ।
अतो न दर्शनं याति सर्वदैव भवादृशाम् ॥
अन्तरङ्गा हि ये लोकास्तेषां प्रकृतिरीदृशी ।
स्थिताः प्रच्छन्नरूपेण सर्वकार्याणि कुर्वते ॥
केवलं बुद्धिदृष्ट्यैव धीराः पश्यन्ति तान् सदा ।
आविर्भूता इवाभान्ति अन्येषामपि तत्पुरः ॥
न वाव भावना कार्या भवत्यत्र प्रयोजने ।
न केवलं यतोऽनेन भवानेव पराजितः ॥
किं तु प्रायेण सर्वेऽपि संसारोदरवर्त्तिनः ।
स्ववीर्येण विनिर्जित्य प्रभवोऽपि वशीकृताः ॥
ततो गृहीततत्त्वेन राजा प्रोक्तः सुबुद्धिना ।
देव ज्ञातो मयाप्येष राजा योऽवर्णि सूरिणा ॥
देवाय कथयिष्यामि रूपमस्य परिस्फुटम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहमेव भदन्तैस्तु सर्वमेव निवेदितम् ॥

दूतश्च।

विज्ञायावसरं तेन पूर्वं संजातबुद्धिना।
अथानतशिरस्केन प्रोक्तं मध्यमबुद्धिना ॥
योऽसौ भगवतादिष्टः संसारतनुताकरः।
गृहिधर्मः स मे नाथ दीयतामुचितो यदि ॥

गुरुरुवाच।

शुत्वा भागवतीं दीक्षां न कर्त्तुं शक्नुवन्ति ये।
तेषां गृहस्थधर्मोऽसौ युक्त एव भवादृशाम् ॥

नृपतिरुवाच।

भदन्त किंस्वरूपोऽयं गृहिधर्मोऽभिधीयते।
सूरिराह महाराज समाकर्णय कथ्यते ॥

ततो भगवता वर्णितं परमपदकल्याणपादपनिरुपहतबीजं सम्यग्दर्शनं। प्रतिपादितानि संसारतरुकन्दच्छेदतयाचिरेण स्वर्गापवर्गमार्गसंसर्गकारीण्यणुव्रतगुणव्रतशिक्षापदानि। ततः सञ्जाततदावरणीयकर्मक्षयोपशमतया भावतः प्रादुर्भूतसम्यग्दर्शनदेशविरतिपरिणामेन शक्योऽयमस्मादृशामप्यनुष्ठातुं गृहस्थधर्म इति संचिन्त्य नरपतिनाभिहितं। भदन्त क्रियतामेतद्दानेनास्माकमप्यनुग्रहः। भगवानाह। सुष्ठु क्रियते। ततो दत्तस्तयोर्द्वयोरपि विधिना गृहिधर्मो भगवता मनीषिदीक्षादानार्थं पुनरभ्युद्यते भगवति भगवच्चरणयोर्निपत्य नरपतिरुवाच। भदन्त गृहीतैवानेन महात्मना भगवतो भागवती दीक्षेति। कृतकृत्य एवायमधुना वर्त्तते। तथापि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वयमेनं मनीषिणमुद्दिश्य किञ्चित्सन्तोषानुरूपमाचरितुमिच्छाम-स्तदनुजानातु भगवानिति। तदाकर्ण्य स्थिता भगवन्तस्तूष्णींभावेन। सुबुद्धिनाभिहितं। देव न पृच्छ्यन्ते द्रव्यस्तवप्रवृत्तिकाले भगवन्तः। अनधिकारो ह्यत्र भगवतां। युक्त एव यथोचितः स्वयमेव द्रव्यस्तवः कर्त्तुं युष्मादृशां। केवलमेतेऽपि विहितं तमनुमोदन्ते एव द्रव्यस्तवं। ददति च तद्गोचरं शेषकालमुपदेशं। यथा कर्तव्योदारपूजा भगवतां। न खलु वित्तस्यान्यच्छुभतरं स्थानमित्यादिवचनसन्दर्भेण। तस्मात्त्वत एव कुरुत यथोचितं यूयं। केवलमभ्यर्थयामः काल-प्रतीक्षणं प्रति मनीषिणं। नृपतिरवोचदेवं कुर्मः। ततोऽभ्यर्थितः सवङ्गमानं राजमन्त्रिभ्यां मनीषी। चिन्तितमनेन। न युक्तः कालविलम्बो धर्मप्रयोजने। तथापि महापुरुषप्रणयभङ्गोऽपि सुदुष्कर इति मन्यमानेन प्रतिपन्नं तत्समीहितम्।

ततस्त्वरयता तेन नरनाथेन तोषतः।
व्यापारिता महायोच्चैः सर्वे मन्त्रिमहत्तमाः॥
ततस्तैः क्षणमात्रेण तत्सर्वं जिनमन्दिरम्।
विचित्रवस्तुविस्तारैर्विहितं विगतातपम्॥
कुरङ्गनाभिकाश्मीरमलयोद्भवरूपया।
कर्पूरोन्मिश्रया गार्या तदधस्तादिलेपितम्॥
तथालिकुलमङ्गीतैः पञ्चवर्णैर्मनोहरैः।
आजानूत्सेधिभिः पुष्पैः सर्वतः परिपूरितम्॥
सौवर्णस्तंभविन्यस्तमणिदर्पणराजितम्।
दिव्यवस्त्रकृतोल्लोचं बद्धमुक्तावचूलकम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नष्टान्धकारसम्बन्धं रत्नोद्योतैः सुनिर्मलैः ।
विध्वस्ताशेषदुर्गन्धं सत्कृष्णागरुधूपतः ॥
देवलोकाधिकामोदं पटवासैर्विसर्पिभिः ।
लसत्केतकसंघातगन्धेन भुवनातिगम् ॥
लसद्विलासिनीलोकप्रारब्धस्नानसाधनम् ।
एवं विधाय तत्तस्य प्रस्तुतं देवपूजनम् ॥

अत्रान्तरे ।

पारिजातकमन्दारनमेरुहरिचन्दनैः ।
सन्तानकैश्च देवौघास्तथान्यैर्जलजोत्तरैः ॥
पुष्पैर्भृत्वा विमानानि द्योतयन्तो नभस्तलम् ।
ततोत्कृष्टरवास्तूर्णमाजग्मुस्ते जिनालयम् ॥
ततः प्रमुदिताशेषलोकलोचनपूजिताः ।
पूजां जगद्गुरूणां ते जातानन्दाः प्रचक्रिरे ॥
सुश्लिष्टवर्णविन्यासां पूजामालोक्य तत्कृताम् ।
निश्चलाचतया लोकास्ते जग्मुर्देवरूपताम् ॥
ततोऽनन्तगुणानन्दपरिपूरितचेतसा ।
नरेन्द्रेण सलोकेन देवानामन्त्र्य सद्गिरा ॥
शुभे सुमेरुवत्तुङ्गे सुवेद्यां भद्रविष्टरे ।
निवेश्य बिम्बं जैनेन्द्रं विधिनारब्धि मज्जनम् ॥

तच्च ।

स्नातस्य शुभवस्त्रस्य किरीटाङ्गदधारिणः ।
गोशीर्षेण विलिप्तस्य हारराजितवक्षसः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुण्डलोद्भासिगण्डस्य शक्राकारानुकारिणः।
बहिःशान्तविकारस्य निर्मलीभूतचेतसः॥
महत्तमोऽयमस्माकमेष एव च नायकः।
एष एव महाभाग एष एव च पूजितः॥
येन भागवती दीक्षा दुष्करापि जिघृक्षिता।
एवं प्रभाषमाणेन नरेन्द्रेण मनीषिणः॥
सत्तीर्थोदकसम्पूर्णस्नापनीयो मनोहरः।
सद्धर्मसारसम्पूर्णमुनिमानससन्निभः॥
गोशीर्षचन्दनोन्मिश्रो दिव्यपद्मावृताननः।
समन्ताच्चर्चितः शुभ्रैश्चारुचन्दनहस्तकैः॥
संस्थाप्य प्रथमस्नात्रे स्नात्रकारतया मुदा।
समर्पितोऽभिषेकार्थं दिव्यकुम्भो भवच्छिदः॥
आनन्दपुलकोद्भेदं दधानो भक्तिनिर्भरः।
जग्राह नृपतिः कुम्भं स्वयमेव द्वितीयकम्॥
तथा मध्यमबुद्धिश्च स पुत्रः स सुलोचनः।
कृतौ भुवननाथस्य स्नात्रकारणतत्परौ॥
चन्द्रोद्योतच्छटाच्छेन चामरेण विभूषिता।
स्थिता त्रिलोकनाथस्य पुरो मदनकन्दली॥
द्वितीया स्थापिता राज्ञा तस्याश्चामरधारिणी।
देवी पद्मावती नाम तदाकारानुकारिणी॥
धूपभाजनमादाय गाढं भावितमानसः।
सुबुद्धिर्वर्धितानन्दः स्थितोऽग्रे पिहिताननः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेनैव राजादिष्टेन शेषकर्मसु सादरम् ।
ये ये श्रेष्ठतमा लोकास्ते ते सम्यङ् नियोजिताः ॥

यतः ।

त एव कृतिनो लोके ते जातास्ते समुन्नताः ।
ते कलालापविज्ञानशालिनस्ते महाधनाः ॥
ते रूपवन्तस्ते शूराः कुलस्यापि विभूषणाः ।
ते सर्वगुणसम्पूर्णाः श्लाघ्यास्ते भुवनत्रये ॥
किङ्करीकृतशक्रस्य लोकनाथस्य मन्दिरे ।
येऽत्र किङ्करतां यान्ति नराः कल्याणभागिनः ॥

ततः प्रवृत्तो भगवतोऽभिषेकमहोत्सवः । पूरयन्ति दिक्चक्रवालमुद्दामदेवदुन्दुभिनिर्घोषाः । बधिरयन्ति जनकर्णकोटराणि रटत्पटहपाटवप्रतिनादसंमूर्च्छिता विविधतूर्यनिनादाः । समुल्लास्यते कणकणकभाणकरवोन्मिश्रः कलकाहलाकलकलः। गीयन्तेऽन्तरान्तरा प्रशमसुखरसास्वादावेदनचतुराणि भगवत्साधुगुणसम्बन्धप्रवणानि श्रवणोत्सवकारीणि गीतकानि । पठ्यन्ते परिशुद्धगम्भीरेण ध्वनिना सर्वज्ञप्रणीतवचनोन्नतिकराणि रागादिविषधरपरममन्त्ररूपाणि भावसारं महास्तोत्राणि। प्रवृत्तानि विविधकरणाङ्गहारहारीणि प्रमोदातिरेकसूचकानि महानृत्तानि। तदेवं महता विमर्देन सुरासुरैरिव कनकगिरिशिखरनिर्वर्तिते भगवदभिषेकमङ्गले पूजितेषु सविशेषं भुवनाधिनाथविम्बेषु विहितेषु निःशेषकृत्यविधानेषु वन्दितेषु साधुलोकेषु दत्तेषु महादानेषु सन्मानितेषु विशेषतः साधर्मिकेषु मनीषिणः स्वगेहनयनाय प्रक्रीकारितो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नरपतिना गजः। आरोपितस्तत्र मनीषी। स्थितोऽस्य स्वयमातपत्रधारकः। घोषितं च नरपतिना हर्षातिरेकरोमाञ्चितवपुषा बृहता शब्देन। यदुत भो भोः सामन्ता भो भो मन्त्रिमहत्तमाः समाकर्णयत यूयम्।

विभूतिरत्र संसारे नरस्य ननु तत्त्वतः।
सत्त्वमेवाविगानेन प्रसिद्धं सर्ववेदिनाम्॥
ततो यस्याधिकं सत्त्वं नरस्येह प्रकाशते।
स शेषनरवर्गस्य प्रभुत्वं कर्त्तुमर्हति॥

एवं च स्थिते।

सत्त्वोत्कर्षस्य माहात्म्यं यदत्रास्य मनीषिणः।
तद्दृष्टमेव युष्माभिः सर्वैरेव परिस्फुटम्॥
यत्तद्भगवतादिष्टं मादृशां त्रासकारणम्।
अनेन रभसा यन्त्रं याचितं तन्महात्मना॥
तदेष यावदस्माकं सदनुग्रहकाम्यया।
गेहे तिष्ठति तावन्नः स्वामी देवो गुरुः पिता॥
वयमस्य भवन्तश्च सर्वे किङ्करतां गताः।
विधूतपापमात्मानं विनयात्करवामहे॥
ततः समस्तैस्तैरुक्तं प्रमोदोद्धुरमानसैः।
यदादिशति राजेन्द्रः कस्मै तन्नात्र रोचते॥
अत्रान्तरेऽतितोषेण देहस्था सा मनीषिणः।
विजृम्भिता विशेषेण जननी शुभसुन्दरी॥
ततः सश्रीकतामाप्य चणेन भुवनातिगाम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रराज राजलोकेन परिवारितविग्रहः॥
करेणुकाधिरूढेन सह मध्यमबुद्धिना।
अथावाप पुरद्वारं स्तूयमानः सुबुद्धिना॥
ततोच्छ्रितपताके च देहशोभामनोरमे।
विशेषोज्ज्वलनेपथ्ये हर्षात्सम्मुखमागते॥
अथासौ नगरे तत्र मनीषी तोषनिर्भरैः।
एवं नागरकैर्लोकैः प्रविवेश कृतस्तुतिः॥ युग्मम्॥

तद्यथा।

धन्योऽयं कृतकृत्योऽयं महात्मायं नरोत्तमः।
अस्यैव सफलं जन्म भूषितानेन मेदिनी॥
अस्त्येव धन्यतास्माकं येषामेष स्वपत्तने।
संजातो न ह्यधन्यानां रत्नपुञ्जेन मीलकः॥

ततश्च।

कामिनीनयनानन्दं कुर्वाणोऽर्थाभिलाषिणां।
ददानश्च महादानं दधानो देवरूपताम्॥
सद्धर्मे पक्षपातं च देहिनामात्मचेष्टितैः।
जनयन्जनितानन्दो विचचार पुरेऽखिले॥
ततो महाविमर्देन सम्प्राप्तो राजमन्दिरम्।
रत्नराशिप्रभाजालैः सदा बद्धेन्द्रकार्मुकम्॥
तत्र चाशेषराजादिलोकसन्मानमानितः।
सकामकामिनीवृन्दलोललोचनवीक्षितः॥
गीतनृत्यप्रबन्धेन सोऽमरालयविभ्रमे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवराजवदास्थानं दत्त्वा निःशङ्कमानसः ॥
ततो विलीनरागोऽपि नृपतेस्तोषवृद्धये ।
उत्थाय मज्जनस्थानं जगाम गतविस्मयः ॥

तत्र च गतस्य तस्य ।

भ्रातुः सूनोरिवात्यन्तवल्लभस्य सगौरवम् ।
कृतं मदनकन्दल्या शरीरपरिमार्जनम् ॥
शेषान्तःपुरनारीभिर्व्यग्राभिः स्नानकर्मणा ।
रराज पेशलालापचारुभिः परिवारितः ॥
वज्रेन्द्रनीलवैदूर्यपद्मरागादिरोचिषा ।
रञ्जिते यन्त्रवापीनां ममज्ज विमले जले ॥
ततो भुजगनिर्मोकसूक्ष्मशुक्ले सुवाससी ।
परिधाय गतो देवभवनं सुमनोहरम् ॥

तत्र च ।

सुबुद्धिसम्बन्धिनि विरचनाचारुतया चित्तनिर्वाणकारिणि जिनमन्दिरे मार्गानुसारितया परमार्थतः सकलकालहृदयवर्तिनोऽपि विशेषतस्तद्दिन एव प्रबोधनरतिसूरिपादप्रसादोपलब्धस्वरूपस्य सकलनिष्कलावस्थस्य भगवतः परमात्मनो रागद्वेषविषापहरणकरणचतुरमनुस्मृतमर्हतः स्वरूपं। ततो निर्गत्य विरलविरलाशपरिजनः पूर्वोपकल्पिताशेषभोजनोपकरणसामग्रीसनाथं प्राप्तो भोजनमण्डपं। तत्र च विरचितानेकाकारेचित्तरमनोत्सवकारिणि भक्ष्यपेयाद्याहारविस्तारे नृपतिना स्वयमुपदिश्यमानमभिमतरसास्वादनं तदनुरोधेन विदधानो निरभिष्वङ्गतया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्धमानस्वास्थ्यातिरेको निर्वर्तयामास भोजनमिति। ततो गृहीत-पञ्चसुगन्धिकोन्मिश्रताम्बूले मलयजमृगनाभिकश्मीरजचोदाङ्गरागे विन्यस्तप्रवरभूषणे दिव्यांशुकाच्छादितशरीरे माल्यविच्छित्ति-सौरभाकृष्टहृष्टचिञ्चिरीके अध्यासितमहार्हसिंहासने प्रणतासंख्य-महासामन्तकिरीटांशुजालरञ्जितचरणे उद्दामबन्दिस्तूयमानयथा-वस्थितगुणसन्दोहे दत्तास्थाने मनीषिणि हर्षातिरेकनिर्भरो राजा सुबुद्धिं प्रत्याह। सखे युष्मदनुभावजन्येयमस्मादृशां कल्याणपरम्परा येनोत्साहितोऽहं भवता भगवद्वन्दनाय। तथा हि।

विलोकितो मया नाथो जगदानन्ददायकः।
भक्तिनिर्भरचित्तेन वन्दितो भुवनेश्वरः॥
दृष्टः कल्पद्रुमाकारः स सूरिर्वन्दितो मुदा।
लब्धो भागवतो धर्मः संसारोच्छेदकारकः॥
जातश्चेदृशरूपेण नररत्नेन मीलकः।
कृतश्चानेन सर्वेषामस्माकं हृदयोत्सवः॥

अथवा किमत्राश्चर्यम्।

महाभागाः प्रजायन्ते परेषां तोषवृद्धये।
स्वकार्यमेतदेवैषां यत्परप्रीतिकारणम्॥
तदस्य युक्तमेवेदं विधातुं पुण्यकर्मणः।
ममाद्भुतमिदं जातं क डोम्बः क तिलाढकम्॥
तदेवंविधकल्याणमालिका मित्रवत्सल।
एवमाचरता नूनं त्वया संपादिता मम॥
राज्ञो हितकरो मन्त्री सुप्रसिद्धं जगत्त्रये।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मात्तवैव मन्त्रित्वं यथार्था ते सुबुद्धिता ॥

सुबुद्धिरुवाच ।

देव मा मैवमादिशत। न खलु देव पुण्यप्राग्भारायत्तजीवितव्येऽत्र किङ्करजनेऽप्येवमतिगौरवमारोपयितुमर्हति देवः। अस्याः संपादने केऽत्र वयं। उचित एव देवः खल्वेवंविधकल्याणपरम्परायाः। नैव हि निर्मलाम्बरतले निशि प्रकाशमाना रुचिरा नक्षत्रपद्धतिः कस्यचिदसम्भावनीयेत्याश्चर्यबुद्धिं जनयति। मनीषिणाभिहितं। महाराज भगवति सप्रसादे कियतीयमद्यापि भवतः कल्याणपरम्परा। भाविदिनश्रीसम्बन्धस्येव गगनतलस्यारुणोद्योतकल्पो हि भवतो भविष्यत्केवलालोकसचिवपरमपदानन्तानन्दसन्दोहसम्बन्धस्य प्राथमकल्पिकः खल्वेष सम्यग्दर्शनजनितः प्रमोदः। नृपतिरुवाच। नाथ महाप्रसादः। कोऽत्र सन्देहः। किं न संपद्यते युष्मदनुचराणां। ततो मन्त्रिणं प्रत्याह। सखे पश्यामीषामद्य दिनप्रबुद्धानामपि विवेकातिशयः। सुबुद्धिरुवाच। देव किमत्र चित्रं। मनीषिणः खल्वेते यथार्थमभिधीयन्ते। प्रबुद्धा एव ह्येवंविधपुरुषा जायन्ते। गुरवः केवलमीदृशां प्रतिबोधे निमित्तमात्रं भवन्ति ॥

इतश्च मनीषिणो राजमन्दिरे प्रवेशावसरे राजानमनुज्ञाप्यादित एव सुबुद्धिना साधर्मिकवात्सल्येन मध्यमबुद्धिर्नीत आसीदात्मीयसदने। कारितस्तदागमननिमित्तः परमानन्दो दत्तानि महादानानि। ततः सोऽपि निर्वर्तितस्नानभोजनताम्बूलविलेपनालङ्करणनेपथ्यमाल्योपभोगः कर्तव्यः। स्नेहनिर्भरसुबुद्धितत्परिकरनिरुपचरितस्तुतिगर्भपेशलालापसमानन्दितहृदयः समागतस्तत्रैवास्थाने। इतो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चितप्रतिपत्तिः ससम्भ्रमं मनीषिणा दापिते तदुपकण्ठमुपविष्टो महति विष्टरे। ततो राजा तमुद्दिश्य सुबुद्धिं प्रत्याह। सखे महोपकर्तायमस्माकं महापुरुषः। सुबुद्धिनाभिहितं। देव कथं। नृपतिराह। समाकर्णय यतो भगवतोपदिष्टे तस्मिन्नप्रमादयन्त्रे तस्य दुरनुष्ठेयतामालोचयतो मम महासमरे कातरनरस्येव प्रादुर्भूता चित्ते समाकुलता ततोऽहमनेन महात्मना तत्रावसरे भगवन्तं गृहिधर्मं याचयता तद्ग्रहणबुद्ध्युत्पादकत्वेन समाश्वासितो। यतो जातो गृहिधर्माङ्गीकरणेनापि मे चेतसा महानवष्टम्भः। ततो ममायमेव महोपकारक इति। सुबुद्धिनाभिहितं। देव यथार्थाभिधानो मध्यमबुद्धिरेष। समानशीलव्यसनेषु सख्यमिति च लोकप्रवादः। ततः समानशीलतया युक्तमेवास्य मध्यमजनानां समाश्वासनं॥ नृपतिना चिन्तितं। अये ममायं मिथ्याभिमानस्येतसीयन्तं कालमासीत् किलाहं नरेन्द्रतया पुरुषोत्तमो यावताधुनानेन सुबुद्धिनार्थापत्त्या गणितोऽहं मध्यमजनलेख्ये। ततो धिङ्मां मिथ्याभिमानिनमित्यथवा वस्तुस्थितिरेषा न मयात्र विषादो विधेयः।

तथा हि।

गजेन्द्रस्तावदाभाति शूरः सन्त्रासकारकः।
यावद्भासुरदंष्ट्राग्रो न सिंह उपलभ्यते॥
यदा सिंहस्य गन्धोऽपि स्यादाघ्रातः करेणुना।
जायते कम्पमानोऽसौ तदाहो कातरः करी॥
मनीषिणमपेक्ष्यातो युक्ता मे मध्यरूपता।

41

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयं सिंहो महाभागो मादृशाः करिकातराः ॥
तदत्र न विषादो मे कर्तुं युक्तः प्रयोजने ।
यतो द्वितीयलेखापि मादृशैरपि दुर्लभा ॥

तथा हि ।

भवेत्सर्वोत्तमस्तावत्पुरुषो यदि पारयेत् ।
अशक्तो मध्यमोऽपि स्यान्न जघन्यः कदाचन ॥
मिथ्याभिमानो नैवायमेक एवाभवत्पुरा ।
किं तर्हि बहवोऽन्येऽपि किं वा मे चिन्तया तया ॥

एवं चिन्तयति राजनि सुबुद्धिराह । देव सम्यगवधारितं देवेन यथैष महोपकारक इति । यतो जिनधर्मानुष्ठाने प्रवर्तमानस्यास्य जीवस्य यो निमित्तमात्रमपि भवति न ततोऽन्यः परमोपकारी जगति विद्यते । नृपतिराह । एवमेतन्नात्र सन्देहः । केवलमिदानीं मे मनसि वितर्को भगवद्वचनानुस्मरणेनासकृन्निराकृतोऽपि निर्लज्जब्राह्मण इव प्रकरणे पुनः पुनः प्रविशतीति । तदेनमुपनेतुमर्हत्यार्यः । सुबुद्धिराह । कीदृशोऽसौ । नृपतिरुवाच । समाकर्णय स्वसंवेदनसंसिद्धमिदमासीत्तदा यदुत तत्र चैत्यभवने प्रविष्टमात्राणामस्माकं शान्तानीव सर्वद्वन्द्वानि उच्चाटितेव केनचिद्राज्यकार्यचिन्तापिशाचिका विलीनमिव सकलमोहजालं विध्मात इव प्रबलरागानलः विध्वस्त इव विपरीताभिनिवेशग्रहः निर्वृतममृतसेकसम्पर्केणेव शरीरं सुखसागरावगाढमिव हृदयं क्षणमात्रेणासीत् । यत्पुनर्नमस्कृतभुवननाथस्य प्रणतगुरुचरणस्य वन्दितमुनिवृन्दस्य भगवद्वचनामृतमाकर्णयतस्तत्र मे निरुपमं सुखसंवेदन-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मभूत् तत्सकलं वागोचरातीतमिति कृत्वा न शक्यते कथयितुं। तदेवंविधेऽपि तत्र जैनेन्द्रमन्दिरे सन्निहितेऽपि तादृशे भगवति गुरौ कथयति रागविषशमनं विरागमार्गं नेदीयसि शान्तचित्ते तपस्विलोकेऽपि सति तावति जनसमुदये कथं बालस्य तथाविधोऽध्यवसायः सम्पन्न इति। सुबुद्धिनाभिहितं। देव यत्तावदुक्तं देवेन यथात्र जिनमन्दिरे प्रविष्टमात्रस्य मे क्षणमात्रेणाचिन्तितगुण सन्दोहाविर्भावोऽभूदिति तन्नाश्चर्यं। प्रमोदशेखरं हि तद्भवनमभिधीयते हेतुरेव तत्तादृशगुणकलापस्य। यत्पुनरभ्यधायि यथा कथं पुनस्तस्यैवंविधसामग्र्यामपि पापाचरणेषु प्रवर्तन्त इति।

अन्यच्च। भगवदुपदेशादेवाहमेवं तर्कयामि यदुत द्रव्यक्षेत्रकाल भावभवाद्यपेक्षया प्राणिनां शुभाशुभपरिणामा भवन्ति। तदस्य बालस्य क्षेत्रजनितोऽयमशुभपरिणामः। नृपतिराह। ननु गुणाकरस्तज्जैनसदनं। तदेव तत्र क्षेत्रं। तत्कथं तदशुभपरिणामहेतुर्भवेदिति। सुबुद्धिराह। न मन्दिरदोषोऽसौ किं तर्हि उद्यानदोषस्तदुद्यानं तत्र सामान्यक्षेत्रं तच्च हेतुस्तस्य बालस्य तथाविधाध्यवसायस्येति। नृपतिराह। यदि दुष्टाध्यवसायहेतुस्तदुद्यानं ततोऽस्माकं किमिति क्लिष्टचित्तकारणं तन्न सम्पन्नं। सुबुद्धिनाभिहितं। देव विचित्रस्वभावं तत्काननं पुरुषादिकमपेक्ष्यानेकाकारकार्यकारकं संपद्यते। अत एव। तन्निजविलसितमिति नाम्ना गीयते। प्रकटयत्येव तज्जन्तूनां सविशेषसहकारिकारणकलापैर्निजं निजं विलसितम्। तथाहि। तस्य बालस्य तेन स्पर्शनेन तथा चाकुशलमालया युक्तस्य मदनकन्दलीं प्राप्य तेन तथाविधाध्यवसायः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनीषिमध्यमबुद्धियुष्मदादीनां पुनर्विशिष्टपुरुषाणां पुण्यप्राग्भारवतां सूरिपादे प्रसादमासाद्य तेनैव सर्वविरतिदेशविरतिपरिणामादयो भावा जनिताः । यद्यपि चेह सर्वस्यैव कार्यस्योत्पत्तौ द्रव्यचेत्रकालखभावकर्मनियतिपुरुषकारादयः कारणविशेषा दृष्टादृष्टाः समुदायेनैव हेतुभावं भजन्ते नैकः कचित्कस्यचित्कारणं तथापि विवचयैकस्यापि कारणत्वं वक्तुं शक्यत इति । तन्निजविलसितमुद्यानमस्माभिर्नानाविधभावनिबन्धनमभिधीयत इति ॥ नृपतिराह । सखे चारुक्तमिदमिदानीं यद्भवता तदाभिहितमासीत् भगवतः पुरतो यथाहं देवायास्य कर्मविलासस्य राज्ञः स्वरूपं निवेदयिष्यामि तन्निवेदयतु भवानहं श्रोतुमिच्छामि । सुबुद्धिराह । देव यद्येवं ततो विविक्तं स्थीयतां देवेन । नृपतिनोक्तमेवं भवतु ॥ ततोऽनुज्ञातौ मनीषिणा समुत्थायास्थानमण्डपात् प्रविष्टौ कक्षान्तरे राजामात्यौ । सुबुद्धिनाभिहितं । देव अयमत्र परमार्थो । ये ते भगवता चत्वारः पुरुषाः प्ररूपिताः तेषामुत्कृष्टतमास्तावत्सकलकर्मप्रपञ्चरहिताः सिद्धा अभिधीयन्ते । जघन्यमध्यमोत्कृष्टाः पुनरेत एव बालमध्यमबुद्धिमनीषिणो विज्ञेयाः । अतः कर्मविलासो राजा यो भगवता प्रतिपादितः स एतेषामेवंविधस्वरूपाणां जनको निजनिजकर्मादयो विज्ञेयः । स एव हि यथावर्णितवीर्यो नापरः । तस्य च तिस्रः शुभाशुभमिश्ररूपाः परिणतयः । ता एव भगवतामीषां मनीषिबालमध्यमबुद्धीनां शुभसुन्दर्यकुशलमाला सामान्यरूपेति नामभिर्जनन्य इति प्रतिपादिताः ता एव यतोऽमूनीदृशरूपतया जनितवत्यः । नृपतिराह । स तर्ह्यमीषां वयस्यः कोऽभिधीयतां । सुबुद्धिरुवाच ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देव तत् सर्वानर्थकारि स्पर्शनेन्द्रियं विज्ञेयं॥ नृपतिना चिन्तितं। अये मयापीदं भगवता कथ्यमानं सर्वमाकर्णितमासीत् केवलं न सम्यग् विज्ञातं यथानेन। तदस्य सुबुद्धेरेवंविधबोधेन सुसाधुभिः सह चिरपरिचयः कारणं। अहो वचनकौशलं भगवतां। कथितमेवातस्तदामीषां मनीषिप्रभृतीनां सम्बन्धि सर्वमन्यव्यपदेशेन चरितं। अथवा किमत्र चित्रं अत एव प्रबोधनरतयस्ते भगवन्तोऽभिधीयन्ते। तदेवं विचिन्त्याभिहितमनेन। सखे पर्याप्तमिदानीं विदितोऽस्माभिरेष वृत्तान्तः। केवलमिदमिदानीमभिधीयते यदुत यद्येष मनीषी विषयानुषङ्गं कियन्तमपि कालं भजेत ततो वयमप्यनेनैव सह दीक्षाग्रहणं कुर्वीमहि। यतः प्रथमदर्शनादारभ्य प्रवर्धते ममास्योपरि स्नेहानुबन्धः। न संचरति विरहकातरतयान्यत्र हृदयं। न निवर्तयातामेतद्वदनकमलावलोकनाल्लोचने। ततो नास्य विरहे वयं क्षणमप्यासितुमुत्सहामहे। न च तथाविधोऽद्यापि अस्माकमाविर्भवति चरणकरणपरिणामः। तदेनं तावदभ्यर्थय प्रणयस्नेहसारं। अनुभावय निरुपचरितशब्दादिभोगान्। प्रकटयास्य पुरतस्तत्त्वाभिभावं। दर्शय वज्रेन्द्रनीलमहानीलकर्केतनपद्मरागमरकतवैडूर्यचन्द्रकान्तपुष्परागादिमहारत्नपूगान् दर्शयापहसितचिदशसुन्दरीलावण्याः कन्यकाः। सर्वथा कथञ्चिदुपप्रलोभय यथा कियन्तमपि कालमस्मत्समीहितमेष मनीषी निर्विचारं संपादयति। सुबुद्धिनाभिहितं। यदाज्ञापयति देवः। केवलमत्रार्थे किञ्चिदहं विज्ञापयामि। तद्युक्तमयुक्तं वा क्षन्तुमर्हति देवो॥ नृपतिराह। सखे सदुपदेशदानाधिकारिणां भवतां शिष्यकल्पे मय्यप्यलमियता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संभ्रमेण। वदतु विवचितं निर्विकल्पमार्यः। सुबुद्धिरुवाच। देव यद्येवं ततो यत्तावदुक्तं देवेन यथा ममात्र मनीषिणि गुरुः स्नेहातिरेकः तद्युक्तमेव। यतः समुचितो महतां गुणिषु पक्षपातः। स हि क्रियमाणः पापाणुपूगं दलयति सदाशयं स्फीतयति सुजनतां जनयति यशो वर्धयति धर्ममुपचिनोति मोक्षयोगतामा-लक्षयतीति। यत्पुनरुक्तं यथा कथञ्चिदुपप्रलोभ्य कियन्तमपि कालमेष धारणीय इति तन्न न्याय्यं प्रत्युतानुचितमाभासते यतो नैवमस्योपरि स्नेहानुबन्धो दर्शितो भवति किं तर्हि प्रत्युत प्रत्यनीकतां संपद्यते।

तथाहि।

घोरसंसारकान्तारचारनिःसारकाम्यथा।
प्रवर्तमानं जैनेन्द्रे धर्मे जीवजगद्धिते॥
मनसा वचसा सम्यक्क्रियया च कृतोद्यमः।
प्रोत्साहयति यस्तस्य स बन्धुः स्नेहनिर्भरः॥
अलीकस्नेहमोहेन यस्तु तं वारयेज्जनः।
स तस्याहितकारित्वात्परमार्थेन वैरिकः॥
तस्मान्न वारणीयोऽयं स्वहितोद्यतमानसः।
एवमारभतां देव स्नेहोऽत्र विहितो भवेत्॥
न चैष शक्यते देव कृतैर्यत्नशतैरपि।
मनीषी लोभमानेतुं विषयैर्दिविकैरपि॥

यतः प्रादुर्भूतोऽस्य महात्मनो विषयविषविपाकावेदनचतुरे भगवद्वचने सुनिश्चितः प्रबोधः। विस्फुरितं सकलमलकालुष्यक्षाल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नत्तमं हृदयसरोवरे विवेकरत्नं। समुल्लसितं यथावस्थितार्थस्वरूप-निरूपणनिपुणं सम्यग्दर्शनं। संजातो निःशेषदोषमोषकरस्वरण-परिणामः। सति च भगवदवलोकनया जीवस्यैवंविधे कल्याणा-भिनिवेशकारिणि गुणकदम्बके न रमते विषयेषु चित्तं प्रति-भासते हेयत्वबुद्ध्या भवप्रपञ्चः इन्द्रजालयते निःसारतया सकलं जगद्विलसितं स्वप्नदर्शनायते चणदृष्टनष्टतया जनसमागमः। न निवर्तते प्रलयकालेऽपि कस्यचिदनुरोधेन मोचमार्गस्य साधनप्रवणा बुद्धिः। तदेवंस्थिते देव अस्योपप्रलोभनमाचरतामस्माकं केवलं मोहविलसितमाविर्भविष्यति न पुनः काचिदभिप्रेतार्थसिद्धिः। तदलमनेनास्थानारंभेणेति॥ नृपतिराह। यद्येवं ततः किं पुन-रधुना प्राप्तकालं। सुबुद्धिराह। देव निरूप्य दीचाग्रहणार्थमस्य प्रशस्तदिनं क्रियतां तदारात् सर्वादरेण महत्तरः प्रमोदः। नृपतिराह। यत्त्वं जानीषे॥ ततः समाहूतः सिद्धार्थो नाम सांवत्सरः। समागतस्त्वरया। प्रविष्टोऽभ्यन्तरे। राज्ञा दापितमासनं। कृतमुचितकरणीयं। कथितमाह्वानप्रयोजनं। ततो निरूप्य निवे-दितमनेन यदुतास्माद्दिनान्नवमे दिनेऽस्यामेव भाविन्यां शुक्लत्रयो-दश्यां शुक्रदिने उत्तरभद्रपदाभियोगमुपगते शशधरे वहति शिव-योगे दिनकरोदयातीते सपादे प्रहरद्वये वृषलग्नं सप्तग्रहकं एकान्त-निरवद्यं भविष्यति। तदाश्रीयतामिति अभिहितं राजमन्त्रिणोः। परिपूज्य प्रहितः सांवत्सरः। गतं तद्दिनं। ततो द्वितीयदिनादारभ्य प्रमोदशेखरे तदन्यजिनायतनेषु च देवानामपि विस्मारितसुरालय-सौन्दर्या विधापिता राज्ञा महोत्सवाः। दापितानि वरवरिकाघोषण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वकं सर्वत्र महादानानि। विहारितो देवेन्द्रवदैरावतविभ्रमजय-करिवरारूढः स्वयं पदातिभावं भजता त्रिकचतुष्कचत्वरादिषु सुराकारैर्नागरिकजनैः स्तूयमानो निरुपमविलासविस्तारमनुभावयता नरपतिना प्रतिदिनं नगरे मनीषी प्राप्तोऽष्टमवासरः। तत्र च नीतं निखिलजनसन्मानदानार्घमानविनोदेन प्रहरद्वयं। अत्रान्तरे दिनकराचरितेन मनीषिवचनं सूचयताभिहितं कालनिवेदकेन।

नाशयित्वा तमो लोके कृत्वाह्लादं मनस्विनाम्।
हे लोकाः कथयत्येष भास्करो वोऽधुना स्फुटम्॥
वर्धमानः प्रतापेन यथाहमुपरि स्थितः।
सर्वोऽपि स्वगुणैरेव जनस्योपरि तिष्ठति॥

ततस्तदाकर्ण्य राजा सुबुद्धिप्रभृतीनुद्दिश्याह। अये प्रत्यासीदति लग्नवेला। ततः सज्जीकुरुत तूर्णं भगवत्पादमूले गमनसामग्रीं। सुबुद्धिरुवाच। देव सज्जैव वर्त्तते मनीषिपुण्यपरिपाटीव सर्वा सामग्री।

तथाहि।

अमी घणघणारावं कुर्वन्तः कनकोज्ज्वलाः।
रथौघाः प्रस्थितास्तूर्णमायुक्तवरवाजिनः॥
एते संख्यामतिक्रान्ता राजवृन्दैरधिष्ठिताः।
जीमूता इव नागेन्द्रा द्वारे गर्जन्ति मन्थरम्॥
वर्यास्ववारैः संरुद्धाः कथञ्चिच्चटुलाननैः।
खमापिबन्तोऽमी देव हया हेषन्ति दर्पिताः॥
अयं पदातिसंघातः क्षीरनीरेश्वरोपमः।
मत्तः प्रयोजनं ज्ञात्वा सुवेषश्चलितोऽखिलः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्नालङ्कारनेपथ्याः सद्दूष्यपटलाकुलाः ।
प्रस्थिता वारनारीणामेते वारा वरेक्षणाः ॥
मनीषिपुण्यसंभाराकृष्टास्तूर्णं समागताः ।
एते विबुधसंघाता द्योतयन्ति नभस्तलम् ॥
एष नागरको लोकः कौतुकाक्षिप्तमानसः ।
कुरुते हर्षकल्लोलैः सागरक्षोभविभ्रमम् ॥

अथवा ।

मत्तो विदितवृत्तान्तो मनीषिगुणरंजितः ।
ज्ञातयुष्मदभिप्रायः को वाचाप्रगुणो भवेत् ॥

देव तस्मात्सतमुत्थातुमर्हथ यूयं। ततः समुत्थितौ मनीषिनरेन्द्रौ निर्गतौ द्वारदेशे। ततो रत्नकिङ्किणीजालभूषिते समारूढः प्रधानस्यन्दने मनीषी। ततः सुखसुकुमारासनोपविष्टः स्वयं प्रतिपन्नसारथिभावेन सह नरपतिना विलसत्किरीटांशुरञ्जितोत्तमाङ्गभागो ध्रियमाणेन निजयशोधवलेनातपत्रेण कपोलडोलायमानकुण्डलो धूयमानेन शशधरदीधितिच्छटाच्छेन वरविलासिनीकरवर्तिना चामरप्रकरेण स्थूलमुक्ताफलकलापविराजितवक्षःस्थलः पठतातितारमुद्दामबन्दिवृन्देन कटककेयूरखचितबाहुदण्डो नृत्यता तोषनिर्भरवरविलासिनीसार्थेन अतिसुरभिताम्बूलाङ्गरागप्रीणिताशेषेन्द्रियग्रामो बधिरयता दिक्चक्रवालं वरतूर्यनिर्घोषेण विशदद्दिव्यांशुकप्रतिपन्नदेहो गायता मनोहारिकिन्नरसंघेन घूर्णमानविचित्रवनमालानिचयचर्चितशरीरो मुञ्चता हर्षातिरेकादुत्कृष्टसिंहनादसन्दर्भं देवसंघेन प्रीणिताशेषप्रणयिजनमनोरथः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्लाघयता नागरलोकेन तथासुरकुमाराकारधरोऽयमिति सकौतुकाभिः समागतोऽस्माकमयं दृष्टिपथमिति सहर्षाभिरस्मदभिमुखमवलोकयतीति सशृङ्गाराभिर्मदनरसवशीकृतहृदयतया नानाविधविलासाभिर्मामियं तिरोधाय दर्शनलोलतया स्वयमवलोकयतीति परस्परं सेर्ष्याभिर्गुरुजनोऽस्मानेवमवलोकयन्तीः पश्यतीति सलज्जाभिः प्रव्रजितः किलायं भविष्यतीति सशोकाभिरलं संसारेण योऽयमेवंविधैरपि त्यज्यत इति ससंवेगाभिरेवमनेकरसभावनिर्भरं हृदयमुद्वहन्तीभिर्निरीक्ष्यमाणमूर्तिर्वातायनविनिर्गतवदनसहस्राभिः पुरसुन्दरीभिरभिनन्द्यमानोऽम्बरविवरवर्तिनीभिः सुरसुन्दरीभिः सहितो रथान्तरारूढेन स्वप्रतिबिम्बसन्निभेन मध्यमबुद्धिना अनुगम्यमानो रथहरिकरिगतैर्महासामन्तसमूहैर्महता विमर्देन प्राप्तो मनीषी निजविलसितोद्याने। रथादवतीर्य स्थितः क्षणमात्रं प्रमोदशेखरद्वारे। परिवेष्टितो राजवृन्देन। इतश्च स्यन्दनारोहणादारभ्य राजा विशेषतस्तदा सत्त्वपरीक्षार्थं मनीषिस्वरूपं दत्तावधानो निरूपयति स्म। यावता तस्य विशुध्यमानाध्यवसायप्रक्षालितमनोमलकलङ्कस्य सत्यपि तादृशे हर्षहेतौ न लक्षितस्तेन तिलतुषत्रिभागमात्रोऽपि चेतोविकारः प्रत्युत गाढतरं क्षारमृत्पुटपाकादिभिरिव विचित्रसंसारविलसितदर्शनसमुद्भूतैर्भावनाविशेषैर्निर्मलीभूतं चित्तरत्नं। ततः परस्परानुविद्धतया मनःशरीरयोर्जातमस्य देदीप्यमानं शरीरं। विलोकितं च राज्ञा यावत्तत्तेजसाभिभूतं दिनकरकरनिकरतिरस्कृतमिव तारकानिकुरम्बं न राजते मनीषिणोऽभ्यर्णवर्ति तद्राजकं। ततस्तदीयगुणप्रकर्षेण राज्ञोऽपि विलीनं तद्विबंधकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्मजालं संजातस्वरूपपरिणामो निवेदितः सुबुद्धिमध्यमबुद्धिमदनकन्दलीसामन्तादिभ्यो निजोऽभिप्रायः। ततोऽचिन्त्यमाहात्म्यतया महापुरुषसन्निधानस्य विचित्रतया कर्मक्षयोपशमस्य रञ्जितचित्ततया निष्कृत्रिममनीषिगुणैः समुल्लसितं सर्वेषां तदा जीववीर्यं। ततस्तैरभिहितम्।

साधु साधूदितं देव युक्तमेतद्भवादृशाम्।
संसारे ह्यत्र निःसारे नान्यच्चारु विवेकिनाम्॥

तथा हि।

देव यद्यत्र संसारे किंचित्स्याद्रामणीयकम्।
श्लाघ्यं सारमुपादेयं वस्तु सुन्दरमेव वा॥
ततः किमीदृशाः सन्तः पूज्या युष्मादृशामपि।
संसारमेनं मुञ्चेयुर्ज्ञाततत्त्वा महाधियः॥
ततोऽमूदृशसल्लोकत्यागादेवावगम्यते।
नास्त्यत्र किंचित्संसारे सारं चारकसन्निभे॥
अतो मनीषिभिस्त्यक्ते देव नैवात्र युज्यते।
स्थातुं विज्ञाततत्त्वानां भवे भूरिभयाकरे॥
अन्यच्च देव सर्वेषामस्माकमपि साम्प्रतम्।
दृष्ट्वा मनीषिणश्चित्तं न चित्तं रमते भवे॥
यथैवास्य प्रभावेण संजातश्चरणोद्यमः।
अस्माकमेष निर्वाहं तथा तेनैव यास्यति॥
ततोऽस्माननुजानीत संसारोच्छेदकारिणीम्।
येन भागवतीं दीक्षामङ्गीकुर्मः सुनिर्मलाम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृपतिरुवाच ।

अहो विवेको युष्माकमहो गम्भीरचित्तता ।
अहो वचनविन्यासस्तथाहो सत्त्वसारता ॥
साध्वध्यवसितं भद्रैः साधु प्रोत्साहिता वयम् ।
साधु भो क्षणमात्रेण त्रोटितं भवपञ्जरम् ॥
एवं सामान्यतस्तावत् सर्वेषामभिनन्दनम् ।
कृत्वा प्रत्येकमप्याह स राजा हर्षनिर्भरः ॥

तत्र सुबुद्धिं तावदुवाच ।

सखे विदितसंसारस्वभावेन त्वया गृहे ।
इयन्तं तिष्ठता कालं वयमेव प्रतीक्षिताः ॥
अन्यथा ते गृहे किं वा स्यादवस्थानकारणम् ।
को नाम राज्यलाभेऽपि भजेच्चाण्डालरूपताम् ॥
तत्साधु विहितं साधु कृतोऽस्माकमनुग्रहः ।
एवमाचरता मित्र दर्शिता च सुमित्रता ॥

मध्यमबुद्धिं प्रत्याह ।

त्वमाद्यावेव धन्योऽसि यस्य सङ्गो मनीषिणा ।
नैव कल्पद्रुमोपेतो नरोऽकल्याणमर्हति ॥
अधुना चरितेऽप्यस्य दधानेन मतिं त्वया ।
स्वभ्रातुर्निर्विशेषैव दर्शिता तुल्यरूपता ॥
तत्साधु विहितं भद्र यः पश्चादपि सुन्दरः ।
सोऽपि सुन्दर एवेति यतो वृद्धाः प्रचक्षते ॥

ततो मदनकन्दलीं प्रत्याह ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सारं च सुकुमारं च देवि काञ्चनपद्मवत्।
तावकीनमिदं चित्तं येनाङ्गीकृतमीदृशम्॥
प्रसिद्धा धर्मपत्नीति यत्त्वं लोकोपचारतः।
मम तत्सत्यतां नीतं कर्तव्येन त्वयाधुना॥
तत्साधु विहितं देवि नास्त्यत्र भवपञ्जरे।
नियन्त्रितानां जीवानां कर्तव्यमपरं वरम्॥

तथा।

यैरभ्युपगता दीक्षा तानन्यानपि भावतः।
स राजा मधुरैरेवं वाक्यैरानन्द्य तोषतः॥

तद्यथा।

धन्या यूयं महात्मानः कृतकृत्या नरोत्तमाः।
यैरभ्युपगता तूर्णं सद्दीक्षा पारमेश्वरी॥
तच्चारु विहितं भद्रा युक्तमेतद्भवादृशाम्।
यूयमेव परं लोके निर्मिथ्या मम बान्धवाः॥

ततश्च।

राजचिह्नार्पणाद्राज्ये स्थापयित्वा सुलोचनम्।
ततः कृतान्यकर्तव्यः प्रविष्टो जिनमन्दिरे॥

तत्र च।

विहिताशेषकर्तव्याः पूजयित्वा जगद्गुरुम्।
आचार्येभ्यो निजाकूतं ते सर्वेऽप्याचचक्षिरे॥
ततोऽभिनन्दितास्तेऽपि सूरिभिः कलया गिरा।
अलं विलम्बितेनात्र संसार इति भाषिणा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः प्रवचनोक्तेन विधिना धूतकल्मषैः ।
सर्वे ते क्षणमात्रेण दीक्षिता गुरुभिर्जनाः ॥
अथ संवेगवृद्ध्यर्थं कल्पोऽयमिति वा क्षणम् ।
कृता समक्षं लोकस्य सूरिभिर्धर्मदेशना ॥

तद्यथा ।

अनाद्यनन्तसंसारे जन्ममृत्युभयाकरे ।
मौनीन्द्री दुर्लभा सत्त्वैः प्रव्रज्येयं सुनिर्मला ॥

यतः ।

तावद्दुःखान्यनन्तानि तावद्रागादिसन्ततिः ।
प्रभवः कर्मणस्तावत्तावज्जन्मपरम्परा ॥
विपदस्तावदेवैतास्तावत्सर्वा विडम्बना ।
तावद्दीनानि जल्पन्ति नरा एव पुरो नृणाम् ॥
तावद्दौर्गत्यसद्भावस्तावद्रोगसमुद्भवः ।
तावदेष बहुक्लेशो घोरसंसारसागरः ॥
यावन्निःशेषसावद्ययोगोपरतिलक्षणा ।
एषा न लभ्यते जीवैः प्रव्रज्यात्यन्तदुर्लभा ॥
प्रसादाल्लोकनाथस्य स्वकर्मविवरेण च ।
यदा तु सत्त्वैर्लभ्येत प्रव्रज्येयं जिनोदिता ॥
तदा निर्धूय पापानि यान्ति ते परमां गतिम् ।
अनन्तानन्दसंपूर्णां निःशेषक्लेशवर्जिताम् ॥
ततोऽमी ये पुरः प्रोक्ताः सर्वेऽपि भवभाविनः ।
क्षुद्रोपद्रवसंघाता दूरापास्ता भवन्ति ते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं च ।

इहापि भो भवन्त्येते प्रशमामृतपायिनः ॥
प्रव्रज्याग्राहिणो जीवा निर्बाधाः सुखपूरिताः ॥
सा च भागवती दीक्षा युष्माभिरधुना स्फुटम् ।
संप्राप्ता तेन संप्राप्तं यत्प्राप्तव्यं भवोदधौ ॥
केवलं सततं यत्नः प्रमादपरिवर्जितैः ।
यावज्जीवं विधातव्यो भवद्भिरिदमुच्यते ॥

यतः ।

नाधन्याः पारमेतस्या गच्छन्ति पुरुषाधमाः ।
ये तु पारं प्रजन्त्यस्यास्त एव पुरुषोत्तमाः ॥
ततस्तैः प्रणतैः सर्वैर्जजल्पे सूरिसंमुखम् ।
इच्छामोऽनुग्रहं नाथ कुर्मो नाथानुशासनम् ॥
स्थगिताननदेशेन मुखवस्त्रिकया मुदा ।
अत्रान्तरे कृतः प्रश्नः शत्रुमर्दनसाधुना ॥

कथम् ।

विशालं निर्मलं धीरं गम्भीरं गुरुदक्षिणम् ।
दयापरीतं निश्चिन्तं द्वेषाभिष्वङ्गवर्जितम् ॥
स्तिमितं जगदानन्दं यद्वा वाग्गोचरातिगम् ।
कथमीदृग्भवे चित्तं नाथ यादृङ् मनीषिणः ॥
यस्य चेष्टितमालोक्य शिथिलीभूतबन्धनाः ।
एते सर्वे वयं मुक्ता भीमात् संसारचारकात् ॥

गुरुरुवाच ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



या विज्ञाता त्वयाप्यस्य जननी शुभसुन्दरी।
यावन्तस्तत्सुतास्तेषां सर्वेषामीदृशं मनः॥
ततो गृहीततत्त्वोऽपि राजर्षिरिदमब्रवीत्।
बोधार्थं मुग्धलोकानां विनयानतमस्तकः॥
किं तस्याः शुभसुन्दर्या विद्यन्ते बहवः सुताः।
अस्माभिश्च पुरा ज्ञातमयमेककपुत्रकः॥

गुरुरुवाच। बाढं विद्यन्ते। तथाहि।

ये ये त्रिभुवनेऽप्यत्र दृश्यन्तेऽनेन यादृशाः।
ते सर्वे शुभसुन्दर्याः पुत्रा नास्त्यत्र संशयः॥

किं च।

ये केचिदुत्तमा लोके सत्वमार्गानुयायिनः।
ते पुत्राः शुभसुन्दर्यास्तुल्या ज्ञेया मनीषिणा॥

राजर्षिरुवाच।

यासौ बालस्य जननी भवद्भिरुपवर्णिता।
भदन्त बालादन्येऽपि तस्याः किं सन्ति सूनवः॥

सूरिणाभिहितं। नितरां सन्ति। तथाहि।

ये ये त्रिभुवनेऽप्यत्र जघन्याः क्लिष्टजन्तवः।
ते तेऽकुशलमालायाः पुत्रा नास्त्यत्र संशयः॥
ते बालसदृशैरेव विज्ञेया दुष्टचेष्टितैः।
एतेऽकुशलमालायाः सूनवः सुपरिस्फुटाः॥

राजर्षिरुवाच। यद्येवं तर्हि।

तस्याः सामान्यरूपायाः किमन्ये सन्ति सूनवः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भदन्त किं वा नो सन्ति मध्यबुद्धेः सहोदराः ॥

सूरिणाभिहितं । बहुतमास्ते विद्यन्ते । यतः ।

ये बालचरिताः केचिन्मनीषिचरिताश्च ये ।
एतेभ्यो ये परे सत्त्वाः सर्वे तेऽस्मुष्य सोदराः ॥

ये केचिच्छबलाचाराः समा मध्यमबुद्धिना ।
सुताः सामान्यरूपायास्ते जीवा भुवनोदरे ॥

सकाशादितराभ्यां ते गण्यमाना जगत्त्रये ।
अनन्तगुणितास्तेन प्रोक्ता भूरितमा मया ॥

राजर्षिरुवाच । भदन्त यद्येवं ततो मम चेतसि परिस्फुरति । यथैवं व्यवस्थिते सत्येतदापन्नं यदुत ।

भार्यात्रयेण जनितं जघन्योत्तममध्यमम् ।
तस्य कर्मविलासस्य जगदेतत्कुटुम्बकम् ॥

सूरिरुवाच ।

"आर्य नैवात्र सन्देहः सम्यगार्येण लक्षितम् ।
मार्गानुसारिणी बुद्धिर्भवत्येव भवादृशाम् ॥

तथाहि ।

जघन्यमध्यमोत्कृष्टाः सर्वयोनिषु जन्तवः ॥
विद्यन्ते केवलं नृत्वे व्यक्तभावा भवन्ति ते ।

ततश्च ।

नरत्वेऽपि विनिर्दिष्टं व्याप्यैवेदं कुटुम्बकम् ।
यदत्र विदुषा कार्यं तदिदानीं निबोधत ॥

त्यक्तव्यं बालचरितं न कार्यस्तत्समागमः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनीषिचरिते यत्नः कर्तव्यः सुखमिच्छता ॥
यतोऽत्र बहवो जीवाः प्रायो मध्यमबुद्धयः ।
ते च सम्यगनुष्ठानात् संपद्यन्ते मनीषिणः ॥
एतद्विज्ञाय भो भव्याः सर्वेऽपि गदिता मया ।
कार्यं मदनुरोधेन वृत्तमस्य मनीषिणः ॥
वर्जनीयश्च यत्नेन पापमित्रैः समागमः ।
यतः स्पर्शनसम्पर्कात् स बालो निधनं गतः ॥
वर्जनेन पुनस्तस्य मनीषी सुपरिस्फुटाम् ।
लोके शेखरतां प्राप्य जातोऽयं मोक्षसाधकः ॥
कल्याणमित्रैः कर्तव्या मैत्री पुंसा हितैषिणा ।
इहामुत्र च विज्ञेया सा हेतुः सर्वसम्पदाम् ॥
दोषायेह कुसंसर्गः सुसंसर्गो गुणावहः ।
एतच्च द्वयमप्यत्र मध्यबुद्धौ प्रतिष्ठितम् ॥

तथा हि ।

बालः स्पर्शनसंबन्धाद्देषोऽभूद्दुःखभाजनम् ।
युक्तोऽभूत्सततालादं एष एव मनीषिणा ॥
तदिदं भो विनिश्चित्य बहिरङ्गान्तरैः सदा ।
न कार्यो दुर्जनैः सङ्गः कर्तव्यः सुजनैः सह ॥

ततश्च ।

इदमाकर्ण्य मौनीन्द्रं वचनं सुमनोहरम् ।
प्रबुद्धा बहवः सत्त्वा जाता धर्मपरायणाः ॥
प्राप्ता देवा निजं स्थानं स्थितो राज्ये सुलोचनः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतोऽन्यत्र विहाराय सूरिः शिष्यगणैः सह ॥

ततश्च ।

विहृत्य कालं भूयांसमागमोक्तेन वर्त्मना ।
पर्यन्तकाले संप्राप्ते विधाय सकलं विधिम् ॥
ज्ञानध्यानतपोवीर्यवह्निनिर्दग्धकल्मषः ।
मनीषी निर्वृतिं प्राप्तो हित्वा स्वं देहपञ्जरम् ॥
ये तु मध्यमसद्वीर्यास्ते तनूभूतकर्मकाः ।
गता मध्यमबुद्ध्याद्या देवलोकेषु साधवः ॥
बालस्य तु यदादिष्टं भदन्तैर्भाविचेष्टितम् ।
तत्तथैवाखिलं जातं नान्यथा मुनिभाषितम् ॥

॥ स्पर्शनकथानकं समाप्तम् ॥

विदुर उवाच । कुमार तदिदं मया ह्यः कथानकमाकर्णित-माकर्णयतश्च मम लङ्घितं दिनं । तेन युष्मत्समीपे नागतोऽस्मि । मयाभिहितं । भद्र सुन्दरमनुष्ठितं । यतोऽतिरमणीयमिदं कथा-नकं बुध्यत एव श्रोतुम् । अहो अत्यन्तदुरन्तः पापमित्रसम्बन्धो यतस्तस्य बालस्य स्पर्शनसम्पर्कादिहामुत्र च निबिडविडम्बनागर्भा दुःखपरंपरैव केवलं संपन्ना नान्यत्किंचनेति । विदुरेण चिन्तितं । बुद्धस्तावदनेन कथानकतात्पर्यार्थ इति । भविष्यति मे वचनाव-काशः ॥ इतश्च तत्रावसरे मत्तो नातिदूरे वर्तते वैश्वानरः । श्रुतं तेन मामकीनं वचनं । चिन्तितमनेन । अये विरूपको नन्दि-वर्धनस्योल्लापो । व्युत्पादितप्रायोऽयमनेन विदुरेण । तत्र सुन्दर-

For Private And Personal Use Only

मिदं वर्तते दुष्टः खल्वेष विदुरो ज्ञापयिष्यत्यस्य मदीयस्वरूप-मिति। साशङ्कः संपन्नो वैश्वानरः॥ विदुरेणाभिहितं। कुमार सत्यमिदं सम्यगवधारितं कुमारेण। अन्यच्च। प्रकृतिरेषा प्रायः प्राणिनां यथा यत्र कुत्रचित्किंचन दृष्टं श्रुतं वा सर्वमात्मविषये योजयन्ति। ततो मयापीदं कथानकमनुश्रुत्य स्वहृदये चिन्तितं। यदुत यदि कुमारस्य कदाचिदपि पापमित्रसम्बन्धो न भवति ततः सुन्दरं संपद्यते। मयाभिहितं। भद्र किमत्र चिन्तनीयं। नास्त्येव मे नापि भविष्यति पापमित्रसम्बन्धगन्धोऽपीति। विदुरः प्राह। वयमप्येतावदेवार्थयामहे। ततः स्थितो मदीयकर्णाभ्यर्णे विदुरः। शनैः शनैरभिहितं चानेन। यदुत केवलमेषोऽपि वैश्वानरो लोकवार्त्तया दुष्टप्रकृतिः श्रूयते। तदयं सम्यक्परीक्षणीयः कुमारेण। मा भूदेष स्पर्शनवद्बालस्य पापमित्रतया भवतोऽनर्थपरंपराकारणमिति।

निरीक्षते च तस्मिन्नवसरे वैश्वानरः साकूतः सन्नभिमुखो मदीयवदनं। लक्षितोऽहमनेन मुखविकारतस्तैर्विदुरवचनैर्दूयमानः। ततः कृता वैश्वानरेण मां प्रति सा पूर्वसाङ्केतिका संज्ञा। भक्षितं मया क्रूरचित्ताभिधानं तद्वटकं। ततस्तत्प्रभावान्मे क्षणेन वृद्धोऽन्तस्तापः। समुल्लसिताः स्वेदबिन्दवो जातं गुञ्जार्धसन्निभं शरीरं संपन्नं विषमदष्टौष्ठं भग्नोग्रभ्रकुटितरङ्गमतिकरालं वक्त्रकुहरं। ततो भद्रे अगृहीतसङ्केते तथा वैश्वानरवटकप्रभावाभिभूतात्मना मया पापकर्मणानाकलय्य तस्य वत्सलतामनालोच्य हितभाषितमवि-गणय्य चिरपरिचयं परित्यज्य स्नेहभावमुररीकृत्य दुर्जनतां सर्वथा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निष्ठुरवचनैस्तिरस्कृतोऽसौ विदुरः। यदुतारे दुरात्मन् निर्लज्जत्वं मां बालकल्पं कल्पयसि तथाचिन्त्यप्रभावोपेतं परमोपकारकमन्तरङ्गभूतं मे वैश्वानरं तथाविधदुष्टस्पर्शनोपमं मन्यसे। अददानस्य च प्रत्युत्तरं विदुरस्य मया दत्ता कपोलदारणी चपेटी। गृहीला महत्फलकं प्रहर्तुमारब्धोऽहं। ततो भयातिरेकप्रकम्पमानगात्रयष्टिर्नष्टो विदुरः। गतस्तातसमीपं। कथितः समस्तोऽपि वृत्तान्तः। ततो निश्चितं स्वमनसि तातेन। यथा न शक्यत एव कथंचिदपि कुमारो वियोजयितुमेतस्माद्वैश्वानरपापमित्रादिति। तदेवं स्थिते यद्भविष्यत्तामेवास्माभिर्मौनेनैव स्थातुं युक्तमिति स्थापितस्तातेन सिद्धान्तः॥

इतश्च निःशेषितं मया कलाग्रहणं। ततो गणितं प्रशस्तदिनं। आनीतोऽहं कलाशालायास्तातेनात्मसमीपं। पूजितः कलाचार्यो दत्तानि महादानानि कारितो महोत्सवः। अभिनन्दितोऽहं तातेनाम्बाभिः शेषलोकैश्च। वितीर्णो मे पृथगावासकः। यथासुखमास्तामेष इति कृत्वा तातेन नियुक्तः परिजनः। समुपहृतानि मे भोगोपभोगोपकरणानि। स्थितोऽहं सुरकुमारवल्लमानः। ततस्त्रिभुवनविलोभनीयोऽमृतरस इव सागरस्य सकललोकनयनानन्दजननश्चन्द्रोदय इव प्रदोषस्य बहुरागविकारभङ्गुरः सुरचापकलाप इव जलधरसमयस्य मकरध्वजायुधभूतः कुसुमप्रसव इव कल्पपादपस्य अभिव्यज्यमानरागरमणीयः सूर्योदय इव कमलवनस्य विविधलास्यविलासयोग्यः कलाप इव शिखण्डिनः प्रादुर्भूतो मे यौवनारम्भः। संपन्नमतिरमणीयं शरीरं। विस्तीर्णी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूतं वचःस्थलं। परिपूरितमूरुदण्डद्वयं अगमत्तनुतां मध्यदेशः। प्राप्तः प्रथिमानं नितम्बभागः। प्रतापवदारूढ़ा रोमराजिः। वैशद्य-मवाप्ते लोचने। प्रलम्बतामुपागतं भुजयुगलं। यौवनसहायेनैवाधि-ष्ठितोऽहं मकरध्वजेन॥ इतश्च स्वभवनाच्चिसन्ध्यं व्रजामि स्माहं राजकुले गुरूणां पादवन्दकः। ततोऽन्यदागतः प्रभाते। कृतं तातस्याम्बादीनां च पादपतनं। अभिनन्दितस्तैराशीर्वादेन। स्थित-स्तत्समीपे कियन्तमपि क्षणं। समागतः स्वभवने निविष्टो विष्टरे यावदकाण्ड एवोल्लसितो राजकुले बहलः कलकलः। ततः किमेतदित्यलक्षिततन्निमित्ततया जातो मे संभ्रमः। प्रस्थितस्तद-भिमुखं यावत्तूर्णमागच्छन्नालोकितो मया धवलाभिधानः सबलो बलाधिकृतः। प्राप्तो मदन्तिकं। प्रणतोऽहमनेन। आह च। कुमार देवः समादिशति। यदुतैतो निर्गतमात्रस्य ते प्रविष्टो मत्समीपे दूतो। निवेदितं च तेन। यथा कुशावर्त्तपुरात् कनक-चूड़राजसूनुः कनकशेखरो नाम राजकुमारो जनकापमाना-भिमानाद्भवत्समीपमागतो गव्यूतमात्रवर्तिनि मलयनन्दने कानने तिष्ठत्येतदाकर्ण्य देवः प्रमाणमिति। ततोऽहं स्वगृहागततया प्रत्यासन्नबन्धुतया महापुरुषतया च प्रत्युद्गमनमर्हति कनक शेखरः कुमार इति आस्थानस्थायिभ्यो राजवृन्देभ्यः प्रख्याप्य एष समुच्चलितः स्वयं तदभिमुखं। कुमारेणापि शीघ्रमागन्तव्य-मित्यहं प्रहितो युष्मदाज्ञानाय। तत्तूर्णं प्रस्थातुमर्हति कुमारस्ततो यदाज्ञापयति तात इति ब्रुवाणश्चलितोऽहं सपरिकरो। मीलित-स्तातबले पृष्टो मया धवलः। कथमेष कनकशेखरोऽस्माकं

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बन्धुरिति। धवलेनाभिहितं। यतो नन्दायाः कनकचूड़ः सहोदरो भवति तेन ते मातुलसूनुरेष भ्रातेति। प्राप्तास्तत्समीपं। कृतं कनकशेखरेण तातस्य पादपतनं। समालिङ्गितस्तातेन मया च। कृतोचिता प्रतिपत्तिः। प्रवेशितो नगरे महानन्दविमर्देन। अभिहितश्च तातेनाम्बया च कनकशेखरो। यथा कुमार सुन्दरमनुष्ठितं यदात्मीयवदनकमलदर्शनेन जनितोऽस्माकं मनोरथानामप्यगम्यो महांश्चित्तानन्दः। तदेतदपि कुमारस्य पैतृकमेव राज्यं। तस्मान्नात्र कुमारेण तिष्ठता विकल्पो विधेय इति। अभिनन्दितं तातावावचनं कनकशेखरेण। समर्पितस्तातेन मदीयभवनाभ्यर्णवर्ती कनकशेखरस्य महाप्रासादः। स्थितस्तत्रासौ। जातोऽस्य मया सह स्नेहभावः। समुत्पन्नो विश्रम्भः। अन्यदा रहसि पृष्टोऽसौ मया। यदुत मयाकर्णितं। किल जनकापमानाभिमानाद्भवतामिहागमनमभूत्तत्कीदृशो जनकेन भवतोऽपमानो विहित इति श्रोतुमिच्छामि। कनकशेखरेणाभिहितम्। आकर्णय।

तातेन चूतमञ्जर्या जनन्यात्यन्तलालितः।
कुशावर्त्तपुरे तावदहमासं कुमारकः॥
अन्यदा मित्रवृन्देन युक्तः केलिपरायणः।
गतः शमावहं नाम काननं नन्दनोपमम्॥
तत्र साधुचिते देशे रक्ताशोकतलस्थितः।
दृष्टो मया महाभागः प्रशान्तो मुनिसत्तमः॥
चीरसागरगम्भीरस्तापनीयगिरिस्थिरः।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिवाकरमहातेजाः शुद्धस्फटिकनिर्मलः ॥
ततः प्रादुर्भवद्भक्तिरहं गत्वा तदन्तिकम्।
प्रणम्य चरणौ तस्य निषणः शुद्धभूतले ॥
वयस्या अपि मे सर्वे प्रणिपत्य मुनीश्वरम्।
उपविष्टा मदभ्यर्णे विनयानम्रमस्तकाः ॥
उपसंहृतसद्ध्यानः स साधुर्दत्तनामकः।
दत्त्वाशीर्मधुरैर्वाक्यैः समस्तान् समभाषत ॥
तदीयवाक्यप्रीतेन मयोक्तं प्रह्वचेतसा।
भदन्त कीदृशः प्रोक्तो धर्मस्तावकदर्शने ॥
अथ प्रह्लादयन्नुच्चैर्मनो मे कलया गिरा।
धर्ममाख्यत्प्रपञ्चेन जैनचन्द्रः स मे मुनिः ॥
तत्रापि प्रथमं तेन साधुधर्मो निवेदितः।
ततस्तदनु विस्तार्य गृहिधर्मः प्रकाशितः ॥

ततश्च।

सम्यग्दर्शनसन्मूलो व्रतस्कन्धो महाफलः।
शमादिशाखो गृहिणां धर्मः कल्पद्रुमोपमः ॥
गृहीतः सवयस्येन गतोऽन्यत्र महामुनिः।
धर्मं पालयतो मेऽसावन्यदा पुनरागतः ॥

इतश्च।

व्युत्पन्नबुद्धिः संजातस्तदाहमपरापरैः।
श्रावकैः सह संसर्गं कुर्वाणो धर्मकाम्यया ॥
अथासौ वन्दितो भक्त्या गत्वोद्याने महामुनिः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पृष्टश्चेदं भदन्तेह किं सारं जिनशासने ॥

मुनिरुवाच ।

अहिंसा ध्यानयोगश्च रागादीनां विनिग्रहः ।
साधर्मिकानुरागश्च सारमेतज्जिनागमे ॥

मया चिन्तितम् ।

सर्वारम्भप्रवृत्तानां मादृशां सुपरिस्फुटम् ।
अहिंसा प्राणिनां तावद्विधातुमतिदुःशका ॥
निष्प्रकम्पमनःसाध्यो ध्यानयोगोऽपि मादृशाम् ।
विषयामिषमूढानां दूराद्दूरतरं गतः ॥
रागादिनिग्रहोऽप्यत्र तत्त्वाभ्यासपरायणैः ।
अप्रमादपरैः शक्यः कर्तुं पुंभिर्न मादृशैः ॥
साधर्मिकानुरागस्तु यो भदन्तेन साधितः ।
स कदाचिद्विधीयेत मादृशैरपि जन्तुभिः ॥
तदत्र यत्नः कर्तव्यो यथाशक्ति मयाधुना ।
यतः सारमनुष्ठेयं नरेण हितमिच्छता ॥
एवं निश्चित्य चित्तेन वन्दित्वा तं मुनीश्वरम् ।
प्रवर्धमानसंवेगस्ततोऽहं गृहमागतः ॥
इतश्चैकसुतत्वेन जीवितादपि वल्लभः ।
अहं तातस्य सर्वत्र यथेच्छाकरणक्षमः ॥
विनयं राजनीतिं च अनुवर्तयता मया ।
तथापि तातः प्रच्छन्नं प्रार्थितो न तथा गिरा ॥

तद्यथा ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करिष्येऽहं यथाशक्ति वात्सल्यं जैनधर्मिणाम् ।
तात तत् कुर्वतो यूयमनुज्ञां दातुमर्हथ ॥

दूतश्च ।

मत्सङ्गेनैव तातोऽपि भद्रको जिनशासने ।
ततः सा मामिका तस्य प्रार्थना रुचिरा मता ॥

आह च ।

राज्यं पुत्र तवायत्तमायत्तं तव जीवितम् ।
स्वाभिप्रेतमतः कुर्वन्न त्वं मां प्रष्टुमर्हसि ॥
ततोऽहं हर्षपूर्णाङ्गः पतितस्तातपादयोः ।
महाप्रसाद इत्येवं ब्रुवाणः प्रीतमानसः ॥
ततः प्रभृति सर्वोऽपि यो नमस्कारधारकः ।
सोऽन्यजोऽपि निजे देशे बन्धुबुद्ध्या मयेक्षितः ॥
भोजनाच्छादनैर्दिव्यैरलङ्कारैः सरत्नकैः ।
धनेन च यथाकामं भृतः साधर्मिको जनः ॥

अन्यच्च ।

अर्हतो यो नमस्कारं धत्ते पुण्यधनो जनः ।
स देशे घोषणापूर्वं विहितोऽकरदो मया ॥
साधवः परमात्मानः साध्व्यः परमदेवताः ।
गुरवः श्रावका लोका ममेति ख्यापितं मया ॥
जिनेन्द्रशासने भक्तिं यः कश्चित् कुरुते जनः ।
आनन्दजलपूर्णाक्षस्तमहं बहुशः स्तुवे ॥
यात्रास्नात्रमहोत्सर्गे प्रमोदमुदिताशयाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विचरन्ति स्म जैनेन्द्रास्तत: सर्वत्र सज्जनाः ॥
तथाभिनवधर्माणो ये मौनीन्द्रमते स्थिताः ।
कृता विशेषतस्तेषां सपर्या भावतो मया ॥
ततो मदनुरागेण लोका धर्मपरायणाः ।
बहवस्तत्र संपन्ना यथा राजा तथा प्रजाः ॥
अथ तं तादृशं वीक्ष्य प्रमोदं जिनशासने ।
अमात्यो दुर्मुखो नाम पापः प्रद्वेषमागतः ॥
ततो रहसि तातस्य स दुरात्मा हितः किल ।
युष्मभ्यमहमित्येवं प्रख्याप्य शठमानसः ॥
इदं न्यवेदयद्देव नैवं राज्यस्य पालना ।
उच्छृङ्खलीकृताः सर्वे कुमारेण यतो जनाः ॥
नातिक्रामन्ति मर्यादां लोका हि करभीरवः ।
ते मुक्ता मुत्कलाचाराः कमनर्थं न कुर्वते ॥
राजदण्डभयादेव देव लोको निरङ्कुशः ।
उन्मार्गप्रस्थितस्तूर्णं करीव विनिवर्तते ॥
उद्दण्डोऽनार्यकार्येषु वर्तमानः स केवलम् ।
प्रतापहाने राज्ञोऽपि लाघवं जनयत्यलम् ॥
अन्यच्चात्राधुना भूरिलोको जैनेमते स्थितः ।
कः कुमारप्रसादार्थी नाश्रयेत्तंसकर्णकः ॥

एवं च ।

करहीने जने जाते यथेष्टप्रविचारिणि ।
कस्माच्च यूयं राजानः किं वा राज्यं विनाज्ञया ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदिदं यत् कुमारेण देव प्रारम्भ्यलौकिकम्।
राजनीतेः समुत्तीर्णं बुध्यते तन्न सुन्दरम्॥
तातः प्राहार्य यद्येवं स्वयमेवोच्यतां त्वया।
कुमारो न वयं तस्य सम्मुखं भाषितुं क्षमाः॥

ततश्च।

तातानुज्ञामवाप्यैवं दुर्मुखो मामभाषत।
कुमार नेदृशी नीतिर्नृपतेर्लोकपालने॥

यतः।

करापीतजगत्सारो महसा व्याप्तभूतलः।
राजा दिनकराकारो लोकस्योपरि तिष्ठति॥
यस्तु प्राकृतलोकस्य वशगः स्यान्महीपतिः।
तस्य स्यात्कीदृशं राज्यं को वा न्यायस्तदाज्ञया॥
राजदण्डभयाभावात्ततो लोका निरङ्कुशाः।
दुष्टचेष्टितमार्गेषु प्रवर्तन्ते यथेच्छया॥

तदेवं स्थिते।

आदितः करदण्डाभ्यां यस्तान्नो शास्ति भूपतिः।
तेनैव परमार्थेन स कृतो धर्मसम्प्लवः॥
कुमार तदिदं ज्ञात्वा राजधर्मव्यतिक्रमात्।
नालीकधर्मवात्सल्यं युक्तं कर्तुं भवादृशाम्॥
ततः प्रादुर्भवत्कोपविक्लवीभूतचेतसा।
आकारसंवरं कृत्वा मया तं प्रति भाषितम्॥
आर्य युक्तमिदं वक्तुमेव मां प्रति यद्यहम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुष्टवष्टादिलोकस्य कुर्यां सन्मानपूजनम् ॥
ये तु स्वगुणमाहात्म्याद्देवानामपि पूजिताः ।
तेषां यथेच्छादानेऽपि नैतत्संबध्यते वचः ॥

तथा हि ।

ये चौर्यपारदार्यादेः सर्वस्माद्दुष्टचेष्टितात् ।
स्वत एव महात्मानो निवृत्ताः सर्वभावतः ॥
तेषां जैनेन्द्रलोकानां दण्डः स्यात् कुत्र कारणे ।
दण्डबुद्धिर्भवेत्तेषु यस्यासौ दण्डमर्हति ॥
करोऽपि रक्षणीयेषु लोकेषु ननु बुध्यते ।
तस्यापि नोचिता जैना ये गुणैरेव रक्षिताः ॥
अतः किङ्करतां मुक्त्वा नान्यत्किंचन भूभुजाम् ।
विधातुं युक्तमेतेषां सेवास्माभिर्विधीयते ॥
येषां नाथो जगन्नाथो भगवांस्तेषु किङ्करः ।
यः स्याद्राजा स एवात्र राजा शेषास्तु किङ्कराः ॥
एवं चाचरता ब्रूहि राजनीतेर्विलङ्घनम् ।
किं मया विहितं येन भवानेवं प्रजल्पति ॥

किं च ।

अलीकधर्मवात्सल्यं मदीयं वदता त्वया ।
परिस्फुटीकृतं नूनं दुर्मुखत्वमिहात्मनः ॥

एवं च वदति मयि लक्षितो दुर्मुखेण मदीयोऽभिप्रायः । चिन्तितमनेन । अये अर्हद्दर्शने निर्भरोऽस्यानुरागः । अनिवर्तकश्चित्तप्रसरः । कुपितश्चायं मदीयवचसा । तदलमनेनाधुना गाढ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तरमुद्देजितेन । प्रगुणीकृत एवाचार्यं मया राजा । ततः स्वयमेव स्वाभिमतमनुष्ठास्यामि । साम्प्रतं पुनरेनमनुलोमयामीति संचिन्त्या- भिहितमनेन । साधु कुमार साधु । सुन्दरस्ते सद्धर्मस्थैर्यातिरेकः । मया हि भवतश्चित्तपरीक्षणार्थं सर्वमिदमुपक्रान्तं । ततश्च सुनि- श्चितमधुना । यदुत तावकीनं मन । स्थिरतया मेरुशिखरमप्यधर- यति । तन्नेदं मदीयवचनं कुमारेणान्यथा सम्भावनीयं । मयाभि- हितम् । आर्य किमत्र वक्तव्यं । अविषयो भवादृशा अन्यथासम्भाव- नायाः । ततो निर्गतो मत्समीपाद्दुर्मुखः । मया चिन्तितं । शठ- प्रकृतिरेष दुर्मुखः पापात्मा च । तन्न विज्ञायते किमयमाचरिष्यति । यतो महताकूतेन प्रथममनेन मन्त्रितं पश्चादतिलरया कृतमाकार- संवरणम् । अतो निरूपयामस्तावत् । ततः प्रयुक्तो मया प्रणिधि- श्चतुरो नामाप्तदारकः ॥ गतेषु कतिचिद्दिनेषु समागतोऽसौ मत्समीपं । निवेदितमनेन । यथा स्वामिन् तावदितो निर्गतोऽहं विनयेनाराध्य दुर्मुखं संपन्नस्तस्याङ्गरक्षकः । ततो दुर्मुखेण रहसि समाहूय समस्तस्थानेभ्यः प्रधानश्रावकानिदमभिहितं । यदुत अरे एष कनकशेखरकुमारोऽलीकधर्मग्रहग्रहीतो राज्यं विनाशयति लग्नः । ततो युष्मभ्यमितः प्रभृति यदेष किंचित् प्रयच्छति यश्च राजभागसद्भूतो भवतां करस्तद्द्वयमपि प्रच्छन्नमेव मम समर्पणीयं न च कुमाराय निवेदनीयमितरथा नास्ति भवतां जीवितमिति । श्रावकैरुक्तं । यदाज्ञापयति महामात्यः । ततो निर्गतास्ते । मया- भिहितं तास्ते । भद्र अपि ज्ञातमेतत्तातेन । चतुरः प्राह । ज्ञातं । मयोक्तं । कुतः सकाशात् । चतुरेणोक्तं । तत एव दुर्मुखात् । मया-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिहितं । ततः किमाचरितं तातेन । चतुरः प्राह । न किंचित् केवलं कृता गजनिमीलिका । ततो मया चिन्तितं । यद्येष दुर्मुखः केवल एव तातस्यानभिप्रेतमिदमकरिष्यत्ततोऽहमदर्शयिष्यमस्य यदीदृशस्याविनयस्य फलं । यदा तु परकृतमनुमतमप्रतिषिद्धमिति न्यायात् तातेनापीदं गजनिमीलिकां कुर्वताभिमतमेव तदा किमत्र कुर्मः । यतो दुष्प्रतिकारौ मातापितरावित्याख्यातं भगवता । ततो न युक्तं तावत्तातेन सह विग्रहकरणं नापीदमीदृशमिदानीं द्रष्टुं शक्यं । तस्मादितोऽपक्रमणमेव श्रेयः । इत्यालोच्य कस्यचिदप्यकथयित्वा आप्तमित्रवृन्देन सहापक्रान्तोऽहं समागतोऽत्रेति । तदेष मे जनकेनापमानो विहित इति ॥

मयाभिहितं । कुमारसुन्दरमनुष्ठितं भवता । न युक्त एवाभिमानशालिनां पुरुषाणां मानम्लानिकारिभिः सहैकत्र निवासः । तथाहि ।

भास्करस्तावदेवास्ते गगने तेजसां निधिः ।
निर्धूय तिमिरं यावत् कुरुते स जनोत्सवम् ॥
यदा तु लङ्घयत्येष तमसोऽपि महोदयम् ।
तदापरसमुद्रादौ गत्वा कालं प्रतीक्षते ॥

ततस्तुष्टो मद्वचनेन कनकशेखरः । तदेवं परस्परप्रीत्या गतं दशरात्रं । अत्रान्तरे मन्नवने तिष्ठतोरावयोः समागतो वेदकः । प्रणतिपूर्वकमभिहितमनेन । यदुत कुमारौ देवः समाज्ञापयति । शीघ्रमागन्तव्यं कुमाराभ्यामिति । ततो यदाज्ञापयति तात । इत्यभिधायावां गतौ तातसमीपे यावदतिरभसवशेन तातास्थाना-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्याथ गलदानन्दोदकप्रवाहक्षालितनयनयुगलास्त्रयः प्रधानपुरुषाः समागत्य सपरिकराः पतिताः कनकशेखरचरणयोः। ततः साकूतमये कैते सुमतिवराङ्गकेशरिण इति वदता सस्नेहमूर्ध्वीकृत्य समालिङ्गिताः कनकशेखरेण। मयोक्तं। कुमार क एते। कनकशेखरः प्राह। मदीयजनकमहत्तमा इति। ततः कृतप्रतिपत्तयः समुपविष्टाः सर्वेऽपि तातास्यर्णे। तातः कनकशेखरं प्रत्याह। कुमार एतैस्त्वदीयजनकमहत्तमैराख्यातं। यथा यतः प्रभृति कुमारोऽनाख्याय निर्गतो गेहात् तत आरभ्य राजा कनकचूडः परिजनसकाशान्न दृश्यते क्वापि कुमार इत्याकर्ण्य सहसा वज्राहत इव पिष्ट इव परायत्त इव मत्त इव मूर्छित इव न किंचिच्चेतयते स्म। देवी च चूतमञ्जरी प्रविष्टा महामोहं मृतेव स्थिता मुहूर्तं। कृतं परिजनेन द्वयोरपि व्यञ्जनचन्दनादिभिराश्वासनं। ततो हा पुत्रक क्व गतोऽसीति प्रलपितुं प्रवृत्तौ तौ देवीनृपौ। ततः परिजनस्यापि समुल्लसितो महानाक्रन्दरवः मिलितं मन्त्रिमण्डलं। अभिहितमनेन। देव नायमत्रोपायः। ततो मुञ्च विषादं अवलम्बस्व धैर्यं क्रियतां यत्नः कुमारान्वेषणे। राजा न तद्वचनं वेदयते स्म। ततश्चतुरेण चिन्तितं। शोकातिरेकेण त्यक्ष्यति देवः प्राणान्। ततो नाधुना ममोपेक्षा कर्तुं युक्ता। ततः पादयोर्निपत्य तेन राज्ञे निवेदितं सकारणं तदीयमपक्रमणं। ततो जीवति कुमार इति कृत्वा प्रत्यागता राज्ञश्चेतना। पृष्टश्चतुरः क्व पुनर्गतः कुमार इति। चतुरेणाभिहितं। न मे किंचिदाख्यातं कुमारेणापक्रमणकारणमिति। चतुरतया मया लक्षितं केवलमेतावद्वितर्कयामि। यदुत जयस्थले

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितृष्वसुः समीपे गतो भविष्यति । वल्लभा हि नन्दा कुमारस्य वत्सलः पद्मराजः । कुमारपरिचयादेवावगतमिदं मया । इतो निर्गतस्य तत्रैव चित्तनिर्वाणं नान्यत्रेति॥ ततः साधु चतुर विज्ञातं साध्विति वदता दापितं चतुराय पारितोषिकं महादानं राज्ञा । अयमस्यानर्थव्यतिकरस्य हेतुरिति कृत्वा निर्वासितः स्वविषयात्स-गोत्रो दुर्मुखः । प्रतिज्ञातं च देवीनृपाभ्यां । यथा यावत् कुमारवदनं साचान्नावलोकितं तावन्नैवावाभ्यामाहारशरीरसंस्कारा-दिकं करणीयमिति ।

इतश्च तत्रैव दिने प्रविष्टो दूतः । तेन च विहितोचितप्रति-पत्तिना निवेदितं कनकचूडाय । यथा देव अस्ति विशाला नाम नगरी । तस्यां नन्दनो नाम राजा । तस्य च द्वे भार्ये प्रभावती पद्मावती च। तयोश्च यथाक्रमं द्वे दुहितरौ विमलानना रत्नवती च । इतश्च कनकपुरे प्रभावत्याः सहोदरोऽस्ति प्रभाकरो नाम राजा। तस्य बन्धुसुन्दरी नाम भार्या । तस्याश्च विभाकरा-भिधानस्तनयः। तयोश्च प्रभाकरपद्मावत्योः पूर्वमजातयोरेव विभा-करविमलाननयोः परस्परमभूज्जल्पः। यदुतावयोर्यस्य कस्यचिद्दु-हिता जायेत तेनेतरसम्बन्धिने सुताय सा देयेति । अतः पूर्व-प्रतिपन्ना सा विमलानना विभाकरस्य । अन्यदा गुणसंभारगर्भ-निर्भरं वन्दिभिरुद्घुष्यमाणं श्रुतं तया कनकशेखरकुमारनामकं । ततस्तदाकर्ण्य सा विमलानना कुमारे विजृम्भितरागातिरेका निज-यूथपरिभ्रष्टेव हरिणिका सहचरवियुक्तेव चक्रवाकिका नाकनिर्वा-सितेव देवाङ्गनिका मानससरःसमुत्कण्ठितेव कलहंसिका स्लहवि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रहितेव द्यूतकरी शून्यहृदयतया न वादयति वीणां न विलसति कन्दुकलीलया न विधत्ते पत्रच्छेदादिकं नाभ्यस्यति चित्रादिकलाः न कुरुते शरीरस्थितिं न ददाति कस्यचिदालापं न लक्षयति रात्रिन्दिनं केवलं निष्पन्दमन्दनिश्चललोचना परमयोगिनीव निरालम्बनं किमपि ध्यायन्ती तिष्ठति । ततः पर्याकुलीभूतः परिकरो न जानीते तादृशविकारस्य कारणं । ततोऽतिवल्लभत्वेन सदा सन्निहितया लक्षितोऽसौ रत्नवत्या विकारहेतुः । यत-श्चिन्तितं तया । अये कनकशेखरकुमारनामग्रहणादनन्तरमिदमव-स्थान्तरमस्याः संपन्नमतो निश्चितमेतत्तेनैव प्रियभगिन्या मनश्चो-रितं । तदिदमत्र प्राप्तकालं । निवेदयाम्येवंस्थितमेव तताय । येन तात एव तस्य प्रियभगिनीचित्तचौरस्य निग्रहं करोतीति विचिन्त्य निवेदितं तया सर्वं नन्दननरपतये । चिन्तितमनेन । दत्तेवेयं जनन्या विभाकराय तथापि नान्यथाधुनास्या जीवितमिति कृत्वा प्रेषयामि तस्यैव कनकशेखरस्य स्वयंवरामेनां । यतो नेदृशा-वस्थायामस्यां युक्तः कालविलम्बः । पश्चादेव विभाकरं संभालयि-ष्यामः । ततो वत्से धीरा भव मुञ्च विषादं गच्छ कुशावर्त्ते कनक-शेखरायेति मधुरवचनैरालप्य देवेन सह परिजनेन प्रस्थापिता तत्र विमलानना । रत्नवत्यापि विज्ञापितो देवः । यथा तात नाहमनया रहिता क्षणमपि जीवितुमुत्सहे । ततो मयापि यात-व्यमित्यनुजानीत यूयं । केवलं न मम कनकशेखरो भर्ता । यतः सापत्न्यं नारीणां महदेव स्नेहत्रोटकारणं । ततो मया तदिष्टस्य वयस्यस्य कस्यचिद्भार्यया भाव्यमिति । देवेनाभिहितं । वत्से यत्ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोचते तदेव समाचर। न खलु वत्सा स्वयमेवानुचितमाचरिष्यति। ततो महाप्रसाद इति वदन्ती प्रवृत्ता रत्नवती । ततोऽनवरतप्रयाणकैः प्राप्ते ते विमलाननारत्नवत्यौ अद्यास्मिन्नगरे स्थिते बहिरुद्याने । प्रहितोऽहममुमर्थं विज्ञापयितुं देवपादमूलमेतदाकर्ण्य देवः प्रमाणमिति ।

ततस्तद्दूतवचनमाकर्ण्य कनकचूडराजा हर्षविषादपूरितहृदयः कन्यावासकदानार्थं व्यापार्य शूरसेनं बलाधिकृतमस्मान् सुमतिवराङ्गकेसरिणः प्रधानमहत्तमान् प्रत्याह । पश्यताहो परमानन्दकारणमपीदमस्माकं नन्दनराजदुहितोरागमनं कुमारविरहानलसर्पिष्प्रक्षेपकल्पतया क्षते क्षारनिषेकतुल्यं प्रतिभासते । तद्गच्छत शीघ्रं यूयं जयस्थले । निश्चितमेतत्तत्रैवास्ते कुमारः । निवेदयत पद्मनृपतये मदीयावस्थां कन्यागमनं च । कारणद्वयमवगम्य प्रहेष्यत्येव कुमारं पद्मराजः । अन्यच्च नन्दिवर्धनकुमारोऽपि पद्मराजमनुज्ञाप्य युष्माभिरानेयो यतः स एवोचितो वरो रत्नवत्याः । ततोऽस्माभिरभिहितं । यदाज्ञापयति देवः । ततश्चेहामुना प्रयोजनेन समागता वयमिति ॥ तदिदं सर्वमस्मभ्यमेतैराख्यातं । तदेवं स्थिते यद्यपि युष्मद्विरहकातरहृदयतया नेदमस्माभिरभिधातुं शक्यं तथापि महाप्रयोजनमित्याकलय्याभिधीयते । यदुत मा कुरुताधुना कालविलम्बं गच्छतातित्वरया कुशावर्त्ते जनयतं द्वावपि युवां कनकचूडराजचित्तानन्दमिति । ततः शोभनमाज्ञापितं तातेन भविष्यत्येव कनकशेखरेण सह ममावियोग इति चिन्तयता मया कनकशेखरेण चाभिहितं । यदाज्ञापयति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तातः। ततस्तोषनिर्भरेण तातेन तस्मिन्नेव चणे सज्जीकारितं प्रस्थानोचितं चतुरङ्गं बलं। नियुक्ता महत्तमाः। कारिताशेषमाङ्गलिककर्तव्यौ प्रस्थापितावावामिति। प्रवृत्तोऽन्तरङ्गपरिजनमध्ये मया सहाभिव्यक्तरूपो वैश्वानरः। पुण्योदयोऽपि प्रवृत्त एव केवलं प्रच्छन्नरूपतया। ततो दत्तं प्रयाणकं लङ्घितः कियानपि मार्गः। इतश्च निवासस्थानं दुष्टलोकानां उत्पत्तिभूमिरनर्थवेतालानां द्वारभूतं नरकस्य कारणं भुवनसन्तापस्य तस्करपल्लिप्रायमस्ति रौद्रचित्तं नाम नगरम्।

तथाहि।

उत्कर्तनशिरश्छेदयन्त्रपीडनमारणैः।
ये भावाः सत्त्वसङ्घस्य घोराः सन्तापकारिणः॥
ते लोकास्तत्र वास्तव्या रौद्रचित्तपुरे सदा।
तस्मात्तद्दुष्टलोकानां निवासस्थानमुच्यते॥
कलहः प्रीतिविच्छेदस्तथा वैरपरम्परा।
पितृमातृसुतादीनां मारणे निरपेक्षता॥
ये चान्येऽनर्थवेताला लोके सम्भावनातिगाः।
ते रौद्रचित्ते सर्वेऽपि संपद्यन्ते न संशयः॥
उत्पत्तिभूमिस्तत्तेषां पत्तनं तेन गीयते।
यथा च नरकद्वारं तथेदानीं निगद्यते॥
ये सत्त्वा नरकं यान्ति स्वपापभरपूरिताः।
ते तत्र प्रथमं तावत्प्रविशन्ति पुराधमे॥
अतः प्रवेशमार्गत्वात्तस्य निर्मलमानसैः।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गीतं तन्नरकद्वारं रौद्रचित्तपुरं जनैः ॥
ये जीवाः क्लिष्टकर्माणो वास्तव्यास्तत्र पत्तने ।
ते स्वयं सततं तीव्रदुःखग्रस्तशरीरकाः ॥
तथा परेषां जन्तूनां दुःखसङ्घातकारिणः ।
अतो भुवनसन्तापकारणं तदुदाहृतम् ॥
किं वात्र बहुनोक्तेन नास्ति प्रायेण तादृशम् ।
रौद्रचित्तपुरं यादृग्भुवनेऽपि पुराधमम् ॥

तत्र रौद्रचित्तनगरे सङ्ग्रहपरश्चौराणां परमशत्रुः शिष्टलोकानां विषमशीलः प्रकृत्या विलोपको नीतिमार्गस्य चरटप्रायो दुष्टाभिसन्धिर्नाम राजा । तथा हि ।

मानोग्रकोपाहङ्कारशाठ्यकामादितस्कराः ।
दुष्टाभिसन्धिं सर्वेऽपि नरेन्द्रं पर्युपासते ॥
अतोऽन्तरङ्गचौराणां तेषां पोषणतत्परः ।
स राजा गीयते लोकैश्चौरसङ्ग्रहणे रतः ॥
सत्यशौचतपोज्ञानसंयमप्रशमादयः ।
ये चापरे सदाचाराः शिष्टलोका यशस्विनः ॥
दुष्टाभिसन्धिः सर्वेषां तेषामुन्मूलने रतः ।
अतोऽसौ परमः शत्रुः शिष्टानामिति गीयते ॥
बह्वीभिर्वर्षकोटीभिर्धर्मध्यानं यदर्जितम् ।
लोकेन तद्धरत्येष क्षणमात्रेण दारुणः ॥
न चास्य तोषणोपायो मुग्धलोकैर्विभाव्यते ।
अतो विषमशीलोऽसौ प्रकृत्या प्रतिपाद्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वाः सन्नीतयस्तावत्प्रवर्तन्ते जगत्त्रये ।
दुष्टाभिसन्धिर्नो यावत्तासां विघटको भवेत् ॥
प्रादुर्भावे पुनस्तस्य क्व धर्मः क्व च नीतयः ।
तेनासौ नीतिमार्गस्य धौरेयैर्गीतो विलोपकः ॥

तस्य च दुष्टाभिसन्धिनरेन्द्रस्यानभिज्ञा परवेदनानां कुशला पापमार्गे वत्सला चरटवृन्दस्यानुरक्तचित्ता निजे भर्तरि पूतनाकारा निष्करुणता नाम महादेवी । तथा हि ।

दुष्टाभिसन्धिना तेन नानाकारैः कदर्थनैः ।
चिरं कदर्थितं दीनं लोकमालोक्य सस्मिता ॥
सा निष्करुणता देवी दुःखं गाढतरं ततः ।
जनयेत्तस्य नो वेत्ति तेन सा परवेदनाम् ॥
नेत्रोत्पाटशिरश्छेदनासिकाकर्णकर्तनम् ।
उत्कर्तनं त्वचोऽङ्गस्य खदिरस्येव कुट्टनम् ॥
ये चान्ये जन्तुपीडायाः प्रकारास्तेषु कौशलात् ।
सा निष्करुणता देवी पापमार्गे विचक्षणा ॥
ये ये भुवनसन्तापकारिणो दुष्टवष्टकाः ।
रौद्रचित्तपुरे लोकाः सन्ति द्रोहादयः खलाः ॥
ते तेऽतिवल्लभास्तस्यास्ते ते सर्वखनायकाः ।
अतश्चरटवृन्दस्य देवी सात्यन्तवल्लभा ॥
दुष्टाभिसन्धिराजेन्द्रं तं भर्तारं दिवानिशम् ।
मन्यते परमात्मानं सा शुश्रूषापरायणा ॥
न मुञ्चति च तद्देहं संवाहयति तद्बलम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनुरक्ता निजे पत्यौ सा देवी तेन वर्ण्यते ॥

तस्याश्च निष्करुणताया महादेव्या अभिवृद्धिहेतुस्तस्य रौद्रचित्तपुरस्य वल्लभा तन्निवासिजनानां विनीता जननीजनकयोरतिभीषणा स्वरूपेण साक्षात्कालकूटसम्पुटघटितेव हिंसा नाम दुहिता । तथा हि ।

यतः प्रभृति सा जाता कन्यका राजमन्दिरे ।
तत आरभ्य तत्सर्वं पुरं समभिवर्धते ॥
राजा पुष्टतरीभूतो देवी स्थूलत्वमागता ।
अतोऽभिवृद्धिहेतुः सा पत्तनस्य सुकन्यका ॥
ईर्ष्याप्रद्वेषमात्सर्यचण्डत्वाप्रशमादयः ।
प्रधाना ये जनास्तत्र पुरे विख्यातकीर्तयः ॥
तेषामानन्दजननी सा हिंसा प्रविलोकिता ।
स्थिता परापरोत्सङ्गे संचरन्ती करात्करे ॥
चुम्ब्यमाना जनैर्नोच्चैर्वल्गभ्रमीति निजेच्छया ।
सा तन्निवासिलोकस्य तेनोक्तात्यन्तवल्लभा ॥
दृष्टाभिसन्धिनृपतेर्वचनं नातिवर्तते ।
सा निष्करुणतादेव्या वचनेन प्रवर्तते ॥
शुश्रूषातत्परा नित्यं तयोर्हिंसा सुपुत्रिका ।
जननीजनकयोस्तेन सा विनीतेति गीयते ॥
भीषणा सा स्वरूपेण यच्चाभिहितमञ्जसा ।
तदिदानीं मया सम्यक्कथ्यमानं निबोधत ॥
अपि सा नाममात्रेण त्रासकम्पविधायिका ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वेषामेव जन्तूनां किं पुनः प्रविलोकिता ॥
साधोमुखेन शिरसा नरकं नयति देहिनः।
सा संसारमहावर्तगर्तसंपातकारिका ॥
सा मूलं सर्वपापानां सा धर्मध्वंसकारिणी।
सा हेतुश्चित्ततापानां सा शास्त्रेषु विगर्हिता ॥
किंचेह बहुनोक्तेन नास्त्येव ननु तादृशी।
लोकेऽपि दारुणाकारा सा हिंसा हन्त यादृशी ॥

इतश्चास्ति तामसचित्तं नाम नगरं। तत्र महामोहतनयो द्वेषगजेन्द्रो नाम नरेन्द्रः प्रतिवसति। इतश्च या प्रागाख्याता वैश्वानरस्य जननी मम धात्री अविवेकिता नाम ब्राह्मणी सा तस्य द्वेषगजेन्द्रस्य भार्या भवति। सा च केनचित्प्रयोजनेन ततस्तामसचित्तान्नगराद्गर्भस्थिते सति वैश्वानरे तत्र रौद्रचित्तपुरे समागतासीत्। यादृक् तत्तामसचित्तं नगरं यादृशोऽसौ द्वेषगजेन्द्रो राजा यादृशी साविवेकिता यच्च तस्यास्तामसचित्तनगराद्रौद्रचित्तपुरं प्रत्यागमनप्रयोजनमेतत् सर्वमुत्तरत्र कथयिष्यामः। केवलं भद्रेऽगृहीतसङ्केते न तदास्य व्यतिकरस्याहं गन्धमपि ज्ञातवान्। इदानीमेवास्य भगवतः सदागमस्य प्रसादादिदं समस्तं मम प्रत्यक्षीभूतं। तेन तुभ्यं कथयामि।

ततः साविवेकिता तत्र रौद्रचित्तपुरे स्थिता कियन्तमपि कालं। जातो दुष्टाभिसन्धिना सह परिचयः। यतो द्वेषगजेन्द्रप्रतिबद्ध एवासौ दुष्टाभिसन्धिश्चरटनरेन्द्रः ततोऽविवेकितायाः किङ्करभूतो वर्तते। ततः साविवेकिता मां मनुजगतौ समा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतमवगम्य ममोपरि स्नेहवशेनागत्य ततो रौद्रचित्तपुरात् स्थिता सन्निहिता । जातोऽस्या मम जन्मदिने वैश्वानरो वृद्धिं गतः क्रमेण । कथितस्तया तस्मै सर्वोऽप्यात्मीयः स्वजनवर्गः । ततस्तस्य वैश्वानरस्य तत्र मार्गे मया सह गच्छतः समुत्पन्नैवम्भूता बुद्धिः । यदुत नयाम्येनं नन्दिवर्धनकुमारं रौद्रचित्तपुरे । दापयाम्यस्मै दुष्टाभिसन्धिना तां हिंसाकन्यकां । ततस्तया परिणीतया ममैष सर्वप्रयोजनेषु गाढतरं निर्व्यभिचारो भविष्यति । ततो विचिन्त्य तेनैवमभिहितोऽहं तत्र गमनार्थं । मयोक्तं । कनकशेखरादयोऽपि गच्छन्तु । वैश्वानरः प्राह । कुमार नामीषां तत्र गमनप्रसरो यतोऽन्तरङ्गं तद्रौद्रचित्तं नगरं । ततो विना परिजनेन मत्सहाय एव कुमारस्तत्र गन्तुमर्हति । ततस्तदाकर्ण्याहमलङ्घनीयतया तद्वचनस्य गुरुतया तत्र स्नेहभावस्य अज्ञानोपहततया चित्तस्यानाकलय्य तस्य परमशत्रुतां अपर्यालोच्यात्महिताहितं अदृष्टाप्यागामिनीमनर्थपरंपरां गतो वैश्वानरेण सह रौद्रचित्तपुरे । दृष्टो दुष्टाभिसन्धिः । दापिता वैश्वानरेण मह्यं तेन हिंसा । परिणीता क्रमेण । कृतमुचितकरणीयं ॥

ततः प्रहितो दुष्टाभिसन्धिना सहितो हिंसावैश्वानराभ्यां मिलितोऽहं कनकशेखरादिबले । गच्छतां मार्गे प्रारब्धः सहर्षेण वैश्वानरेण सह जल्पः । यदुत कुमार कृतकृत्योऽहमिदानीं । मयोक्तं । कथम् । स प्राह । यदेषा परिणीता कुमारेण हिंसा । केवलमेतावदधुनाहं प्रार्थये यद्येषा कुमारस्य सततमनुरक्ता भवति । मयाभिहितं । कः पुनरेवंभवनेऽस्या उपायो भविष्यति । वैश्वानरः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततोऽभिहितमनेन। आर्य त्वमेवात्र सर्वाधिकारी चमः सर्वेषामुचितकर्तव्यानां। तत्किमेतैरपरमुचितं कर्तव्यं। विमलमतिराह। देव यद्देवपादैः कर्तुमारब्धं तदस्माकमेतेषां च सर्वेषामस्य कालस्योचितं कर्तव्यं नापरं। यतः समान एवायं न्यायः सर्वेषां वर्तते। निवेदितान्येव हि भगवता सर्वेषामेव जीवानामेकैकस्य त्रीणि त्रीणि कुटुम्बकानि। तस्मादेषामप्यस्य कालस्येदमेवोचितं। यदुत प्रथमकुटुम्बकं पोष्यते द्वितीयं हन्यते तृतीयं परित्यज्यत इति। नृपतिनाभिहितं। आर्यातिसुन्दरमिदं यद्येतेऽपि प्रतिपद्यन्ते। विमलमतिराह। देव पथ्यमिदमत्यन्तमेतेषां। किमत्र प्रतिपत्तव्यं॥ ततस्तदाकर्ण्य तत्र परिषदि जीवा बलादेषोऽस्मान् प्रव्राजयतीति भावनया भयोत्कर्षेण कम्पिताः कातराः प्रद्विष्टा गुरुकर्मकाः प्रपलायिता नीचा विक्लवीभूता विषयगृध्नवः प्रखिन्नाः कुटुम्बादिप्रतिबद्धबुद्धयः प्रह्लादिता लघुकर्मका अभ्युपगतवन्तस्तद्वचनं धीरचित्ता इति। ततस्तैर्लघुकर्मधीरचित्तैरभिहितं। यदाज्ञापयति देवस्तदेव क्रियते। कः सकर्णकः सत्यां समग्रसामग्र्यामेवंविधमार्याद्भ्रश्यतीति। तदाकर्ण्य हृष्टो राजा। गताः सर्वेऽपि अभ्यर्णवर्तिनि प्रमोदवर्धने चैत्यभवने। स्नापितानि भुवननाथस्य भगवतो बिम्बानि। विरचिता मनोहारिणी पूजा। प्रवर्तितानि महादानानि कारितं बन्धनमोचनादिकं समस्तमुचितकरणीयं। समाहूतः श्रीधराभिधानो नगरान्निजतनयः। दत्तं तस्मै राज्यं नरपतिना। प्रव्राजिताः प्रवचनोक्तेन विधिना सर्वेऽप्युपस्थितलोका भगवता। विहिता भवप्रपञ्चनिर्वेदजननी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राह । सापराधं निरपराधं वा प्राणिनं मारयता कुमारेण न मनागपि घृणायितव्यं श्रयमस्याः । खल्वनुरक्तीभवनोपायः । मयाभिहितं । किमनयात्यन्तमनुरक्तया भविष्यति । वैश्वानरः प्राह । कुमार महतोऽपि महाप्रभावेयं । यतो मयाधिष्ठितः पुरुषोऽतितेजस्वितया परेषां केवलं त्रासमात्रं जनयति अनया पुनर्हिंसयात्यन्तमनुरक्तयालिङ्गितमूर्तिर्महाप्रभावतया दर्शनमात्रादेव जीवितमपि नाशयति । तस्मादभिमुखीकर्तव्येयं कुमारेण । मयाभिहितमेवं करोमि । वैश्वानरेणोक्तं । महाप्रसाद इति ॥ ततो मार्गे गच्छन्नहं शशसूकरशरभशम्बरसारङ्गादीनामाटव्यजीवानां शतसहस्राणि मारयामि स्म । ततः प्रहृष्टा हिंसा संपन्ना मय्यनुकूला । ततः कम्पन्ते मद्दर्शनेन जीवाः मुञ्चन्ति प्राणानपि केचित् । ततः संजातो मे वैश्वानरकथितहिंसाप्रभावे प्रत्ययः । प्राप्ता वयं कनकचूडविषयाभ्यर्णं । तत्रास्ति विषमकूटो नाम पर्वतः । तस्मिंश्च कनकचूडमण्डलोपद्रवकारिणोऽम्बरीषनामानश्चरटाः प्रतिवसन्ति । ते च कदर्थिताः पूर्वं बहुशः कनकचूडेन । ततः कनकशेखरमागच्छन्तमवगम्य निरुद्धस्तैर्मार्गः । प्रत्यासन्नीभूतमस्मद्बलं । ततः कलकलं कुर्वन्तः समुत्थिताश्चरटाः । समालग्नमायोधनं । ततश्च

निपतितशरजालभिन्नेभकुम्भस्थलाभोगनिर्गच्छदच्छाच्छमुक्ताफलस्तोमसंपूरिताशेषपीठभूदेशं क्षणात् । तथा

विदलितभटमस्तकासंख्यराजीवषण्डानुकारेण रक्तौघनीरेण दण्डास्त्रसच्छत्रसंघातहंसेन तुल्यं तडागेन संजातमुच्चैर्महायुद्धमस्माकमिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः समुदीर्णतया चरटवर्गस्य संजाताः परिभग्नप्रायाः कनक-शेखराद्यः। अत्रान्तरे प्रवरसेनाभिधानेन चरटनायकेन सार्धं समापतितं समायोधनमिति। ततः संज्ञितोऽहं वैश्वानरेण। भक्षितं मया तत्क्रूरचित्ताभिधानं वटकं। ततः प्रवृद्धो मेऽन्तस्तापः। संजातो भृकुटितरङ्गभङ्गुरो ललाटपट्टः। समाचितं खेदविन्दुनिकरेण शरीरं। स च प्रवरसेनोऽत्यन्तकुशलो धनुर्वेदे निर्व्यूढसाहसः करवालेऽतिनिपुणः सर्वास्त्रप्रयोगेषु गर्वोद्धुरो विद्याबलेन प्रबल-वीर्या देवतानुग्रहेण। तथापि सन्निहितपुण्योदयमाहात्म्यान्मे न लगन्ति स्म तदीयशिलीमुखाः न प्रभवन्ति स्म तदीयशस्त्राणि न वहन्ति स्म तस्य विद्याः अकिञ्चित्करीभूता देवता। मम तु चेतसि परिस्फुरितं अहो प्रियमित्रवटकस्य प्रभावातिशयो यदस्य तेजसा समायं रिपुर्दृष्टिमपि धारयितुं न पारयति। ततो मया तथा वैश्वानरवटकप्रभावाधिष्ठितेन स प्रवरसेनश्चरटनायको विच्छिन्नकार्मुकः प्रतिहतशेषान्यशस्त्रः सन् गृहीतचमत्कुर्वद्भास्वर-करवालः स्यन्दनादवतीर्य स्थितो भूतले प्रस्थितो मदभिमुखं। अत्रान्तरे पार्श्ववर्तिन्या विलोकितोऽहं हिंसया। जातो गाढतरं रौद्रपरिणामः मुक्तो मया कर्णान्तमाकृष्य निशितोऽर्धचन्द्रः। छिन्नं तेन तस्यागच्छतो मस्तकं। समुल्लसितोऽस्मद्बले कलकलः। निपा-तिता ममोपरि देवैः कुसुमवृष्टिः। वृष्टं सुगन्धोदकं। समाहता दुन्दुभयः। समुद्घोषितो जयजयशब्दः। ततो हतनायकत्वाद्विषण्णं चरटबलं। अवलम्बितप्रहरणं गतं मे शरणं प्रतिपन्नं मया। निवृत्तमायोधनं संजातः सन्धिः। प्रतिपन्नः सर्वचरटैर्मम भृत्यभावः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मया चिन्तितं। अहो हिंसाया माहात्म्यप्रकर्षः; यदनयापि विलोकितस्य ममैतावानुन्नतिविशेषः संपन्न इति। सम्मानितास्तेऽपि कनकशेखरादिभिः। दत्तं प्रयाणकं। संप्राप्ता वयं कुशावर्त्तपुरे। समानन्दितः कनकशेखरकुमारागमनेन कनकचूडराजस्तुष्टो मद्दर्शनेन। ततो विधापितस्तेन महोत्सवः पूजितः प्रणयिवर्गः। ततो गणितं विमलाननारत्नवत्योर्विवाहदिनं समागतं पर्यायेण। कृतमुचितकरणीयं। ततो दीयमानैर्महादानैर्विधीयमानैर्जैनजनसम्मानैर्बहुविधकुलाचारैः संपाद्यमानैरभ्यर्हितजनोपचारैर्गानवादनपानखादनविमर्दैन निर्भरीभूते समस्ते कुशावर्त्तपुरे परिणीता कनकशेखरेण विमलानना मया रत्नवतीति। ततो विहितेषूचितकर्तव्येषु निवृत्ते विवाहमहानन्दे गते दिनत्रयेऽदृष्टपूर्वतया कुशावर्त्तस्यातिरमणीयतया तत्प्रदेशानां कुतूहलपरतया यौवनस्य समुत्पन्नतयास्मासु विश्रम्भभावस्य गृहीत्वास्मदनुज्ञां नगरावलोकनाय निर्गते भ्रमणिकया सपरिकरे विमलाननारत्नवत्यौ। ततोऽनेकाश्चर्यदर्शनेनानन्दपूरितहृदये संप्राप्ते ते चूतचूतकं नामोद्यानं प्रवृत्ते क्रीडितुम्। वयं तु कनकचूडराजास्थाने तदा तिष्ठामः। यावदकाण्ड एव प्रवृत्तः कोलाहलः पूत्कृतं दासचेटीभिः किमेतदिति संभ्रान्तं उत्थितमास्थानं। हृते विमलाननारत्नवत्यौ केनचिदिति प्रादुर्भूतः प्रवादः। ततः सन्नद्धमस्मद्बलं लग्नं तदनुमार्गेण। ततो मार्गखिन्नतया परसैन्यस्य सोत्साहतयास्मदनीकस्य स्तोकभूभाग एव समवष्टब्धा परचमूरस्मत्पताकिन्या। श्रुतमस्माभिर्विभाकरनामकं वन्दिभिरुद्घुष्यमाणम्। ततः सर्वैरेव चिन्तितमस्माभिः। अये स एष कनक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरनिवासी प्रभाकरबन्धुसुन्दर्यास्तनयो विभाकरो यस्मै प्रभावत्या दत्ता विमलानना पूर्वमासीदिति निवेदितं दूतेन। ततस्तेषोऽस्मान् परिभूय हरत्येते वध्वौ दुष्टात्मेति भावयतो मे विहिता वैश्वानरेण संज्ञा। ततो भक्षितं मया क्रूरचित्ताभिधानं वटकं। संजातो भासुरः परिणामः। ततो मयाभिहितं। अरेरे पुरुषाधम विभाकर परदारहरणतस्कर क यासि पुरुषो भव पुरुषो भवेति। ततस्तदाकर्ण्य गङ्गाप्रवाह इव त्रिभिः स्रोतोमुखैर्वलितमभिमुखं परबलं। आविर्भूतास्तदधिष्ठायकास्त्रय एव नायकाः। ततो मया कनकचूडराजेन कनकशेखरेण च त्रिभिरपि योद्धुकामैर्यथासंमुखं वृत्तास्ते। इतश्च योऽसौ कन्यागमनसूचनार्थं कनकचूडराजसमीपे समागतः पूर्वमासीन्नन्दराजदूतः स तत्रावसरे मत्सकाशे वर्तते। ततोऽभिहितोऽसौ मया। अरे विकट जानीषे त्वं कतमाः खल्वेते त्रयो नायकाः। विकटः प्राह। देव सुष्ठु जानामि। य एष वामपार्श्वेऽनीकस्य सम्मुखो भवतः एष कलिङ्गाधिपतिः समरसेनो नाम राजा। एतद्बलेनैव हि प्रारब्धमिदमनेन विभाकरेण। यतो महाबलतया विभाकरपितुः प्रभाकरस्यायं स्वामिभूतो वर्तते। यः पुनरेष मध्यमसैन्ये वर्ततेऽभिमुखः कनकचूडनरपतेरयं विभाकरस्यैव मातुलो वङ्गाधिपतिर्द्रुमो नाम राजा। यस्त्वेष दक्षिणभागवर्तिनि बले नायकोऽभिमुखः कनकशेखरस्य सोऽयं विभाकर एव। यावदेवं कथयति विकटः तावत्समालग्नमायोधनं। तच्च कीदृशम्।

शरजालतिरस्कृतदृष्टिपथं पथरोधसमाकुलतीव्रभटम्।
भटकोटिविपाटितकुम्भतटं तटविभ्रमहस्तिशरीरचितम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रचितप्रथितोरुसुहस्तिघटं घटनागतभीरुकृतार्तरवम् ।
रवपूरितभूधरदिग्विवरं वरहेतिनिवारणखिन्ननृपम् ॥
नृपभिन्नमदोद्धुरवैरिगणं गणसिद्धनभस्वरघुष्टजयम् ।
जयलम्पटयोधशतैश्चटुलं चटुलाश्वमहस्वविमर्दकरम् ॥
करहृष्टशरौघविदीर्णरथं रथभङ्गविवर्द्धितबोलबलम् ।
बलशालिभटेरितसिंहनदं नदभीषणरक्तनदीप्रवहम् ॥

ततश्चेदृशे प्रवृत्ते महारणे दत्तः परैः कृतभीषणनादैः समरभरः। भग्नमस्मद्दलं। समुल्लसितः परबले कलकलः। केवलं न चलिता वयं पदमपि पराङ्मुखं। त्रयोऽपि नायकाः समुत्कटतया निकटीभूताः परे। अत्रान्तरे पुनः संज्ञितोऽहं वैश्वानरेण। भक्षितं मया क्रूरचित्ताभिधानं वटकं। जातो मे भासुरतरः परिणामः। ततः साक्षेपमाहूतो मया समरसेनो वलितोऽसौ ममोपरि मुञ्चन्नस्त्रवर्षं। केवलं सन्निहिततया पुण्योदयस्य न प्रभवन्ति स्म तानि मे शस्त्राणि। ततो विलोकितोऽहं हिंसया। जातो मे दारुणतरो भावः। ततः प्रहिता मया परविदारणचतुरा शक्तिः। विदारितः समरसेनो गतः पञ्चत्वं। भग्नं तद्दलं। वलितोऽहं द्रुमाभिमुखं। स च लग्न एव योद्धुं कनकचूडेन। ततो मयाभिहितो। रे किमत्र भवति हन्तव्ये तातेनयाचितेन। न खलु गोमायुकेसरिणोरनुरूपमायोधनं। ततस्त्वमारादागच्छेति। ततो वलितो ममाभिमुखं द्रुमनरेन्द्रः। निरीक्षितोऽहं हिंसया। ततो दूरादेव निपातितमर्धचन्द्रेण मया तस्योत्तमाङ्गं। भग्नं तदीयसैन्यं। विहितो मयि सिद्धविद्याधरादिभिर्जयजयशब्दः। दूतश्च कनकशेखरेणापि सहा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पतितो योद्धुं विभाकरः। शरवर्षच्छेदानन्तरं मुक्तानि तेन कनकशेखरस्योपरि आग्नेयपन्नगादीन्यस्त्राणि। निवारितानि वारुणगारुडादिभिः प्रतिशस्त्रैः कनकशेखरेण। ततोऽमिलतासहायः समवतीर्णः स्यन्दनाद्विभाकरः। कीदृशं रथस्थस्य भूमिस्थेन सह युद्धमिति मत्वा कनकशेखरोऽपि स्थितो भूतले। ततो दर्शितानेककरणविन्यासमभिवांछितमर्मप्रहारं प्रतिप्रहारवञ्चनासारं संजातं द्वयोरपि वृहतीं वेलां वलं करवालयुद्धम्। ततः समाहत्य स्कन्धदेशे पातितः कनकशेखरेण विभाकरो भूतले। गतो मूर्च्छां। समुच्छलितः कनकशेखरबले हर्षकलकलः। ततो निवार्य तं वायुदानसलिलाभ्युक्षणादिभिराश्वासितो विभाकरः कनकशेखरेण अभिहितश्च। साधु भो नरेन्द्रतनय साधु न मुक्तो भवता पुरुषकारः नाङ्गीकृतो दीनभावः समुज्ज्वालिता पूर्वपुरुषस्थितिः लेखितमात्मीयं शशधरे नामकं। तदुत्थाय पुनर्योद्धुमर्हति राजसूनुः। ततोऽहो अस्य महानुभावता अहो गम्भीरता अहो पुरुषातिरेकः अहो वचनातिरेकः इति चिन्तयता विभाकरेणाभिहितं। आर्य अलमिदानीं युद्धेन। निर्जितोऽहं भवता न केवलं खड्गेन किं तर्हि चरितेनापि। ततः परमबन्धुवत् स्वयं निवेसितो विभाकरः स्वकीयस्यन्दने कनकशेखरेण समाह्लादितो मधुरवचनैः। उपसंहृतमायोधनं। गतं पदातिभावं सर्वमपि परसैन्यं कनकशेखरस्य। दृष्टे भयातिरेकप्रकम्पमानगात्रयष्टी विमलाननारत्नवत्यौ समानन्दिते पेशलवाक्यैः स्थापिते निजभर्तृस्यन्दनयोः कनकचूडेन। ततो लब्धजयतया हर्षपरिपूर्णाङ्गा वयं कुशावर्तपुरे प्रवेष्टुमारब्धाः। कथम्।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरतः कुञ्जरारूढो राजा देवेन्द्रसन्निभः ।
दद्दानं यथाकामं प्रविष्टो निजमन्दिरे ॥
तत्र प्रमुदिताशेषलोकलोचनवीक्षितः ।
पुरं प्रविश्य स्वे गेहे गतः कनकशेखरः ॥
ततो रत्नवतीयुक्तः स्यन्दनस्थः शनैः शनैः ।
यावद्गच्छामि तत्राहं निजावाससमुखम् ॥
तावदेते समुल्लापाः प्रवृत्ताः पुरयोषिताम् ।
जयश्रिया परीताङ्गे मयि सस्पृहचेतसाम् ॥
जगत्यप्रतिमल्लोऽपि येनासौ विनिपातितः ।
द्रुमः समरसेनश्च स सोऽयं नन्दिवर्धनः ॥
अहो धैर्यमहो वीर्यमहो दाक्ष्यमहो गुणाः ।
अस्य नूनं न मर्त्योऽयं देवोऽयं नन्दिवर्धनः ॥
इयं रत्नवती धन्या यास्य भार्या महात्मनः ।
धन्या वयमपि ह्येष यासां दृष्टिपथं गतः ॥
अथवा सर्वमेवेदमहो धन्यतमं पुरम् ।
अचिन्त्यसाहसाढ्येन यदनेन विभूषितम् ॥
ततस्तास्तादृशीर्वाचः शृण्वतो मम मानसे ।
महामोहसमुत्पन्नो वितर्कोऽयमभूद्भृशम् ॥
ममायमीदृशो लोके प्रवादोऽत्यन्तदुर्लभः ।
यः संजातो महानन्दहेतुरुन्नतिकारकः ॥
तस्यास्य कारणं तावद्वयस्यो हितकारकः ।
एष वैश्वानरोऽस्त्येव नात्र सन्देहगोचरः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि प्रियया नूनं ममेदं हन्त हिंसया।
सर्वं संपादितं मन्ये कृतमालोकनं यथा॥
अहो प्रभावो हिंसाया अहो मय्यनुरक्तता!
अहो कल्याणकारित्वमहो सर्वगुणाढ्यता॥
यादृशी वर्णिता पूर्वं वरमित्रेण मे प्रिया।
एषा वैश्वानरेणोच्चैस्तादृश्येव न संशयः॥
तस्मादगृहीतसङ्केते वृत्तान्तस्यात्र कारणम्।
स मे पुण्योदयो नाम वयस्यः परमार्थतः॥

केवलम्।

तदा न लक्षयाम्येवमहं पापहतात्मकः।
यथा पुण्योदयाज्जातं ममेदं सर्वमञ्जसा॥

ततश्च।

एवंविधविकल्पेनाहं वैश्वानरहिंसयोः।
अत्यन्तमनुरक्तात्मा न जानामि स्म किंचन॥
इतश्च हट्टमार्गेण मामकीनरथस्तदा।
प्राप्तो राजकुलाभ्यर्णं कृतलोकचमत्कृतिः॥
अथास्ति सुह्मनाथस्य दुहिता जयवर्मणः।
प्रिया कनकचूडस्य देवी मलयमञ्जरी॥
तस्याश्च भुवनाभोगसर्वसौन्दर्यमन्दिरम्।
अस्ति मन्मथमञ्जूषा कन्या कनकमञ्जरी॥
सा स्यन्दनस्थं गच्छन्तं वातायनकसंस्थिता।
मां दृष्ट्वा पञ्चबाणस्य शरगोचरतां गता॥

47

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुतूहलवशेनाथ वीक्षमाणेन सर्वतः ।
गवाक्षे लीलया दृष्टिर्मया तत्र निपातिता ॥
ततः कनकमञ्जर्या लोललोचनमीलिता ।
क्षणं सा मामिका दृष्टिश्चलति स्म न कीलिता ॥
सापि तां मामिकां दृष्टिं पिबन्ती स्तिमितेक्षणा ।
स्वेदकम्पनरोमाञ्चैर्व्यक्तकामा क्षणं स्थिता ॥
मम तस्याश्च सानन्दं दृष्टिसंयोगदीपितम् ।
मदीयसारथिर्भावं तेतलिस्तमलक्षयत् ॥

ततश्चिन्तितं तेतलिना । अये रतिमकरकेतनयोरिवातिसुन्दरोयमनयोरनुरागविशेषः । केवलं महाजनसमक्षमेवमनिमेषाक्षतया निरीक्षमाणस्यैनां हीनसत्त्वतया लाघवमस्य संपत्स्यते । रत्नवत्याश्च कदाचिदीर्ष्या संपद्येत । ततो न मे युक्तमुपेक्षितुमिति । ततः काकलीं कृत्वा चोदितस्तेतलिना स्यन्दनः । ततोऽहं लावण्यामृतपङ्कमग्नामिव कपोलपुलककण्टकलग्नामिव मदनशरशलाकाकीलितामिव तदीयसौभाग्यगुणस्यूतामिव कनकमञ्जरीवदनकमलावलोकनात् कथंचिद्दृष्टिमाकृष्य तस्यामेव निक्षिप्तहृदयः प्राप्तः क्रमेण निजमन्दिरे । तत्र च शून्यमनस्को विधाय दिवसोचितं कर्तव्यमारूढो ऽहमुपरितनभूमिकायां । ततः प्रस्थाप्य समस्तं परिजनमेकाकी निषण्णः शय्यायां । तस्यां चापरापरैः कनकमञ्जरीगोचरैर्वितर्ककल्लोलैर्विधुरितचेतोवृत्तिर्न जानामि स्माहं । यदुत किमागतोऽस्मि । किं गतोऽस्मि । किं तत्रैव स्थितोऽस्मि । किमेककोऽस्मि । किं परिजनवृतोऽस्मि । किं सुप्तोऽस्मि किं वा जागर्मि । किं रोदिमि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं वा न रोदिमि। किं दुःखमिदं किं वा सुखमिदं। किमुत्कण्ठकोऽयं किं वा व्याधिरयं। किमुत्सवोऽयं किं वा व्यसनमिदं। किं दिनमिदं किं वा रजनीयं। किं मृतोऽस्मि किं वा जीवामीति। क्वचिदीषल्लब्धचेतनः पुनश्चिन्तयामि। अये क्व गच्छामि। किं करोमि। किं शृणोमि। किं पश्यामि। किमालपामि। कस्य कथयामि। कोऽस्य मे दुःखस्य प्रतीकारो भविष्यतीति।

एवं च पर्याकुलचेतसो निषिद्धाशेषपरिजनस्यापरापरपार्श्वेण शरीरं परावर्तयतो महानारकस्येव तीव्रदुःखेनालब्धनिद्रस्येव लङ्घिता सा रजनी। समुद्गतोऽंशुमाली। गतस्तथैव तिष्ठतो मेऽर्धप्रहरः। अत्रान्तरे समागतस्तेतलिः। अतिवल्लभतया मे न वारितः केनापि। प्राप्तो मत्समीपं। कृतमनेन पादपतनं। निषण्णो भूतले। विरचितकरमुकुलेन चाभिहितमनेन। देव नीचजनसुलभेन चापलेन किंचिद्देवं विज्ञापयिष्यामि तच्चार्वचारु वा सोढुमर्हति देवः। मयाभिहितं। भद्र तेतले विस्रब्धं वद। किमियत्याकूर्चशोभया। तेतलिनाभिहितं। यद्येवं ततो मया देवपरिजनादाकर्णितं यथा रथादवतीर्य देवो न ज्ञायते किमत्र कारणं सोद्वेग इव निषिद्धाशेषपरिजनः सचिन्तः शयनीये विवर्तमानस्तिष्ठति। इतश्च स्यन्दनाश्वानां तृप्तिं कारयतो लङ्घितोऽतीतदिनशेषः। ततो रात्रौ समुत्पन्ना मे चिन्ता। यदुत किं पुनर्देवस्योद्वेगकारणं भविष्यति। ततस्तदलक्षयतश्चिन्ताविधुरस्य जाग्रत एव मे विभाता रजनी। ततो यावदुत्थाय किलेहागच्छामि तावद्गृहस्तमं प्रयोजनान्तरमापतितं। तेनातिवाह्ययती वेलामहमागत इत्यतो निवेदयतु देवः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसादेन शरीरकुशलवार्तामात्रायत्तजीविताय किङ्करापसदायास्मै जनाय यदस्य व्यतिकरस्य कारणमिति ब्रुवाणः पतितो मेचरणयोस्तेतलिः। ततो मया चिन्तितं। अहो अस्य मयि भक्तिप्रकर्षः अहो वचनकौशलं। युज्यत एवास्मै सद्भावः कथयितुं। तथापि वामशीलतया मदनविकारस्य मयाभिहितं। भद्र तेतले न जाने किमत्र कारणं। केवलं यतः प्रभृति हट्टमार्गमतिक्रम्य समानीतस्त्वया रथो राजकुलाभ्यर्णे धारितस्तत्र कियन्तमपि क्षणं तदारात्सर्वाणि मे विलीयन्तेऽङ्गानि प्रवर्धतेऽन्तस्तापः ज्वलतीव भवनं न सुखायन्ते जनोल्लापाः आविर्भवति रणरणकः समुद्भूतालीकचिन्ता शून्यमिव हृदयं। ततोऽहमस्य दुःखस्यालब्धपरित्राणोपायः खल्वेवं स्थित इति ततः सहर्षेण तेतलिनाभिहितं। देव यद्येवं ततो विज्ञातं मयास्य दुःखस्य निदानमौषधं च। न विषादः कर्तव्यो देवेन। मयाभिहितं। कथं। तेतलिः प्राह। समाकर्णय निदानं तावदस्य दुःखस्य चक्षुर्दोषः। मयोक्तं। कस्य सम्बन्धी। तेतलिः प्राह। न जाने किमसौ लक्षिता न वा देवेन मया पुनर्दृष्टतीं वेलां निरूपिता तत्र राजकुलपर्यन्तवर्तिनि प्रासादे वर्तमाना काचिद्वरदारिका देवमर्धतिरश्चीनेनेक्षणयुगलेन साभिनिवेशमङ्गप्रत्यङ्गतो निरूपयन्ती। तन्निश्चितमेतत्तस्या एव सम्बन्धी चक्षुर्दोषोऽयं। यतो देव अतिविषमा विषमशीलानां दृष्टिर्भवति। ततो मया चिन्तितं। वष्टः खल्वेष तेतलिः। बुद्धोऽनेन मदीयभावः। विलोकिता सा चिरमनेन। अतः पुण्यवानयं। यतस्तु वदत्येष यथा लब्धं मया तवास्य दुःखस्य भेषजमिति ततः संपादयिष्यति नूनं तां मदनज्वर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हरणमूलिकां कन्यकामेष मे। तस्मात्प्राणनाथो ममायं वर्तत इति विचिन्त्य समारोपितो बलात्पर्यङ्के तेतलिः। अभिहितश्च। साधु भो साधु सुष्ठु विज्ञातं भवता मदीयरोगनिदानं। इदानीमौषधमस्य निवेदयतु भद्रः। तेतलिनाभिहितं। देव इदमत्र चक्षुर्दोषे भेषजं। यदुत निपुणवृद्धनारीभिः कार्यतां सम्यग् लवणावतारणकं विधीयतां मन्त्रकुशलैरपमार्जनं लिख्यन्तां रक्षाः निबध्यन्तां कण्डकानि अनुशील्यन्तां भूतिकर्माणि। अन्यच्च। शाकिन्यपि किल प्रत्युच्चारिता न प्रभवतीति कृत्वा गत्वा निष्ठुरवचनैर्गाढं निर्भर्त्स्यतां सा दारिका। यदुत हे वामलोचने निरीक्षितस्त्वया विषमदृष्ट्या देवः। ततस्त्वं ज्ञाता बुद्धा तिष्ठसि। यदि च देवस्य शरीरे मनागपि स्खलितं भविष्यति ततो नास्ति ते जीवितमिति। एवं क्रियमाणे देव नियमादुपशाम्यत्येष चक्षुर्दोषः। तदिदमस्य भेषजं मया विज्ञातमिति। ततो विहस्य मयाभिहितं। भद्र तेतले पर्याप्तं परिहासेन। निवेद्यतां यद्यवधारितः कश्चिद्भवता निश्चितं मद्दुःखविगमोपायः। तेतलिः प्राह। देव किमलब्धदेवदुःखप्रतीकारा एव देवपादोपजीविनः कदाचिदपि देवस्य पुरतः सोद्वेगे सति देवे सहर्षं जल्पितुमुत्सहन्ते। तस्मान्मा कुरुत विषादं। सिद्धमेव देवसमीहितं। मया हि देवोद्वेगनिरासार्थमेवैष परिहासो विहितः। मयाभिहितं। वर्णय तर्हि कथं सिद्धमस्मत्समीहितम्। तेतलिः प्राह। देव विज्ञापितमिदमादावेव मया। यथा मम प्रत्युषस्येव देवसमीपमागच्छतो हृदत्तमं प्रयोजनान्तरमापतितं। तेन लङ्घितो ममायं दिनार्धप्रहर इति। तद्देवसमी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हितसिद्ध्यर्थमेव प्रयोजनान्तरं। कथमन्यथा वृत्तमलमस्योपपद्यते। यतोऽस्ति मम परिचिता मलयमञ्जरीसम्बन्धिनी कपिञ्जला नाम वृद्धगणिका। सा मम शयनादुत्तिष्ठतः पुरतः प्रविश्य मद्भवने वयस्य त्रायध्वं त्रायध्वमिति महता शब्देन पूत्कृतवती। ततोऽनुपलब्धभयकारणेन मयाभिहितं। भद्रे कपिञ्जले कुतस्ते भयं। तयाभिहितं। मीनकेतनादिति। मयाभिहितं। कपिञ्जले अश्रद्धेयमिदं। यतोऽहमेवं तर्कयामि। यदुत कुङ्कुमरागपिङ्गलपलितचिताज्वालावलीभासुरं कटकटायमानास्थिपञ्जरशिवाशब्दभैरवं संकुचितवलीतिलकजालपिच्छलताभीषणं उल्लम्बितशवाकारलम्बमानातिस्थूलस्तनभयानकं अतिरौद्रमहाश्मशानविभ्रमं त्वदीयशरीरमिदमुपलभ्य नूनं कामः कातरनर इवाराटीर्दत्त्वा दूरतः प्रपलायते। ततः कुतस्ते भयमिति। कपिञ्जलयाभिहितं। अयि अलीकदुर्विदग्ध न लक्षितस्त्वया मदीयोऽभिप्रायः। तेनैवं ब्रवीषि। अतः समाकर्णय यथा मे मदनाद्भयमिति। मयाभिहितं। तर्हि निवेदयतु भवती। सा प्राह। अस्ति तावदिदितैव भवतो मलयमञ्जरी नाम मम स्वामिनी। तस्यास्त्वास्ति कनकमञ्जरी नाम दुहिता॥ अत्रान्तरे तेतलिना कनकमञ्जरीनामग्रहणादेव स्पन्दितं मे दक्षिणलोचनेन स्फुरितमधरेण उच्छ्वसितं हृदयेन रोमाञ्चितमङ्गेन गतमिवोद्वेगेन। ततो मया चिन्तितं। नूनं सैषा मम हृदयदयिता कनकमञ्जरीत्युच्यते। सहर्षेण चाभिहितं। ततस्ततः। ततो लक्षितमदीयभावेन अहो प्रियनामोच्चारणमन्त्रसामर्थ्यमिति विचिन्त्य तेतलिनानुसन्धानेन कपिञ्जलावचनमिदमभिहितं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा च मदीयस्तन्यपानेन संवर्धिता । तेन मम सर्वस्वमिव शरीरमिव हृदयमिव जीवितमिव सा कनकमञ्जरी स्वरूपाद्व्यतिरेकिणी वर्तते । अधुना पीड्यते सा वराकी मकरध्वजेन । ततो यत्तस्या मीनकेतनाद्भयं तत्परमार्थतो ममैव भयमिति ॥ तदिदमाकर्ण्य धारयतस्तेतलेराकृष्य करवालमरे रे मन्मथहतक मुञ्च मुञ्च मे प्रियां कनकमञ्जरीं पुरुषो वा भव दुरात्मन्नास्यधुना ते जीवितमिति ब्रुवाणोऽहमुत्थितः शयनीयतलाद्वेगेन । तेतलिनाभिहितं । देव अलमवेगेन । न खलु सद्ये देवेदं कनकमञ्जर्या मदनहतकादन्यस्माद्वा सकाशाद्भयगन्धोऽपि । कथानकं चेदमतस्तच्छेषमप्याकर्णयतु देवः । ततस्तद्वचनेनाहं पुनः प्रत्यागतचेतनो मनाग् विलचीभूतो निषण्णः शय्यातले । तेतलिः प्राह । ततो मयाभिहितं । भद्रे कपिञ्जले किं पुनर्निमित्तमासाद्य तस्यां कनकमञ्जर्यां प्रभवति मदनहतकः । कपिञ्जलयाभिहितं आकर्णय । अस्ति तावदतीते दिने संपन्नं वधूहरणविड्वरं । संजातो देवस्य कनकचूडस्य परैः सह महासङ्ग्रामः । ततो लब्धपताकेषु नगरं प्रविशत्सु कनकचूडकनकशेखरनन्दिवर्धनेषु कुतूहलवशेनाहं गेहान्निर्गत्य स्थिता हट्टमार्गे । प्रविष्टेषु गता स्वामिनी भवनं । आरूढा चोपरितनभूमिकायां । तत्र च वातायने वर्तमाना राजमार्गाभिमुखनिःसारितवदनकमला निष्पन्दमन्दस्तिमितशून्यदृष्टिका चित्रविन्यस्तेव शैलघटितेव निष्पन्नयोगेव परमयोगिनी व्युपरताशेषाङ्गप्रत्यङ्गचलनचेष्टा दृष्टा मया कनकमञ्जरी । ततो हा किमेतदिति विचिन्त्य स सम्भ्रमं पुत्रि कनकमञ्जरीति पुनः पुनस्ता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महमाहूतवती । न च दत्तं मे मन्दभाग्यायास्तया प्रत्युत्तरं । इतश्च तस्मिन्नवसरे तत्रासीत्कदलिका नाम दासदारिका । ततस्तां प्रति मयाभिहितं । भद्रे कदलिके केन पुनर्हेतुना वत्सायाः कनकमञ्जर्या इयमेवंविधावस्था संजातेति । कदलिकयाभिहितं । अम्ब न सम्यग् लक्षयामि । केवलं यतः प्रभृति राजमार्गेऽवतीर्णो नन्दिवर्धनकुमारः पतितो दृष्टिगोचरे भर्तृदारिकायाः तत आरभ्येयं प्रमुदितेव लब्धरत्नेव अमृतसिक्तेव महाभ्युदयप्राप्तेव अनाख्येयं किमपि रसान्तरमनुभवन्ती मया दृष्टासीत् । यदा त्वतीतोऽसौ दृष्टिगोचरात् तदेयमिदृशीमवस्थां प्राप्तेति तत-स्तदाकर्ण्य मरिष्यतीयमकृतप्रतीकारेति संचिन्त्य शोकविक्लव-तया विहितो मया हाहारवः । तदाकर्णनेन समागता मलयम-ञ्जरी । ततः सापि किमेतत्कपिञ्जले किमेतदिति वदन्ती निरीक्ष्य कनकमञ्जरीं विलपितुमारब्धा । ततो वृहत्तमतया वेलस्य जननीवल्लभतया हृदयस्य स्वभ्यस्ततया विनयस्य मनाक् संजात-चेतना संपन्ना कनकमञ्जरी । मोटितमनया शरीरकं । प्रवृत्ता जृम्भितुं । ततस्तां स्वकीयोत्सङ्गे निधाय मलयमञ्जर्याभिहितं । वत्से कनकमञ्जरि किं ते शरीरके बाधते । कनकमञ्जर्याभिहितं । अम्ब नाहमन्यत्किंचिल्लक्षयामि । केवलं दाहज्वरो मे शरीरं बाधते । ततो यावदाकुला वयं कुर्मस्तस्याः शरीरस्य मलयजरसेन-सेचनं प्रेरयामः कर्पूरजलबिन्दुवर्षाणि तालवृन्तानि प्रयच्छामोऽङ्गे हिमसेकशीतला जलार्द्राः समर्पयामो मुहुर्मुहुः कर्पूरपूरितानि नागवल्लीदलवीटकानि समाचरामोऽन्यामप्यनेकाकारां शीतक्रियां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावद्गतोऽस्तं वासरेश्वरः समुद्गतो निशीथिनीनाथः परिप्लावितं चन्द्रिकया नभस्तलं। ततो मयाभिहिता मलयमञ्जरी । स्वामिनि सघर्ममिदं स्थानं। अतः प्रकाशे निःसार्यतां राजदुहिता। तयाभिहितं। एवं क्रियतां। ततो हिमगिरिविशालशिलाविभ्रमे सुधाधवलप्रकाशहर्म्यतले कथंचिद्धार्यमाणा नीता कनकमञ्जरी विरचितं तत्रातिशीतलनलिनीदलपल्लवशयनीयं। तत्र तां निवेश्य विहितानि भुजयुगले मृणालनालवलयानि। स्थापितो वक्षस्थले सिन्दुवारहारः। समुपनीताः स्पर्शनार्थं प्रक्षेपमात्रेण महासरोवरस्यापि स्थानभावसम्पादकाः शीतवीर्या महामणयः। लगति च तत्र प्रदेशे स्वत एव बलिनामपि रोमहर्षदन्तवीणासञ्जननो गन्धवाहनः। ततो मलयमञ्जर्याभिहितं। वत्से कनकमञ्जरि किमपगताधुना भवत्या दाहज्वरबाधा। कनकमञ्जरी प्राह। नहि नहि अम्ब प्रत्युताधुना मम मतिः यदुतानन्तगुणा सा वर्तते। यतः प्रज्वलितखादिराङ्गारपुञ्जायते मां प्रत्येष शशधरहतकः। ज्वालाकलापायते चन्द्रिका। विस्फुलिङ्गायते तारकानिकरः। दहति मामेष नलिनीदलस्रस्तरः। शोषयन्ति सिन्दुवारहारादयः। किंबहुना हतशरीरकमपि मेऽधुना पापाया दाहात्मकतया वह्निपिण्डायते॥ ततो दीर्घं निःश्वस्य मलयमञ्जर्याभिहितं भद्रे कपिञ्जले जानासि वत्सायाः किं पुनरीदृशदाहज्वरकारणं। मया तु कर्णे स्थित्वा निवेदितं तस्यास्तत्कदलिकावचनं। मलयमञ्जर्याभिहितं। यद्येवं ततः किं पुनरत्र प्राप्तकालं॥ अत्रान्तरे समुत्थितो राजमार्गे शब्दः। यदुत सिद्धमेवेदं प्रयोजनं। केवलं

48

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेलाच विलम्बिते । ततः सहर्षया मयाभिहितं । स्वामिनि गृहीतः शब्दार्थः । सा प्राह । बाढं गृहीतः । मयाभिहितं । यद्येवं ततः सिद्धमेव वत्सायाः कनकमञ्जर्याः समीहितं । स्पन्दते च मम वामलोचनं । अतो नात्र सन्देहो विधेयः । मलयमञ्जरी प्राह । कोऽद्यापि सन्देहः सिध्यत्येवेदं ॥ अत्रान्तरे कनकमञ्जर्या एव ज्येष्ठा भगिनी मणिमञ्जरी नाम सा समारुह्य हर्म्यतलं सहर्षा निषण्णास्मत्समीपे । मयाभिहितं । वत्से मणिमञ्जरि निर्दुःखसुखतया कठोरा त्वमसि । सा प्राह । कथं । मयोक्तं । या त्वमेवमस्मासु विषादवतीषु सहर्षा दृश्यसे । मणिमञ्जर्याभिहितं । अथ किं क्रियतां । न शक्यते गोपयितुं महन्मे हर्षकारणं । मयोक्तं । आख्याहि वत्से कीदृशमिति । मणिमञ्जर्योक्तं । गताहमासं तातसमीपे । निवेशिता तातेन निजोत्सङ्गे । तदा च तातस्य कनकशेखरः पार्श्ववर्ती वर्तते । ततस्तं प्रति तातेनाभिहितं । पुत्र येनानेन नन्दिवर्धनेन महाबलावपि तौ समरसेनद्रुमौ लीलया विनिपातितौ स नैष सामान्यः पुरुषः । न चास्य सुकृतस्य वयं जीवितदानेनापि निष्क्रयं गच्छामः । तदिदमत्र प्राप्तकालं । जीवितादपि वल्लभतरे ममैते मणिमञ्जरीकनकमञ्जर्यौ । दत्ता चेयं पूर्वमेवास्यैव महत्तमसहोदराय शीलवर्धनाय । इयंतु कनकमञ्जरी साम्प्रतमस्मै नन्दिवर्द्धनाय दीयतामिति । कनकशेखरेणोक्तं । चारु मंत्रितं तातेन । तात एवोचितं जानीते । ततो दातव्येवेति । स्थापितस्ताभ्यां सिद्धान्तः । समुत्थिताहं तातोत्सङ्गात् प्रवृत्ता चेहागन्तुं । चिन्तितं च मया । अहो मे धन्यता अहो अनुकूलता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवस्य अहो सुपर्यालोचितकारिता तातस्य अहो विनयः कनकशेखरस्य । भविष्यत्येवं प्रियभगिन्या सह मम यावज्जीवमवियोगः । ललिष्यावहे नानाविधं । एवं च चिन्तयन्त्या ममाविर्भूतः स्फुटबहिर्लिङ्गो हर्षः । तदिदं मे हर्षकारणमिति । मलयमञ्जर्याभिहितं । कपिञ्जले पश्य कालज्ञोनो निमित्तस्य संवादः । मयोक्तं । किमाश्चर्यं यतो देवीयमुत्पातुका भाषा भवति । केवलं वत्से कनकमञ्जरि मुञ्चेदानीं विषादं । अवलम्बस्व धैर्यं । सिद्धमधुना नः समीहितं । व्यपगतं भवत्या दाहज्वरकारणं । प्रतिपादितासि देवेन हृदयनन्दनाय नन्दिवर्धनाय ॥ ततः संजाताश्वासापि हृदये कुटिलशीलतया मदनस्य विधाय ममाभिमुखं विषमभ्रुकुटिं कनकमञ्जर्याभिहितं । आः भवतु मातः किमेवमलीकवचनैर्मां प्रतारयसे । शिरोऽपि ममाधुना स्फुटति लग्नमनेनासंबद्धप्रलापेन मलयमञ्जर्याभिहितं । वत्से मा मैवं वोचः । सत्यमेवेदं नान्यथा वत्सया संभावनीयं । ततः कुतो ममेयन्ति भाग्यानीति शनैर्वदन्ती स्थिताधोमुखी कनकमञ्जरी । ततस्तां निजपतिभक्तस्त्रीकथानिकाकथनव्याजेन विनोदयन्तीभिरस्माभिरतिवाहिता रजनी । न चाद्याप्युपशाम्यति तस्याः परिदहनं । मया चिन्तितं । यावत्क्रमेण संपत्स्यते नन्दिवर्धनदर्शनं तावन्मरिष्यतीयं राजदुहिता । अतः पश्यामि तावत्तेतलिं । वल्लभोऽसौ कुमारस्य शक्नोति तं विज्ञापयितुं । कदाचित्ततः संपद्यतेऽस्याः परिचाद्यैव कुमारदर्शनेनेति विचिन्त्य समागताहं लत्समीपे । तदिदं निमित्तमासाद्य तस्यां प्रभवति मीनकेतन इत्येतदाकर्ण्य वयस्यः प्रमाणं ॥ मयाभिहितं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्येवं ततो यद्यपि वश्येन्द्रियो देवो महासत्त्वतया च तृणमिव स्त्रैणमाकलयति तथाप्येवं विज्ञपयामि यथाभ्युद्धरति निजदर्शनेन राजदुहितरं। केवलं रतिमन्मथे कानने भवतीभिः स्थातव्यं। ततो महाप्रसादोऽनुगृहीतोऽस्मीति वदन्ती पतिता मच्चरणयोः कपिञ्जला। गता स्वभवनं। अहमपीहागतः। तदिदं देव मया भवद्भेषजमवाप्तं॥

मयाभिहितं। साधु तेतले साधु त्वमेव वक्तुं जानीषे। ततः समारोपितस्तस्य वक्षःस्थले मयात्मीयो हारः परिहिता भुजयोः कटककेयूरादयः। तेतलिः प्राह। देवात्र तुच्छकिङ्करजने देवकीयोऽयमतिप्रसादोऽनुचित इवाभासते। मयाभिहितं। आर्य प्राणप्रदेऽपि सद्वैद्ये किं किंचिदनुचितमस्ति। तन्न कर्तव्योऽत्र भवता संक्षोभः। त्वं ममेदानीं जीविताद्व्यतिरिक्तो वर्तसे॥

अत्रान्तरे समागतो द्वारि विमलो नाम महाराजमहत्तमो निवेदितो मे प्रतिहार्या। स्थितः पृथगासने तेतलिः। प्रविष्टो महत्तमः। कृतोचिता प्रतिपत्तिः। अभिहितमनेन। कुमार देवेन प्रहितो युष्मत्समीपेऽनेनार्थेन। यथास्ति मम जीवितादपीष्टतमा कनकमञ्जरी नाम दुहिता। सा ममोपरोधात् कुमारेण स्वयं पाणिग्रहणेनाह्लादनीया॥ ततो निरीक्षितं मया तेतलिवदनं। तेनाभिहितं। देवानुवर्तनीयो महाराजो देवस्य। अतो मान्यतामियं तस्य प्रथमप्रणयप्रार्थना। मयाभिहितं। तेतले त्वमत्र प्रमाणं। विमलः प्राह। कुमार महाप्रसादः। ततो निर्गतो विमलः॥ तेतलिनाभिहितं। देव गम्यतामिदानीं तत्र रतिमन्मथे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कानने । मा उन्मनीभूत्वा राजदुहिता कालहरणेन । मयाभिहितमेवं भवतु ॥ ततस्तेतलिसहाय एव गतोऽहं तच्चोद्याने । दृष्टं तदपहसितनन्दनवनं काननं । ततश्चम्पकवीथिकासु कदलीगुपिलेषु अतिमुक्तकलतावितानेषु केतकीषण्डेषु मृद्वीकामण्डपेषु अशोकवनेषु लवलीगहनेषु नागवल्लारामेषु नलिनसरोवरोपान्तेषु विचरितमितश्चेतश्च भूयो भूयः कनकमञ्जरीदर्शनलोलुपतया । न च दृष्टा सा कुरङ्गलोचना । ततो मया चिन्तितं । हन्त प्रतारितोऽहमनेन तेतलिना । विमलव्यतिकरोऽपि नूनं तेतलेरेव मायाप्रपञ्चः । कुतस्तद्दर्शनसम्पादकानि भाग्यानि मादृशां ॥ अत्रान्तरे श्रुतो मया तरुलतागहनमध्ये कलनूपुरध्वनिः । ततोऽपसृत्य तेतलिसमीपान्निरूपितं तद्गहनं मया । दृष्टा च तमालतरोरधस्तादवर्तमाना स्वर्गात्परिभ्रष्टेवामराङ्गना स्वभवनान्निष्कासितेव नागकन्यका रतिरिव मदनविरहकातरा सशोका कनकमञ्जरी । विलोकितमनया तरलतारया दृष्ट्या दिक्चक्रवालं । न दृष्टः कोऽपि सत्त्वः । ततोऽभिहितं तया । हे भगवत्यो वनदेवताः प्रतीतमेवेदं भवतीनां । यत्किल प्रतिपन्नं तेतलिना तस्य जनस्यानयनं दत्तोऽत्र रतिमन्मथे कानने सङ्केत इत्युपप्रलोभ्याहमिहानीता तया जरन्मार्जार्या । अधुना किलासौ जनो न दृश्यत इति तं गवेषयामीत्यभिधाय मामेकाकिनीं विमुच्य सा न जाने कुत्रचिद्गता । तदेवं प्रतारिताहमिन्द्रजालरचनाचतुरया कपिञ्जलया । तदलं मे जीवितेन प्रियविरहानलदग्धाया आप्तजनेनापि वञ्चिताया मन्दभाग्यायाः । केवलं प्रसादाद्भगवतीनां जन्मान्तरेऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स एव जनो भर्ता भूयादिति वदन्त्या वल्मीकमारुह्य निबद्धस्तमालतरुशाखायां पाशकः । निर्मिता तत्र शिरोधरा । प्रवृत्ता मोक्तुं शरीरं । अत्रान्तरे सुन्दरि मा साहसं मा साहसमिति ब्रुवाणः प्राप्तोऽहं वेगेन धृतं । वामभुजेनाश्लिष्य मध्यदेशे निपतच्छरीरं । छिन्नो दक्षिणकरेणासिपुत्रिकया पाशकः । आश्वासिता पवनदानेन । अभिहिता च । देवि किमिदमसमञ्जसमारब्धं । ननु स्वाधीनोऽयं जनस्ते वर्तते । तन्मुञ्च विषादं । ततः सा तथैव स्थिता घूर्णमानविलोलविलोचना मां निरीक्षमाणा तत्क्षणमनेकरससंभारगर्भनिर्भरं सुपरिस्फुटं मदनचिह्नं योगिनामपि वाग्गोचरातीतं स्वरूपं धारयन्ती मया विलोकिता । कथं एकाकिनीति भीता स एवायमिति सहर्षा कुत इति साशङ्का स्वरूपोऽयमितिससाध्वसा स्वयमागतेति सलज्जा विजने प्राप्तेति दिक्षु निक्षिप्ततरलतारिका दत्तसङ्केतेति विश्वस्ता दृष्टमिदमनेन मदीयमाचरणमिति सवैलक्ष्या लक्ष्मीरिव क्षीरोदमन्थनोत्थितमात्रा विशदस्वेदजलप्लावितदेहतया कदम्बकुसुममालिकेव परिस्फुटपुलकोद्भेदसुन्दरतया पवनप्रेरिततरुमञ्जरीव प्रकम्पमानसर्वाङ्गतया आनन्दसागरमवगाहमाना स्तिमितनिष्पन्दमन्दलोचनतया । सानभिव्यक्तैरक्षरैर्मुञ्च मुञ्च कठोरहृदय मुञ्च न कार्यमनेन जनेन जनस्येति वदन्ती मदीयभुजमध्याद्बहिर्मुखं निष्पतितुमारब्धा । ततो निवेशिता मया ललितकोमले दूर्वाविताने । निषण्णः स्वयमभ्यर्ण एव तदभिमुखः । ततोऽभिहितं मया । सुन्दरि मुञ्च लज्जां । परित्यज कोपं । न खल्वाज्ञाकारी किङ्करजनोऽयं कोपस्य गोचरो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवितुमर्हति । एवं च वदति मयि सा कनकमञ्जरी किंचिदकु कामापि न वक्तुं शक्नुवती केवलं विलसद्दशनकिरणरञ्जिताधर-विम्बा कपोलामलस्फुरितसूचितान्तःस्मिता वामचरणाङ्गुष्ठेन भूतलं लिखन्ती स्थितेषदधोमुखी । मयाभिहितं । अलमत्र सुन्दरि विकल्पितेन । यतः ।

हृदयाज्जीविताद्देहात्सकाशादतिवल्लभा ।
नाथोऽत्र त्वां विहायान्यो नास्ति मे भुवनत्रये ॥
अद्यप्रभृति निर्मिथ्यं तव पद्मविलोचने ।
क्रीतः सद्भावमूल्येन दासोऽहं पादधावकः ॥
कठोरहृदयो नाहं कठोरोऽत्र विधिः परम् ।
यो मे दर्शनविच्छेदं कुर्यात्ते वक्त्रपङ्कजे ॥
एतच्च मामकं वाक्यमाकर्ण्य प्रीतमानसा ।
मया निरीक्षिता बाला भजन्ती सा रसान्तरम् ॥

कथम् ।

चणेनामृतसिक्तेव क्षिप्तेव सुखसागरे ।
प्राप्तराज्याभिषेकेव तोषादन्येव सा स्थिता ॥

इतश्च मामन्विष्य नानास्थानेषु पर्यटन्ती प्राप्ता तमुद्देशं कपिञ्जला । दृष्टस्तेतलिः । अभिहितमनया । स्वागतं वयस्य क पुनः कुमार इति । तेतलिनाभिहितं । अत्र तरुलतागहेन प्रविष्टः । ततस्त्वलिते द्वे अपि ते अस्मदभिमुखं । दृष्टमावयोर्मिथुनं । संजातो हर्षातिरेकः । कपिञ्जलयाभिहितं । नमस्तस्मै भगवते देवाय येनेदं युगलमत्यन्तमनुरूपं संयोजितं । तेतलिः प्राह ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कपिञ्जले नूनं रतिमन्मथयोरिवानयोर्योगेनेदमुद्यानमद्येव यथार्थं संपन्नं । इतरथा व्यर्थकमेवास्य रतिमन्मथमित्यभिधानं पूर्वमासीत् । ततोऽस्मन्निकटदेशे प्राप्ते तेतलिकपिञ्जले । समुत्थिता ससंभ्रमेण कनकमञ्जरी । कपिञ्जलयाभिहितं । वत्से निषीदालं संभ्रमेण । ततोऽमृतपुञ्जक इव तत्र दूर्वाविताने निषण्णानि स्नेहनिर्भरसहासविश्रम्भजल्पैः स्थितानि वयं कियन्तमपि क्षणं ॥ अत्रान्तरे समागतो योगन्धरो नाम कन्यान्तःपुरकञ्चुकी । तेन च विधाय मम प्रणामं सत्वरमाहूता कनकमञ्जरी । कपिञ्जलयाभिहितं । भद्र किमितीदमाकारणं। योगन्धरः प्राह । श्रुतेयमपटुशरीरा रात्रौ देवेन । ततः प्रभाते स्वयमेव गवेषिता स्वस्थाने न चोपलब्धा । ततः पर्याकुलीभूतो देवः । समादिष्टोऽहमनेन । यथा यतः कुतश्चिदेतां गृहीत्वा शीघ्रमागच्छेति । तदिदमाह्वानकारणं । ततस्तदाकर्ण्यालङ्घनीयवचनस्तात इति मन्यमाना मुहुर्मुहुर्मां वलिततारं विलोकयन्ती सालसं प्रस्थिता सह कपिञ्जलया कनकमञ्जरी क्रमेणातिक्रान्ता दृष्टिगोचरात् । तेतलिनाभिहितं । देव किमिदानीमिह स्थितेन । ततोऽहं तदेव कृतककोपं वदनं तदेव मुञ्च मुञ्च कठोरहृदय मुञ्चेति वचनं तच्च विलसद्दशनकिरणरञ्जितमधरबिम्बं तदेव च हर्षातिरेकसूचकममलकपोलविस्फुरितं तच्च सद्भावसमर्पकं सलज्जं चरणाङ्गुष्ठेन भूमिलेखनं तदेव चाभिलाषातिरेकसन्दर्शकं तिरश्चीनेक्षणनिरीक्षणं तस्याः कनकमञ्जर्याः सम्बन्धि तीव्रतरमदनदाहज्वरप्रवर्धकमपि प्रकृत्या महामोहवशेन तदुपशमार्थममृतबुद्ध्या स्वचेतसि पुनः पुनश्चारयन् प्राप्तः स्वभवनं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृतं द्विवसोचितं कर्तव्यं । अपराह्णे समायाता कदलिका । तयाभिहितं । कुमार देवः समादिशति । यथा । निरूपितं मया सांवत्सरैर्विवाहदिनं अद्यैव गोधुल्यां शुध्यतीति । तदाकर्ण्य निमग्न इवाहं रतिसमुद्रे । दापितं कदलिकायै पारितोषिकं । स्तोकवेलायां समायाता गृहीतकनककलशा वारनार्यः । निर्वर्तितं मे स्नपनकं । विहितानि कौतुकानि । ततो दापितानि महादानानि । मोचितानि बन्धनानि । पूजिता नगरदेवताः । सन्मानिता गुरवः । विधापिता हट्टशोभाः । शोधिता राजमार्गाः । पूरितः प्रणयिवर्गः । गीतमम्बाजनैः । नृत्तमन्तःपुरैः । विलसितं राजवल्लभैः । ततो महता विमर्देन प्राप्तोऽहं राजभवनं । प्रयुक्ता मुसलताडनादयः कुलाचाराः । प्रविष्टोऽहं वधूगृहके । तत्र चामरवधूरप्युपहसन्ती रूपातिशयेन रतिमपि विशेषयन्ती मदनहरविलासैः ईषल्लम्बालका चक्रवाकमिथुनविभ्रमेण स्तनकलशयुगलेन सुनिविष्टनासिकावंशा रक्ताशोककिसलयाकाराभ्यां कराभ्यां कोकनदपत्त्रनेत्रा करिकराकारधरेणोरुदण्डद्वयेन विस्तीर्णनितम्बबिम्बा त्रिवलीतरङ्गभङ्गुरेण मध्यभागेन कृष्णस्निग्धकुटिलकेशा स्थलकमलयुगलानुकारिणा चरणद्वयेन कुण्डमिव मदनरसस्य राशिरिव सुखानां निधानमिव रतेः आकरो रूपानन्दरत्नानां मुनीनामपि मनोहारिणीमवस्थामनुभवन्ती महामोहतिरोहितविवेकलोचनेन मया दृष्टा कनकमञ्जरी । हृष्टचेतसा पुलकितशरीरेण कृतं प्रधानसांवत्सरवचनेन पाणिग्रहणं । भ्रान्तानि मण्डलानि । प्रयुक्ता आचाराः । विहिता लोकोपचाराः । वृत्तो महता विमर्देन



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विवाहयज्ञः। प्रविष्टोऽहमपहसितसुरभवने कनकमञ्जरीसनाथे वासभवने अवगाहितसुरतामृतसागरः। एवं च प्रवर्धमानानुरागयोरावयोर्गतानि कतिचिद्दिनानि ॥

इतश्च विभाकरस्य कृतं व्रणकर्म। प्रगुणीभूतः शरीरेण। जातो मया सहास्य स्नेहभावः। समुत्पन्नो विश्रम्भः। अन्यदा विधाय बहुमानं प्रहितः सपरिकरोऽसौ स्वस्थाने कनकचूडराजेन। येऽपि तेऽम्बरीषनामानश्चरटा वीरसेनप्रभृतयो हते प्रवरसेने प्रतिपन्नभृत्यभावा मया सह पूर्वमागतास्तेऽपि कृतसन्माना मया विसर्जिता गताः स्वस्थाने। ततोऽहं विगतचिन्तासन्तापस्ताभ्यां रत्नवतीकनकमञ्जरीभ्यामानन्दमहोदधिमवगाहमानः स्थितस्तत्रैव कियन्तमपि कालं। अस्यापि च व्यतिकरस्य परमार्थतः स एव पुण्योदयः कारणं। मम तु महामोहवशेन तदा प्रतिष्ठितं हृदये। यदुताहो हिंसावैश्वानरयोः प्रभावातिशयः। अनयोर्हि माहात्म्येन मयेयं निरुपमानन्दामृतरसकूपिका कनकमञ्जरी लब्धेति। यतः कथितं तेतलेः कपिञ्जलया कनकचूडराजादाकर्णितं मणिमञ्जरीवचनं यथा यतोऽनेन नन्दिवर्धनकुमारेण महाबलावपि द्रुमसमरसेनौ लीलया विनिपातितौ तस्मादस्मै युक्तेयं दातुं कनकमञ्जरीति। तौ च द्रुमसमरसेनौ मया हिंसावैश्वानरप्रभावादेव विनिपातितौ। तस्मात्परमार्थतो हिंसावैश्वानराभ्यामेव ममेयं कनकमञ्जरी संपादितेति। ततो जातं मे गाढतरं हिंसावैश्वानरस्नेहप्रतिबद्धमन्तःकरणं। ततो वैश्वानरवचनेन तैः क्रूरचित्ताभिधानैर्वटकैः प्रतिदिनमुपयुज्यमानैर्जनितं मे चण्डत्वं संपादितमसहनत्वं विहिता

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रौद्रता निर्वर्तितो भासुरभावः। गताङ्गाङ्गीभावं क्रूरता। जातोऽहं स्वरूपं तिरोधाय साक्षादिव वैश्वानरः। ततो नापेक्षे वटकोपयोगं। किं तर्हि सततप्रज्वलितोऽहमाक्रोशामि हितभाषिणं ताडयामि निष्कारणमेव परिजनं। हिंसया तु पुनः पुनराश्लिष्यमाणस्य मे संजातमाखेटकव्यसनं। ततः प्रतिदिनं निपातयामि स्माहमनेकजन्तुसंघातं। दृष्टं तन्मदीयचेष्टितं कनकशेखरेण। चिन्तितमनेन। अहो किमिदमीदृशमस्यासमञ्जसं चरितम्॥ तथाहि।

रूपवान् कुलजः शूरः कृतविद्यो महाशयः।
तथाप्ययं ममाभाति न किंचिन्नन्दिवर्धनः॥
यतोऽयं हिंसयाश्लिष्टो युक्तो वैश्वानरेण च।
परोपतापनिरतो धर्माद्दूरेण वर्तते॥
अतो नोपेक्षितुं युक्तो ममायं हितकारिणः।
वचने यदि वर्तेत स्यादस्मै हितमुत्तमम्॥
केवलस्य च मे वाक्यं कदाचिन्न करोत्ययम्।
ताताभ्यर्णे पुनः प्रोक्तः कुर्यात्तत्तातलज्जया॥
तदेनं तातसहितः शिक्षयामि तथा कृते।
हिंसावैश्वानरौ हित्वा स्यादेष गुणभाजनम्॥

ततः कृतो गृहीतार्थः कनकशेखरेण राजा। अन्यदा प्रविष्टोऽहं राजास्थाने। विहितप्रतिपत्तिर्निविष्टो नरेन्द्रसमीपे। ततः श्लाघितोऽहं कनकचूडराजेन। कनकशेखरेणाभिहितं। तात एवंविध एवायं नन्दिवर्धनः स्वरूपेण। केवलमिदमेकमस्य विरूपकं यदेष

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सतां गर्हिते कुसंसर्गे वर्तते। नृपतिराह। कीदृशोऽस्य कुसंसर्गः। कनकशेखरेणाभिहितं। अस्त्यस्य स्वरूपोपतापहेतुः सर्वानर्थकारणं वैश्वानरो नाम वयस्यः। तथा विद्यतेऽस्य श्रूयमाणापि जगत्त्रासकारिणी महापापहेतुर्हिंसा नाम भार्या। ताभ्यां च युक्तस्यास्येक्षुकुसुमस्येव निष्फलेव शेषगुणधवलता। नृपतिराह। यद्येवं ततस्तयोः पापयोस्त्याग एव श्रेयान् नाश्रयणम्॥ तथाहि।

वयस्यः स विधातव्यो नरेण हितमिच्छता।
इहामुत्र च यः श्रेयान् न लोकद्वयनाशकः॥
सा भार्या विदुषा कार्या या लोकाह्लादकारिका।
धर्मसाधनहेतुश्च न पुनर्दुष्टचेष्टिता॥

एवं च वदतोस्तयोर्वचनेन सततं ज्वलमानोऽपि वह्निरिव सर्पिषा गाढतरं प्रज्वलितोऽहं। ततो मया व्याधूनितमुत्तमाङ्गं आस्फोटितं करतलेन भूमिपृष्ठं विमुक्तः प्रलयनिर्घाताकारो झङ्कारः आलोकितमुद्यचलत्तारिकया दृष्ट्या तयोरभिमुखं अभिहितश्च राजा। अरे मृतक मदीयजीवितं वैश्वानरं हिंसां च पापतया कल्पयसि। न लक्षयसि कस्य प्रसादात्त्वयेदं राज्यं समासादितं। किं तर्हि मदीयवैश्वानरमन्तरेण भवतः पित्रापि ससमरसेनो द्रुमो वा निहन्तुं शक्येत। कनकशेखरः पुनरेवमभिहितः। अरे वृषल किं मत्तोऽपि पण्डिततरस्त्वमसि येनैवं मां शिक्षयसि। ततस्तद्वलोक्याकर्ण्य च मदीयवचनं विस्मितो राजा। कृतं कनकशेखरेण स्मेरं मुखं। मया चिन्तितं। अये नैतौ मां गणयतः। ततः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समाकृष्टा चमत्कुर्वाणा चुरिका। अभिहितं च। अरे गेहेनर्दिनौ दर्शयामि भवतोः स्वकीयवैश्वानरवीर्यं। प्रहरणहस्तौ भवतं। ततः समुत्खातचुरिकं ललमानजिह्वं यममिव मामवलोक्य दूरीभूतं राजकं। न चलितौ राजकनकशेखरौ। ततः सञ्चिहिततया पुण्योदयस्य महाप्रतापतया राजकनकशेखरयोर्भवितव्यतावशेन चादत्त्वैव प्रहारं निर्गतोऽहमास्थानाद्गतः स्वभवनं। ततः प्रभृत्यप-कर्णितोऽहं कनकचूडकनकशेखराभ्यां। यथापि दृष्टौ तौ शचुरूपौ। विच्छिन्नः परस्परं लोकव्यवहारोऽपीति ॥

अन्यदा समागतो जयस्थलाद्दारुको नाम दूतः। प्रत्यभि-ज्ञातो मया। निवेदितमनेन। यथा कुमार महत्तमैः प्रहितोऽहं। मया चिन्तितं। अये किमिति महत्तमैः प्रहितोऽयं न पुनस्तातेन। ततो जाताशङ्केन पृष्टोऽसौ मया। अपि कुशलं तातस्य। दारुकः प्राह। कुशलं। केवलमस्ति वङ्गाधिपतिर्यवनो नाम राजा। तेन चागत्य महाबलतया समन्तान्निरुद्धं नगरं स्वीकृतो बहिर्विषयः दापितानि स्थानकानि भग्नः पर्याहारः। न चास्ति कश्चित्तन्निरा-करणोपायः। ततः चीरसागरगम्भीरहृदयोऽपि मनागाकुलीभूतो देवः। विषण्णा मन्त्रिणः। उन्मनीभूता महत्तमाः। त्रस्ता नागरकाः। किं बहुना। न जाने किमत्र भविष्यतीति वितर्केण संजातं सर्वमपि दैवशरणं तन्नगरं। ततो मन्त्रिमहत्तमैः कृतपर्यालोचः स्थापितः सिद्धान्तः। यदुत नन्दिवर्धनकुमार एव यदि परमेनं यवनहतकमुत्सादयति नापरः पुरुष इति। ततो मतिधनेनाभि-हितं। ज्ञाप्यतामिदमेवंस्थितमेव देवाय। बुद्धिविशालेनाभिहितं।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नैवेदं देवाय ज्ञापनीयं । मतिधनः प्राह । कोऽत्र दोषः । बुद्धिविशालेनोक्तं । सुतवत्सलतया देवस्य कदाचिदेवंविधसङ्कटे नन्दिवर्धनागमनं न प्रतिभासते। तस्माद्देवस्याज्ञापनमेव श्रेयः। प्रज्ञाकरः प्राह । साधु साधूपपद्यमानं मन्त्रितं बुद्धिविशालेन । मतिधन किमत्रान्येन विकल्पेन। प्रेष्यतां कुमाराकारणाय प्रच्छन्न एव दूतः येन सर्वत्र शान्तिः संपद्यते । मतिधनेनाभिहितं । एवं भवतु । ततः सर्वरोचकेन प्रहितोऽहमिति ॥ तदिदं दूतवचनमाकर्ण्योल्लसितो वैश्वानरः । भविष्यति मम चारुतरोऽवसर इति प्रहसिता हिंसा । मयाभिहितं। अरे ताडयत प्रस्थानभेरिं । सज्जीकुरुत चतुरङ्गसेनां । तथा कृतं नियुक्तैः । ततः सर्वबलेन चलितोऽहं । नाख्यातं कनकचूडकनकशेखरयोः । केवलं कनकमञ्जरीवत्सलतया प्रवृत्ता मणिमञ्जरी। ततोऽनवरतप्रयाणकैः प्राप्ता वयं जयस्थलासन्ने। अभिहितो मया वैश्वानरः। यदुत वयस्य सततप्रवृत्ता ममाधुना तेजस्विता नापेक्षते वटकोपयोगं । तत्किमत्र कारणमिति। वैश्वानरेणाभिहितं। कुमार निष्कृत्रिमभक्तिग्राह्या वयं। अतुला च ममोपरि कुमारस्य भक्तिः। मदीयप्रभवाणि चैतानि क्रूरचित्तानि वटकानि भक्तिमतामेव पुंसां शरीरे प्रचरन्ति । तेन प्रचरितानि कुमारस्य शरीरे गतानि तन्मयतां । किं बहुना । मद्रूप एवाधुना वीर्येण कुमारो वर्तते । अन्यच्च । कुमार मदीयवचनानुभावादेवेयमपि हिंसाधुना कुमारस्य प्रतिपन्ना सात्मीभावं । नात्र सन्देहो विधेयः। मयाभिहितं। अद्यापि सन्देहः॥ ततो यावदेतावानावयोर्जल्पः संपद्यते स्म तावद्दर्शनवीथिमवतीर्णं परबलं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्टमनेनास्मदनीकं । ततस्तत्संनद्धमागतमभिमुखं । ततः संलग्न-मायोधनं । तच्च कीदृशम् ।

रथौघघर्घरारवं गजेन्द्रगर्जिदारुणम् ।
महाश्वहेषितोद्धुरं पदातिशब्दभीषणम् ॥

क्षणेन च तत्किंभूतं संपन्नम् ।

विदीर्णचक्रकूबरं विभिन्नमत्तकुञ्जरम् ।
विनाथवाजिराजितं पतत्पदातिमस्तकम् ॥
प्रजातसैन्यतानवं प्रनष्टदेवदानवम् ।
असिग्रहप्रवर्धकं प्रनृत्तसत्कबन्धकम् ॥

ततोऽभिभूता यवनराजसेनयास्मत्पताकिनी । समुल्लसितस्तद्बले कलकलः । ततो वलितोऽहमेककस्तदभिमुखं । समापतितो मया सह योद्धुं स्वयमेव यवनराजः । रणरभसेन चातीव मिलितौ स्यन्दनौ । ततः स्थित्वाहं कूबराग्रे दत्त्वा करणं पतितस्तत्स्यन्दने । त्रोटितं स्वहस्तेन यवनराजस्य मस्तकं ।

ततः प्रादुर्भवत्तोषलसज्जयजयारवम् ।
अस्मद्बलं परावृत्य समायातं मदन्तिकम् ॥

अन्यच्च । तदा ।

देवदानवगन्धर्वा वर्णयन्तः पराक्रमम् ।
मम गन्धोदकं पुष्पैर्मिश्रं मुञ्चन्ति मस्तके ॥
ततश्च तत्परानीकं क्षणेन हतनायकम् ।
जातं मे किङ्करं सर्वमाज्ञानिर्देशकारकम् ॥
निर्गत्य नगरात्तातो हर्षेण सह बन्धुभिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समागतः समीपं मे नगरं च सबालकम् ॥

ततो रथादवतीर्य पतितोऽहं तातपादयोः । गृहीत्वांसदेशयोरूर्ध्वीकृत्यानन्दोदकवर्षेण स्नपयता समालिङ्गितोऽहं तातेन । चुम्बितो मुहुर्मुहुर्मूर्धदेशे । ततो दृष्टा मयाम्बा । कृतं तस्याः पादपतनं । समालिङ्गितोऽम्बया चुम्बितो मस्तके । अभिहितश्चानन्दाश्रुपरिपूर्णलोचनया गद्गदया गिरा । यथा । पुत्र वज्रशिलासम्पुटघटितमेतत्ते जनन्याः सम्बन्धि हतहृदयं यत्तवापि विरहे न शतधा विदीर्णं । निःसारितानि च वयममुष्माद्गर्भवासादिव नगररोधकाद्भवता । अतो ममापि जीवितेन चिरं जीवेति ॥ ततो लज्जितोऽहं स्थितो मनागधोमुखं । समारूढानि सर्वाण्यपि रथवरे । ततश्च ।

*दृष्टा वैरिविमर्देन तुष्टा मत्सङ्गमेन च ।*

ते राजलोकाः सर्वेऽपि तदा किं किं न कुर्वते ॥

तथाहि ।

केचिद्ददति दानानि केचिद्गायन्ति भाविताः ।
उद्दामतूर्यनिर्घोषैः केचिन्नृत्यन्ति निर्भरम् ॥
केचित्कलकलायन्ते केचिदुत्कृष्टनादिनः ।
काश्मीरचन्दनक्षोदैः केचित्केलिपरायणाः ॥
केचिद्वस्त्राणि वर्षन्ति तथान्ये हासपूर्वकम् ।
हरन्ति पूर्णपात्राणि वल्गमानाः परस्परम् ॥
तुष्टो नागरको लोको वल्गन्ते कुब्जवामनाः ।
कृतोर्ध्वबाहवो नृत्ताः सर्वेऽन्तःपुरपालकाः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं महाप्रमोदेन प्रविश्य नगरं ततः ।
स्थित्वा राजकुले किंचिद्गतोऽहं निजमन्दिरे ॥
दिवसोचितकर्तव्यं तत्र संपाद्य सर्वथा ।
अनेकाद्भुतविस्तारदर्शनप्रीतमानसः ॥
समं कनकमञ्जर्या रजन्यां शयने स्थितः ।
अथैवं चिन्तयामि स्म महामोहवशंगतः ॥
अहो वैश्वानरस्योच्चैः प्रभावोऽयं महात्मनः ।
ममेयमीदृशी जाता यतः कल्याणमालिका ॥
आगतोऽहं तदुत्साहाज्जाता तेजस्विता परा ।
तोषितौ जनकौ लोके लब्धा जयपताकिका ॥
अहो प्रभावो हिंसाया या विलोकनलीलया ।
करोत्येषा विशालाक्षी मंक्षु वैरिविमर्दनम् ॥
नातः परतरं मन्ये प्रभावे वृद्धिकारणम् ।
यथेयं मम हिंसेति प्रत्यक्षफलदायिनी ॥
ततो गाढतरं रक्तोऽहं वैश्वानरहिंसयोः ।
सिद्धान्तं हृदयेनैवं स्थापयामि विशेषतः ॥
एते मे परमौ बन्धू एते परमदेवता ।
एते एव हिते मन्ये सर्वमत्र प्रतिष्ठितम् ॥
एते यः श्लाघयेद्धन्यः स मे बन्धुः स मे सुहृत् ।
एते यो द्वेष्टि मूढात्मा स मे शत्रुर्न संशयः ॥
न पुनस्तद्विजानामि महामोहपरायणः ।
यथा पुण्योदयाज्जातं ममेदं सर्वमञ्जसा ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिंसावैश्वानरासक्तः पुण्योदयपराङ्मुखः ।
ततोऽहं धर्ममार्गस्य दूराद्दूरतरं गतः ॥

ततश्च ।

रात्रिशेषे समुत्थाय पापर्द्धौ बद्धमानसः ।
तातम्बादीनदृष्ट्वैव गतोऽटव्यामहं ततः ॥
अनेकसत्त्वसम्भारं मारयित्वा गते दिने ।
सन्ध्यायां पुनरायातः प्रविष्टो भवने निजे ॥
अथासौ विदुरः प्रोक्तस्तातेनाकुलचेतसा ।
मत्समीपे कुमारोऽद्य किं नायातो निरूपय ॥
विदुरेणोक्तं प्रभातेऽहं कृत्वा मैत्रीं चिरन्तनीम् ।
दर्शनार्थं कुमारस्य गतस्तस्यैव मन्दिरे ॥
ततः परिजनेनोक्तं यथाखेटककाम्यया ।
रात्रावेव गतोऽटव्यां कुमारो नास्ति भो गृहे ॥

ततो मयाभिहितं। किमद्यैव कुमारो गतः पापर्द्धिबुद्ध्या किं वा प्रतिदिनं गच्छतीति। परिजनः प्राह। भद्र यतः प्रभृतीयं हिंसा परिणीता कुमारेण तत आरभ्य प्रतिदिनं गच्छति। नान्यथा धृतिं लभते। किं बहुना। जीविताद्पि बल्लभोऽधुना आखेटकः कुमारस्येति। मया चिन्तितं। अहो हता दैवेन वयं मन्दभाग्याः। तदिदमाभाणकमायातं। यदुत यत्करभस्य पृष्ठे न माति तत्कण्ठे निबध्यत इति। तथा हि वैश्वानरपापमित्रयोगेणैव कुमारस्य गाढमुद्वेजिता वयं यावतेयमपरा कृत्येवास्य भार्या संपन्नेति। तत्किं पुनरत्र विधेयमिति चिन्तयतो मे गतं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिनं। तदिदं कुमारस्य युष्मत्समीपेऽनागमनकारणमिति। तातेनाभिहितं। विदुर महापापहेतुरिदं मृगयाव्यसनं न च सेवितमस्मद्वंशजैर्नरपतिभिः। अतो यद्यस्य निमित्तभूतेयं भार्या कुमारस्यापसार्यते ततः सुन्दरं भवति। विदुरः प्राह। देव वैश्वानरवन्निरुपक्रमेयं लक्ष्यते। अथवा श्रूयते पुनरप्यायातोऽत्र नगरे स जिनमतज्ञो नैमित्तिकः। ततः स एवाहूय प्रष्टुं युक्तो यदत्र कर्तव्यमिति। तातेनाभिहितं। आकारय तर्हि तं नैमित्तिकं। विदुरेणोक्तं। यदाज्ञापयति देवः॥

ततो निर्गतो विदुरः। समागतः स्तोकवेलायां गृहीत्वा जिनमतज्ञं। ततो विधाय तस्य प्रतिपत्तिमाख्यातं तातेन प्रयोजनं। ततो निरूपितं बुद्धिनाडीसञ्चारतो नैमित्तिकेनाभिहितं च। यथा महाराज एक एवात्र परमुपायो विद्यते। स यदि संपद्येत ततः स्वयमेव प्रलीयेत कुमारस्येयमनर्थकारिणी हिंसाभिधाना भार्या। तातेनाभिहितं। कीदृशः स इति कथयत्वार्यः। जिनमतज्ञेनाभिहितं। यत्तदा वर्णितं समक्षमेव भवतां। यथास्ति रहितं सर्वोपद्रवैर्निवासस्थानं समस्तगुणानां कारणं कल्याणपरम्परायाः दुर्लभं मन्दभागधेयैश्चित्तसौन्दर्यं नगरं। तत्र च यो वर्णितः। यथास्ति हितकारी लोकानां कृतोद्योगो दुष्टनिग्रहे दत्तावधानः शिष्टपरिपालने परिपूर्णः कोशदण्डसमुदयेन शुभपरिणामो नाम राजा। तस्य राज्ञो यथासौ चान्तेर्जनयित्री निष्प्रकम्पता नाम महादेवी तदा वर्णिता तथैव तस्यान्यापि द्वितीयास्ति हितकारिणी लोकानां निकष-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूमिः सर्वशास्त्रार्थानां प्रवर्तिका सदनुष्ठानानां दूरवर्तिनी पापानां चारुता नाम राज्ञी । तथाहि ।

तावद्दुःखानि संसारे लभन्ते सर्वजन्तवः ।
स्वर्गापवर्गमार्गं च न लभन्ते कदाचन ॥
यावत्सा चारुता देवी तैर्न सम्यग् निषेव्यते ।
यदा पुनर्निषेवन्ते तां देवीं ते विधानतः ॥
लब्ध्वा कल्याणसन्दोहं तदा यान्ति शिवं नराः ।
अतः सा चारुता देवी लोकानां हितकारिणी ॥
संसारसागरोत्तारकारणानि महात्मनाम् ।
लोके लोकोत्तरे वापि यानि शास्त्राणि कानिचित् ॥
तेषु सर्वेषु शास्त्रेषु वर्णिता परमार्थतः ।
उपादेयतया देवी सा प्राज्ञैस्तत्त्वचिन्तकैः ॥
तेन सा निकषस्थानं शास्त्राणामिह गीयते ।
तां विना सर्वशास्त्रार्थोऽसद्बुद्धिप्रकरायते ॥
दानं शीलं तपो ध्यानं गुरुपूजा शमो दमः ।
एवमादीनि लोकेऽत्र चारुकर्माणि भावतः ॥
प्रवर्तयति सा देवी स्वबलेन महात्मनाम् ।
तेन सा सदनुष्ठानजनकेति निरुच्यते ॥
कामक्रोधभयद्रोहमोहमात्सर्यविभ्रमाः ।
शाठ्यपैशुन्यरागाद्या ये लोके पापहेतवः ॥
तेषां तया सहावस्था नास्त्येव भुवनत्रये ।
अतः सा चारुता देवी पापानां दूरवर्तिनी ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्याश्च शुभपरिणामसम्बन्धिन्याश्चारुताया महादेव्या आह्लादहेतुर्जगतः सुन्दरा रूपेण वल्लभा बन्धूनां कारणमानन्दपरम्परायाः सततं मुनीनामपि हृदयवासिनी विद्यते दया नाम दुहिता। तथाहि।

सर्वे चराचरा जीवा भुवनोदरचारिणः॥
दुःखं वा मरणं वापि नाभिकाङ्क्षन्ति सर्वदा॥

ततश्च।

सा दया द्वयमप्येतद्दारयत्येव देहिनाम्।
तेन सा भुवनाह्लादकारणं परिकीर्तिता॥
मुखं शशधराकारं साभीदानाख्यमुत्तमम्।
सद्दानदुःखत्राणाख्यौ दयायाः पीवरौ स्तनौ॥
विस्तीर्णं जगदानन्दं शमाख्यं जघनस्थलम्।
यद्वा नास्त्येव तद्देहे किंचिदङ्गमसुन्दरम्॥
रूपेण सुन्दरा प्रोक्ता तेन सा मुनिपुङ्गवैः।
यथेष्टा बन्धुवर्गस्य तथेदानीं निगद्यते॥
क्षान्तिः शुभपरिणामश्च चारुता निष्प्रकम्पता।
शौचसन्तोषधैर्याद्या दयाया बान्धवा मताः॥
तेषां तु सतताह्लादकारिणी हृदयस्थिता।
तेनातिवल्लभा प्रोक्ता बन्धुवर्गस्य सा दया॥
सुरेषु मर्त्यलोकेषु मोक्षे च सुखपद्धतिः।
दयापरीतचित्तानां वर्तते करवर्तिनी॥
आनन्दपद्धतेर्हेतुस्तेन सा कन्यका मता।
अत एव सुसाधूनां हृदये सा प्रतिष्ठिता॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथवा ।

दया हितकरी लोके दया सर्वगुणावहा ।
दया हि धर्मसर्वस्वं दया दोषनिषूदनी ॥
दयैव चित्तसन्तापविध्यापनपरायणा ।
दयावतां न जायन्ते नूनं वैरपरम्पराः ॥
किं वात्र बहुनोक्तेन गुणसम्भारगौरवम् ।
वहन्ती पद्मपत्राक्षी सा दया केन वर्ण्यताम् ॥
तदत्र परमार्थोऽयं महाराजाय कथ्यते ।
हिंसायाः प्रलयोपायो नापरोऽत्र निरीक्ष्यते ॥
यदैष तां दयां धीरः कुमारः परिणेष्यति ।
तदास्य स्वयमेवैषा दुष्टा भार्या विनंक्ष्यति ॥

यतः ।

इयं दाहात्मिका पापा सा पुनर्हिमशीतला ।
ततोऽनयोर्विरोधोऽस्ति यथाग्निजलयोः सदा ॥

ततस्तातेनाभिहितं । आर्य कदा पुनरेष नन्दिवर्धनकुमारस्तां दयाकन्यकां परिणेष्यति । जिनमतज्ञेनाभिहितं । यदा शुभपरिणामो दास्यति । तातः प्राह । स एव तर्हि कदा दास्यति । जिनमतज्ञेनाभिहितं । यदा कुमारं प्रति प्रगुणो भविष्यति । तातेनाभिहितं । कस्तर्हि तस्य प्रगुणीभवनोपायः । जिनमतज्ञः प्राह । कथितं पूर्वमेवेदं मया भवतां । यथा तं शुभपरिणामनरेश्वरं यदि परं कर्मपरिणाममहाराजः प्रगुणयितुं समर्थो नापरः । तदायत्तो यतोऽसौ वर्तते । तस्मात्किमत्र बहुना । यदा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स कर्मपरिणाममहानरेन्द्रः कुमारं प्रति सप्रसादो भविष्यति तदा स्वयमेव शुभपरिणामेनास्मै कुमाराय दयादारिकां दापयिष्यति। किं च चिन्तया। अन्यच्च। लक्षयाम्येवाहं निमित्तबलेन कुमारस्य भव्यतामपेक्ष्य युक्तिबलेन च। यदुत नियमेन कचित्काले सप्रसादो भविष्यत्येनं कुमारं प्रति कर्मपरिणामो नात्र सन्देहः। ततश्च तस्मिन् काले आपृच्छ्य महत्तमभगिनीं लोकस्थितिं पर्यालोच्य सह कालपरिणत्या निजभार्यया कथयित्वात्मीयमहत्तमाय स्वभावाय संभाष्य च स्वरमधुरवचनैरस्यैव नन्दिवर्धनकुमारस्य सम्बन्धिनीं समस्तभावान्तरानुयायिनीं प्रच्छन्नरूपामन्तरङ्गभार्यां भवितव्यतां दीपयित्वा नियतियदृच्छादीनां कुमारवीर्यं स्थापयित्वा दयादारिकादानस्य योग्योऽयमिति सर्वसमक्षं सिद्धान्तपक्षं ततो दापयिष्यत्येव स कर्मपरिणाममहाराजो दयादारिकां कुमाराय। निःसन्दिग्धमेतदतो मुञ्चत यूयमाकुलतां। तातः प्राह। तत्किमधुनास्माकं प्राप्तकालं। जिनमतज्ञेनोक्तं। मौनमवधीरणा च। तातेनाभिहितं। आर्य किमात्मपुत्रोऽस्माभिरवधीरयितुं शक्येत। जिनमतज्ञः प्राह। तत्किमत्र क्रियतां। यदि हि बहिरङ्गोऽयमुपद्रवः कुमारस्य स्यात्ततो न युज्येत कर्तुं तत्रभवतामवधीरणां। अयं पुनरन्तरङ्गोपद्रवो वर्तते। ततस्तमवधीरयन्तोऽपि भवन्तो नोपालम्भमर्हन्ति। ततो यदादिशत्यार्य इति वदता तातेन परिपूज्य प्रहितो नैमित्तिकः॥

गतानि कतिचिद्दिनानि। समुत्पन्नेयं तातस्य बुद्धिः। यथा स्थापयामि यौवराज्ये नन्दिवर्धनकुमारं। ज्ञापितं महत्तमानां।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपन्नमेतैः । गणितं प्रशस्तदिनं । कृताभिषेकसामग्री । समाहूतोऽहं । विरचितं भद्रासनं । मीलिताः सामन्ताः । समागता नागरकाः । संनिधापितानि माङ्गलिकानि । प्रकटितानि रत्नानि । प्रत्यासन्नीभूतान्यन्तःपुराणि ॥ अत्रान्तरे प्रविष्टा प्रतीहारी । कृतं तया पादपतनं । विरचितं करपुटकुड्मलं निवेशितं ललाटपट्टे । गदितमनया । देव अरिदमननृपतेः सम्बन्धी स्फुटवचनो नाम महत्तमः प्रतीहारभूमौ तिष्ठति । एतदाकर्ण्य देवः प्रमाणं । तातेनाभिहितं । शीघ्रं प्रवेशय । प्रवेशितः प्रतीहार्या । विहिता प्रतिपत्तिः । अभिहितं स्फुटवचनेन । महाराज श्रुतो मया बहिरेव कुमारस्य यौवराज्याभिषेकव्यतिकरः । तेनाहं शुभमुहूर्तोऽयमिति कृत्वा स्वप्रयोजनसिद्धये त्वरिततरः प्रविष्टः । तातेनाभिहितं । सुन्दरमनुष्ठितं । निवेदयतु स्वप्रयोजनमार्यः । स्फुटवचनः प्राह । अस्ति तावद्विदित एव भवादृशां शार्दूलपुराधिपतिः सुगृहीतनामधेयो देवोऽरिदमनः । तस्यास्ति विनिर्जितरतिरूपा रतिचूला नाम महादेवी । तस्याश्चाचिन्त्यगुणरत्नमञ्जूषा मदनमञ्जूषा नाम दुहिता । तया च लोकप्रवादेनाकर्णितं नन्दिवर्धनकुमारचरितं । ततो जातस्तस्याः कुमारेऽनुरागातिरेकः । निवेदितः स्वाभिप्रायो रतिचूलायै । तयापि कथितो देवाय । ततस्तां मदनमञ्जूषां कुमाराय प्रदातुं युष्मत्समीपे प्रहितोऽहं देवेन । अधुना महाराजः प्रमाणम् ॥ ततो निरीक्षितं तातेन मतिधनवदनम् । मतिधनः प्राह । देव महापुरुषोऽरिदमनः । युक्त एव देवस्य तेन सार्धं सम्बन्धः । ततोऽनुमन्यतामिदं तस्य वचनं । कोऽत्र विरोधः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तातेनाभिहितं। एवं भवतु। अत्रान्तरे मयाभिहितं। अहो कियद्दूरे तत्तावकीनं शार्दूलपुरमितः स्थानात्। स्फुटवचनः प्राह। सार्धयोजनशते। मयाभिहितं। मैवं वोचः। स्फुटवचनः प्राह। तर्हि यावद्दूरे तत्कथयतु स्वयमेव कुमारः। मयाभिहितं। गव्यूतेनोने सार्धयोजनशते। स्फुटवचनः प्राहः। किमेतत्। मयाभिहितं। श्रुतमस्माभिर्बालकाले। स्फुटवचनः प्राह। न सम्यगवधारितं कुमारेण। मयोक्तं। त्वया कथमवधारितम्। स्फुटवचनः प्राहः। गणितं मया पदं पदेन। मयाभिहितं। सुनिर्णीतमिदमस्माभिरप्याप्तप्रवादात्। स्फुटवचनेनोक्तं। कुमार विप्रतारितः केनापि। न चलतीदं मदीयं प्रमाणं तिलतुषत्रिभागमात्रेणापि॥ ततो मामेष दुरात्मा लोकमध्येऽलीकं करोतीति चिन्तयतो मे जृम्भितं वैश्वानरेण प्रहसितं हिंसया। प्रयुक्ता योगशक्तिः। कृतो द्वाभ्यामपि मदीयशरीरेऽनुप्रवेशः। ततः संजातोऽहं साक्षादिव प्रलयज्वलनः। समाकृष्टं दिनकरकरनिकरकरालं करवालं॥ अत्रान्तरे चिन्तितं पुण्योदयेन। यदुत पूर्णो ममाधुनावधिः। पालितो भवितव्यतानिर्देशः। न योग्योऽयमिदानीं नन्दिवर्धनकुमारो मत्सम्बन्धस्य। तस्मादपक्रमणमेव मेऽधुना श्रेयः। इत्यालोच्य नष्टः पुण्योदयः॥ मया कुर्वतो हाहारवं तावतो जनसमुदायस्याग्रत एव अविचार्य कार्याकार्यमेकप्रहारेण कृतो द्विदलः स्फुटवचनः। ततो हा पुत्र किमिदमकार्यमनुष्ठितमिति ब्रुवाणः समुत्थितः सिंहासनात् तातस्खलितो मदभिमुखं वेगेन। मया चिन्तितं। अयमप्येतद्रूप एव यो दुरात्मा मयापि कृतमिदम-

51

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्यमित्यारटति। ततः समुदीर्णखड्गो वलितोऽहं ताताभिमुखं। कृतो लोकेन कोलाहलः। ततो मया न स्मृतं जनकत्वं न लक्षिता स्नेहनिर्भरता न गणितं परमोपकारित्वं नालोचितो महापापागमः। सर्वथा वैश्वानरहिंसावशीभूतचित्तेनावलम्ब्य कर्म-चाण्डालतां तथैव रटतस्तातस्य चोटितमुत्तमाङ्गं। ततो हा जात हा जात मा साहसं मा साहसं चायध्वं लोकास्त्रायध्वमिति विमुक्तकरुणाक्रन्दरवा आगत्य लग्ना ममाम्बा करे करवालोद्दाल-नार्थं। मया चिन्तितं। इयमपि पापा मम वैरिणीव वर्तते येवं शत्रूच्छेदपरेऽपि मयि लकशकायते। ततः कृता सापि द्वेधा करवालेन। ततो हा भ्रातर्हा कुमार हा आर्यपुत्र किमिदमा-रब्धमिति पूत्कुर्वाणानि शीलवर्धनो मणिमञ्जरी रत्नवती च लग्नानि चीण्यपि मम भुजयोरेककालमेव निवारणार्थं। मया चिन्तितं। एकालोचितं नूनममीषां सर्वेषामपि दुरात्मनां। ततो गाढतरं परि-ज्वलितोऽहं। नीतानि चीण्येकैकप्रहारेणान्तकसदनं॥ अत्रान्तरेऽमुं व्यतिकरमाकर्ण्य हा आर्यपुत्र किमिदं किमिदमिति प्रलपन्ती प्राप्ता कनकमञ्जरी। मया चिन्तितं। अये एषापि पापा मद्वैरिणामेव मिलिता येवं विक्रोशति। अहो हृदयमपि मे वैरिभूतं वर्तते। तत्किमनेन। अपनयाम्यस्या अपि बन्धुवत्सलत्वं। ततो विगलित-प्रेमाबन्धे विस्मृता तद्विरहकातरता। न स्फुरितानि हृदये विश्रब्ध-जल्पितानि। अपहस्तिता रतिसुखसन्दोहाः। न पर्यालोचितस्तस्याः सम्बन्धी निरुपमः स्नेहाबन्धः। सर्वथा वैश्वानरान्धबुद्धिना हिंसा-क्रोडीकृतहृदयेन मया विदलिता करवालेन वराकी कनकमञ्जरी॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रान्तरे संरम्भेण गलितं मे कटीतटात्परिधानं विलुलितं भूमौ। निपतितमुत्तरीयं क्षितितले। जातोऽहं यथाजातः। मुत्कलीभूताः केशाः। संपन्नः साक्षादिव वेतालः। ततस्तथाभूतं मामवलोक्य दूरवर्तिभिः प्रेक्षकडिम्भरूपैर्हसद्भिरट्टहासेन कृता किलिकिलिका। ततः सुतरां प्रज्वलितोऽहं चलितस्तन्मारणार्थं वेगेन। ततो मे भ्रातरो भगिन्यः स्वजनाः सामन्ताश्च लग्नाः सर्वेऽप्येककालं निवारणार्थं। ततः कृतान्त इव समदर्शितया समस्तानपि निर्दलयन्नहं गतः कियन्तमपि भूभागं। ततो भूरितया लोकस्य वनकरीव श्रमे पातयित्वा गृहीतः कथंचिदहं। उद्दालितं मण्डलाग्रं। बद्धः पश्चाद्बाहुबन्धेन। ततो रटन्नसभ्यवचनानि प्रक्षिप्तोऽपवरके। दत्ते कपाटे। तत्र च प्रज्वलन्ननुनयवचनैः प्रलपन्नश्राव्यभाषया ददानः कपाटयोर्मस्तकास्फोटां क्षामो बुभुक्षया पीडितः पिपासया दन्दह्यमानश्चित्तसन्तापेनालभमानो निद्रां महाघोरनारक इव तथा बद्ध एव स्थितो मासमात्रं कालं अवधीरितः परिजनेन॥ अन्यदात्यन्तक्षीणतया समागता ममार्धरात्रे क्षणमात्रं निद्रा। ततः प्रसुप्तस्य छिन्नं मे मूषकैर्बन्धनं। जातोऽहं मुत्कलः। उद्घाटिते कपाटे। निर्गतो बहिर्देशे। निरूपितं राजकुलं। यावन्न कश्चिच्चेतयते ततो मया चिन्तितं। सर्वमेवेदं राजकुलं नगरं च मम वैरिभूतं वर्तते येनाहमेवं परिक्लेशितः पापेन। ततो विजृम्भितो ममान्तर्वर्ती वैश्वानरः। सहर्षया हुङ्कारितं हिंसया। दृष्टं मया प्रज्वलिताग्निकुण्डं। चिन्तितं हृदये। अयमत्र वैरिनिर्यातनोपायः। यदुत गृहीत्वा शरावं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्हलाङ्गाराणां ततो राजकुलस्य नगरस्य च अपरापरेषु इन्धनबहुलेषु स्थानेषु स्तोकस्तोकान्प्रक्षिपामि। ततः स्वयमेव भस्मीभविष्यतीदं द्वयमपि दुरात्मकमिति। ततः कृतं सर्वं तथैव। तन्मया लग्नं समन्तात्प्रदीपनकं। निर्गतोऽहमपि दंदह्यमानः कथंचिद्भवितव्यताविशेषेण। प्रवृत्तो जनाक्रन्दरवः। धावन्ति स्म लात लातेति ब्रुवाणाः परबलशङ्कया सुभटाः। ततः क्षीणतया शरीरस्य परस्परानुविद्धतया शरीरमनसोर्विगलितं धैर्यं। समुत्पन्नं मे भयं। पलायितोऽटवीसंमुखं। पतितो महारण्ये विद्धः कण्टकैः स्फोटितः कक्षकैः परिभ्रष्टो मार्गात् प्रस्खलितो विषमोट्टङ्कात् निपतितोऽधोमुखो निम्नदेशे। चूर्णितान्यङ्गोपाङ्गानि। न शक्नोम्युत्थातुं ॥

अत्रान्तरे समागताश्चौराः। दृष्टस्तैस्तथावस्थितोऽहं। अभिहितममीभिः परस्परं। अरे महाकायोऽयं पुरुषो लप्स्यते परकूले बहुमूल्यं। तद् गृहीत्वा नयामः स्वस्वामिमूलमेनं। तदाकर्ण्य समुल्लसितो ममान्तर्निमग्नो वैश्वानरः। स्थितोऽहमुपविष्टः। ततस्तेषामेकेनाभिहितं। अरे विरूपकोऽस्याभिप्रायः। ततः शीघ्रं बध्नीत यूयमेनमन्यथा दुर्ग्रहो भविष्यति। ततो गाढं हत्वा धनुःशाखाभिर्नियन्त्रितोऽहं पश्चान्मुखीकृत्य बाहू। ददतो गालीर्बद्धं मे वस्त्रकुहरं। ततः समुत्थापितोऽहं। परिहितं जरच्चीवरखण्डं। खेटितो ददद्भिर्गाढप्रहारान् नीतः कनकपुरप्रत्यासन्नां भीमनिकेतनाभिधानां भिल्लपल्लीं। दर्शितो रणवीरस्य पल्लीपतेः। अभिहितमनेन। अरे पोषयत तावदेनं येन पुष्टो विक्रेतुं नीयते। ततो यदा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञापयति देव इति वदता नीतोऽहमेकेन चौरेण स्वभवने। कोटितं वदनं कृतो मुत्कलो लग्नोऽहं चकारादिभिः। कुपितश्चौरो। हतोऽहं दण्डादिभिर्नवरं समर्पितोऽयं मम स्वामिनेति मत्वा न मारितोऽहमनेन। केवलं दापितं कदशनं। ततो बुभुक्षाक्षामकुक्षितया संजातं मे दैन्यं। तदेव कदन्नं भक्षयितुमारब्धः। न पूरितमुदरं। संजातश्चित्तोद्वेगः। गतानि कतिचिद्दिनानि। पृष्टोऽसौ रणवीरेण चौरः कीदृशोऽसौ पुरुषो वर्तत इति। स प्राह। देव न कथंचित्तस्य बलमारोहतीति। ततः क्षपितोऽहमेवं तेन भूयांसं कालं॥ अन्यदा समायातः कनकपुराच्चौराणामुपरि दण्डः। नष्टास्तस्कराः। लूषिता सा पल्ली। गृहीता बन्द्यो नीताः कनकपुरे। गतोऽहमपि तन्मध्ये। दर्शिता बन्द्यो विभाकरनृपतेः। ततो मामवलोक्य चिन्तितमनेन। अये किमिदमाश्चर्यं यदेष पुरुषोऽस्थिचर्मशेषतया दवदग्धस्थाणुकल्पोऽपि नन्दिवर्धनकुमाराकारं धारयति। ततो निरूपितोऽहं नखाग्रेभ्यो बालाग्राणि यावत्। ततः स्थितं तस्य हृदये नन्दिवर्धनकुमार एवायं। केवलं कथं तस्येह संभवोऽथवा विचित्राणि विधेर्विलसितानि। तद्वशगानां हि प्राणिनां किं वा न संभवति। तथाहि।

य एकदा नताशेषभूपमौल्यर्चितक्रमः।
वचने वचने लोकैर्जय देवेति भण्यते॥
स एव विधिना राजा तस्मिन्नेव भवेऽन्यदा।
रोराकारं विधायोच्चैर्नानाकारं विडम्ब्यते॥

तस्मात्स एवायं नास्त्यत्र सन्देहः। ततः स्मृतमित्रभावेन

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गलदानन्दोदकप्रवाहक्षालितकपोलेन सिंहासनादुत्थाय समालिङ्गितोऽहं विभाकरेण। ततः किमेतदिति विस्मितं राजमण्डलं। ततो निवेश्यात्मीयार्धासनेऽभिहितोऽहमनेन। वयस्य कोऽयं वृत्तान्तः। ततः कथितं विभाकराय मयात्मचरितं। विभाकरः प्राह। हा कष्टं न सुन्दरमनुष्ठितं भवता यदिदमतिनिर्घृणं जननीजनकादिमारणमाचरितं। ततः अयमपीह जन्मन्येव क्लेशो भवतस्तस्यैव फलविपाकः। तच्छ्रुत्वा विस्फुरितौ ममान्तर्गतौ हिंसावैश्वानरौ। चिन्तितं मया। यथायमपि मे वैरिरूप एव यो मत्कर्तव्यमप्यसुन्दरं मन्यते। ततो जातो मे तन्मारणाभिप्रायः। तथापि दुर्बलतया देहस्य महाप्रतापतया विभाकरस्य संनिहिततया बहुराजवृन्दस्य अनिकटवर्तितया प्रहरणस्य न दत्तो मया प्रहारः। केवलं कृतं कालं मुखं। लक्षितो विभाकरेण मदीयाभिप्रायः। यथा न सुखायतेऽस्य मदीयोऽयं जल्पः। तत् किमनेन संतापितेन। ततो विहितः प्रस्तुतकथाविक्षेपः। ज्ञापितं सामन्तमहत्तमादीनां। यथैष नन्दिवर्धनकुमारो मम शरीरं जीवितं सर्वस्वं बन्धुर्भ्राता पूज्योऽद्य जातोऽहमस्य दर्शनेनातः कुरुत प्रियसमागममहोत्सवमिति। तैरभिहितं। यदाज्ञापयति देवः। ततः प्रवर्तितो महानन्दः। स्नपितोऽहं विधिना परिधापितो दिव्यवस्त्राणि भोजितः परमान्नैः विलेपितः सुरभिविलेपनेन भूषितो महालङ्कारैः। दत्तं स्वयमेव विभाकरेण मनोहारि ताम्बूलं। मया त्वहमनेनेदमभिहितो यथा न सुन्दरमनुष्ठितं भवतेति ततो मारयिष्याम्येनं वैरिणमिति रौद्रवितर्कपरंपरादो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दूयमानचेतसा न किंचिच्चेतितं। उत्थाय भोजनमण्डपादुपविष्टा वयमास्थानशालायां। मतिशेखरेण मन्त्रिणाभिहितं। किं विदितं कुमारेण यथा देवभूयं गतः सुगृहीतनामधेयो देवः प्रभाकरः। ततो धूनिता मया कन्धरा। कृतं विभाकरेण साश्रु लोचनयुगलं अभिहितं च। वयस्य ताते परोक्षेऽधुना युष्माभिस्तातकार्यमनुष्ठेयं। तदिदं राज्यमेते वयमेताश्च तातपादप्रसादलालिताः प्रकृतयः प्रतिपन्नाः किङ्करभावं वयस्यस्य। यथेष्टं नियोज्यतां। ततो वैश्वा-वैगुण्यादवस्थितोऽहं मौनेन। लङ्घितो दिवसो दत्तं प्रादोषिक-मास्थानं। तदन्ते विसर्जितराजमण्डलो निवार्य प्रियतमाप्रवेशं मया सहातिस्नेहनिर्भरतया महार्हायामेकस्यामेव शय्यायां प्रसुप्तो वासभवने विभाकरनरेन्द्रः। ततो भद्रेऽगृहीतसङ्केते तदा मया हिंसावैश्वानराभ्यां विधुरितहृदयेन स तथाविधोऽतिस्निग्धविश्रब्धो विभाकरः समुत्थाय विनिपातितः पापेन। निर्गतश्चाहं परिधान-द्वितीयः। स्वकर्मत्रासेन पलायितो वेगेन निपतितोऽटव्यां। सोढानि नानाविधदुःखानि। प्राप्तो महता क्लेशेन कुशावर्त्तं। विश्रान्तो बहिः कानने। दृष्टः कनकशेखरपरिकरेण। निवेदितः कनकचूडकनकशेखरयोः। चिन्तितमाभ्यां। भवितव्यमत्र कारणेन यदेकाकी नन्दिवर्धन इति। ततः समागतौ कतिचिदाप्तपुरुष-परिवारौ मत्समीपं। विहितमुचितं। स्थितो मया सहोत्सारके कनकशेखरः। पृष्टमेकाकिताकारणं। मया चिन्तितं। अस्यापि न प्रतिभासिष्यते मदीयचरितं। तत्किं कथितेन। ततो मयाभि-हितं। अलमनया कथया। कनकशेखरः प्राह। किं मह्यमपि न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथ्यते । मयोक्तं । नेति । कनकशेखरेणोक्तं । कुमारावस्थतया कथनीयमितरथा न भवति मे चित्ते निर्वाणं । ततो मयादिष्ट-मयमुल्लङ्घयतीति चिन्तयतो मेऽन्तर्गतौ प्रचलितौ हिंसावैश्वानरौ । समाकृष्टा कनकशेखरकटीतटात्ज्वलज्जिह्वाभासुरासिपुत्रिका । समुद्गीर्णः कनकशेखरमारणाय प्रहारः । ततः किमेतदिति प्राप्ता वेगेन कनकचूडादयः । प्रादुर्भूतः कोलाहलः । स्तम्भितोऽहं कनक-शेखरगुणावर्जिततया यथासंनिहितया देवतया । समुत्क्षिप्तः पश्यतामेव तेषां गगनमार्गेण । नीतस्तद्विषयसन्धिदेशे । क्षिप्तस्तेषा-मम्बरीषाभिधानानां वीरसेनादीनां चरटानां मध्ये । दृष्टस्तैस्तथै-वोद्गीर्णप्रहारो गृहीतचुरिकः । प्रत्यभिज्ञातोऽमीभिः । पतिताः पादयोरभिहितं च तैः । देव कोऽयं वृत्तान्तः । न शकितं मया जल्पितुं । विस्मिताश्चरटाः । आनीतमासनं । न शकितं मयोपवेष्टुं । ततो गता दैन्यमेते । तत्करुणयोत्तम्भितोऽहं देवतया । चालितान्यङ्गानि । हृष्टास्ते वराकाः । निवेशितोऽहमासने पुनरपि पृष्टः प्रस्तुतव्यतिकरं । मया चिन्तितं । अहो यत्र यत्र व्रजामस्तत्र तत्र वयमेतैः परतन्त्रिपरायणैरलीकवत्सलैर्लोकैरासितुं न लभामहे । ते लब्धप्रतिवचनाः पुनः पुनर्मां पृच्छन्ति स्म । ततो विस्फुरितौ मे हिंसावैश्वानरौ । निपातिताः कतिचिच्चरटाः । जातः कल-कलः । ततो बलात्तेषां गृहीता मम हस्तादसिपुत्रिका । बद्धो-ऽहमात्मभयेन ॥ अत्रान्तरे गतोऽस्तं दिनकरः । विजृम्भितं तिमिरं । समालोचितं चरटैः । यथा पूर्ववैरिक एवायमस्माकं नन्दिवर्धनो येन हतः प्रवरसेनोऽधुनापि घातिता एतेनैते प्रधानपुरुषाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि प्रतिपन्नोऽस्माभिरेष स्वामिभावेन प्रख्यापितो लोके। विज्ञातमेतद्देशान्तरेषु। ततोऽस्य मारणे महानयशस्कारः संपद्यते। नैष वह्निवत्पुद्गलके कथंचिद्दारयितुं शक्यः। तस्माद्दूरदेशं नीत्वा त्याग एवास्य श्रेयानिति स्थापितः सिद्धान्तः॥ ततो नियन्त्रितोऽहं गन्त्रीमारटंश्च बद्धो वस्त्रेण वदनदेशे। युक्तौ मनः-पवनगमनौ वृषभौ। प्रस्थापिताः कतिचित्पुरुषाः। खेटिता गन्त्री-गता रजन्यैव द्वादश योजनानि। ततः प्रापितोऽहमनवरतप्रया-णकैः शार्दूलपुरं। त्यक्तो मलविलयाभिधाने बहिष्कानने। गताः स्वस्थानं सगन्त्रीकास्ते मनुष्याः॥

स्तोकवेलायां अकाण्ड एव विजृम्भितः सुरभिपवनः। विमुक्तः सहजोऽपि वैरानुबन्धः पशुगणैः। भुवनश्रियेव तत्समाध्यासितं काननं। समवतीर्णाः समकमेव सर्वे ऋतवः। प्रमुदिता विहङ्गम-गणाः। मनोहरमनुत्तालतालं रुंटितं मधुकरावलीभिः। विगत-तापं विशेषतस्तमुद्देशमुद्योतयितुमारब्धो दिनकरः। तथा ममापि मनाग्गलित इव चित्तसन्तापः॥ तदनन्तरं च देहभूषणप्रभाप्रवाहेण द्योतयन्तो दिक्चक्रवालं समागतास्तत्र देवाः। शोधितं तैर्भूतलं। वृष्टमतिसुरभिगन्धोदकं। विमुक्तः पञ्चवर्णमनोहारिकुसुमप्रकरः। विरचितं विशालमतिरमणीयं मणिकुट्टिमं। विहितं तस्योपरि कनककमलं। विस्तारितमुपरिष्टाद्देवदूष्यवितानं। अवलम्बितास्तत्र मौक्तिकावचूलाः। ततः समुत्सुकैस्तैर्देवैरवलोकितमार्गः कल्पद्रुम इव यथेष्टफलदायितया कनकगिरिरिव स्थिरतया क्षीरनीरधिरिव गुणरत्नाकरतया शशधर इव शीतलेश्यतया दिनकर इव सप्रताप-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा चिन्तामणिरिव दुर्लभतया स्फटिक इव निर्मलतया भूभाग इव सर्वसहिष्णुतया गगनतलमिव निरालम्बनतया गन्धकरीव वरकरिभिः परिकरितः स्वप्रतिबिम्बकैरिव बहुविधविनेयैः समागतः केवलज्ञानदिवाकरो विवेको नामार्यः । समुपविष्टः कनककमले । प्रणिपत्य विहितकरामुकुला निषण्णा परिषत् । प्रारब्धं व्याख्यानं ॥

अत्रान्तरे भगवतः प्रतापं सोढुमशक्नुवन्तौ मदीयशरीरान्निर्गतौ हिंसावैश्वानरौ दूरदेशे स्थितौ मां प्रतीक्षमाणौ ।

अथारिदमनो राजा मुनिं विज्ञाय लोकतः ।
स पुरो निर्गतस्तस्य मुनेर्वन्दनकाम्यया ॥
तथा मदनमञ्जूषा या दत्ता मम कन्यका ।
सापि तत्र समायाता सहिता रतिचूलया ॥
विहाय पञ्चचिह्नानि भक्तिनिर्भरमानसः ।
राजा कृतोत्तरासङ्गः प्रविष्टः सूर्यवग्रहे ॥
पञ्चाङ्गप्रणिपातेन पादयोर्न्यस्तमस्तकः ।
प्रणम्य सूरिं नौति स्म ललाटे कृतकुड्मलः ॥

कथम् ।

अज्ञानतिमिरोच्छेदकरनाथ दिवाकर ।
नमस्ते रागसन्तापनाशकारिनिशाकर ॥
स्वपाददर्शनेनाद्य नाथ कारुण्यसागर ।
भवता भवनिर्नाशपूतपापाः कृता वयम् ॥
अद्यैव ननु जातोऽस्मि राज्येऽद्यैव प्रतिष्ठितः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्यैव पटुकर्णोऽस्मि पश्याम्यद्यैव चक्षुषा ॥
यद्द्याखिलसन्तापपापजीर्णविरेचनम्।
भाग्यसंसूचकं मन्ये संपन्नं तव दर्शनम् ॥
एवं संस्तुत्य राजेन्द्रः सूरिं सूदितकल्मषम्।
प्रणम्य शेषसाधूंश्च निषसः शुद्धभूतले ॥
स्वर्गापवर्गपण्यस्य सत्यंकार इवाखिलैः।
गुरुभिर्मुनिभिश्चोच्चैर्धर्मलाभः कृतो नृपे ॥
ततः कृतप्रणामेषु शेषलोकेषु भावतः।
प्रयुक्तलोकयात्रेण गुरुणारम्भि देशना ॥

कथम्।

भो भव्या भवकान्तारे पर्यटद्भिरनारतम्।
अत्यन्तदुर्लभो ह्येष धर्मः सर्वज्ञभाषितः ॥

यतः।

अनादिरेष संसारः कालोऽनादिः प्रवाहतः।
जीवाश्चानादिकाः सर्वे दृश्यन्ते ज्ञानचक्षुषा ॥
न चैते प्राप्नुवन्तोऽमुं धर्मं सर्वज्ञभाषितम्।
कदाचिदपि पूर्वं तु तेनैते भवभाजनम् ॥
अथावाप्तो भवेज्जैनो धर्मोऽमीभिः कदाचन।
ततः कुतो भवोऽमीषां क तार्णं वह्निमीलके ॥
तस्मात्सुनिश्चितं राजन्नेतन्नास्त्यत्र संशयः।
नैवावाप्तः पुरा धर्मो जन्तुभिर्जिनदेशितः ॥

एवं च स्थिते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदानादौ भवेऽमीषां मत्स्यानामिव सागरे ।
सदा दोलायमानानां जीवानां दुःखसङ्कुले ॥
स्वकर्मपरिणामेन भव्यत्वपरिपाकतः ।
मनुष्यत्वादिसामग्र्या तथा कालादियोगतः ॥
धन्यः सकलकल्याणजनकोऽचिन्त्यशक्तिकः ।
यत्र क्वचिद्भवेज्जीवेऽनुग्रहः पारमेश्वरः ॥
स तदा लभते जीवो दुर्भेदग्रन्थिभेदतः ।
अशेषक्लेशनिर्नाशि जैनेन्द्रं तत्त्वदर्शनम् ॥
ततोऽसौ गृहिधर्मं वा प्राप्नुयाज्जिनभाषितम् ।
लभते साधुधर्मं वा सर्वदुःखविमोचकम् ॥
सा चेयती भवेत्कस्य सामग्रीयं सुदुर्लभा ।
राधावेधोपमानेन धर्मप्राप्तिः प्रकीर्तिता ॥
तदत्र लब्धे सद्धर्मे कुरुध्वं यत्नमुत्तमम् ।
अलब्धस्य तु लाभार्थं घटध्वमिह हे जनाः ॥

अत्रान्तरे चिन्तितं नरेन्द्रेण । केवलज्ञानदिवाकरो भगवानयं। नास्त्यस्य किंचिदज्ञेयं । अतः पृच्छामि भगवन्तमात्मीयसंशयं । अथवा पश्यत्येव भगवान्मदीयसन्देहं जिज्ञासां वा । अतः कथयतु ममानुग्रहेण । ततो भगवता सूरिणा भव्यजनबोधनार्थमभिहितो नरेन्द्रः । महाराज वाचा पृच्छ । नृपतिनाभिहितं । भदन्त येयं मदीयदुहिता मदनमञ्जूषा अस्याः पद्मनृपतिसुतनन्दिवर्धन-कुमाराय दानार्थं प्रहितो मया जयस्थले स्फुटवचनो नाम महत्तमः । गतः कियानपि कालो न निवृत्तोऽसौ । ततः प्रहिता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मया तद्वार्त्तोपलंभार्थं पुरुषाः। तैश्चागत्य निवेदितं। यथा देव तज्जयस्थलं भस्मीभूतं दवदग्धस्थलमात्रमधुना वर्तते। छिन्नमण्डलं च तत्तेन न विद्यन्ते प्रत्यासन्नान्यन्यग्रामनगराणि। अरण्यप्रायः सोऽधुना देशो वर्तते। तथा वार्त्तामात्रमपि नास्माभिरुपलब्धं कथं तत्तथाभूतं संजातमिति। ततो मया चिन्तितं। हा कष्टमहो कष्टं। किं पुनरत्र कारणं। किमकाण्ड एव तत्रोत्पाताङ्गार-वृष्टिर्निपतिता किं वा पूर्वविरुद्धदेवेन भस्मीकृतं नगरं। उत मुनिना केनचित्कोपाग्निना दग्धं। आहोस्वित् क्षेमवह्निना चौरादिभिर्वा। ततश्चाविज्ञातपरमार्थः ससन्देहः शोकापन्नश्च स्थितोऽहमेतावन्तं कालं। अधुना भगवति दृष्टे संजातः शोकाप-नोदः। सन्देहः पुनरद्यापि मे नापगच्छति। तमपनयतु भग-वानिति॥ भगवताभिहितं। महाराज पश्यसि त्वमेनं पर्षदः प्रत्यासन्नं नियन्त्रितं पश्चाद्वाहुबन्धेन निबद्धवस्त्रविवरं तिरश्चीनं पुरुषं। नृपतिनाभिहितं। सुष्ठु पश्यामि। भगवानाह। महाराज एतेन भस्मीकृतं नगरं। नृपतिराह। भदन्त कोऽयं पुरुषः। भगवानाह। महाराज स एवायं तव जामाता नन्दिवर्धनकुमारः। नृपतिराह। कथं पुनरनेनेदमीदृशं व्यवसितं। किमिति वायमेवं-विधावस्थोऽधुना वर्तते। ततः कथितो भगवता स्फुटवचनविरोधा-दिकस्वरटमनुष्यपरित्यागपर्यवसानः सर्वोऽपि नरपतये मदीय-वृत्तान्तः। तमाकर्ण्य विस्मितो राजा परिषच्च। नृपतिना चिन्तितं। किं छोटयाम्यस्य वदनं। करोमि मुत्कलं बाहुयुगलं। अथवा नहि नहि। निवेदितमेवास्य चरितं भगवता। तदेष

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुत्कलोऽस्माकमपि केनचिदकाण्डविघ्नसम्पादनेन धर्मकथाश्रवण-विघ्नहेतुः स्यात्। तस्मात्तावदयं यथान्यासमेवास्तां। पश्चादुचितं करिष्यामः। अस्थानं चैष करुणायाः यस्येदृशं चरितं। तदधुना तावदपरं भगवन्तं सन्देहं प्रश्नयामः। ततोऽभिहितं नृपतिना। भदन्त नन्दिवर्धनकुमारोऽस्माभिरेवंगुणः समाकर्णितः। यदुत।

वीरो दक्षः स्थिरः प्राज्ञो महासत्त्वो दृढव्रतः।
रूपवान्नयमार्गज्ञः सर्वशास्त्रविशारदः॥
गुणानां निकषस्थानं प्रख्यातपरपौरुषः।
अतोऽनेन महापापं कथं चेष्टितमीदृशम्॥
सूरिणाभिहितं राजन्नास्य दोषस्तपस्विनः।
तादृग्गुणगणोपेतः स्वरूपेणैष वर्तते॥
राजाह ननु कस्यायं दोषो नाथ विवेच्यताम्।
यद्येवमात्मरूपेण निर्दोषो नन्दिवर्धनः॥

ततो गुरुणाभितं। यदेतद्दृश्यते दूरवर्त्ति कृष्णरूपं मानुषद्वयं अस्यैव समस्तोऽपि दोषः। ततो नरपतिना विस्फारितं तदभिमुख-लोचनयुगलं। निरूपितं च्छतौ वेलां तन्मानुषद्वयं। गदितं चानेन। भगवन्नेकोऽत्र मनुष्यो द्वितीया नारीति लक्ष्यते। भग-वताभिहितं। सम्यगवधारितं महाराजेन। नृपतिराह। भदन्त कोऽयं मनुष्यः। भगवताभिहितं। एष महामोहस्य पौत्रको द्वेष-गजेन्द्रस्य सूनुरविवेकितानन्दनो वैश्वानरोऽभिधीयते। अस्य हि जननीजनकाभ्यां प्रथमं क्रोध इति नाम प्रतिष्ठितं। पश्चात्स्वगुणैरस्य परिजनसकाशादिदं द्वितीयं वैश्वानर इति प्रियनामकं संपन्नं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृपतिराह। तर्हि नारी केयं। भगवताभिहितं। एषा द्वेषगजेन्द्रप्रतिबद्धस्य दुष्टाभिसन्धिनरेन्द्रस्य निष्करुणताया महादेव्या दुहिता हिंसोच्यते। नृपतिनाभिहितं। अनेन नन्दिवर्धनकुमारेण सहानयोः कः सम्बन्धः। भगवानाह। अस्यान्तरङ्गे एते मित्रभार्ये भवतोऽनयोश्च समर्पितहृदयोऽयं न गणयति स्वकमर्थानर्थं नापेक्षते धर्माधर्मं न लक्षयति भक्ष्याभक्ष्यं नाकलयति पेयापेयं न जानीते वाच्यावाच्यं नावगच्छति गम्यागम्यं न बुध्यते हिताहितविभागं। ततो विस्मरन्ति स्वभ्यस्ता अपि समस्ताः क्षणमात्रेण निजगुणाः। परावर्तते निःशेषदोषपुञ्जतयास्यात्मा। ततो महाराज नन्दिवर्धनेनानेन बालकाले कदर्थिता निरपराधा दारकाः खलीकृतः कलोपाध्यायस्ताडितो हितोपदेशदायकोऽपि विदुरः। तथा तरुणेन सता घातिताः प्राणिसंघाताः विहिता महासङ्ग्रामाजनितो जगत्सन्तापः परमोपकारिणौ बान्धवावपि मारयितुमारब्धौ तिरस्कृतौ कनकचूडकनकशेखरौ। तदारात्पुनर्यदनेनाचरितं स्फुटवचनेन महाकाण्डभण्डनं तन्मारणं च तथा जननीजनकसहोदरभगिनीप्रियभार्यादिव्यापादानं नगरदहनं स्नेहनिर्भरमित्रभृत्यनिपातनं च तन्निवेदितमेव युष्माकं। स एष महाराज समस्तोऽप्यनयोरेव पापयोर्हिंसावैश्वानरयोरस्य भार्यावयस्ययोर्दोषसंघातो न पुनः स्वयमस्य तपस्विनो नन्दिवर्धनकुमारस्य दोषगन्धोऽप्यस्ति। तथाह्ययं स्वरूपेण स्थानमनन्तज्ञानस्य भाजनमनन्तदर्शनस्य पात्रमनन्तवीर्यस्य निलयनमनन्तसुखस्य कुलभवनमपरिमितगुणानां। न चेदृशमात्मस्वरूपमद्याप्येष वराको लक्षयति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेनानयोः पापभार्यावयस्ययोः स्वरूपविपर्यासकारिणोर्वशे वर्तते । तथा च वर्तमानोऽयमेवंविधामनन्तदुःखहेतुभूतामनर्थपरंपरामासादयति ॥ नृपतिनाभिहितं । भदन्त स्फुटवचनव्यतिकरात्पूर्वमस्माभिः श्रुतमासील्लोकवार्त्तया । यदुतानेन नन्दिवर्धनकुमारेणोत्पद्यमानेनानन्दितं पद्मराजकुलं वर्धितं कोशदण्डसमृध्या तोषितं नगरं । वर्धमानेन पुनराह्लादिताः प्रकृतयो विस्तारितो गुणप्राग्भारः प्रतापेन वशीकृतं भूमण्डलं निर्जिताः शत्रवः गृहीता जयपताका समुल्लसितो यशःपटहः सिंहायितं भूतले अवगाहितः सुखामृतसागरः । तत् किं तदास्य नास्तामेतौ पापभार्यावयस्यौ यदीमौ दुःखपरंपराकारणभूताविति । भगवताभिहितं । महाराज तदाप्यास्तामेतौ किं तु तदान्यदेव कल्याणपरंपराकारणमासीत् । नृपतिराह । किं तत् । भगवतोक्तं । पुण्योदयो नाम सहचरः । स हि विद्यमानः स्वकीयप्रभावेण सर्वेषामेषामनन्तरोक्तानां पद्मराजकुलानन्दजननादीनां प्रयोजनविशेषाणां संपन्नः कारणं । केवलं महामोहवशान्न लक्षितोऽनेन नन्दिवर्धनेन तदीयः प्रभावः । पुण्योदयमाहात्म्यजातमपि कल्याणकदम्बकं हिंसावैश्वानरप्रतापजनितं ममैतदित्येवमेष मन्यते स्म । ततोऽयमविशेषज्ञ इति मत्वा विरक्तोऽसौ पुण्योदयः । नष्टो गृहीत्वैकां दिशं स्फुटवचनव्यतिकरावसरे । ततस्तद्विकलस्यास्य नन्दिवर्धनकुमारस्येदमनर्थकदम्बकमाभ्यां हिंसावैश्वानराभ्यां संपादितमिति । नृपतिराह । भदन्त कियान्पुनः कालोऽस्य हिंसावैश्वानराभ्यां सह सम्बन्धस्य । भगवताभिहितं । अनादिपरिचितावस्येमौ हिंसावैश्वानरौ । केवलमत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पद्मराजगृहे निवसतोऽस्याविर्भूताविमौ। पूर्वं तिरोभूतौ स्थितौ। नृपतिराह। किमनादिरूपोऽयं नन्दिवर्धनकुमारः। भगवानाह। वाढं। नृपतिराह। तत्किमित्ययं पद्मराजपुत्रतया प्रसिद्धः। भगवानाह। मिथ्याभिमानोऽयमस्य यदुत पद्मराजपुत्रोऽहं। अतो नात्रास्था विधेया। नृपतिनोक्तं। भदन्त तत्परमार्थतः कुतस्त्योऽयमवधार्यतां। भगवताभिहितं। असंव्यवहारनगरवास्तव्यः कुटुम्बिकोऽयं संसारिजीवनामा कर्मपरिणाममहाराजादेशेन लोकस्थितिनियोगमुररीकृत्य स्वभार्यया भवितव्यतया ततो नगरान्निःसारितोऽपरापरस्थानेषु पर्यटन् धार्यत इत्यवधारणीयं। नृपतिराह। भदन्त कथमेतदिति सप्रपञ्चामस्य वक्तव्यतां श्रोतुमिच्छामि। भगवानाह। महाराजाकर्णय। ततः कथितो भगवता समस्तोऽपि विस्तरेण मदीयव्यतिकरः। ततः क्षुप्ततया भगवद्दर्शनेऽरिदमनस्य विमलतया बोधस्य प्रत्यायकतया भगवद्वचनस्य लघुकर्मतया जीवस्य प्रत्यासन्नतया महाकल्याणस्य परिस्फुरितमस्य हृदये। अये भगवता विमलकेवलालोकेनोपलभ्यास्य नन्दिवर्धनकुमारस्य सम्बन्धी भवप्रपञ्चोऽयमनेन व्याजेन प्रतिपादितः। ततोऽभिहितमनेन। भदन्त यथैवं मयावधारितं तथैवेदमुतान्यथेति। भगवानाह। महाराज तथैव। मार्गानुसारिणी हि भवतो बुद्धिः। तत्कुतस्तत्रान्यथाभावः। नृपतिनाभिहितं। भदन्त तत्किमस्यैव नन्दिवर्धनस्यायं वृत्तान्तः किं वान्येषामपि प्राणिनामिति। भगवानाह। महाराज सर्वेषां संसारोदरविवरवर्तिनामसुमतामेष व्यतिकरः प्रायेण समावर्तते। तथाहि। स्थिताः सर्वेऽप्येतेऽनादिकं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालं प्रायोऽसांव्यवहारिकजीवराशिमध्ये। तत्र च निवसतामेतेषा-मेत एव क्रोधमानमायालोभास्रवद्वारादयोऽन्तरङ्गः परिजनः। यावन्तश्चागमप्रतिपादितानुष्ठानबलेन जीवाः सिध्यन्ति तावन्त एवा-सांव्यवहारिकजीवराशिमध्यादागच्छन्तीति केवलिवचनं। ततो निर्गताश्चैतेऽपि सर्वे जीवा विडम्बिता भूयांसं कालमेकेन्द्रियेषु विनाटिता विकलेन्द्रियेषु विगोपिताः पञ्चेन्द्रियतिर्यग्योनिजेषु कदर्थिता नानाविधानन्तदुःखैः कारिता बहुविधरूपाणि सतत-मपरापरभवप्रायोग्यकर्मजालविपाकोदयद्वारेण भवितव्यतया भ्रमि-ताश्चारघट्टघटीयन्त्रन्यायेन सूक्ष्मबादरपर्याप्तकापर्याप्तकपृथिव्यप्तेजो-वायुवनस्पतिद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियसंज्ञ्यसंज्ञिपञ्चेन्द्रियतिर्यग्यो-निजखचरजलचरादिभेदविवर्तेन सर्वस्थानेषु प्रत्येकमनन्तवाराः। ततः कैश्चिज्जीवैः कथंचिन्महासागरपतितैरिव रत्नद्वीपं महारोग-भराक्रान्तैरिव महाभेषजं विषमूर्छितैरिव महामन्त्रो दारिद्र्याभि-भूतैरिव चिन्तामणिः प्राप्यतेऽतिदुर्लभोऽयं मनुष्यभवः। तत्रापि महानिधिग्रहण इव वेताला भृशमाविर्भवन्त्येते हिंसाक्रोधादयो दोषा यैरभिभूतास्तिष्ठन्तु तावदेते प्रबलमहामोहनिद्राघूर्णित-मानसा नन्दिवर्धनमङ्गुला वराकसत्त्वाः किं तर्हि येऽपि जिनवचन-प्रदीपेन जानन्त्येनं भवप्रपञ्चं लक्षयन्ति मनुष्यभवदुर्लभतां बुध्यन्ते संसारसागरतारकं धर्मं वेदयन्ते स्वसंवेदनेन भगवद्वचनार्थं निश्चि-न्वन्ति निरुपमानन्दरूपं परमपदं तेऽपि बालिशा इव प्रवर्तन्ते परोपतापेषु भवन्ति गर्वाध्माताः कुर्वन्ति परवञ्चनानि रज्यन्ते द्रविणोपार्जनेषु व्यापादयन्ति सत्त्वसंघातं भाषन्तेऽलीकवचनानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आददते परधनं गृध्यन्ति विषयोपभोगेषु आचरन्ति महापरिग्रहं भजन्ते रजनीभोजनानि। तथा मुह्यन्ति शब्देषु मूर्छन्ति रूपेषु लुभ्यन्ति रसेषु तृप्यन्ति गन्धेषु आश्लिष्यन्ति स्पर्शेषु द्विषन्ति चानिष्टशब्दादीन् भ्रमयन्ति पापस्थानेषु सततमन्तःकरणं न नियन्त्रयन्ति भारतीं उच्छृङ्खलयन्ति कायं भज्यन्ते दूरेण तपश्चरणात्। ततोऽयं मनुष्यभवो मोक्षाक्षेपकारणभूतोऽपि तेषामधन्यतया न केवलं न किंचिद्गुणलवलेशमात्रमपि साधयति किं तर्हि यथास्य नन्दिवर्धनस्य तथैव प्रत्युतानन्तदुःखपरंपराकुलसंसारकारणतां प्रतिपद्यते। तथाहि प्राप्तोऽयं मनुष्यभवोऽनादौ संसारे पूर्वमनन्तवारान् न च सद्धर्मानुष्ठानविकलेनानेन किंचित्साधितं। अत एवास्माभिः पूर्वं भगवद्धर्मस्यात्यन्तदुर्लभता प्रतिपादिता। तथाहि।

पद्मरागेन्द्रनीलादिरत्नसङ्घातपूरितम्।
लभ्यते भवनं राजन्न तु जैनेन्द्रशासनम्॥
समृद्धं कोषदण्डाभ्यामेकच्छत्रमकण्टकम्।
सुप्रापमीदृशं राज्यं न तु धर्मो जिनोदितः॥
संपूर्णभोगसम्प्राप्तिप्रीणितेन्द्रियमानसम्।
सुलभं नृपदेवत्वं न मतं पारमेश्वरम्॥
संसारे परमैश्वर्यकारणं भूप लभ्यते।
इन्द्रत्वमपि जीवेन न धर्मो जिनदेशितः॥
एते हि भावा राजेन्द्र संसारसुखकारणम्।
सद्धर्मस्तु मुनीन्द्रोक्तो निर्वाणसुखकारणम्॥
निर्वाणसुखसंसारसुखयोश्च परस्परम्।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिन्तारत्नस्य काचेन यावत्तावद्गुणान्तरम् ॥
एवं च ज्ञातमाहात्म्यैः संसारे ब्रूहि तत्त्वतः ।
ईदृग्धर्मसम्प्राप्तिर्भूप केनोपमीयताम् ॥

एवंस्थिते ।

एनं संसारविस्तारं विलंघ्य कथमप्यदः ।
मानुष्यं प्राप्य दुष्प्रापं राधावेधोपमं जनः ॥
यो जैनमपि संप्राप्य शासनं कर्मनाशनम् ।
हिंसाक्रोधादिपापेषु रज्यते मूढमानसः ॥
संहारयति काचेन चिन्तामणिमनुत्तमम् ।
करोत्यङ्गारवाणिज्यं दग्ध्वा गोशीर्षचन्दनम् ॥
भिनत्ति नावं मूढात्मा लोहार्थं स महोदधौ ।
सूत्रार्थं दारयत्युच्चैर्वैडूर्यं रत्नमुत्तमम् ॥
प्रदीपयति कीलार्थं देवद्रोणीं महत्तमाम् ।
रत्नस्थाल्यां पचत्यांम्लखलकं मोहदोषतः ॥
सौवर्णलाङ्गलाग्रेण लिखित्वा वसुधां तथा ।
अर्कबीजं वपत्येष तूलार्थं मूढमानसः ॥
छित्त्वा कर्पूरखण्डानि कोद्रवाणां समन्ततः ।
वृतिं विधत्ते मूढोऽयमहं सश्रुतिकः किल ॥

यतः ।

हिंसाक्रोधादिपापेषु जन्तोरासक्तचेतसः ।
सद्धर्मोऽयं जिनेन्द्रोक्तो दूराद्दूरेण गच्छति ॥
सद्धर्मरहितश्चासौ पापपूरितमानसः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न मोक्षमार्गलेशेन कथंचिदपि युज्यते ॥
ततो जानन्नपि बलात्पुनर्भीमे महोदधौ ।
निर्वोलं याति मोहान्धो यथायं नन्दिवर्धनः ॥

नृपतिनाभिहितं । भगवंस्तस्य नन्दिवर्धनस्य किमियतापि प्रपञ्चेन कथ्यमाने स्वसंवेदनसंसिद्धेऽपि निजचरिते संजातः प्रबोधः । भगवताभिहितं । महाराज न केवलमस्य प्रतिबोधाभावः किं तर्हि मयि कथयति प्रत्युतास्य महानुद्वेगो वर्तते । नृपतिराह । किमभव्योऽयं । भगवतोक्तं । नाभव्यः किं तर्हि भव्य एव । केवलमयमस्यैव वैश्वानरस्य दोषो यन्मदीयवचनं न प्रतिपद्यते । यतोऽयमनन्तोऽनुबन्धोऽस्येति कृत्वा अनन्तानुबन्धीति तृतीयनाम्ना मुनिभिर्गीयते । ततोऽत्र विद्यमाने न सुखायते मदीयवचनं उत्पादयत्यरतिं जनयति कलमलकं । ततः कुतोऽस्य तपस्विनः प्रबोधः । पर्यटितव्यमद्याप्यनेन नन्दिवर्धनेनास्य वैश्वानरस्य प्रसादादपरापरस्थानेषु दुःखमनुभवतानन्तं कालं प्राप्तव्या च वैरपरंपराः । नृपतिराह । भदन्त महारिपुरेषोऽस्य वैश्वानरः । भगवतोक्तं । पर्याप्तमियत्या महारिपुतया । नृपतिराह । किमस्यैवायं वयस्यः किं वान्येषामपि जन्तूनां । भगवानाह । यदि महाराज स्फुटं प्रश्नयसि ततस्तथा ते कथयामि यथा पुनः प्रष्टव्यमिदं न भवति । नृपतिराह । अनुग्रहो मे । भगवताभिहितं । इह सर्वेषां जीवानां प्रत्येकं त्रीणि त्रीणि कुटुम्बकानि । तद्यथा । क्षान्तिमार्दवार्जवमुक्तिज्ञानदर्शनवीर्यसुखसत्यशौचतपःसन्तोषादीनि यत्र गृहमानुषाणि तदिदमेकं कुटुम्बकं । तथा क्रोधमानमायालोभरागद्वेषमोहाज्ञानशोकभया-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विरतिप्रभृतयो यत्र बान्धवाः तदिदं द्वितीयं कुटुम्बकं । तथा शरीरं तदुत्पादकौ स्त्रीपुरुषावन्ये च तथाविधा लोका यत्र सम्बन्धिनः तदिदं तृतीयं कुटुम्बकं। कुटुम्बत्रितयद्वारेण चासंख्याताः स्वजनवर्गाभवन्ति। तत्र यदिदमाद्यं कुटुम्बकमेतज्जीवानां स्वाभाविकमनाद्यपर्यवसितं हितकरणशीलमाविर्भावतिरोभावधर्मकमन्तरङ्गं च वर्तते मोक्ष-प्रापकं च । यतः प्रकृत्यैवेदं जीवमुपरिष्टान्नयति । यत्पुनरिदं द्वितीयं कुटुम्बकमेतज्जीवानामस्वाभाविकं । तथाप्यविज्ञातपरमार्थै-र्जन्तुभिर्गृहीतं तद्गाढतरं स्वाभाविकमिति । तदनाद्यपर्यवसितम-भव्यानां अनादि सपर्यवसितं केषांचिद्भव्यानां एकान्तेनाहितकरण-शीलमाविर्भावतिरोभावधर्मकमन्तरङ्गं च वर्तते संसारकारणं च । यतः प्रकृत्यैवेदं जीवमधस्तात्पातयति । यत्पुनरिदं तृतीयं कुटुम्बक-मेतज्जीवानामस्वाभाविकमेव तथा सादि सपर्यवसितमनियतसद्भावं च । यथा भव्यतया हिताहितकरणशीलमुत्पत्तिविनाशधर्मकं बहि रङ्गं च वर्तते तथा भव्यतया संसारकारणं मोक्षकारणं वा भवति। यतो बाहुल्येन द्वितीयकुटुम्बकस्यावष्टम्भकारकमिदमतः संसार-कारणं । यदि पुनः कथंचिदाद्यं कुटुम्बकमनुवर्तते ततो जीवस्येद-मप्याद्यकुटुम्बकपोषणे सहायं स्यात् । ततश्च मोक्षकारणतां प्रति-पद्येत । तदेवंस्थिते महाराज यदिदं द्वितीयं कुटुम्बकमस्य मध्ये सर्वेषां संसारिजीवानामेष वैश्वानरो वयस्यस्तथेयमपि हिंसा भार्या विद्यत एव । नात्र सन्देहो विधेयः । नृपतिराह । भदन्त यदीद-माद्यं कुटुम्बकं स्वाभाविकं हितकरणशीलं मोक्षकारणं च तत्कि-मितीमे जीवा गाढं नेदमाद्रियन्ते। यदि चेदं द्वितीयकुटुम्बक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वाभाविकमेकान्तेनाहितकरणशीलं संसारकारणं च तत्किमितीमे जीवा गाढतरमिदं पोषयन्ति । भगवानाह । महाराजाकर्णयात्र कारणं। एतदाद्यं कुटुम्बकमनेन द्वितीयकुटुम्बकेनानादौ संसारे सकलकालमभिभूतमास्ते । ततो भयात्तिरोभावं गतस्य तस्य न संपन्नं कदाचिदभिव्यक्तं दर्शनं। ततो न लक्षयन्त्येते वराका जीवास्तत्सम्बन्धिनं गुणकलापं। तेन न तस्योपरि गाढमादरं कुर्वन्ति । विद्यमानमपि तदविद्यमानं मन्यन्ते । तस्य गुणानपि वर्णयन्तमस्मदादिकं न गणयन्ति । एतत्पुनर्द्वितीयं कुटुम्बकमनादौ संसारे शत्रूभूतस्याद्यकुटुम्बकस्य निराकरणादवाप्तजयपताकं लब्धप्रसरतया वल्गमानं प्रायेण सकलकालमाविर्भूतमेवास्ते । ततः संपद्यते तेन सहामीषां जीवानामहर्निशं दर्शनं । ततो वर्धते प्रेमाबन्धः समुत्पद्यते चित्तरतिः संजायते विश्रम्भः प्रादुर्भवत्यनेन सह प्रणयः । ततोऽस्य द्वितीयकुटुम्बकस्य सततमनुरक्तमानसाः खल्वेते जीवा न पश्यन्ति दोषसंघातं समारोपयन्त्यस्यासन्तमपि गुणसन्दोहं । तेनेदं गाढतरमेते पोषयन्ति । इदमेवैकं परमबन्धुभूतमस्माकमिति मन्यन्ते । अस्य च दोषप्रकाशकमस्मदादिकं शत्रुबुद्ध्या पश्यन्ति ॥ नृपतिराह । भदन्त सुन्दरं भवति यद्येते तपस्विनो जीवा अनयोः कुटुम्बकयोर्गुणदोषविशेषमवगच्छेयुः । भगवानाह । किमतःपरं सुन्दरतरं। एतावन्मात्रमेव हि निःशेषकल्याणानि वाञ्छता परमार्थतः पुरुषेण कर्तव्यं यदुतानयोः प्रथमद्वितीययोः कुटुम्बकयोर्गुणदोषविशेषपरिज्ञानमिति । तथास्माभिरपि जीवानां धर्मकथाभिरेतावन्मात्रमेव संपादनीयं। केवलमेते जीवाः स्वयोग्यतामन्तरेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नानयोर्विशेषं कथंचिदपि ज्ञापयितुं शक्यन्ते। तेनायोग्येषु वयमपि गजनिमीलिकां कुर्मः। यदि पुनः सर्वेऽपि जीवा अनयोः कुटुम्बकयोर्गुणदोषविशेषमवगच्छेयुस्तदादित एव संसारोच्छेदः स्यात्। ततो निराकृत्येदं द्वितीयं कुटुम्बकं सर्वेऽपि जीवा मोक्षं गच्छेयुरिति। नृपतिराह। यद्येवमशक्यानुष्ठानं सर्वेषां जीवानामनयोर्गुणदोषविशेषज्ञापनं तत्किमनया चिन्तया। अस्माभिर्विज्ञातस्तावद्भगवत्पादप्रसादेनानयोः कुटुम्बकयोर्गुणदोषविशेषः। ततः सिद्धं नः समीहितं। यतः।

परोपकारः कर्तव्यः सत्यां शक्तौ मनीषिणा।
परोपकारासामर्थ्ये कुर्यात्स्वार्थे महादरम्॥

भगवानाह। न परिज्ञानमात्रं त्राणं। नृपतिराह। यदन्यदपि विधेयं तदादिशन्तु भगवन्तः। भगवतोक्तं। अन्यदत्र विधेयं श्रद्धानमनुष्ठानं च। तच्चास्त्येव भवतः श्रद्धानं अनुष्ठानं च। पुनर्यदि शक्नोषि ततः सिध्यत्येव समीहितं नात्र सन्देहः। केवलं तत्रातिनिर्घृणं कर्म समाचरणीयं। नृपतिराह! भदन्त कीदृशं तत्कर्म। भगवानाह। यदेते साधवः सततमनुशीलयन्ति। नृपतिराह। यदनुशीलयन्त्येते तच्छ्रोतुमिच्छामि। भगवतोक्तं। आकर्णय।

अनादिस्नेहसंबद्धं द्वितीयं यत्कुटुम्बकम्।
योधयन्ति तदाद्येन घोरचित्ता दिवानिशम्॥

तथाहि।

निर्घृणा यत एवेदमाविर्भूतं कुटुम्बकम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं घातयन्ति ज्ञानेन महामोहपितामहम् ॥
यस्तन्त्रकः समस्तस्य कुटुम्बस्य महाबलः ।
रागं वैराग्ययन्त्रेण तमेते चूर्णयन्त्यलम् ॥
अन्यच्च निरनुक्रोशा रागस्यैव महोदरम् ।
द्वेषं मैत्रीशरेणोच्चैरेते निघ्नन्ति साधवः ॥
क्षमाक्रकचपाटेन पाटयन्ति सुदारुणाः ।
एते भोः साधवः क्रोधं रटन्तं स्निग्धबान्धवम् ॥
क्रोधस्य भ्रातरं मानं तथैते द्वेषनन्दनम् ।
हत्वा मार्दवखड्गेन चालयन्त्यपि नो करौ ॥
मायामार्जवदण्डेन दलयन्ति तपस्विनीम् ।
लोभं मुक्तिकुठारेण रौद्राञ्छिन्दन्ति खण्डशः ॥
तथैते मुनयो भूप स्नेहाबन्धपरायणम् ।
कामं निष्पीड्य हस्तेन मर्दयन्तीव मत्कुणम् ॥
दहन्ति शोकसम्बन्धं तीव्रेण ध्यानवह्निना ।
भयं भिन्दन्ति निर्भीका धैर्यबाणेन वत्सलम् ॥
हास्यं रतिर्जुगुप्सा च तथारतिः पितृष्वसा ।
विवेकशक्त्या राजेन्द्र साधुभिर्दारिता पुरा ॥
अन्यच्च भ्रातृभाण्डानि पञ्चाक्षाणि सुनिर्घृणाः ।
सन्तोषमुद्गरेणोच्चैर्दलयन्तीह साधवः ॥
एवं ये ये भवन्त्यत्र कुटुम्बे स्निग्धबान्धवाः ।
तांस्तान्निपातयन्त्येते जाताञ्जातान् सुनिर्दयाः ॥
वर्धयन्ति बलं नित्यं प्रथमे च कुटुम्बके ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वेषां स्निग्धबन्धूनामेते राजेन्द्र साधवः ॥
पुष्टिं गतेन तेनोच्चैर्निहतं भग्नपौरुषम् ।
अमीषां बाधकं नैव तद्द्वितीयं कुटुम्बकम् ॥
अन्यच्च पोषकं ज्ञात्वा द्वितीयस्य तृतीयकम् ।
राजन्नेतैः परित्यक्तं सर्वथैव कुटुम्बकम् ॥
यावत्तृतीयं न त्यक्तं तावज्जेतुं न शक्यते ।
द्वितीयमपि कार्त्स्न्येन पुरुषेण कुटुम्बकम् ॥
अतो यद्यस्ति ते वाञ्छा भूप संसारमोचने ।
ततोऽतिनिर्घृणं कर्म मयोक्तमिदमाचर ॥
केवलं सम्यगालोच्य मध्यस्थेनान्तरात्मना ।
किं शक्येत मया कर्तुं किं वा नेदमिति त्वया ॥
एतेऽतिनिर्घृणाः कर्म कथंचिदिदमीदृशम् ।
कुर्वन्त्यभ्यासयोगेन नृशंसा भूप साधवः ॥
अन्येन पुनरीदृक्षं कर्म बन्धुदयालुना ।
चिन्तयितुमपि नो शक्यं करणं दूरतः स्थितम् ॥

किं तु ।

योऽयं त्यागस्तृतीयस्य द्वितीयस्य च घातनम् ।
कुटुम्बकस्य राजेन्द्र प्रथमस्य च पोषणम् ॥
एतत्त्रयं परिज्ञाय कृत्वा श्रद्धानमञ्जसा ।
अनुष्ठाय च वीर्येण भूयांसो मुनिपुङ्गवाः ॥
भवप्रपञ्चान्निर्मुक्ताः सर्वद्वन्द्वविवर्जिताः ।
स्थित्वा स्वाभाविके रूपे मोदन्ते मोक्षवर्तिनः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदिदं दुष्करं कर्म किं तु पर्यन्तसुन्दरम्।
एवं व्यवस्थिते भूप कुरुष्व यदि रोचते॥

नृपतिराह।

शिष्टं भगवता पूर्वं कुटुम्बद्वयमादिमम्।
अविच्छिन्नं प्रवाहेण सदानादिभवोदधौ॥
तृतीयं पुनरुद्दिष्टं विनाशोत्पत्तिधर्मकम्।
तत्किं भवे भवे नाथ संभवत्यपरापरम्॥
सूरिराह महाराज संभवत्यपरापरम्।
भवे भवेऽत्र जन्तूनां तत्तृतीयं कुटुम्बकम्॥
राजाह नाथ यद्येवं ततोऽनादिभवार्णवे।
अनन्तानि कुटुम्बानि त्यक्तपूर्वाणि देहिभिः॥
सूरिराह महाराज सत्यमेतन्न संशयः।
एते हि पथिकप्रायाः सर्वे जीवास्तपस्विनः॥

ततश्च।

अन्यान्यानि कुटुम्बानि मुञ्चन्तो वासकेष्विव।
अपरापरदेहेषु संचरन्ति पुनः पुनः॥
राजाह नाथ यद्येवं ततोऽत्रापि भवे नृणाम्।
कुटुम्बे स्नेहसम्बन्धो महामोहविजृम्भितम्॥
सूरिराह महाराज सम्यग्ज्ञातमिदं त्वया।
महामोहं विना को वा कुर्यादेनं सकर्णकः॥
राजाह यो न शक्नोति कर्तुं नाथ निबर्हणम्।
द्वितीयस्य कुटुम्बस्य कथंचिच्छक्तिविभ्रमात्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तृतीयस्य परित्यागात्तस्य किं जायते फलम् ।
यथोक्तं यदि वा नेति ममेदं प्रविवेचय ॥
सूरिराह महाराज यो न हन्ति द्वितीयकम् ।
तृतीयत्यजनं तस्य नूनमात्मविडम्बनम् ॥
तृतीयं हि परित्यज्य यदि हन्यान्निराकुलः ।
द्वितीयमेवं तत्त्यागः सफलो विफलोऽन्यथा ॥

नृपतिनाभिहितम् । भदन्त यद्येवं ततः ।

भवप्रपञ्चं विज्ञाय महाघोरं सुदुस्तरम् ।
अवाप्य मानुषं जन्म संसारेऽत्यन्तदुर्लभम् ॥
अनन्तानन्दसंपूर्णं मोक्षं विज्ञाय तत्त्वतः ।
तस्य कारणभूतं च बुद्ध्वा जैनेन्द्रशासनम् ॥
युष्मादृशेषु नाथेषु प्राप्तेषु हितकारिषु ।
कुटुम्बत्रयरूपे च विज्ञाते परमार्थतः ॥
को नामाद्यकुटुम्बस्य पुरुषो हितकामुकः ।
कुर्यान्न पोषणं नाथ बन्धुभूतस्य तत्त्वतः ॥
विघ्नं सर्वसमृद्धीनां सर्वव्यसनकारणम् ।
द्वितीयं वा न को हन्ति शत्रुभूतं कुटुम्बकम् ॥
येनात्यक्तेन दुःखौघस्त्यक्तेन परमं सुखम् ।
को न त्यजति तन्नाथ तृतीयं वा कुटुम्बकम् ॥
सूरिराह महाराज ज्ञाततत्त्वेन जन्तुना ।
इदमेवात्र कर्तव्यं त्रयं संसारभीरुणा ॥
राज्ञाहाज्ञाततत्त्वानां नाथ मौनीन्द्रशासने ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं विद्यतेऽधिकारोऽत्र नेति नेति गुरोर्वचः॥

राज्ञा चिन्तितम्।

अये विज्ञाततत्त्वोऽहं श्रद्धावासितमानसः।
ततोऽस्ति मेऽधिकारोऽत्र गुह्यके कर्मणि ध्रुवम्॥
ततो राजा समुद्भूतवीर्योल्लासो यतीश्वरम्।
प्रणम्य पादयोरेवं स प्राह विहिताञ्जलिः॥
यदादिष्टं भदन्तेन किल कर्मातिनिर्घृणम्।
तदहं कर्तुमिच्छामि नाथ युष्मदनुज्ञया॥
सूरिणोक्तं महावीर्य युक्तमेतद्भवादृशाम्।
अनुज्ञातं मयापीदं ज्ञातं तत्त्वं त्वयाधुना॥

ततः शरभसेन नरपतिना विलोकितं पार्श्ववर्तिनो विमलमतेर्मन्त्रिणो वदनं। आदिशतु देव इति ब्रुवाणोऽसौ स्थितः प्रह्वतरः। नृपतिनाभिहितं। आर्य त्यजनीयो मया राज्यस्वजनदेहादिसङ्गः निहन्तव्या भगवदादेशेन रागादयः पोषणीयान्यह-र्निशं ज्ञानादीनि ग्रहीतव्या भागवती दीक्षा। ततो यदस्य कालस्योचितं तत्तूर्णं कुरुष्वेति। विमलमतिराह। यदाज्ञापयति देवः। किं तु न मयैव केवलेनास्य कालस्योचितं विधेयं किं तर्हि यान्येतान्यन्तःपुराणि ये चैते सामन्ता यश्चान्योऽपि राजलोको या चेयं समस्तापि परिषत् तैः सर्वैरेवास्य कालस्योचितं कर्तव्यं। राज्ञा चिन्तितं। अये मयायमादिष्टः किल मम दीक्षाग्रहणकाले यदुचितं जिनस्नपनपूजादानमहोत्सवादिकं तत् कुरुष्वेति। तदयं किमेवमुल्लपति। अहो गम्भीरः कश्चिदभिप्रायः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परपदाभिलाषातिरेकसंवर्धनी धर्मदेशना। गता यथास्थानं देवादयः ॥

मम पुनरगृहीतसङ्केते तदमृतकल्पमपि न परिणतं तदा भागवतं वचनं। निकटीभूतौ हिंसावैश्वानरौ। कृतः पुनस्ताभ्यां मम शरीरेऽनुप्रवेशः। मोचितश्चाहं बन्धनात् सर्वजन्तूनां बन्धनमोचनार्थं नियुक्तै राजपुरुषैः। चिन्तितं च मया। विगोपितोऽहमनेन लोकमध्ये श्रमणेन। ततो धमधमायमानश्चेतसा किमत्र स्थितेनेति मन्यमानः प्रवृत्तो विजयपुराभिमुखो गन्तुं। लङ्घितः कियानपि मार्गः। इतश्च तत एव विजयपुराच्छिखरिनृपतेः सूनुर्मत्कल्प एव हिंसावैश्वानरदोषेण निर्वासितः स्वविषयाज्जनकेन दृष्टो मयारण्ये प्रातिपथिको धराधरो नाम तरुणः। पृष्टो मया विजयपुरमार्गं। ततः पर्याकुलतया चित्तस्य न श्रुतं तेन मद्वचनं। मया चिन्तितं। परिभवबुद्ध्या मामेष न गणयति। ततः समुल्लसितौ मे हिंसावैश्वानरौ। गृहीता तत्कटीतटादसिपुत्रिका। ततस्तेनापि विस्फुरितहिंसावैश्वानरेणैव समाकृष्टं मण्डलाग्रं। दत्तौ समकमेव द्वाभ्यामपि प्रहारौ। दारिते शरीरे ॥

अत्रान्तरे मम तस्य च जीर्णा सा एकभववेद्या गुडिका। ततो वितीर्णे अपरे गुडिके द्वयोरपि भवितव्यतया। इतश्चास्ति पापिष्ठनिवासा नाम नगरी। तस्यामुपर्युपरि सप्त पाटका भवन्ति। तेषु च पापिष्ठाभिधाना एव कुलपुत्रका वसन्ति। ततः षष्ठे तमाभिधाने पाटके नीतौ द्वावपि गुडिकाप्रभावेण भवितव्यतया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थापितौ तादृशकुलपुत्रकरूपतया। प्रवृद्धः सोऽधिकतरमावयोर्वैरानुबन्धः। स्थितौ परस्परघातमनेकयातनाभिर्विदधानौ द्वाविंशति सागरोपमानि। अवगाहितोऽनन्तमहादुःखसागरः। ततस्तस्याः पर्यन्ते गुडिकादानेनैवानीतौ पश्चाचनिवासनगरे द्वावपि भवितव्यतया विहितौ गर्भजसर्परूपौ। प्रादुर्भूतः पूर्वाविधेन परस्परं पुनः क्रोधाबन्धः। युध्यमानयोः संपन्नं गुडिकाजरणम्। पुनः प्रापितौ तेनैव प्रयोगेण तस्यामेव पापिष्ठनिवासायां नगर्यां धूमप्रभाभिधाने पञ्चमे पाटके भवितव्यतया। तत्रापि परस्परं निर्दलयतोर्गतानि सप्तदश सागरोपमानि। अनुभूतान्यतितीव्रदुःखानि॥ ततः पुनरानीय पश्चाचनिवासनगरे विहितौ द्वावपि सिंहरूपौ। तत्रापि तदवस्थितो वैराबन्धः। ततश्चान्योन्यं प्रहरतोरपनीय तद्रूपं विहितं तस्यामेव पुर्यां पङ्कप्रभाख्ये चतुर्थपाटके पापिष्ठरूपं भवितव्यतया। तद्गतयोः पुनरप्यावयोरनुवर्तते स्मासौ रोषोत्कर्षः। लङ्घितानि तत्रापीतरेतरं निघ्नतोर्दश सागरोपमानि। सोढानि वाग्गोचरातीतानि दुःखानि॥ ततः पुनरानीय जनितौ द्वावपि श्येनरूपौ। संलग्नमुल्लसितवैश्वानरयोरायोधनं। ततश्चावयित्वा तद्रूपं पुनर्नीतौ तस्यामेव पुरि वालुकाप्रभानाम्नि तृतीयपाटके गुडिकाप्रयुक्तिवशेनैव भवितव्यतया। तत्रापि परस्परं शरीरचूर्णनं कुर्वतोः क्षेत्रानुभावजनितानि परमाधार्मिकासुरोदीरितानि चानन्तदुःखानि सततमनुभवतोरतिक्रान्तानि सप्त सागरोपमानि। तदन्ते पुनरानीतौ पश्चाचनिवासनगरे दर्शितौ च नकुलरूपौ भवितव्यतया। न त्रुटितस्तत्रापि परस्परं मत्सर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकर्षः। प्रहरतोश्चान्योन्यं विदीर्णे द्वयोरपि शरीरे। जीर्णे प्राचीनगुडिके। वितीर्णे पुनरपरे। नीतौ पुनस्तस्यामेव नगर्यां शर्कराप्रभाभिधाने द्वितीयपाटके। ततो विहितबीभत्सरूपयोरन्योन्यं पिषतोः परमाधार्मिककदर्थनां क्षेत्रजनितसन्तापं च वेदयतोरतीतानि तत्रापि त्रीणि सागरोपमानि। एवं पापिष्ठनिवासनगर्याः पञ्चाक्षनिवासनगरे ततोऽपि पुनस्तस्यां गत्यागमनं कुर्वता तेन च धराधरेण सार्धं वैरं खेटयता भद्रेऽगृहीतसङ्केते विडम्बितानि मया भवितव्यताप्रेरितेन भूयांसि रूपाणि। ततः पुनः कुतूहलवशेनैव तया निजभार्यया जीर्णायां तस्यामेकभववेद्याभिधानायां कर्मपरिणाममहाराजसमर्पितायां गुडिकायां भूयो भूयोऽपरां गुडिकां योजयन्त्या तदसंव्यवहारनगरं विहायापरेषु प्रायेण सर्वस्थानेषु तिलपीडकन्यायेन भ्रमितोऽहमनन्तकालमिति ॥

एवं वदति संसारिजीवे प्रज्ञाविशालया चिन्तितं। अहो रौद्ररूपोऽसौ क्रोधः। दारुणतरा हिंसा। तथाहि। तद्वशवर्तिनानेन संसारिजीवेन घोरसंसारसागरं कथंचिदतिलंघ्य प्राप्तेऽपि मनुष्यभवे विहितं तत्तादृशमतिरौद्रं कर्म। न प्रतिपन्नं भागवतं वचनं हारिता मनुष्यरूपता निर्वर्तिता वैरपरंपरा उपार्जिता संसारसागरेऽनन्तरूपा विडम्बना खीकृतो महादुःखसन्तानः। तदिदमनुभवागमसिद्धमनुभवन्तोऽप्येते मनुष्यभावापन्नाः प्राणिनो न लक्षयन्तीवानयोः स्वरूपं आत्मवैरिण इव समाचरन्ति तमेव क्रोधं तामेव हिंसां सततमनुवर्तन्ते। तदेतेऽपि वराका



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लप्स्यन्ते नूनमेवंविधामनर्थपरंपरामित्येषा चिन्ता ममान्तःकरणमाकुलयति ॥ संसारिजीवः प्राह । ततः पुनरन्यदाहमगृहीतसङ्केते नीतः श्वेतपुरे भवितव्यतया विहितश्चाभीररूपः । तद्रूपतया वर्तमानस्य मे तिरोभूतोऽसौ वैश्वानरः । जातो मनागहं शान्तरूपः । प्रवृत्ता मे यदृच्छया दानबुद्धिः । न चाभ्यस्तं किंचिद्विशिष्टं शीलम् । न चानुष्ठितः कश्चित्संयमविशेषः । केवलं कथंचिद्घर्षणघूर्णनन्यायेन संपन्नोऽहं तदा मध्यमगुणः । ततस्तथाभूतं मामुपलभ्य जाता मयि प्रसन्नहृदया भवितव्यता । ततश्चाविर्भावितोऽनया पुनरपि सहचरो मे पुण्योदयः । ततोऽभिहितमनया । आर्यपुत्र गन्तव्यं भवता सिद्धार्थपुरे स्थातव्यं तत्र यथासुखासिकया । अयं च तवानुचरः पुण्योदयो भविष्यति । मयाभिहितं । यदाज्ञापयति देवी । ततो जीर्णायां प्राचीनगुडिकायां दत्ता पुनरेकभववेद्या सा ममापरा गुडिका भवितव्यतयेति ।

भो भव्याः प्रविहाय मोहललितं युष्माभिराकर्ण्यता-
मेकान्तेन हितं मदीयवचनं कृत्वा विशुद्धं मनः ।
राधावेधसमं कथंचिदतुलं लब्ध्वापि मानुष्यकं
हिंसाक्रोधवशानुगैरिदमहो जीवैः पुरा हारितम् ॥

अनादिसंसारमहाप्रपञ्चे
क्वचित्पुनः स्पर्शवशेन मूढैः ।
अनन्तवारान् परमार्थशून्यै-
र्विनाशितं मानुषजन्म जीवैः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतन्निवेदितमिह प्रकटं ततो भो-
स्तां स्पर्शकोपपरतापमतिं विहाय ।
शान्ताः कुरुध्वमधुना कुशलानुबन्ध-
मङ्काय लङ्घयथ येन भवप्रपञ्चम् ॥

इत्युपमितभवप्रपञ्चायां कथायां क्रोधहिंसा-
स्पर्शनेन्द्रियविपाकवर्णनस्तृतीयः
प्रस्तावः ॥ ग्रंथाग्रं ८००० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# चतुर्थः प्रस्तावः ।

अथ विख्यातसौन्दर्ये सपुण्यजनसेविते ।
सिद्धार्थनगरे तत्र भूपोऽभून्नरवाहनः ॥
यस्तेजसा सहस्रांशुं गाम्भीर्येण महोदधिम् ।
स्थैर्येण शैलराजेन्द्रं जयति स्म महाबलः ॥
येन बन्धुषु चन्द्रत्वं शत्रुवंशे कृशानुता ।
प्रदर्शितात्मनो नित्यं धनेन धनदायितम् ॥
तस्य रूपयशोवंशविभवैरनुरूपताम् ।
दधानासीन्महादेवी नाम्ना विमलमालती ॥
सा चन्द्रिकेव चन्द्रस्य पद्मेव जलजन्मनः ।
तस्य राज्ञः सदा देवी हृदयान्न विनिर्गता ॥
ततोऽगृहीतसङ्केते तदानीं निजभार्यया ।
सह पुण्योदयेनाहं तस्याः कुक्षौ प्रवेशितः ॥
अथ संपूर्णकालेन सर्वावयवसुन्दरः ।
निष्क्रान्तोऽहमभिव्यक्तरूपस्फुनस्तथेतरः ॥
ततो मामुपलभ्यासौ देवी विमलमालती ।
संजातः किल पुत्रो मे परं हर्षमुपागता ॥
ततो निवेदितो राज्ञे तुष्टोऽसावपि चेतसा ।
संजातो नगरानन्दः कृतो जन्ममहोत्सवः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ममापि च समुत्पन्नो वितर्को निजमानसे ।
यथाहमनयोः पुत्रस्तातो मातेति तावुभौ ॥
अथ मासे गते पूर्णे महानन्दपुरःसरम् ।
ततः प्रतिष्ठितं नाम ममेति रिपुदारणः ॥
नन्दिवर्धनकाले या ममासीदविवेकिता ।
सा धात्री पुनरायाता स्तनपायनतत्परा ॥
इतश्च तेन सा भर्त्रा निजेन प्रियकामिना ।
कचिद्दोषगजेन्द्रेण संयोगं समुपागता ॥
यदा चापन्नगर्भाभूद्देवी विमलमालती ।
तदैव दैवयोगेन संजाता सापि गर्भिणी ॥
ततो मज्जन्मकाले सा प्रसूता दुष्टदारकम् ।
उन्नामितमहोरस्कं वदनाष्टकधारकम् ॥
तं वीक्ष्य सा विशालाक्षी परं हर्षमुपागता ।
ततश्च चिन्तयत्येवं स्तिमितेनान्तरात्मना ॥
अहो मदीयपुत्रस्य कूटानि सुगिरेरिव ।
मूर्धानोऽष्ट विराजन्ते तदिदं महदद्भुतम् ॥
ततः समागते मासे निजसूनोर्गुणोचितम् ।
करोति नाम विख्यातं शैलराज इति स्फुटम् ॥

इतश्च ।

सा धात्री स च तत्सूनुरनादावपि सर्वदा ।
ममान्तरङ्गोऽभूदेव तिरोभूततया परम् ॥
ततः पित्रोर्महानन्दं दधानः सुखलालितः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सहैव शैलराजेन परां वृद्धिमहं गतः ॥
अथातीतेषु वर्षेषु पञ्चषेषु ततो मया ।
स व्यक्तं रममाणेन शैलराजो निरीक्षितः ॥
अनादिस्नेहमोहेन तं दृष्ट्वा मम मानसे ।
या प्रीतिरासीत्साख्यातुं वचनेन न पार्यते ॥
विलोकयन्तं मां वीक्ष्य स्निग्धदृष्ट्या स दारकः ।
शठात्मा चिन्तयत्येवं लब्धलक्ष्यः स्वचेतसा ॥
अये मामेष राजेन्द्रतनयः स्निग्धचक्षुषा ।
विलोकयति तन्नूनं ममायं वर्तते वशे ॥
ततो विस्मेरिताक्षोऽसौ किलाहं स्नेहनिर्भरः ।
दर्शयन्निति मे देहं समालिङ्गति मायया ॥
ततो मे मोहदोषेण स्फुरितं निजमानसे ।
अहो भावज्ञताप्यस्य त्रैलोक्यमतिवर्तते ॥
तदिदानीं मया नैष स्निग्धो बन्धुर्विचक्षणः ।
मोक्तव्यः क्षणमप्येवं कृतश्चित्ते विनिश्चयः ॥
ततस्तेन सहोद्यानकाननेषु दिने दिने ।
क्रीडतः सततं याति कालो मे हृष्टचेतसः ॥
न लक्षितं मया मोहविक्लीभूतचेतसा ।
यथैष शैलराजो मे परमार्थेन वैरिकः ॥
ततो दिनेषु गच्छत्सु मैत्री तेन विवर्धते ।
तत्प्रभावात्प्रवर्धन्ते वितर्का मम मानसे ॥
यथा ममोत्तमा जातिः कुलं सर्वजनाधिकम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बलं भुवनविख्यातं रूपं भुवनभूषणम् ॥
सौभाग्यं जगदानन्दमैश्वर्यं भुवनातिगम् ।
श्रुतं पूर्वभवाभ्यस्तं परिस्फुरति मेऽग्रतः ॥
मघवापि पदं स्वीयं यद्यहं प्रार्थये ततः ।
ददात्येव न कार्यं मे लाभशक्तिरियं मम ॥
ये चान्येऽपि तपोवीर्यधैर्यसत्त्वादयो गुणाः ।
ते मय्येव वसन्त्युच्चैर्विमुच्य भुवनत्रयम् ॥

यदि वा ।

यस्येदृशेन मित्रेण संजातो मम मीलकः ।
तस्य को वर्णयेल्लोके गुणसम्भारगौरवम् ॥

तथाहि ।

पुरुषस्य भवेत्तावत्सर्वस्यैकमिहाननम् ।
अयं वक्त्राष्टकेनैव जयत्येव परं जनम् ॥
तदेष शैलराजो मे यस्य प्राप्तो वयस्यताम् ।
तस्य नास्ति जगत्यत्र यन्न संपद्यमञ्जसा ॥
ततोऽवलिप्तचित्तोऽहं तां विकल्पपरंपराम् ।
वर्धयन्नात्मनः सर्वं न्यूनं मन्ये तदा जनम् ॥
ऊर्ध्वीकृतनिजग्रीवो नक्षत्राणि निभालयन् ।
अग्रतोऽपि न पश्यामि मत्तवद्गन्धवारणः ॥
आपूर्णो भूरिवातेन विततात्मा यथा दृतिः ।
ततोऽहं विचरामि स्म निःसारो मदविह्वलः ॥
चिन्तयामि न मे वन्द्यः कश्चिदस्ति जगत्त्रये ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत एतद्गुणैः सर्वमधस्तान्मम वर्तते॥
को ममान्यो गुरुर्नूनमहमेव गुणैर्गुरुः।
क एते देवसङ्घाता ये मत्तोऽपि गुणाधिकाः॥
ततोऽत्यतीतसङ्केते तदाहं गर्वनिर्भरः।
शैलस्तम्भसमो नैव कस्यचित्प्रणतिं गतः॥

किं च।

प्रणताशेषसामन्तकिरीटांशुविराजितम्।
न नतं जातुचिद्भद्रे तातीयं पादपङ्कजम्॥
अशेषजनवन्द्यापि स्नेहनिर्भरमानसा।
कदाचिदपि नैवाम्बा मया नूनं नमस्कृता॥
ये केचिल्लौकिका देवा याश्चान्याः कुलदेवताः।
न ताः प्रणामकामेन चक्षुषापि मयेक्षिताः॥
ततो मां तादृशं वीक्ष्य शैलराजसमन्वितम्।
वर्धमानं स राजेन्द्रो मनसा पर्यचिन्तयत्॥
अहो मदीयपुत्रोऽयं गाढं मानधनेश्वरः।
तदस्य लोको यद्याज्ञां लङ्घयेत कदाचन॥
ततोऽयं चित्तनिर्वेदान्मन्यमानोऽवधीरणाम्।
मां विहाय क्वचिद्गच्छेत्तदिदं नैव सुन्दरम्॥
ज्ञापयित्वा नरेन्द्रादीन् कुमारचरितं ततः।
आज्ञाविधेयानस्योच्चैः करोमि सकलानपि॥
एवं विचिन्त्य मे तातः स्नेहनिर्भरमानसः।
समस्तं तत्करोत्येव यत्स्वयं परिचिन्तितम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ ताताज्ञया सर्वे नरेन्द्रा नतमस्तकाः ।
बालस्यापि ममात्यन्तं किङ्करत्वमुपागताः ॥
प्रधानकुलजाता ये ये च विक्रमशालिनः ।
तेऽपि मां देव देवेति ब्रुवाणाः पर्युपासते ॥
यदहं वच्मि तत्सर्वो राजलोकः कृतादरः ।
जय देवेति लपन्नुच्चैः शिरसा प्रतिपद्यते ॥
किं चात्र बहुनोक्तेन ततोऽम्बा च सबान्धवा ।
वीक्षते सर्वकार्येष्वधिकं मां परमात्मनः ॥
स च पुण्योदयस्तत्र माहात्म्ये मम कारणम् ।
तथापि मोहदोषेण मयेदं परिचिन्तितम् ॥
अयं ममैष यो जातो देवानामपि दुर्लभः ।
सर्वस्यास्य प्रतापस्य शैलराजो विधायकः ॥
ततः संतुष्टचित्तेन शैलराजो मयान्यदा ।
प्रोक्तो विश्रम्भजल्पेन स्नेहनिर्भरचेतसा ॥
वयस्य योऽयं संपन्नो लोकमध्येऽतिसुन्दरः ।
मम ख्यातिविशेषोऽयं प्रतापो हन्त तावकः ॥

ततश्च ।

मदीयवचसा तुष्टः शैलराजः स्वमानसे ।
वृष्टतामुररीकुर्वन्निदं वचनमब्रवीत् ॥
कुमार परमार्थोऽयं कथ्यते तव साम्प्रतम् ।
यदेवंविधजल्पस्य कुमारास्येह कारणम् ॥
ये दुर्जना भवन्त्यत्र गुणपूर्णं परं जनम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वाभिप्रायानुमानेन मन्यन्ते दोषपुञ्जकम् ॥
ये सज्जना पुनर्धन्यास्ते लोकं दोषपूरितम् ।
स्वाभिसन्धिविशुद्धैव लक्षयन्ति गुणालयम् ॥

एवं च स्थिते ।

यद्भासते गुणित्वेन गुणहीनोऽप्ययं जनः ।
कुमार तावके चित्ते सौजन्यं तत्र कारणम् ॥
प्रतापस्तावकीनोऽयं समस्तोऽपि सुनिश्चितम् ।
भावत्कवीर्यविख्याताः के वयं परमार्थतः ॥
तदिदं शैलराजीयं वचनं सुमनोहरम् ।
आकर्ण्याहं तदा भद्रे परं स्नेहरसं गतः ॥

चिन्तितं च मया ।

अहो मय्यनुरागोऽस्य अहो गम्भीरचित्तता ।
अहो वचनविन्यासस्तथाहो भावसारता ॥

ततो मयाभिहितं ।

वयस्य नेदृशं वाच्यमुपचारपरं वचः ।
ममाग्रतो यतो ज्ञातं माहात्म्यं तावकं मया ॥
ततो हर्षवशात्तेन शैलराजेन जल्पितम् ।
प्रसादपरमे नाथे भृत्यानां किं न सुन्दरम् ॥

अन्यच्च ।

यदि सम्भावना जाता भवतां मादृशे जने ।
ततो मे परमं गुह्यं भवद्भिरनुमन्यताम् ॥
विद्यते मम सद्वीर्यं हृदयस्यावलेपनम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्निजे हृदये देयं कुमारेण प्रतिक्षणम् ॥

मयाभिहितं । कुतस्तदवाप्तं भवता किंनामकं को वा तस्य हृदयावलेपनस्य प्रभाव इति श्रोतुमिच्छामि । शैलराजेनाभिहितं । कुमार न कुतश्चिदपि तदवाप्तं मया किं तर्हि स्वकीयेनैव वीर्येण जनितं । नामतः पुनः स्तब्धचित्तं तदभिधीयते । प्रभावं तस्यानुभवद्वारेणैव विज्ञास्यति कुमारः । किं तेनावेदितेन । मयाभिहितं । यद्वयस्यो जानीते । ततः समर्पितं ममान्यदा शैलराजेन तदात्मीयं हृदयावलेपनं । विलिप्तं मया हृदयं । जातोऽहं गाढतरमुल्लम्बितशूनतस्कराकारधारितया नमनरहितः । ततस्तथाभूतं मामवलोक्य सुतरां प्रणतिप्रवणाः संपन्नाः मामन्तमहत्तमादयः । तातोऽपि सप्रणामं मामालापयति स्म । तथाम्बापि स्वामिनमिव मां विज्ञपयति स्म । ततः संजातो मे हृदयावलेपनप्रभावे सम्प्रत्ययः । संपन्ना स्थिरतरा शैलराजे परमबन्धुबुद्धिरिति ॥ इतश्चान्यदा गतोऽहमन्तरङ्गे क्लिष्टमानसाभिधाने नगरे । तच्च कीदृशं ।

आवासः सर्वदुःखानां नष्टधर्मैर्निषेवितम् ।
कारणं सर्वपापानां दुर्गतिद्वारमञ्जसा ॥

तत्र च नगरे दुष्टाशयो नाम राजा । स च कीदृशः ।

उत्पत्तिभूमिर्दोषाणामाकरः क्लिष्टकर्मणाम् ।
सद्विवेकनरेन्द्रस्य महारिः स नराधिपः ॥

तस्य च राज्ञो जघन्यता नाम देवी । सा च कीदृशी ।

नराधमानां साभीष्टा विद्वद्भिः परिनिन्दिता ।
प्रवर्तिका च सा देवी सर्वेषां निन्द्यकर्मणाम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तयोश्च जघन्यतादुष्टाशययोर्देवीनृपयोरत्यन्तमभीष्टोऽस्ति मृषावादो नाम तनयः । स च कीदृशः ।

समस्तभूतसङ्घस्य विश्वासच्छेदकारकः ।
निःशेषदोषपुञ्जत्वाद्गर्हितश्च विचक्षणैः ॥
शाठ्यपैशुन्यदौर्जन्यपरद्रोहादितस्कराः ।
तं राजपुत्रं सेवन्ते सदनुग्रहकाम्यया ॥
स्नेहो मैत्री प्रतिज्ञा च तथा सम्प्रत्ययश्च यः ।
एतेषां शिष्टलोकानां राजसूनुरसौ रिपुः ॥
पितासौ व्रतलोपस्य मर्यादाया महारिपुः ।
अयशोवादतूर्यस्य सदास्फालनतत्परः ॥
ये केचिन्नरकं यान्ति तस्य निर्देशकारिणः ।
स एव प्रगुणं मार्गं तेषां दर्शयितुं क्षमः ॥

ततो दृष्टोऽसौ मया दुष्टाशयो नरेन्द्रः । तत्पार्श्ववर्तिनी च विलोकिता सा जघन्यता महादेवी । तयोश्चाग्रतो वर्तमानो निर्वर्णितो मया तयोरेव चरणशुश्रूषाकरणपरायणः स मृषावादो राजदारकः । ततो विहितप्रतिपत्तिः स्थितस्तत्राहं कियन्तमपि कालं । महामोहविमोहितमानसेन च मया न लक्षितं तदा तेषां नगरराजेन्द्रमहादेवीदारकाणां सम्बन्धि स्वरूपं । गृहीतोऽपि परमबन्धुबुद्ध्या विशेषतः प्रतिपन्नो वयस्यतया मृषावादः । प्राप्तः प्रकर्षगतिं तेन सह प्रेमाबन्धः । दृष्टोऽसौ शरीरादभिन्नरूपतया । ततश्चानीतः स मया मृषावादः स्वस्थाने । ततस्तेन सह ललमानस्य मे समुत्पद्यन्ते स्म मनसीदृशा वितर्काः । यदुत ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नूनं विदितसारोऽहमहमेव विचक्षणः।
शेषः सर्वः पशुप्रायो मुग्धबुद्धिरयं जनः॥
यस्य मे सर्वसम्पत्तिकारको मित्रतां गतः।
सर्वदायं मृषावादः स्नेहेन हृदि वर्तते॥
असद्भूतपदार्थेऽपि सद्बुद्धिं जनयाम्यहम्।
सद्भूतमप्यसद्भूतं दर्शयामि सुहृद्बलात्॥
कृतं प्रत्यक्षमप्युच्चैर्महासाहसमात्मना।
वरमित्रप्रसादेन लगयामि परे जने॥
चौर्यं वा पारदार्यं वा कुर्वतोऽपि यथेच्छया।
कुतोऽपराधगन्धोऽपि मम यावदयं सुहृत्॥
स्वार्थसिद्धिः कुतस्तेषां येषामेष न विद्यते।
अतो मूर्खा अमी लोकाः स्वार्थभ्रंशो हि मूर्खता॥
विग्रहेऽपि क्वचित्सन्धिं सन्धावपि च विग्रहम्।
मृषावादप्रसादेन घटयामि यथेच्छया॥
यत्किंकिंचिच्चिन्तयाम्यत्र वस्तु लोकेऽतिदुर्लभम्।
वरमित्रप्रसादेन सर्वं संपद्यते मम॥
मया पुण्यैरवाप्तोऽयमयमेव च मे सुहृत्।
एष एव जगद्वन्द्यो यथेष्टफलदायकः॥
ततोऽगृहीतसङ्केते मया मोहहतात्मना।
कुविकल्पैर्मनस्तत्र मृषावादे प्रतिष्ठितम्॥
तद्वशेन च येऽनर्थाः संपद्यन्तेऽतिदारुणाः।
पुण्योदयप्रभावेण ते यान्ति विलयं तदा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहं तु तन्न जाने स्म महामोहवशं गतः ।
ततस्तत्र मृषावादे पश्यामि गुणमालिकाम् ॥
एवं च वर्तमानस्य वयस्यद्वययोगतः ।
कलाग्रहणकालो मे संप्राप्तः क्रमशोऽन्यदा ॥
ततस्तातेन संपूज्य कलाचार्यं विधानतः ।
तस्यार्पितोऽहं सद्भक्त्या महानन्दपुरःसरम् ॥
उक्तश्चाहं गुरुः पुत्र तवायं ज्ञानदायकः ।
अतः पादौ प्रणम्यास्य शिष्यभावं समाचर ॥
मयोक्तं तात मुग्धोऽसि यो मामेवं प्रभाषसे ।
वराकः किं विजानीते नूनमेष ममाग्रतः ॥
गुरुरन्यस्य लोकस्य स्यादेष न तु मादृशाम् ।
अतो नाहं पताम्यस्य पादयोः शास्त्रकाम्यया ॥

केवलम् ।

भवतामनुरोधेन गृह्णामि सकलाः कलाः ।
मदीयविनयो नूनमस्य स्यान्माहलोहितम् ॥
ततस्तातेन स प्रोक्तः कलाचार्यो रहःस्थितः ।
आर्य मामकपुत्रोऽयं गाढं मानधनेश्वरः ॥
तदत्र भवता नास्य दृष्ट्वाप्यविनयादिकम् ।
चित्तोद्वेगो विधातव्यो ग्राहणीयश्च सत्कलाः ॥
ततो विनयनम्रस्य श्रुत्वा तातस्य जल्पितम् ।
यदादिशति राजेन्द्र इत्याह स महामतिः ॥
चिन्तितं च तदा तेन कलाचार्येण मानसे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्लिष्टैष यावच्छास्त्रस्य सद्भावं नावबुध्यते ॥
यावच्च केलिबहुलां बालतामनुवर्तते ।
अलीकगर्विताध्मातस्तावदेवं प्रभाषते ॥
यदा तु ज्ञातसद्भावः शास्त्रार्थानां भविष्यति ।
तदा मदं परित्यज्य स्वयं नम्रो भविष्यति ॥
एवं निश्चित्य हृदये कलाचार्यो महामतिः ।
ततः सर्वादरेणासौ प्रवृत्तो ग्राहणे मम ॥
इतश्चान्येऽपि तत्पार्श्वे बहवो राजदारकाः ।
प्रशान्ता विनयोद्युक्ता गृह्णन्ति सकलाः कलाः ॥
यथा यथा च मे नित्यमादरं कुरुते गुरुः ।
तथा तथा वयस्यो मे शैलराजो विवर्धते ॥
ततश्च तद्वशेनाहमुपाध्यायं मदोद्धतः ।
जात्या श्रुतेन रूपेण हीलयामि क्षणे क्षणे ॥

ततश्च चिन्तितं महामतिना। अये।

ग्रस्तस्य सन्निपातेन क्षीरान्नमिव सुन्दरम् ।
अपथ्योऽस्य वराकस्य कलाशास्त्रपरिश्रमः ॥
गाढं कर्षितदेहस्य यथान्नं भूरिभोजनम् ।
तथास्य मत्कृतो यत्नः श्वयथुं वर्धयत्यलम् ॥
ततो यद्यपि राजेन्द्रः पुत्रस्नेहपरायणः ।
उत्साहयति मां नित्यं गुणाधानार्थमस्य वै ॥
तथाप्यपात्रभूतोऽयं य एवं रिपुदारणः ।
तस्य त्यागः परं न्याय्यो ज्ञानदानं न युज्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यो हि दद्यादपात्राय संज्ञानममृतोपमम् ।
स हास्यः स्यात्सतां मध्ये भवेच्चानर्थभाजनम् ॥
न चैष शक्यते कर्तुं नम्रो यत्नशतैरपि ।
को हि खेदशतेनापि श्वपुच्छं नामयिष्यति ॥

ततश्चैवं स्वचेतस्यवधार्य तेन महामतिना कलाचार्येण शिथिलितो ममोपरि कलाशास्त्रग्राहणानुबन्धः परित्यक्तमुपचारसंभाषणं दृष्टोऽहं धूलिरूपतया। तथापि तातलज्जया नासौ बहिर्मुखविकारमात्रमपि दर्शयति न च मनागपि मां परुषमाभाषते। इतश्च तेऽपि राजदारकाः शैलराजमृषावादनिरतं मामुपलभ्य विरक्तास्चित्तेन। तथापि पुण्योदयेनाधिष्ठितं मां ते चिन्तयन्तोऽपि न कथंचिदभिभवितुं शक्नुवन्ति ॥ इतश्च यथा यथा तौ शैलराजमृषावादौ वर्धेते तथा तथासौ मदीयवयस्यः पुण्योदयः चीयते। ततः कृशीभूते तस्मिन् पुण्योदये समुत्पन्ना मे गाढतरं गुरुपरिभवबुद्धिः। अन्यदा निर्गतो बहिः प्रयोजनेनोपाध्यायः। ततोऽधिष्ठितं मया तदीयं महार्हं वेत्रासनं। दृष्टोऽहमुपविष्टस्तत्र राजदारकैः। ततो लज्जितास्ते मदीयकर्मणा। लघुध्वनिना चोक्तमेतैः। हा हा कुमार न सुन्दरमिदं विहितं भवता। वन्दनीयमिदं गुरोरासनं। न युक्तं भवादृशामस्याक्रमणं। यतोऽस्मिन्नुपविशतां संपद्यते कुलकलङ्कः समुल्लसति भ्रमयशःपटहः प्रवर्धते पापं संजायते चायुषः क्षरणमिति। मयाभिहितं। अरे बालिशा नाहं भवादृशां शिक्षणार्हः। गच्छत यूयमात्मीयं सप्तकुलं शिक्षयत। तदाकर्ण्य स्थितास्ते तूष्णींभावेन। ततः स्थित्वा तत्र वेत्रासने बृहतीं वेलामुत्थितोऽहं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथेष्टचेष्टया समागतः कलोपाध्यायः। कथितं तस्मै राजदारकै-र्मदीयविलसितं। क्रुद्धः स्वचेतसा। पृष्टोऽहमनेन। ततः सासूयं मयाभिहितं। अहमेतत्करोमि। अहो ते शास्त्रकौशलं अहो ते पुरुषविशेषज्ञता अहो ते विचारितभाषिता अहो ते विमर्शपाटवं यस्त्वमेतेषां मत्सरिणामसत्यवादिनां वचनेन विप्रतारितो मामेव-माभाषसे। ततो विलक्षीभूतः कलोपाध्यायः। चिन्तितमनेन। न तावदेते राजदारका विपरीतं भाषन्ते। अयं तु स्वकर्म-पराधमेवमपलपति। तदेनं स्वयमुपलभ्य शिक्षयिष्यामि। अन्यदा प्रच्छन्नदेशस्थितेनावरचितोऽहं तेन महामतिना। दृष्टस्तत्र वेत्रासने सरभसमुपविष्टो ललमानः। ततः प्रकटीभूतोऽसौ दृष्टो मया। मुक्तं झगिति वेत्रासनं। महामतिनाभिहितं। इदानीं तर्हि भवतः किमुत्तरं। मयोक्तं। कीदृशे प्रश्ने। महामतिराह। तत्रैव पूर्वके। मयोक्तं। न जानाम्यहं कीदृशोऽसौ पूर्वकः प्रश्नः। महामतिराह। किमुपविष्टस्त्वमत्र वेत्रासने न वेति। ततो हा शान्तं पापमिति ब्रुवाणेन पिहितौ मया कर्णौ। पुनरभिहितं। पश्यत भो मत्सरविलसितं यदेते स्वयमकार्यं कृत्वा ममोपर्येवमा-रोपयन्ति। महामतिना चिन्तितं। अहो सेयं दृष्टेऽप्यनुपपन्नता नाम। अहो अस्य धार्ष्ट्यं अवेद्यकः खल्वयं। इयत्तातः परमसत्य-वचनस्य। राजदारकैरभिहितमेकान्ते विधाय कलाचार्यं। यदुता-द्रष्टव्यः खल्वयं पापः। तत्किमेनमस्माकं मध्ये धारयत यूयं। महामतिना चिन्तितं। सत्यमेते तपस्विनः प्रवदन्ति। नोचित-मेवायं रिपुदारणः सत्सङ्गमस्य। तथाहि।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लुब्धमर्थप्रदानेन क्रुद्धं मधुरभाषणैः ।
मायाविनमविश्वासात् स्तब्धं विनयकर्मणा ॥
चौरं रक्षणयत्नेन सद्बुद्ध्या पारदारिकम् ।
वशीकुर्वन्ति विद्वांसः शेषदोषपरायणम् ॥
न विद्यते पुनः कश्चिदुपायो भुवनत्रये ।
असत्यवादिनः पुंसः कालदष्टः स उच्यते ॥

यतः ।

सर्वेऽपि ये जगत्यत्र व्यवहाराः शुभेतराः ।
सत्ये प्रतिष्ठिता नेदं यस्यासौ नन्वलौकिकः ॥
अतो विज्ञाय यत्नेन सत्यहीनं नराधमम् ।
त्यजन्त्येव सुदूरेण प्रियसत्या महाधियः ॥
ततोऽयं सत्यहीनत्वादस्माकं रिपुदारणः ।
सम्यग्विज्ञातशीलानां न मध्ये स्यातुमर्हति ॥

अथवा नास्य वराकस्य रिपुदारणस्यायं दोषो यतोऽयमनेन शैलराजेन प्रेर्यमाणस्तावत्सकलदुर्विनयमाचरति । तथानेन मृषावादेन प्रोत्साह्यमानः खल्वयमेवं भाषते । ततो यद्येतौ पापवयस्यौ परिहरति तदर्थं शिक्षयामि तावदेनं । ततः कृतोऽहमुत्सारके महामतिनाभिहितस्य । कुमार नेदृशानां स्थानमिह मदीयशालायां । अतः कदाचिदेतौ पापवयस्यौ परिहर यदि वा नागन्तव्यमिह कुमारेणेति । मयाभिहितं । त्वमात्मीयजनकाय स्वस्थानं प्रयच्छ । वयं तु त्वदीयस्थानेन त्वयापि च विनैव भविष्यामहे । ततस्त्वेवंविधैस्तिरस्कृत्य परुषवचनैरुपाध्यायमुन्मामितया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कन्धरया गगनाभिमुखेन वदनेन विततीकृतेन वक्षःस्थलेनाविकट-पादपातेन गतिमार्गेण विक्षिप्य तेन स्तब्धचित्तेन शैलराजीय-विलेपनेनात्महृदयं निर्गतोऽहमुपाध्यायभवनात् । ततोऽभिहिता महामतिना राजदारकाः । अरे निर्गतस्तावदेष दुरात्मा रिपु-दारणः । केवलं गरीयान्नरवाहननृपतेः पुत्रस्नेहः । स्नेहमूढाश्च प्राणिनो न पश्यन्ति वल्लभस्य दोषसमूहं समारोपयन्त्यसन्तमपि गुणसङ्घातं हृष्यन्ति तद्विप्रियकारिणि जने न विचारयन्ति विप्रिय-करणकारणं न लक्षयन्ति स्थानमानान्तरं कुर्वन्ति स्वाभिमत-विप्रियकर्तुर्महापायं । तदेवं व्यवस्थिते भवद्भिर्मौनमवलम्बनीयं । यदि रिपुदारणनिर्गमनव्यतिकरं प्रश्नयिष्यति देवो नरवाहन-स्ततोऽहमेव तं प्रत्याययिष्यामि । राजदारकैरभिहितं । यदाज्ञा-पयत्युपाध्यायः ॥

इतश्च ततो निर्गत्य गतोऽहं तातसमीपे । पृष्टस्तातेन । पुत्र किं वर्तते कलाग्रहणस्येति । ततः शैलराजीयहृदयावलेपनवशेन मृषावादावष्टम्भेन च मयाभिहितं । तात समाकर्णय ।

पूर्वमेव ममाशेषं विज्ञानं हृदयस्थितम् ।
अयं तावकयत्नो मे विशेषाधायकः परम् ॥

ततश्च :

लेख्ये चित्रे धनुर्वेदे नरादीनां च लक्षणे ।
गान्धर्वे हस्तिशिक्षायां पत्रच्छेद्ये सवैद्यके ॥
शब्दे प्रमाणे गणिते धातुवादे सकौतुके ।
निमित्ते याश्च लोकेऽत्र कलाः काश्चित्सुनिर्मलाः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तासु सर्वासु मे तात प्रावीण्यं वर्तते परम् ।
आत्मतुल्यं न पश्यामि त्रैलोक्येऽप्यपरं नरम् ॥
सुतस्नेहेन तच्छ्रुत्वा तातो हर्षमुपागतः ।
चुम्बित्वा मूर्धदेशे मामिदं वचनमब्रवीत् ॥
जात चारु कृतं चारु सुन्दरस्ते महोद्यमः ।
किं त्वेकं मे कुमारेण वचनं श्रूयतामिति ॥

मयाभिहितं । वदतु तातः । तातेनाभिहितं ।

विद्यायां ध्यानयोगे च स्वभ्यस्तेऽपि हितैषिणा ।
सन्तोषो नैव कर्तव्यः स्थैर्यं हितकरं तयोः ॥

एवं च स्थिते ।

गृहीतानां स्थिरत्वेन शेषाणां ग्रहणेन च ।
कलानां मे कुमारत्वं त्वं पुषाण मनोरथान् ॥

मयाभिहितं । एवं भवतु । ततो गाढतरं तुष्टस्तातः । दत्तो भाण्डागारिकस्यादेशः । अरे पूरय महामतिभवनं धनकनकनिचयेन येन कुमारः सकलोपभोगसम्पत्त्या निर्व्यग्रस्तत्रैव कलाग्रहणं कुर्वन्नास्ते । ततो यदाज्ञापयति देव इत्यभिधाय संपादितं भाण्डागारिकेण राजशासनं । महामतिनापि मा देवस्य चित्तसन्तापो भविष्यतीत्याकलय्य न निवेदितं ताताय मदीयविलसितं । ततोऽभिहितोऽहं तातेन । वत्स अद्यदिनादारभ्य स्थिरीकुर्वता पूर्वगृहीतं कलाकलापं गृह्णता चापूर्वं तत्रैवोपाध्यायभवने भवता स्थातव्यमहमपि न द्रष्टव्यः । मयाभिहितं । एवं भवतु । जातश्च मे हर्षः । ततस्तातसमीपान्निर्गतेन मया मृषावादं प्रत्यभिहितं । वयस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कस्योपदेशेनेदृशं भवतः कौशल्यं येन युष्मदवष्टम्भेन मया संपादितस्तातस्य हर्षः प्रच्छादितः कलाचार्यकलहव्यतिकरो लब्धा चेयमतिदुर्लभा मुत्कलचारितेति । मृषावादेनाभिहितं । कुमाराकर्णय । अस्ति राजसचित्ते नगरे रागकेसरी नाम राजा । तस्य च मूढता नाम महादेवी । तयोश्चास्ति माया नाम दुहिता । सा मया महत्तमा भागिनी प्रतिपन्ना । प्राणेभ्योऽपि वल्लभोऽहं तस्याः । ततस्तदुपदेशेन ममेदृशं कौशलं । सा च जननीकल्पमात्मानं मन्यमाना यत्र यत्र क्वचिदहं संचरामि तत्र तत्र वत्सलतया सततमन्तर्लीना तिष्ठति न क्षणमात्रमपि मां विरहयति । मयाभिहितं । वयस्य दर्शनीया ममापि सात्मीया भगिनी भवता । मृषावादेनाभिहितं । एवं करिष्यामि ॥

ततो मया ततः प्रभृति वेश्याभवनेषु द्यूतकरशालासु दुर्ललितमीलकेषु तथान्येषु च दुर्विनयस्थानेषु यथेष्टचेष्टया विचरता तथापि मृषावादबलेन कलाग्रहणमहं करोमीति लोकमध्ये गुणोपार्जनतत्परमात्मानं प्रकाशयता तातमपश्यतैवातिवाहितानि द्वादश वर्षाणि । मुग्धजनप्रवादेन च समुच्चलितालीकवार्त्ता यथा रिपुदारणकुमारः सकलकलाकलापकुशल इति । प्रचरितो देशान्तरेष्वपि प्रवादः । समारूढश्चाहं यौवनभरे ॥

ततश्च शेखरपुरे नगरे नरकेसरिनरेन्द्रस्य वसुंधराया महादेव्याः कुक्षिसंभूतास्ति नरसुन्दरी नाम दुहिता । सा च भुवनाद्भुतभूतरूपातिशयेन निरुपमा कलासौष्ठवेन संप्राप्ता यौवनं । समुत्पन्नोऽस्याश्चित्तेऽभिनिवेशः । यदुत यः कलाकौशलेन मत्तः समधिक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तरः स एव यदि परं मां परिणयति नापरः। निवेदितं पित्रोर्निजाकूतं। संजातमनयोः पर्याकुलत्वं नास्त्येवास्याः कलाभिः समानोऽपि भुवने पुरुषः कुतः पुनरधिकतर इति भावनया। ततः श्रुतस्ताभ्यां मदीयः कलाकौशलप्रवादः। चिन्तितं नरकेसरिणा। स एव रिपुदारणो यदि परमस्याः समर्गलतरो भविष्यति। युज्यते च नरवाहनेन सहास्माकं वैवाह्यं। यतः प्रधानवंशो महानुभावश्चासौ वर्तते तस्य च राज्ञो रत्नसूचिरिव महानागस्य निरपत्यस्य सैवैका नरसुन्दरी दुहिता। ततोऽत्यन्तमभीष्टतया तस्याश्चिन्तितमनेन। गच्छामि तत्रैव सिद्धार्थपुरे गृहीत्वा वत्सां नरसुन्दरीं। ततः परीक्ष्य तं रिपुदारणं विवाहयाम्येनां येन मे चित्तनिर्वृतिः संपद्यते। ततः सर्वबलेन समागतो नरकेसरी। ज्ञापितस्तातस्यागमनवृत्तान्तः। परितुष्टोऽसौ। कारितमुच्छ्रितपताकं नगरं। प्रवेशितो महाविमर्देन नरकेसरी तातेन। दत्तमावासस्थानं। भविष्यति रिपुदारणकुमारस्य नरसुन्दर्या सह कलाकौशलपरीक्षेति ज्ञापितं लोकानां। प्रशस्तदिने सज्जीकारितः स्वयंवरमण्डपः। विरचिता मञ्चाः। मीलितं राजवृन्दं। समुपविष्टस्तन्मध्ये सपरिकरस्तातः। समाहूतोऽहं कलाचार्यश्च। प्राप्तोऽहं सह मित्रद्वयेन तातसमीपं महामतिश्च सह राजदारकैः॥ इतश्च पुण्योदयस्य मदीयदुष्टचेष्टितानि पश्यतश्चित्तखेदेनैव संजातं कृशतरं शरीरं विगलितं परिस्फुरणं मन्दीभूतः प्रतापः। ततोऽहमुपविष्टस्ताताभ्यर्णे कलोपाध्यायश्च। निवेदितं विनयनम्रेण नरवाहनेन महामतये नरकेसरिराजागमनप्रयोजनं। तदाकर्ण्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संजातो मे हर्षातिरेकः। स्थितस्तूष्णीभावेन स्वहृदयमध्ये हसन्नुपाध्यायः। अत्रान्तरे समागतो नरकेसरी। परितुष्टो नरवाहनः। दापितं तस्मै महार्हसिंहासनं। उपविष्टः सपरिकरो नरकेसरी। ततस्तदनन्तरं पूरयन्ती जनहृदयसरांसि लावण्यामृतप्रवाहेण अधरयन्ती वरबर्हिकलापं कृष्णस्निग्धकुञ्चितकेशपाशेन प्रोद्भासयन्ती दिक्चक्रवालं वदनचन्द्रेण विधुरयन्ती कामिजनचित्तानि लीलामन्थरेण विलासविलोकितेन दर्शयन्ती महेभकुम्भविभ्रमं पयोधरभरेण उच्छृङ्खलयन्ती मदनवारणं विस्तीर्णजघनपुलिनेन विडम्बयन्ती सञ्चारिरक्तराजीवयुगललीलां चरणयुग्मेन उपहसन्ती कलकोकिलाकुलकूजितं मन्मथोल्लापजल्पितेन कुतूहलयन्ती वरमुनीनपि प्रवरनेपथ्यालङ्कारमाल्यताम्बूलाङ्गरागविन्यासेन परिकरिता प्रियसखीवृन्देन अधिष्ठिता वसुंधरया प्रविष्टा नरसुन्दरी। ततस्तां विलोक्याहं हृष्टश्चेतसा। विजृम्भितः शैलराजः। विलिप्तं स्तब्धचित्तेन तेनावलेपनेन मयात्महृदयं। चिन्तितं च। कोऽन्यो मां विहायैनां परिणेतुमर्हति। न खलु मकरध्वजादृते रतिरन्यस्योपनीयते॥ अत्रान्तरे विहितविनया तातादीनामभिहिता नरकेसरिणा नरसुन्दरी। यदुत उपविश वत्से। मुञ्च लज्जां। पूरयात्मीयमनोरथान्। प्रश्नय रिपुदारणकुमारं कलामार्गे यत्र कचित्ते रोचते। ततो नरसुन्दर्या सहर्षमुपविश्याभिहितं। यदाज्ञापयति तातः। केवलं गुरूणां समक्षं न युक्तं ममोद्ग्राहयितुं। तस्मादार्यपुत्र एवोद्ग्राहयतु सकलाः कलाः। अहं पुनरेकैकस्यां कलायां सारस्थानानि प्रश्नयिष्यामि। तत्रार्यपुत्रेण निर्वाहः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करणीय इति । तदाकर्ण्य हृष्टौ नरवाहननरेन्द्रौ समस्तराजकुलं लोकाश्च । ततस्तातेनाभिहितोऽहं । कुमार सुन्दरं मन्त्रितं राजदुहित्रा । तस्मात्प्रतमुद्ग्राहयतु कुमारः सकलाः कलाः पूरयत्वस्या मनोरथान् जनयतु ममानन्दं निर्मलयतु कुलं गृह्णातु जयपताकां । एषा सा निकषभूमिर्वर्तते विज्ञानप्रकर्षस्येति ॥ मम तु तदा कलानां नामान्यपि विस्मृतानि । ततो विक्लवीभूतमन्तःकरणं प्रकम्पिता गात्रयष्टिः प्रादुर्भूताः प्रस्वेदबिन्दवः संजातो रोमोद्धर्षः प्रनष्टा भारती तरलिते लोचने । ततो हा किमेतदिति विषण्णस्तातः । प्रलोकितं महामतिवदनं । महामतिराह । किं कर्तव्यमादिशतु देवः । तातेनाभिहितं । किमितीयमीदृशी कुमारशरीरेऽवस्था । ततः कर्णे निवेदितं महामतिना । देव मनःक्षोभविकारोऽयमस्य । तातः प्राह । किं पुनरस्य मनःक्षोभनिमित्तं । महामतिराह । देव प्रस्तुतवस्त्वज्ञानं । भवत्येव हि वागायुधानां सदसि विदुषां सस्पर्धमाभाषितानां ज्ञानावष्टम्भविकलानां मनसि क्षोभातिरेकः । तातेनाभिहितं । आर्य कथमज्ञानं कुमारस्य । ननु सकलकलासु प्रकर्षं प्राप्तः कुमारो वर्तते । ततः संस्मृत्य मदीयदुर्विलसितं गृहीतो मनाक्क्रोधेन कलाचार्यः । ततोऽभिहितमनेन । देव प्रकर्षं प्राप्तः कुमारः शैलराजमृषावादप्रणीतयोः कलयोर्न पुनरन्यत्र । तातः प्राह । के पुनस्ते कले । महामतिराह । दुर्विनयकरणमसत्यभाषणं च । एते ते शैलराजमृषावादप्रणीते कले । अनयोस्त्वात्यन्तं कुशलः कुमारः । न पुनरन्यकलानां गन्धमात्रमपि जानीते । तातः प्राह । कथमिदं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महामतिनाभिहितं। देव देवस्य दीर्घचित्तसन्तापभीरुभिस्तदैव नाख्यातमिदमस्माभिः। यतो लोकमार्गातीतं कुमारस्य चरितमिदानीमपि देवस्य पुरतस्तत्कथयतो न प्रवर्तते मे वाणी। तातेनाभिहितं। यथावृत्तकथने भवतो नास्त्यपराधः। निःशङ्कं कथयत्वार्यः। कलाचार्येणावज्ञाकरणादिको वेत्रासनारोहणगर्भो दुर्वचनतिरस्करणपर्यन्तो निवेदितः समस्तोऽपि मदीयदुर्विलसितवृत्तान्तः। तातेनाभिहितं। आर्य यद्येवं ततो जानतापि त्वयास्य कुलदूषणस्य स्वरूपं किमित्ययमेवंविधसभामध्ये प्रवेशितः। ननु विगोपिता वयमाकालमनेन पापेन। महामतिराह। देव न मयायमिह प्रवेशितः। मद्भवनान्निर्गतस्यास्य द्वादश वर्षाणि वर्तन्ते। केवलमकाण्ड एव संजातमद्य मम देवकीयमाकारणं। ततः समागतोऽहं। अयं तु कुतश्चिदन्यतः स्थानादिहागत इति। तातेनाभिहितं। आर्य यद्येवमपाचचूडामणिरेष रिपुदारणो गुणानामभाजनतया वर्जितो युष्माभिः तत्किमिति गर्भाधानादारभ्यास्येयन्तं कालं यावत्कल्याणपरंपरा संपन्ना किमिदानीमेवं लोकमध्ये विगुप्यत इति। महामतिराह। देव अस्त्यस्य पुण्योदयो नामान्तरङ्गो वयस्यः। तज्जनिता प्राक्तनी कल्याणपरंपरा। तथाहि। तत्प्रभावादेवायं प्रादुर्भूतः सुकुले संपन्नो जननीजनकयोरभीष्टतमः संजातो रूपसौभाग्यसुखैश्वर्यादिभाजनं। तातः प्राह। तर्हि क्व पुनरधुना गतोऽसौ पुण्योदयः। महामतिराह। न कुचिद्गतोऽत्रैव प्रच्छन्नरूप आस्ते। केवलं पश्यन्नस्यैव रिपुदारणस्य सम्बन्धीनि दुर्विलसितानि चित्तदुःखासिकया साम्प्रतं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षीणशरीरोऽसौ तपस्वी वर्तते । न शक्नोत्यस्यापदं निवारयितुमिति । तदाकर्ण्य तातो नास्त्यत्र कश्चिदुपायो विनाटिता वयमनेन दुष्पुत्रेण महालोकमध्ये प्रसभमिति चिन्तया राहुग्रस्तशशधरबिम्बमिव कृतं तातेन कृष्णं मुखं । लक्षितः समस्तलोकैः पर्यालोचनपरमार्थः । ततो विलक्षीभूतास्तातबान्धवाः । विद्राणवदनः संपन्नः परिजनः । प्रहसिता मुखमध्ये खिड्गलोकाः । विषण्णा नरसुन्दरी । विस्मितो नरकेसरिलोकः । ततश्चिन्तितं जनेन तातलज्जया लघुध्वनिना परस्परमुक्तं च । अये ।

गर्वाध्मातः परं मूढो बस्तिवद्वातपूरितः ।
निःसारोऽपि गतः ख्यातिमेष भो रिपुदारणः ॥

अथवा ।

निरक्षरोऽपि वाचालो लोकमध्येऽतिगौरवम् ।
वागाडम्बरतः प्राप्तो यः स्यादन्योऽपि मानवः ॥
स सर्वो निकषप्राप्तः प्राप्नोत्येव विडम्बनाम् ।
महाहास्यकरीं मूढो यथायं रिपुदारणः ॥

मम तु तातोपाध्यायौ कर्णोत्सारकेण परस्परं तथा जल्पन्तौ पश्यतः समुत्पन्नो मनसि विकल्पः । अये बलात्कारेण मामेतौ जल्पयिष्यतः । ततो भयातिरेकेण स्तम्भितं मे गलकनाडीजालं निरुद्धश्चोच्छ्वासनिःश्वासमार्गः । संजाता म्रियमाणावस्था । ततो हा पुत्र हा तात हा वत्स हा तनय किमेतदिति प्रलपन्ती वेगेनागत्य शरीरे लग्ना ममाम्बा विमलमालती । पर्याकुलीकृतः परिजनः किं कर्तव्यताविमूढा वसुंधरा विस्मितो नरकेसरी ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तातेनाभिहितं। गच्छत भो लोका गच्छत न पटुः शरीरेणाद्य कुमारः। पुनर्जल्पो भविष्यति। तदाकर्ण्य निर्गता वेगेन लोका मिलिता बहिस्त्रिकचतुष्कचत्वारादिषु। अहो रिपुदारणस्य पाण्डित्यमहो पाण्डित्यमिति प्रवृत्तं प्रहसनं। प्रहितौ लज्जावनम्रेण तातेन कलोपाध्यायनरकेसरिणौ। गतः स्वावासस्थाने नरकेसरी। चिन्तितमनेन। दृष्टं यद्द्रष्टव्यं। दीयतां प्रभाते प्रयाणकमिति॥ ममापि निर्जनीभूते मन्दीभूतं भयं स्वस्थीभूतं शरीरं। तातस्य तु हृतराज्यस्येव वज्राहतस्येव महाचिन्ताभराक्रान्तस्य लङ्घितं तद्दिनं। समागता रजनी। न दत्तं प्रादोषिकमास्थानं। निवार्य जनप्रवेशं प्रसुप्तः। केवलं तया चिन्तयापनिद्रेणैवातिवाहितप्राया विभावरी॥ इतश्च लज्जितो मे वयस्यः पुण्योदयः। चिन्तितमनेन।

यस्य जीवत एवैवं पुंसः स्वामी विडम्ब्यते।
किं तस्य जन्मनाप्यत्र जननीक्लेशकारिणः॥

ततश्च।

जातं विच्छायकं तावन्ममैतदतिदुःसहम्।
यायात्सुतामदत्त्वैव यद्यसौ नरकेसरी॥
ततोऽस्य सर्वथा व्यर्थं कुमारस्य मदीयकम्।
संनिधानमतो नैव ममोपेक्षात्र युज्यते॥
ततो यद्यप्ययोग्योऽयमेतस्या रिपुदारणः।
तथापि दापयाम्येनामस्मै कमललोचनाम्॥

अत्रान्तरे समागता तातस्य रात्रिशेषे निद्रा। ततो भद्रे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽगृहीतसङ्केते समाश्वासनार्थं तातस्य दत्तं कामरूपितया स्वप्नान्तरे तेन पुण्योदयेन दर्शनं। दृष्टः सुन्दराकारो धवलवर्णः पुरुषः। अभिहितमनेन। महाराज किं स्वपिषि किं वा जागर्षि। तातेनाभिहितं। जागर्मि। पुरुषः प्राह। यद्येवं मुञ्च ततो विषादं। दापयिष्याम्यहं रिपुदारणकुमाराय नरसुन्दरीमिति। तातेनाभिहितं। महाप्रसादः॥

अत्रान्तरे प्रहतं प्राभातिकं तूर्यं। ततो विबुद्धस्तातः। पठितं कालनिवेदकेन।

हीनप्रतापो यः पूर्वं गतोऽस्तं जगतां पुरः।
स एवोदयमासाद्य रविराख्याति हे जनाः॥
यदा येनेह यल्लभ्यं शुभं वा यदि वाशुभम्।
तदावाप्नोति तत्सर्वं तत्र तोषेतरौ वृथा॥

एतच्चाकर्ण्य चिन्तितं तातेन। यदुत न कर्तव्यो मयाधुना विषादः। यतो लम्भयिष्यामि कुमारं नरसुन्दरीमिति। स्फुटमेव निवेदितं स्वप्ने मम देवेन। अनेन तु कालनिवेदकपाठव्याजेन दत्तो ममोपदेशो वेधसा। यदुत यः पुरुषो यावतः सुन्दरस्यासुन्दरस्य वा वस्तुनो यदा भाजनं तस्य तावत्तदतर्कितमेव तदा तद्वशेन संपद्यत इति। न कर्तव्यौ तत्र विदुषा हर्षविषादौ। ततोऽनया भावनया स्वस्थीभूतस्तातः॥

इतश्चाचिन्त्यप्रभावतया पुण्योदयस्य संपादिता तेन नरकेसरिणो बुद्धिः। यदुत महानुभावोऽयं नरवाहनराजः। विज्ञातं च राज्यान्तरेष्वपि मम यदिहागमनप्रयोजनं। ततो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लज्जाकरं पक्षद्वयस्यापि नरसुन्दरीमदत्त्वा मम स्वस्थाने गमनं। अतः संभाव्य कथंचिदेनां प्रयच्छामि रिपुदारणकुमारायेति ॥ ततो निवेदितो नरकेसरिणा वसुंधरासमक्षं नरसुन्दर्यै स्वाभिप्रायः। ततो नरसुन्दर्या अपि पुण्योदयप्रभावादेव वलितं मां प्रति मानसं। चिन्तितमनया। युक्तियुक्तमेव तातेन मन्त्रितं। ततोऽभिहितमनया। यदाज्ञापयति तातः। तदाकर्ण्य हृष्टो नरकेसरी। आगत्याभिहितोऽनेन नरवाहनः। महाराज किमत्र बहुना जल्पितेन। आगतैवेयं वत्सा नरसुन्दरी कुमारस्य स्वयंवरा। तदत्र किं बहुना विकत्थनेन। केवलं दुर्जनवचनावकाशो भवति। अतो निर्विचारं ग्राह्यतां कुमारेण स्वपाणिना पाणिरस्याः। तातेनाभिहितं।। एवं क्रियते। गणितं प्रशस्तदिनं। परिणीता मया महता विमर्देन नरसुन्दरी। तां विमुच्य गतः स्वस्थाने नरकेसरी। दत्तो मह्यं तातेन निर्व्यग्रभोगार्थं महाप्रासादः। गतानि नरसुन्दर्या सह ललमानस्य मे कतिचिद्दिनानि। घटितं च पुण्योदयेन निरन्तरमावयोः प्रेम समुत्पादितश्चित्तविश्रम्भः लगिता मैत्री जनितो मनोरतिप्रबन्धः प्ररोहितः प्रणयः वर्धितश्चित्तमीलकाल्हादसागरः। सर्वथा

स्वप्रभामिव तीक्ष्णांशुश्चन्द्रिकामिव चन्द्रमाः।
क्षणमेकं न मुञ्चामि तामुमामिव शङ्करः॥
सापि मामकवक्त्राब्जरसास्वादनतत्परा।
भ्रमरीव गतं कालं न जानाति तपस्विनी॥
ततस्तं तादृशं वीक्ष्य देवानामपि दुर्लभम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साधं मे नरसुन्दर्या प्रेमाबन्धं मनोहरम् ॥
मदीयौ सुहृदाभासौ परमार्थेन वैरिकौ।
तौ मृषावादशैलेशौ चित्तमध्ये रुषं गतौ ॥
चिन्तितं च ततस्ताभ्यां कथमेष वियोज्यते।
एतया नरसुन्दर्या पापात्मा रिपुदारणः ॥
शैलराजो मृषावादं ततश्चेत्यमभाषत।
त्वं तावन्नरसुन्दर्याः कुरु चित्तविरञ्जनम् ॥
स्वयमेवाहमत्रार्थे भणिष्यामि ततः परम्।
मादृशा च कृते यत्ने कीदृशं प्रेमबन्धनम् ॥
मृषावादस्ततः प्राह नोत्साह्योऽहं भवादृशा।
कृतमेव मया पश्य एतस्याश्चित्तभेदनम् ॥
तदेवं मद्वियोगार्थं ततस्तौ कृतनिश्चयौ।
शैलराजमृषावादौ पर्यालोच्य व्यवस्थितौ ॥
अहं तु तां समासाद्य सद्भार्यां नरसुन्दरीम्।
चिन्तयामि त्रिलोकेऽपि प्राप्तं यत्सुन्दरं मया ॥
ततश्चोन्नामितैकभ्रूर्मन्थरीकृतलोचनः।
दत्त्वा तच्छैलराजीयं हृदये स्वेऽवलेपनम् ॥
चिन्तयामि न लोकेऽत्र पुरुषोऽन्योऽस्ति मादृशः।
यतो ममेदृशी भार्या ततो गाढतरं पुनः ॥
न पश्यामि गुरुं नैव देवान्नो बन्धुसन्ततिम्।
न भृत्यवर्गं नो लोकं न जगत् सचराचरम् ॥
अथ तत्तादृशं दृष्ट्वा मदीयं दुष्टचेष्टितम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुण्योदयो मनस्तापाद्गाढं जातोऽतिदुर्बलः ॥
ततो मां तादृशं वीक्ष्य विरक्ताः सर्वबान्धवाः ।
इदं जल्पितुमारब्धा हसन्तस्ते परस्परम् ॥
पश्यताहो विधेः कीदृगस्थानविनियोजनम् ।
स्त्रीरत्नमीदृशं येन मूर्खेणानेन योजितम् ॥
स्तब्धोऽभून्मूर्खभावेन प्रागेष रिपुदारणः ।
आसाद्येमां पुनर्भार्यां गर्वेणान्धोऽधुना ह्ययम् ॥
स एव वर्तते न्यायो लोके यः किल श्रूयते ।
एकं स वानरस्तावद्दृष्टोऽन्यद्वृषणेऽलिना ॥
तदेषा चारुसर्वाङ्गी सद्भार्या नरसुन्दरी ।
करिणीव खरस्योच्चैर्न योग्यास्य मृगेक्षणा ॥
अन्यदा नरसुन्दर्या सद्भावार्पितचित्तया ।
स्नेहगर्भपरीक्षार्थं चिन्तितं निजमानसे ॥
किं ममार्पितसद्भावः किं वा नो रिपुदारणः ।
आ ज्ञातं स्नेहसर्वस्वं गुह्याख्यानेन गम्यते ॥
अनाख्येयमतः किंचिद्गुह्यसर्वस्वमञ्जसा ।
पृच्छाम्येनं दृढस्नेहे ततो व्यक्तिर्भविष्यति ॥

ततश्चिन्तितं नरसुन्दर्या । कीदृशं पुनरहं गुह्यमधुनार्यपुत्रं पृच्छामि । ऊं ज्ञातं तावत्सुनिश्चितमिदं मया । यदुत नितरां कमनीयशरीरोऽपि रक्ताशोकपादपवदेष निखिलकलाकलापकौशलफलविकल एवार्यपुत्रः । यतो विज्ञानाभावजनिताद्भयातिरेकादेव तथाविधोऽस्य तदा सभामध्ये मनःक्षोभोऽभूत्तदधुना तदेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनःक्षोभकारणमार्यपुत्रं प्रश्नयामि । ततो यदि स्फुटमाचक्षीत विज्ञास्यामि यथास्ति मया सहास्य स्नेहसद्भावः। अथ न कथयेत्तत-स्तत्राप्यभिप्रायं लक्षयिष्यामीति विचिन्त्य पृष्टोऽहं नरसुन्दर्या । यदुतार्यपुत्र कीदृशं तव तदा सभामध्ये शरीरापाटवमासीदिति । अत्रान्तरे ज्ञातावसरेण प्रयुक्ता मृषावादेनात्मीया योगशक्तिः । कृतमन्तर्धानं । प्रविष्टो मदीयमुखे । ततोऽभिहितं मया । प्रिय-तमे त्वया पुनस्तदा कीदृशं लक्षितं । नरसुन्दरी प्राह । न मया किंचित्तदा सम्यग् विज्ञातं । केवलं समुत्पन्ना शङ्का किं सत्यमेव शरीरापाटवमार्यपुत्रस्य किं वा कलाकलापे न कौशलमिति । मयाभिहितं । सुन्दरि न तत्रैकोऽपि विकल्पः कर्तव्यः । यतस्त-रन्ति हृदये मम सकलाः कलाः । शरीरापाटवमपि मम न किंचित्तदासीत् । केवलमम्बया तातेन चालीकमोहात् कृतो मुधैव बहलः कलकलः । तथाविधालीककलकले च स्थिरतया स्थितोऽहं मौनेन। एतच्चाकर्ण्य नरसुन्दर्याः संजातो मनसि व्यलीकभावः। चि-न्तितमनया । अहो अस्य प्रत्यक्षापलापित्वं अहो निर्लज्जता अहो आत्मबहुमानिता । ततोऽभिहितं नरसुन्दर्या । आर्यपुत्र यद्येवं ततो महत्कुतूहलं मम इदानीमप्यहमार्यपुत्रेण कलास्वरूपमुत्की-र्त्यमानं श्रोतुमिच्छामि । अतो महता प्रसादेन समुत्कीर्तयतु तदार्यपुत्रः । मया चिन्तितं । अये पाण्डित्याभिमानेन परिभवबुद्ध्या मामुपहसत्येषा । अत्रान्तरे लब्धावसरो विजृम्भितः शैलराजः । विलिप्तं तेन स्तब्धचित्ताभिधानेनात्मीयविलेपनेन स्वहस्तेन मद्धृ-दयं । ततश्चिन्तितं मया। एवं या मम परिभवेनोपहासकारिणी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खल्वेषा पापा नरसुन्दरी । तया किमिह स्थितया । ततो मयाभिहितं । अपसर पापे दृष्टिमार्गादपसर तूर्णं निर्गच्छ मदीयभवनात् । न युक्तं भवादृश्याः पण्डितंमन्याया मूर्खेणानेन जनेन सहावस्थातुमिति । ततोऽवलोकितं मदीयवदनं नरसुन्दर्या । चिन्तितमनया । हा धिक् सद्भावीभूत एवायं । वशीकृतो मानभटेन नो गोचरः साम्प्रतं प्रसादनायाः । ततो मन्त्राहतेव भुजङ्गवनिता समुन्मूलितेव वनलतिका उत्खोटितेव चूतमञ्जरी अङ्कुशकृष्टेव करिणिका सर्वथा विद्राणदीनवदना साध्वसभारनिर्भरं हृदयमुद्वहन्ती मन्दं क्वणन्मणिमेखलाकिङ्किणीकलकोलाहलनूपुरझणझणारावसमाकृष्टस्नानवापिकाकलहंसकानि पदानि निक्षिपन्ती चलिता नरसुन्दरी निर्गता मामकीनसदनात् प्राप्ता तातीयभवने ॥ स्थितोऽहं शैलस्तम्भतया यावदद्यापि न शुष्यति शैलराजीयं तद्वचःस्थलावलेपनं तावतीं वेलां । शोषमुपागते मनाक्पुनस्त्रावलेपने संजातो मे पश्चात्तापः । बाधते नरसुन्दरीस्नेहमोहः । समाध्यासितोऽहमरत्या गृहीतो रणरणकेन अङ्गीकृतः शून्यतया उररीकृतो विक्लवतया प्रतिपन्नो विकारकोटीभिः अवष्टब्धो मदनज्वरेण । ततो निषण्णः शयनीये । तत्रापि प्रवर्धमानया जृम्भिकयानवरतमुद्वर्तमानेनाङ्गेन मत्स्यक इव खादिराङ्गारराशिमध्ये दन्दह्यमानः स्तोकवेलायां यावत्तिष्ठामि तावदागता सविषादमम्बा विमलमालती । ततस्तां वीक्ष्य कृतं मयाकारसंवरणं । निषण्णा भद्रासने स्वयमेवाम्बा । स्थितोऽहं पर्यङ्क एवोपविष्टः । अभिहितमम्बया । वत्स न सुन्दरमनुष्ठितं भवता यदसौ तपस्विनी नरसुन्दरी



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परुषवचनैस्तथा तिरस्कृता । तथाहि यदितो गतायास्तस्याः संपन्नं तत्समाकर्णयतु वत्सः । मयाभिहितं । उच्यतां यत्ते रोचते । अम्बयाभिहितं । अस्ति तावदितो गता नयनसलिलधाराधौतगण्डलेखा दीनमनस्का दृष्टा सा मया नरसुन्दरी । पतिता रुदन्ती मम पादयोः। मयाभिहिता । हले नरसुन्दरि किमेतत् । तयाभिहितं । अम्ब दाहज्वरो मां बाधते । ततो नीता मया सा संप्रवातदेशे । सज्जीकारितं शयनीयं । तत्र च स्थापिता सा । निषसाहं पार्श्वे । ततः प्रहतेव महामुद्गरेण लुप्यमाणेव तीव्राग्निना खाद्यमानेव वनपञ्चाननेन ग्रस्यमानेव महामकरेण अवष्टभ्यमानेव महापर्वतेन उत्कर्त्यमानेव कृतान्तकर्तिकया पाट्यमानेव क्रकचपाटेन पच्यमानेव नरके प्रतिक्षणमुद्वर्तपरावर्तं कर्तुमारब्धा । मयाभिहितं । हले किंनिमित्तकः पुनस्तवायमेवंविधो दाहज्वरः । ततो दीर्घदीर्घं निःश्वस्य न किंचिज्जल्पितमनया। मया चिन्तितं। मानसीयमस्याः पीडा । कथमन्यथा ममापि न कथयेत् । ततः कृतो मया निर्बन्धः । कथितं कृच्छ्रेण नरसुन्दर्या यथावृत्तं । ततो नियुज्य तस्याः शीतक्रियाकरणे कदलिकां मयाभिहिता सा नरसुन्दरी । यदुत वत्से यद्येवं ततो धीरा भव मुञ्च विषादं अवलम्बस्व साहसं । गच्छाम्यहं स्वयमेव वत्सस्य रिपुदारणस्य समीपे। करोमि तं तवानुकूलम् । केवलं किं न विज्ञातं पूर्वमेव त्वयेदं यथा नितरां मानधनेश्वरो मदीयस्तनयः न विषयः प्रतिकूलभाषणस्य । तदिदानीमपि विज्ञातमाहात्म्ययास्य त्वया न कदाचिदपि प्रतिकूलमाचरणीयं यावज्जीवं परमात्मेवायमाराधनीयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततश्चेदं मदीयवचनमाकर्ण्य सा बाला नरसुन्दरी विकसितेव कमलिनी कुसुमितेव कुन्दलता परिपाकबन्धुरेव मञ्जरी मदसुन्दरेव करिणिका जलसेकाप्यायितेव वल्लरी पीतामृतरसेव नागप्रणयिनी गतघनबन्धनेव चन्द्रलेखिका सहचरमीलितेव चक्रवाकिका क्षिप्तेव सुखामृतसागरे सर्वथा किमप्यनाख्येयं रसान्तरमनुभवन्ती शयनादुत्थाय निपतिता गाढं मम चरणयोः। अभिहितमनया। अम्ब महाप्रसादः। अनुगृहीतास्मि मन्दभाग्याहमनेन वचनेनाम्बया। तद्गच्छतु शीघ्रमम्बा करोतु ममानुकूलमेकवारमार्यपुत्रं। ततो यदि पुनरयं जनस्तस्य प्रतिकूले वर्तमानः स्वप्नेऽपि विज्ञातः स्यादम्बया ततो यावज्जीवं न संभाषणीयो नापि द्रष्टव्यः पापात्मेति। मयाभिहितं। यद्येवं ततो गच्छामि। नरसुन्दरी प्राह। अम्ब महाप्रसादः। ततः समागताहमेषा वत्सस्य समीपे। तदयमत्र वत्स परमार्थः।

सा तु दन्दह्यते बाला विदित्वा प्रतिकूलताम्।
तवानुकूलतां मत्वा प्रमोदमवगाहते॥
वल्लभेयं कुमारस्य श्रुत्वेदममृतायते।
अनिष्टेयं कुमारस्य श्रुत्वेदं नारकायते॥
त्वदीयरोषनाम्नापि म्रियते सा तपस्विनी।
सन्तोषमात्रनाम्नापि तावकीनेन जीवति॥
अतो यन्मुग्धया किंचिदपराद्धं तया तव।
बालया प्रणयात्सर्वं तद्वत्सः क्षन्तुमर्हति॥
प्रणतेषु दयावन्तो दीनाभ्युद्धरणे रताः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सस्नेहार्पितचित्तेषु दत्तप्राणा हि साधवः ॥

ततश्चेदमम्बया नरसुन्दरीस्नेहसर्वस्वमुत्कीर्त्यमानमाकर्ण्य यावत्किलाहं स्नेहनिर्भरतया तां प्रति प्रगुणो भवामि तावच्छैलराजेन विरचिता कुटिलभ्रुकुटिर्धूनितमुत्तमाङ्गं दत्तो मदीयहृदये विलेपनचर्चः । ततस्तस्याः सम्बन्धिनमपराधं संस्मृत्य जातो मम पुनश्चित्तावष्टम्भः । ततोऽभिहिता मयाम्बा । यदुत न कार्यं मम तया परिभवकारिण्या पापयेति । अम्बयाभिहितं । वत्स मा मैवं वोचः । चन्तव्यो मम लग्नाया वत्सेन तदीयोऽयमेको गुरुरपराधः । ततः पतिता मच्चरणयोरम्बा । मयाभिहितं । अपसर त्वमप्यवस्तुनिर्बन्धपरे मम दृष्टिपथादपसर । न प्रयोजनं त्वयापि मे या त्वं मया निःसारितां तां दुरात्मिकां संघटयसि । ततश्चरणाभ्यां प्रेरिता मयाम्बा । ततो भद्रेऽगृहीतसङ्केते शैलराजवशवर्तिना मया पापात्मना तथा तिरस्कृता सती लज्जयित्वा मदीयमनिवर्तकमाग्रहविशेषं निराशा मुञ्चन्ती नयनसलिलं यथागतमेव प्रतिगताम्बा । निवेदितो नरसुन्दर्यै व्यतिकरः । तमाकर्ण्य वज्रनिर्दलितेव मूर्छया निपतितासौ भूतले । सिक्ता चन्दनरसेन समाश्वासिता तालवृन्तवायुना लब्धचेतना रोदितुमारब्धा । विमलमालत्याभिहितं । पुत्रि किं क्रियते । वज्रमयहृदयोऽसौ ते भर्ता । तथापि मा रुदिहि मुञ्च विषादं । साहसावष्टम्भेन कुरु तावदेकं त्वमुपायं । गच्छ स्वयमेव प्रियतमप्रसादनार्थं । ततः स्वयं गतायाः प्रत्यागतहृदयः कदाचित्प्रसीदत्यसौ । यतो मार्दवसाध्यानि कामिहृदयानि भवन्ति । अथ तथापि कृते न प्रसीदेत्ततः पश्चात्तापो न भविष्यति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतः सुपरिमाणिते वल्लभके किलावरक्तको न भवतीति लोकवार्ता । नरसुन्दरी प्राह । यदाज्ञापयत्यम्बा । ततश्चलिता सा मम तोषणार्थं । किमस्यास्तत्र गतायाः संपद्यत इति विमर्शेन लग्ना तदनुमार्गेणाम्बा । प्राप्ता मम पार्श्वे नरसुन्दरी । स्थिता द्वारदेशे विमलमालती । नरसुन्दर्याभिहितं ।

नाथ कान्त प्रिय स्वामिञ्जीवदायक वल्लभ ।
प्रसीद मन्दभाग्यायाः प्रसीद नतवत्सल ॥
न पुनस्ते मनोदुःखं करिष्येऽहं कदाचन ।
त्वां विना शरणं नाथ नास्ति मे भुवनत्रये ॥

एवं च वदन्ती बाष्पोदकबिन्दुवर्षणालोललोचनयुगलेन स्नपयन्ती मदीयचरणद्वयं प्रणता नरसुन्दरी । मम तु तां तादृशीं पश्यतस्तदा कीदृशं हृदयं संपन्नं । अपि च ।

स्नेहेन नरसुन्दर्या भवत्युत्पलकोमलम् ।
वीचिते शैलराजे तु शिलासङ्घातनिष्ठुरम् ॥
नवनीतमिवाभाति यावच्चिन्तयति प्रियाम् ।
वज्राकारं पुनर्भाति शैलराजवशीकृतम् ॥
ततो दोलां समारूढं तदा मामकमानसम् ।
निश्चेतुं नैव शक्नोति किमत्र मम सुन्दरम् ॥
तथापि मोहदोषेण मया दीनापि बालिका ।
शैलराजं प्रिय कृत्वा भर्त्सिता नरसुन्दरी ॥

कथम् ।

आः पापे गच्छ गच्छेति वागाडम्बरमायया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न प्रतारयितुं शक्यस्त्वयायं रिपुदारणः ॥
कुशलापि कलासूत्रैरन्येषां यदि वञ्चनम् ।
कर्तुं शक्नासि नो जातु मूर्खाणामपि मादृशाम् ॥
यदाहं हसनस्थानं संजातस्त्वादृशामपि ।
तदा किं ते प्रलापेन कीदृशी मम नाथता ॥
इत्युक्त्वा स्तब्धसर्वाङ्गः शून्यारण्ये मुनिर्यथा ।
स्थितोऽहं मौनमालम्ब्य शैलराजेन चोदितः ॥

ततः सा वराकी नरसुन्दरी विगलितविद्येवाम्बरचरी परिभ्रष्टसमाधिसामर्थ्येव योगिनी तप्तस्थलनिक्षिप्तेव शफरिका अवाप्तनष्टरत्ननिधानेव मूषिका सर्वथा त्रुटिताशापाशबन्धना निपतिता महाशोकभरसागरे चिन्तयितुं प्रवृत्ता । किमिदानीं सर्वथा प्रियतमतिरस्कृताया मम जीवितेनेति । ततो निर्गत्य भवनात् क्वचिद्गन्तुमारब्धा । ततः किमियं करोतीति विचिन्त्य सहित एव शैलराजेनालक्षितपादपातं लग्नोऽहं तदनुमार्गेण ॥ इतश्च

लोकयन्निव निर्विण्णो मदीयं दुष्टचेष्टितम् ।
अत्रान्तरे गतोऽन्यत्र तदा चेत्रे दिवाकरः ॥

ततः समुल्लसितमन्धकारं । संजाता विरलजनसञ्चारा राजमार्गाः । ततो गता सैकत्र शून्यगृहे नरसुन्दरी । इतश्चोद्गन्तुं प्रवृत्तः शशधरः । ततो मन्दमन्दप्रकाशे तामेव निरीक्षमाणः प्राप्तोऽहमपि तद्द्वारदेशे स्थितो गोपायितेनात्मना । ततो नरसुन्दर्या विलोकितं दिग्चक्रवालं दृष्टकास्थलमारुह्योत्तरीयेण बद्धो मध्यवलये पाशकः । नियमिता तत्र शिरोधरा । ततोऽभिहितम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नया। भो भो लोकपालाः शृणुत यूयमथवा प्रत्यक्षमेवेदं दिव्यज्ञानिनां तत्रभवतां। यदुत लब्धप्रसरतया नाथवादेन कलोपन्यासं कारितो मयार्यपुत्रो न परिभवबुद्ध्या। तस्य तु तदेव मानपर्वतारोहकारणं संपन्नं। एवं च सर्वथा निराकृताहं तेन मन्दभाग्या। अत्रान्तरे मया चिन्तितं। नास्यास्तपस्विन्या ममोपरि परिभवबुद्धिः किं तर्हि प्रणयमात्रमेवात्रापराध्यति। ततो न सुन्दरमनुष्ठितं मया। अधुनापि वारयाम्येनामितोऽध्यवसायादिति विचिन्त्य पाशकच्छेदार्थं यावच्चलामि तावदभिहितं नरसुन्दर्या। यदुत तत्प्रतीच्छत भगवन्तो लोकपालाः साम्प्रतं मदीयप्राणान्। मा च मम जन्मान्तरेष्वपि पुनरेवंविधव्यतिकरो भूयादिति। ततः शैलराजेनाभिहितं। कुमार पश्य जन्मान्तरेऽपि त्वदीयसम्बन्धमेषा नाभिलषति। मया चिन्तितं। सत्यमिदं। तथाहीयं प्रस्तुतव्यतिकरनिषेधमाशास्ते। मदीयव्यतिकरश्चात्र प्रस्तुतः। तन्म्रियतां। किमनया मम पापया। ततो लब्धप्रसरेण दत्तो मम हृदये शैलराजेन स्वविलेपनहस्तकः। स्थितोऽहं तस्य माहात्म्येन तां प्रति काष्ठवन्निष्ठितार्थः। ततः प्रवाहितो नरसुन्दर्यात्मा पूरितः पाशकः लम्बितुं प्रवृत्ता निर्गते नयने निरुद्धः श्वासमार्गः वक्रीकृता ग्रीवा आकृष्टं धमनीजालं शिथिलितान्यङ्गानि समसमायितं श्रोतोभिः निर्वादितं वक्त्रकुहरं विमुक्ता च सा प्राणैर्वराकी॥ इतश्च भवनान्निर्गच्छन्ती दृष्टाम्बया नरसुन्दरी अहं च तदनुयायी। चिन्तितमनया। नूनं भग्नप्रणयेयं रुष्टा वत्सा गच्छति मे वधूः। अयं पुनरस्या एव प्रसादनार्थं पृष्ठतो लग्नो मम पुत्रकः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो दूरं गतयोरावयोरनुमार्गेणागच्छन्ती समागतास्वापि तत्र शून्यगृहे । दृष्टा तथा लम्बमाना नरसुन्दरी । चिन्तितमम्बया । हा हा हतास्मि । नूनं मत्पुत्रकस्यापीयं वार्ता । कथमन्यथास्यामेवं व्यवस्थितायां स तूष्णीमासीत् । मया तु शैलराजीयावलेपनदोषेणैव अवस्तुनिर्बन्धपरेयमिति कृता तदवधीरणा । ततः शोकभराम्बया मम पश्यत एव तथैव व्यापादितोऽम्बयाप्यात्मा । ततः साध्वसमल्लापेनेव क्षुब्धं मनाङ् मे स्तब्धचित्ताभिधानं तत्तदा हृदयावलेपनं । गृहीतोऽहं पश्चात्तापेनाक्रान्तः शोकभरेण ।

ततः स्वाभाविकस्नेहविक्लवीभूतमानसः ।
चणं विधातुमारब्धः प्रलापमतिदारुणम् ॥

तथाप्यतिप्रौढतया निजमाहात्म्येन कृत एव मे शैलराजेन चित्तावष्टम्भः । चिन्तितं मया । अये मनुष्यः कथं स्त्रीविनाशे रोदितीति । ततः स्थितोऽहं तूष्णींभावेन ॥

इतश्च कदलिकया चिन्तितं । किमिति स्वामिनी नागच्छति । तद्गच्छाम्यहं तदन्वेषणार्थं । ततः कुतश्चिन्निश्चित्य प्राप्ता सापि तं प्रदेशं । ततो दृष्ट्वा विमलमालतीनरसुन्दर्यौ तथा लम्बमाने कृतस्तया हाहारवः । मिलितं सतातं नगरं । समुच्छलितः कोलाहलः । किमेतदिति पृष्टा कदलिका । निवेदितं तया सर्वं यथावृत्तं ॥ अत्रान्तरे संपन्नः स्फुटतरश्चन्द्रालोकः । ततो दृष्टे तथैवोल्लम्बमाने सर्वलोकेनाम्बानरसुन्दर्यौ । विलोकितोऽहमपि स्वकर्मचस्ततया भग्नगतिप्रसरो नष्टवाणीकस्तत्रैव लीनो वर्तमानश्छन्नप्रदेशे । जातःसंप्रत्ययः । धिक्कारितोऽहं जनेन । कारितं तातेनाम्बानरसुन्दर्योर्मृतकार्यम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्तत्तादृशं वीक्ष्य मदीयं कर्म दारुणम् ।
तातः शोकभराक्रान्तस्तदैवं चिन्तयत्यलम् ॥
अहो अनर्थपुञ्जोऽयमहो मे कुलदूषणः ।
अहो सर्वजघन्योऽयमहो पापिष्ठशेखरः ॥
अहो सर्वापदां मूलमहो लोकपथातिगः ।
अहो वैरिकसङ्काशो ममायं रिपुदारणः ॥
न कार्यं मे ततोऽनेन पुत्रेणापि दुरात्मना ।
एवं विचिन्त्य तातेन कृतश्चित्ते विनिश्चयः ॥
ततोऽवधीरितस्तेन भवनाच्च बहिष्कृतः ।
भ्रष्टश्रीकः पुरे तत्र विचरामि सुदुःखितः ॥
स्वदुष्टचेष्टितेनैव बालानामपि सर्वथा ।
गम्यश्चाहं तदा जातस्ततश्चैवं विगर्हितः ॥
पापोऽयं दुष्टचेष्टोऽयमद्रष्टव्यो विमूढधीः ।
कुलकण्टकभूतोऽयं सर्वथा विषपुञ्जकः ॥
मानावलेपतो येन कलाचार्योऽपकर्णितः ।
मूर्खचूडामणित्वेऽपि पाण्डित्यं च प्रकाशितम् ॥
माता च प्रियभार्या च येन मानेन मारिता ।
को वा निरीक्षते पापं तमेनं रिपुदारणम् ॥
उक्तमेवेदमस्माभिर्नोचितास्य दुरात्मनः ।
सा कलाकौशलादीनां खानिर्या नरसुन्दरी ॥

ततश्च

वियुक्तो नरसुन्दर्या यदयं तच्च सुन्दरम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं तु सा पद्मपत्राक्षी यन्मृता तन्न सुन्दरम् ॥
अहं पुनर्महामोहलुप्तज्ञानः स्वचेतसा।
तदापि चिन्तयाम्येवं भद्रे विमललोचने ॥
त्यक्तस्यापीह तातेन निन्दितस्यापि दुर्जनैः।
शैलराजमृषावादौ तथापि मम बान्धवौ ॥
अनयोर्हि प्रसादेन भुक्तपूर्वं मया फलम्।
भोक्ष्ये च कालमासाद्य पुनर्नास्त्यत्र संशयः ॥
ततश्चैवं जनेनोच्चैर्निन्द्यमानः क्षणे क्षणे।
स्थितोऽहं भूरिवर्षाणि दुःखसागरमध्यगः ॥

इतश्च

अत्यन्तदुर्बलीभूतः सकोपो मयि निस्फुरः।
स तु पुण्योदयो भद्रे स्थितोऽकिंचित्करस्तदा ॥
अथान्यदा क्वचिद्राजा वाहनार्थं सुवाजिनाम्।
वेष्टितो राजवृन्देन निर्गतो नगराद्बहिः ॥
ततः कुतूहलाकृष्टः सर्वो नागरको जनः।
तत्रैव निर्गतोऽहं च संप्राप्तस्तस्य मध्यगः।
अथ बाल्हीककाम्बोजतुरुष्कवरवाजिनः।
वाहयित्वा भृशं राजा राजलोकविलोकितः ॥
ततः खेदविनोदार्थमुद्यानं सुमनोहरम्।
प्रविष्टः सह लोकेन ललितं नाम शीतलम् ॥

तच्च कीदृशम्

अशोकनागपुन्नागतालहिन्तालराजितम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रियङ्गुचम्पकाङ्कोलकदलीवनसुन्दरम् ॥
केतकीकुसुमामोदहृष्टालिकुलमालितम् ।
समस्तगुणसंपूर्णं सर्वथा नन्दनोपमम् ॥
तत्रैकदेशे विश्रम्य स राजा नरवाहनः ।
उत्थाय सह सामन्तैर्लीलया हृष्टमानसः ॥
प्रलोकयितुमारब्धः कौतुकेन वनश्रियम् ।
विस्फारितेन नीलाब्जचारुणा लोलचक्षुषा ॥

तत्र च

सत्कान्तियुक्तनक्षत्रग्रहसङ्घातवेष्टितम् ।
प्रकाशितदिगाभोगं साक्षादिव निशाकरम् ॥
रक्ताशोकतरुस्तोमपरिवारितविग्रहम् ।
यथेष्टफलदं साक्षाज्जङ्गमं कल्पपादपम् ॥
उन्नतं विबुधावासं कुलशैलविवेष्टितम् ।
हेमावदातं सुखदं सुमेरुमिव गत्वरम् ॥
कुवादिमत्तमातङ्गमदनिर्नाशकारणम् ।
वृतं सत्करिवृन्देन निर्मदं गन्धवारणम् ॥
अथ साधूचिते देशे रक्ताशोकतलस्थितम् ।
सत्साधुसङ्गमध्यस्थं कुर्वाणं धर्मदेशनाम् ॥
शुभार्पितं यथा धन्यो निधानं रत्नपूरितम् ।
विचक्षणाख्यमाचार्यं स नरेन्द्रो व्यलोकयत् ॥
अथ तं तादृशं वीक्ष्य सूरिं निर्मलमानसः ।
नरवाहनराजेन्द्रः परं हर्षमुपागतः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततश्चित्ते कृतं तेन नूनं नास्ति जगत्त्रये।
ईदृशं नरमाणिक्यं यादृशोऽयं तपोधनः॥
निर्जितामरसौन्दर्या निवेदयति वीक्षिता।
अमुष्याकृतिरेवोच्चैर्गुणसम्भारगौरवम्॥
तदीदृशस्य किं नाम भवेद्वैराग्यकारणम्।
येन यौवनसंस्थेन खण्डितो मकरध्वजः॥

अथ वा

गत्वा प्रणम्य पादाब्जं स्वयमेव महात्मनः।
ततः पृच्छामि पूतात्मा भवनिर्वेदकारणम्॥
एवं विचिन्त्य गत्वासौ नत्वा सूरेः क्रमद्वयम्।
दत्ताशीस्तेन हृष्टात्मा निषसः शुद्धभूतले॥
ततस्तदनुमार्गेण राजवृन्दं तथा पुरम्।
उपविष्टं यथास्थानं नत्वाचार्यांघ्रिपङ्कजम्॥
मया तु भद्रे पापेन शैलराजवशात्मना।
न नतं तादृशस्यापि तदा सूरेः क्रमद्वयम्॥
पाषाणस्तम्भमुक्तोलीसन्निभो लोकपूरणः।
केवलं स्तब्धसर्वाङ्गो निषस्योऽहं भुवस्तले॥
अथ गम्भीरघोषेण मेघवन्नीरपूरितः।
धर्ममाख्यातुमारब्धः स आचार्यो विचक्षणः॥

अभिहितं च तेन भगवता। यदुत भो भो भव्याः प्रदीप्तभवनोदरकल्पोऽयं संसारविस्तारो निवासः शारीरादिदुःखानां। न युक्त इह विदुषः प्रमादः। अतिदुर्लभेयं मानुषावस्था प्रधानं पर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोकसाधनं । परिणामकटवो विषयाः । विप्रयोगान्तानि सत्सङ्गतानि । पातभयातुरमविज्ञातपातमायुः । तदेवं व्यवस्थिते विध्यापनेऽस्य संसारप्रदीपनकस्य यत्नः कर्तव्यः । तस्य च हेतुः सिद्धान्तवासनासारो धर्ममेघः । अतः स्वीकर्तव्यः सिद्धान्तः । सम्यक् सेवितव्यास्तदभिज्ञाः । भावनीयं मुण्डमालिकोपमानं । त्यक्तव्या खल्वसदपेक्षा । भवितव्यमाज्ञाप्रधानेन । उपादेयं प्रणिधानं । पोषणीयं सत्साधुसेवया । रक्षणीयं प्रवचनमालिन्यं । एतच्च विधिप्रवृत्तः संपादयति । अतः सर्वत्र विधिना प्रवर्तितव्यं । सूत्रानुसारेण प्रत्यभिज्ञातव्यमात्मस्वरूपं । प्रवृत्तावपेक्षितव्यानि निमित्तानि । यतितव्यमसंपन्नयोगेषु । लक्षयितव्या विस्रोतसिका । प्रतिविधेयमनागतमस्याः । भवत्येवं प्रवर्तमानानां सोपक्रमकर्मविलयः । विच्छिद्यते निरुपक्रमकर्मानुबन्धः । तस्मादत्रैव यतध्वं यूयमिति ॥ एवं च निवेदिते तेन भगवता विचक्षणसूरिणास्याः परिषदो मध्ये केषांचिद्भव्यानामुल्लसितस्चरणपरिणामः । अपरेषां संजातो देशविरतिक्षयोपशमः । अन्यैः पुनर्विदलितं मिथ्यात्वं । अपरेषां प्रतनूभूता रागादयः । केषांचित्संपन्नो भद्रकभावः । ततो निपतितास्ते सर्वेऽपि भगवच्चरणयोः । अभिहितमेतैः । इच्छामोऽनुशास्तिं कुर्मो यदाज्ञापयन्ति नाथाः ॥ अत्रान्तरे विदितं तातेन । यदुत प्रश्नयाम्यधुना तदहमात्मविवक्षितं । ततो ललाटतटविन्यस्तकरमुकुलेनाभिहितमनेन ।

जनातिशायिरूपाणां जगदैश्वर्यभागिनाम् ॥
भदन्त तत्रभवतां किं वो वैराग्यकारणम् ॥
सूरिणाभिहितं भूप यद्यत्र तव कौतुकम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्ते कथयाम्येष भवनिर्वेदकारणम् ॥

किं तु

आत्मस्तुतिः परे निन्दा पूर्वक्रीडितकीर्तनम् ।
विरुद्धमेतद्राजेन्द्र साधूनां चयमप्यलम् ॥
ममात्मचरिते चैतत्कथ्यमाने परिस्फुटम् ।
चयं संपद्यते तेन न युक्तं तस्य कीर्तनम् ॥

तातेनाभिहितम् ।

एवं निगदता नाथ वर्धितं कौतुकं त्वया ।
कर्तव्योऽतः प्रसादो मे निवेद्यं चरितं निजम् ॥
ततो विज्ञाय निर्बन्धं मध्यस्थेनान्तरात्मना ।
प्रबोधकारणं ज्ञात्वा सूरिरित्थमवोचत ॥

यदुत

अनादिनिधनं लोके नानावृत्तान्तसङ्कुलम् ।
विद्यते भूतलं नाम नगरं सुमनोहरम् ॥
तत्रास्ति भुवनख्यातो देवानामपि नायकः ।
अलंघ्यसत्प्रतापाज्ञो नरेन्द्रो मलसञ्चयः ॥
सुन्दरासुन्दरे कार्ये नित्यं विन्यस्तमानसा ।
तस्य चास्ति महादेवी तत्पक्तिर्नाम विश्रुता ॥
तयोश्च देवीनृपयोरेकः सुन्दरचेष्टितः ।
विद्यते जगदाल्हादी पुत्रो नाम शुभोदयः ॥
तथा द्वितीयस्तनयस्तयोर्देवीनरेन्द्रयोः ।
अस्ति सर्वजनोत्तापी विख्यातश्चाशुभोदयः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वभर्तुर्वत्सला साध्वी सुन्दराङ्गी जनप्रिया ।
भार्या शुभोदयस्यास्ति पद्माची निजचारुता ॥
तथाशुभोदयस्यापि जनसन्तापकारिणी ।
भार्या स्वयोग्यता नाम विद्यतेऽत्यन्तदारुणा ॥
इतश्च कालपर्यायादवाप्य निजचारुताम् ।
ततः शुभोदयाज्जातः पुत्रो नाम विचक्षणः ॥
तथैव कालपर्यायादवाप्यैव स्वयोग्यताम् ।
ततोऽशुभोदयाज्जातो जडो नाम सुताधमः ॥
तयोर्विचक्षणस्तावद्वर्धमानः प्रतिक्षणम् ।
यादृशः स्वैर्गुणैर्जातस्तदिदानीं निबोधत ॥
मार्गानुसारिविज्ञानः पूजको गुरुसंहतेः ।
मेधावी प्रगुणो दक्षो लब्धलक्ष्यो जितेन्द्रियः ॥
सदाचारपरो धीरः सद्भोगी दृढसौहृदः ।
देवाभिपूजको दाता ज्ञाता स्वपरचेतसाम् ॥
सत्यवादी विनीतात्मा प्रणयागतवत्सलः ।
क्षमाप्रधानो मध्यस्थः सत्त्वानां कल्पपादपः ॥
धर्मैकनिष्ठः शुद्धात्मा व्यसनेऽप्यविषसधीः ।
स्थानमानान्तराभिज्ञः कुत्सिताग्रहवर्जितः ॥
समस्तशास्त्रतत्त्वज्ञो वाचि पाटवसंगतः ।
नीतिमार्गप्रवीणत्वात् त्रासकः शत्रुसंहतेः ॥
स्वगुणोत्सेकहीनात्मा विमुक्तः परनिन्दया ।
अहृष्टः सम्पदां लाभे परार्थे च विनिर्मितः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं चेह बहुनोक्तेन यावन्तः पुरुषे गुणाः ।
गीयन्ते तेऽखिलास्तत्र प्रादुर्भूता विचक्षणे ॥
अथ संवर्धमानोऽसौ शरीरेण प्रतिक्षणम् ।
जडस्तु यादृक् संपन्नस्तदिदानीं निबोधत ॥
विपर्यस्तमनाः सत्यशौचसन्तोषवर्जितः ।
मायावी पिशुनः क्लीबो निन्दकः साधुसंहतेः ॥
असत्यसन्धः पापात्मा गुरुदेवविडम्बकः ।
असत्प्रलापो लोभान्धः परेषां चित्तभेदकः ॥
अन्यच्चित्ते वदत्यन्यच्चेष्टते क्रिययापरम् ॥
दह्यते परसम्पत्सु परापत्सु प्रमोदते ॥
गर्वाध्मातः सदा क्रुद्धः सर्वेषां भषणप्रियः ।
आत्मश्लाघापरो नित्यं रागद्वेषवशानुगः ॥
किं वात्र बहुनोक्तेन ये ये दोषाः सुदुर्जने ।
गीयन्ते तेऽखिलास्तत्र प्रादुर्भूतास्ततो जडे ॥
एवं च वर्धमानौ तौ स्वगेहे सुखलालितौ ।
विचक्षणजडौ प्राप्तौ यौवनं परिपाटितः ॥
इतश्च गुणरत्नानामुत्पत्तिस्थानमुत्तमम् ।
पुरं निर्मलचित्ताख्यं विद्यते लोकविश्रुतम् ॥
तत्रान्तरङ्गे नगरे नृपो नाम्ना मलक्षयः ।
अस्ति सद्गुणरत्नानां जनकः पालकश्च सः ॥
तस्य सुन्दरता नाम महादेवी मनःप्रिया ।
विद्यते चारुसर्वाङ्गी सा तद्रत्नविवर्धिका ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ताभ्यां च कालपर्यायाज्जाता पद्मदलेक्षणा ।
बुद्धिर्नाम गुणैराढ्या कन्यका कुलवर्धनी ॥
ततः सा गुणरूपाभ्यामनुरूपं विचक्षणम् ।
विचिन्त्य प्रहिता बाला ताभ्यां तस्य स्वयंवरा ॥
परिणीता च सा तेन महाभूतिप्रमोदतः ।
विचक्षणेन सत्कन्या जाता च मनसः प्रिया ॥
तया युक्तस्य तस्योच्चैर्भुञ्जानस्य मनःसुखम् ।
विचक्षणस्य गच्छन्ति दिनानि शुभकर्मणा ॥
अथान्यदा क्वचिद्बुद्धेर्वार्तान्वेषणकाम्यया ।
मलक्षयेण प्रहितो विमर्शो निजपुत्रकः ॥
स च बुद्धौ दृढस्नेहभावभावितमानसः ।
तस्या एव समीपस्थः सद्भगिन्याः स्थितो मुदा ॥
सहोदरसमायुक्ता भर्त्रा च बहुमानिता ।
ततः सा चित्तनिर्वाणाद्गर्भं गृह्णाति बालिका ॥
अथ तस्याः शुभे काले सद्गर्भपरिपाकतः ।
जातो देदीप्यमानाङ्गः प्रकर्षो नाम दारकः ॥
जातः संवर्धमानोऽसौ प्रकर्षो बुद्धिनन्दनः ।
विचक्षणगुणैस्तुल्यो विमर्शस्यातिवल्लभः ॥
[अथान्यदा स्वकं दृष्टं काननं सुमनोहरम् ।
विचक्षणजडाभ्यां भो नाम्ना वदनकोटरम् ॥
तत्र खादनपानेन ललमानौ यथेच्छया ।
तौ द्वावपि स्थितौ कंचित्कालं संतुष्टमानसौ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र कुन्दसमाः शुभ्रा रदनाः सन्ति वृक्षकाः ।
तेषां च वीथिकायुग्मं ताभ्यां दृष्टं मनोहरम् ॥
ततः कुतूहलेनान्तः प्रविश्य प्रविलोकितम् ।
तत्र चालक्ष्यपर्यन्तं दृष्टं ताभ्यां महाबिलम् ॥
ततो विस्फारिताक्षाभ्यां कौतुकेन सविस्मयम् ।
विचक्षणजडाभ्यां तत् सुचिरं संनिरीक्षितम् ॥
अथ तस्मात्समुद्भूता रक्तवर्णा मनोहरा ।
दासचेट्या समं काचिल्ललना चारुविग्रहा ॥
तां वीक्ष्य स जडश्चित्ते परं हर्षमुपागतः ।
ततश्च चिन्तयत्येवं विपर्यासितमानसः ॥
अहो अपूर्विका योषिदहो सुन्दरदर्शना ।
अहो संस्थानमेतस्या अहो रूपमहो गुणाः ॥
किमेषा नाकतो मुग्धा भ्रष्टा स्यादमराङ्गना ।
किं वा पातालतो बाला नागकन्या विनिर्गता ॥

अथवा नहि नहि सुष्ठु मया चिन्तितं । यतः ।

स्वर्गे वा नागलोके वा कुतः स्यादियमीदृशी ।
मर्त्ये च दूरतोऽपास्ता वार्तापीदृक्षयोषितः ॥
तन्नूनं विधिना मह्यं परितुष्टेन कल्पिता ।
निर्माप्येयं प्रयत्नेन सुन्दरैः परमाणुभिः ॥

अन्यच्च ।

नूनं पुरुषहीनेयं मदर्थं विहिता वने ।
यतो मां वीक्षते बाला लोलदृष्टिर्मुहुर्मुहुः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गत्वा समीपमेतस्याः कृत्वा चित्तपरीक्षणम् ।
ततः करोमि स्वीकारं किं ममान्येन चेतसा ॥

इतश्च ।

विचक्षणश्च तां दृष्ट्वा ललनां ललिताननाम् ।
ततश्चेतसि संपन्नो वितर्कोऽयं महात्मनः ॥
एकाकिनी वने योषा परकीया मनोरमा ।
न द्रष्टुं युज्यते रागान्नापि संभाषणोचिता ॥
यतः सन्मार्गरक्तानां व्रतमेतन्महात्मनाम् ।
परस्त्रियं पुरो दृष्ट्वा यान्त्यधोमुखदृष्टयः ॥
अतो प्रयाम्यतः स्थानात्किं ममापरचिन्तया ।
ततो गन्तुं प्रवृत्तोऽसौ हस्तेनाकृष्य तं जडम् ॥
तेन चाकृष्यमाणोऽसौ कथंचिद्बलिना जडः ।
हृतसर्वस्ववन्मोहात्परं दुःखमुपागतः ॥
यावत्तौ गच्छतः स्तोकं भूभागं राजपुत्रकौ ।
तावत्तस्यानुचरी तस्याः पश्चाल्लग्ना समागता ॥

तया च दूरत एव विहितः पूत्कारः । यदुत त्रायध्वं भो नाथास्त्रायध्वं । हा हतास्मि मन्दभागिनी । ततो वलितस्तद-भिमुखं जडः । तेनाभिहितं । सुन्दरि मा भैषीः । कथय कुतस्ते भयमिति । तयाभिहितं । यद्भवन्तौ मम स्वामिनीं विमुच्य चलितौ तेनैषा जातमूर्छा म्रियते । लग्नाधुना । तस्माद्द्वौ ताव-त्समीपे स्थीयतां भवद्भ्यामेतस्याः येन युष्मत्सन्निधानेन मनाक्स्वस्थी-भूतायां स्वामिन्यां ततोऽहं निराकुला सती भवतोरेतत्स्वरूपं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समस्तं विज्ञापयामि । ततो जडेनाभिहितो विचक्षणः । भ्रातर्गम्यतामेतत्स्वामिनीसमीपे । भवतु सा स्वस्था । विज्ञपयत्वेषा यथाविवक्षितं । को दोषः । विचक्षणेन चिन्तितं । न सुन्दरमिदं । इयं हि वष्टा चेटी तरला स्वभावेन प्रतारयिष्यति नूनमस्मान् । अथवा पश्यामि तावत्किमेषा तत्र गता जल्पति । न चाहमनया प्रतारयितुं शक्यः । तस्माद्गच्छामि । कात्र मम शङ्का । एवं विचिन्त्याभिहितं विचक्षणेन । भ्रातरेवं भवतु । ततो गतौ पश्चान्मुखौ विचक्षणजडौ प्राप्तौ तत्समीपे । स्वस्थीभूता ललना । निपतिता दासचेटी तयोश्चरणेषु । अभिहितमनया । महाप्रसादः । अनुगृहीतास्मि युवाभ्यां । जीविता स्वामिनी । दत्तं मे जीवितं । जडेनाभिहितं । सुन्दरि किंनामिकेयं तव स्वामिनी । चेट्याभिहितं । देव सुगृहीतनामधेया रसनेयमभिधीयते । जडेनाभिहितं । भवतीं किंनामिकामवगच्छामि । ततः सलज्जमभिहितमनया । देव लोलताहं प्रसिद्धा लोके चिरपरिचितापि विस्मृताधुना देवस्य । तत्किमहं करोमि मन्दभागिनीति । जडेनाभिहितं । भद्रे कथं मम त्वं चिरपरिचितासि । लोलतयाभिहितं । इदमेवास्मद्विज्ञपनीयं । जडः प्राह । विज्ञपयतु भवती । लोलतयोक्तं । अस्ति तावदेषा मम स्वामिनी परमयोगिनी । जानात्येवातीतानागतं । अहमपि चास्याः प्रसादादेवंविधैव । इतश्च कर्मपरिणाममहाराजभुक्तौ स्थितमस्त्यसंव्यवहारनगरं । तत्र कदाचिद्भवतोरवस्थानमासीत् । ततः कर्मपरिणामादेशेनैवायातौ भवन्तावेकाक्षनिवासपुरे । ततोऽप्यागतौ विकलाक्षनिवासे । तत्र त्रयः पाटका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्यन्ते। तत्र प्रथमे द्विहषीकाभिधानाः कुलपुत्रकाः प्रतिवसन्ति। ततस्तेषां मध्ये वर्तमानाभ्यां युवाभ्यां यथानिर्देशकारितया प्रसन्नेन कर्मपरिणाममहानरेन्द्रेण भटभुक्त्या दत्तमिदं वदनकोटरं काननं। एतच्च स्वाभाविकमेवात्र सर्वदा विद्यत एव महाबिलं। इयं च सर्वाप्यस्मदुत्पत्तेः पूर्विका वार्ता। ततो विधिना चिन्तितं। गृहिणी-रहिताविमौ वराकौ न सुखेन तिष्ठतः। अतः करोम्यनयोर्गृहिणी-मिति। ततस्तेन भगवता विधात्रा दयापरीतचेतसा पुत्रयोर्नि-मित्तमत्रैव महाबिले निर्वर्तितैषा मे स्वामिनी। तथाहं चास्या एवानुचरीति॥ जडेन चिन्तितं। अये यथा मया विकल्पितं तथैवेदं संपन्नं। अस्मदर्थमेवेयं रसना निष्पादिता वेधसा। अहो मे प्रज्ञातिशयः। विचक्षणेन चिन्तितं। कः पुनरयं विधिर्नाम। ऊं ज्ञातं। स एव कर्मपरिणामो भविष्यति। कस्यान्यस्येदृशी शक्ति-रिति॥ जडः प्राह। भद्रे ततस्ततः। लोलतयोक्तं। ततः प्रभृत्येषा मे स्वामिनी युक्ता मया युवाभ्यां सह खादन्ती नानाविधानि खाद्यकानि पिबन्ती विविधरसोपेतानि पानकानि ललमाना यथेष्टचेष्टया तत्रैव विकलाक्षनिवासे नगरे त्रिष्वपि पाटकेषु तथा पञ्चाक्षनिवासे मनुजगतौ अन्येषु च तथाविधेषु स्थानेषु विचरिता भूयांसं कालं। अतएव क्षणमप्येषा युष्मद्विरहं न विषहते। युष्मद्वधीरणया चागतमूर्च्छा म्रियते स्वामिनी। तदेवमहं भवतोश्चिरपरिचितास्मि॥ एतच्चाकर्ण्य सिद्धं नः समीहितं इति भावनया परितुष्टो जडः। ततोऽभिहितमनेन। सुन्दरि यद्येवं प्रविशतु तव स्वामिनी नगरे। पवित्रयत्वेकं स्वावस्थानेन महा-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रासादं येन पुनस्तत्र चिरन्तनस्थित्या सुखमास्महे । लोलतया-भिहितं। मा मैवमाज्ञापयतु देवः। न निर्गतेयं स्वामिनी कदाचिदपीतः काननात् । पूर्वमपीयमत्रैव वर्तमाना युवाभ्यां सह ललिता । तदधुनाप्यस्मिन्नेव स्थाने तिष्ठन्ती लालयितुं युज्यते स्वामिनी । जडः प्राह । यद्भवती जानीते तदेव क्रियते । सर्वथा त्वमेवात्र प्रमाणं । कथनीयं यद्रोचते तव स्वामिन्यै येन संपादयामः । लोलतयोक्तं । महाप्रसादः । किमत्रापरमुच्यतां । अनुभवतु भवतोः स्वामिनी लालनेन सुखामृतमविच्छेदेनेति । एवं च स्थापिते सिद्धान्ते ।

तत आरभ्य यत्नेन जडो वदनकोटरे ।
तिष्ठन्तीं रसनां नित्यं लालयत्येव मोहतः ॥

कथं ।

क्षीरेक्षुशर्कराखण्डदधिसर्पिर्गुडादिभिः ।
पक्वान्नखाद्यकैर्दिव्यैर्द्राक्षादिवरपानकैः ॥
मद्यैर्मांसरसैश्चित्रैर्मधुभिश्च विशेषतः ।
ये चान्ये लोकविख्याता रसास्तैश्च दिने दिने ॥
एवं लालयतस्तस्य जडस्य रसनां सदा ।
यदि चूर्णं भवेत्तत्र कथयत्येव लोलता ॥
यतः सानुदिनं वक्ति स्वामिनीमधुरप्रिया ।
मांसमाहर मद्यं च नाथ मृष्टं च भोजनम् ॥
ददस्व व्यञ्जनान्यस्यै रोचन्ते तानि सर्वदा ।
तत्सर्वं स करोत्येव मन्वानोऽनुग्रहं जडः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स तथा लालनासक्तो भार्यायाः प्रतिवासरम्।
क्लेशराशिनिमग्नोऽपि मोहादेवं च मन्यते॥

यदुत।

धन्योऽहं कृतकृत्योऽहमहो मे सुखसागरः।
यस्येदृशी शुभा भार्या संपन्ना पुण्यकर्मणः॥
नास्ति नूनं मया यादृक् सुखितो भुवनत्रये।
यतोऽस्या लालनां मुक्त्वा किं नाम भुवने सुखम्॥
ततोऽलीकसुखास्वादपरिमोहितचेतनः।
तदर्थं नास्ति तत्कर्म यदसौ नानुचेष्टते॥
तं भार्यालालनोद्युक्तं तथा दृष्ट्वाखिलो जनः।
जडं हसितुमारब्धः सत्यमेष जडो जडः॥
यतो धर्मार्थमोक्षेभ्यो विमुखः पशुसन्निभः।
रसनालालनोद्युक्तो न चेतयति किंचन॥
जडस्तु तत्र गृद्धात्मा लोकैरेवं सहस्रशः।
हसितो निन्दितश्चापि न कथंचिन्निवर्तते॥

विचक्षणस्तु तच्छ्रुत्वा लोलतायाः प्रभाषितम्।
ततश्च चिन्तयत्येवं तदा मध्यस्थमानसः॥
अस्ति तावदियं भार्या मम नास्त्यत्र संशयः।
आस्माके दृश्यते येन वने वदनकोटरे॥
केवलं यदियं वक्ति रसनालालनं प्रति।
अपरीक्ष्य न कर्तव्यं तन्मया सुपरिस्फुटम्॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतः स्त्रीवचनादेव यो मूढात्मा प्रवर्तते ।
कार्यतत्त्वमविज्ञाय तेनानर्थो न दुर्लभः ॥
ततोऽनादरतः किंचिल्लोलतायाचने सति ।
दत्त्वा खाद्यादिकं तावत्कुर्महे कालयापनाम् ॥

ततश्च ।

भार्येयं पालनीयेति मत्वा रागविवर्जितः ।
ददानः शुद्धमाहारं लोलतां च निवारयन् ॥
अविश्रब्धमनास्तस्यां लोकयात्रानुरोधतः ।
अनिन्दितेन मार्गेण रसनामनुवर्तयन् ॥
धर्मार्थकामसंपन्नो विद्वद्भिः परिपूजितः ।
स्थितो विचक्षणः कालं कियन्तमपि लीलया ॥
तं च तेजस्विनं मत्वा निरीहं च विचक्षणम् ।
भावज्ञा किंचिदप्येनं याचते नैव लोलता ॥
स लोलताविनिर्मुक्तो रसनां पालयन्नपि ।
अशेषक्लेशहीनात्मा सुखमास्ते विचक्षणः ॥

यतः ।

ये जाता ये जनिष्यन्ते जडस्येह दुरात्मनः ।
रसनालालने दोषा लोलता तत्र कारणम् ॥
विचक्षणेन सा यस्माल्लोलतालं निराकृता ।
रसनापालनेऽप्यस्य ततोऽनर्थो न जायते ॥
इतश्च तुष्टचित्तेन जडेनाम्बा स्वयोग्यता ।
ज्ञापिता रसनालाभं जनकस्याशुभोदयः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तयोरपि मनस्तोषस्तच्छ्रुत्वा समपद्यत ।
ततस्ताभ्यां जडः प्रोक्तः स्नेहापूर्णेन चेतसा ॥
पुत्रानुरूपा ते भार्या संपन्ना पुण्यकर्मणा ।
सुन्दरं च त्वयारब्धं यदस्याः पुत्र लालनम् ॥
इयं हि सुखहेतुस्ते सुभार्येयं वरानना ।
ततो लालयितुं युक्ता पुत्र रात्रिंदिवं त्वया ॥

ततश्च ।

स्वयमेव प्रवृत्तोऽसौ जनकाभ्यां च चोदितः ।
एकं सोन्मादिता बाला मयूरैर्लपितं तथा ॥
ततो गाढतरं रक्तो रसनायां जडस्तदा ।
तल्लालनार्थं मूढात्मा सहतेऽसौ विडम्बनाः ॥

इतो विचक्षणेनापि स्वीयतातः शुभोदयः ।
ज्ञापितो रसनालाभं माता च निजचारुता ॥
तथा बुद्धिप्रकर्षौ च विमर्शश्च विशेषतः ।
बोधितो रसनावाप्तिं मिलितं च कुटुम्बकम् ॥
ततः शुभोदयेनोक्तं वत्स किं ते प्रकथ्यते ।
जानामि वस्तुतस्तत्त्वं सत्योऽसि त्वं विचक्षणः ॥
तथापि ते प्रकृत्यैव यन्ममोपरि गौरवम् ।
तेन प्रचोदितो वत्स तवाहमुपदेशने ॥
वत्स तावत्समस्तापि नारी पवनचञ्चला ।
क्षणरक्तविरक्ता च सन्ध्याभ्रालीव वर्तते ॥
नदीव पर्वतोद्भूता प्रकृत्या नीचगामिनी ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दर्पणार्पितदुर्ग्राह्यवदनप्रतिमोपमा ॥
वक्रकौटिल्यनागानां संस्थापनकरण्डिका।
कालकूटविषस्योच्चैर्लतेव मरणप्रदा ॥
नरकानलसन्तापदायिकेयमुदाहृता।
मोक्षप्रापकसद्ध्यानप्रत्यनीकभूता च वर्तते ॥
कार्यं संचिन्तयत्यन्यद्भाषतेऽन्यच्च मायया।
करोत्यन्यच्च सा पुंसः शुद्धशीला च भासते ॥
ऐन्द्रजालिकविद्येव दृष्टेराच्छेदकारिका।
नरचित्तजतुद्रावकारिणी वह्निपिण्डवत् ॥
प्रकृत्यैव च सर्वेषां वैमनस्यविधायिनी।
संसारचक्रविभ्रान्तिहेतुर्नारी बुधैर्मता ॥
पुंभिरास्वादितं दिव्यं विवेकामृतभोजनम्।
चुर्द्रेव वामयत्येषा भुज्यमाना न संशयः ॥
अनृतं साहसं माया नैर्लज्ज्यमतिलोभिता।
निर्दयत्वमशौचं च नार्याः स्वाभाविका गुणाः ॥
वत्स किं बहुनोक्तेन ये केचिद्दोषसञ्चयाः।
ते नारीभाण्डशालायामाकालं सुप्रतिष्ठिताः ॥
तस्मात्तस्याः सदा पुंसा न कर्तव्यो हितैषिणा।
विश्रम्भवशगो ह्यात्मा तेनेदमभिधीयते ॥
येयं ते रसना भार्या संपन्ना लोलतायुता।
न सुन्दरैषा मे भाति को वा योगस्तवानया ॥
यतो न ज्ञायतेऽद्यापि कुतस्त्येयं ततस्त्वया।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सङ्गहं कुर्वतामुष्या मूलशुद्धिः परीक्ष्यताम् ॥

यतः।

अत्यन्तमप्रमत्तोऽपि मूलशुद्धेरवेदकः।
स्त्रीणामर्पितसद्भावः प्रयाति निधनं नरः॥

ततो निजचारुतयाभिहितं। वत्स विचक्षण सुन्दरं ते जनकेन मन्त्रितं। अन्विष्यतामस्या रसनाया मूलशुद्धिः। को दोषः। विज्ञातकुलशीलस्वरूपा हि सुखतरमनुवर्तनीया भविष्यति। बुद्ध्याभिहितं। आर्यपुत्र यद्गुरव आज्ञापयतस्तदेवानुष्ठातुं युक्तमार्यपुत्रस्य। अलङ्घनीयवाक्या हि गुरवः सत्पुरुषाणां भवन्ति। प्रकर्षः प्राह। तात सुन्दरमम्बया जल्पितं। विमर्शेनोक्तं। को वाचासुन्दरं वक्तुं जानीते। सर्वथा सुन्दरमेवेदं यत्सुपरीक्षितं क्रियत इति। विचक्षणेन चिन्तितं। सुन्दरमेतानि मन्त्रयन्ति। न संग्रहणीयैव विदुषा पुरुषेणाविज्ञातकुलशीलाचारा ललना। केवलं कथितमेव मम लोलतया रसनायाः सम्बन्धि मूलोत्थानं। विज्ञातश्चाधुना मया शीलाचारः। यदुत खादनपानप्रियेयं रसना। अथवा नहि नहि को हि सकर्णकः पुरुषो भुजङ्गवनितागतिकुटिलतरचित्तवृत्तेः कुलयोषितोऽपि वचने संप्रत्ययं कुर्यात्। किं पुनर्दासचेट्याः। तत्कीदृशो मम लोलतावचने संप्रत्ययः। शीलाचारोऽपि सहसंवासेन भूयसा च कालेन सम्यग् विज्ञायते न यथाकथंचित्। तत्किमनेन बहुना। करोमि तावदहं तातादीनामुपदेशं गवेषयाम्यस्या रसनाया मूलशुद्धिं। ततो विज्ञाय यथोचितं करिष्यामीति विचिन्त्य विचक्षणेनाभिहितं। यदाज्ञापयति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तातः। केवलं तातः स्वयमेव निरूपयतु कः पुनरत्र रसनामूलशुद्धिगवेषणार्थं प्रस्थापनयोग्य इति। शुभोदयेनोक्तं। वत्स अयं विमर्शः परमरूपकार्यभरस्य निर्वाहणक्षमः। तथा हि।

युक्तं चायुक्तवद्भाति सारं चासारमुच्चकैः।
अयुक्तं युक्तवद्भाति विमर्शेन विना जने॥
तस्य हेयमुपादेयमुपादेयं च हेयताम्।
भजेत वस्तु यस्यायं विमर्शो नानुकूलकः॥
अत्यन्तगहने कार्ये मतिभेदतिरोहिते।
विमर्शः कुरुते नृणामेकपक्षं विवेचितम्॥

किं च।

नरस्य नार्या देशस्य राज्यस्य नृपतेस्तथा।
रत्नानां लोकधर्माणां सर्वस्य भुवनस्य वा॥
देवानां सर्वशास्त्राणां धर्माधर्मव्यवस्थितेः।
विमर्शोऽयं विजानीते तत्त्वं नान्यो जगत्त्रये॥
येषामेष महाप्राज्ञो वत्स निर्देशकारकः।
ते ज्ञातसर्वतत्त्वार्था जायन्ते सुखभाजनम्॥
अतो धन्योऽसि यस्यायं विमर्शस्तव बान्धवः।
न कदाचिदधन्यानां चिन्तारत्नेन मीलकः॥
एष एव नियोक्तव्यो भवताऽत्र प्रयोजने।
भानुरेव हि शर्वर्यास्तमसः क्षालनक्षमः॥

विचक्षणेनाभिहितं। यदाज्ञापयति तातः। ततो निरीक्षितमनेन विमर्शवदनं। विमर्शः प्राह। अनुग्रहो मे। विचक्षणेनोक्तं।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्येवं ततः शीघ्रं विधीयतां भवता तातादेशः । विमर्शेनाभिहितं । एष सज्जोऽस्मि । केवलं विस्तीर्णा वसुन्धरा नानाविधा देशा भूयांसि राज्यान्तराणि । तद्यदि कथंचिन्मे कालक्षेपः स्यात्ततः कियतः कालान्निवर्तितव्यं । विचक्षणेनोक्तं । भद्र संवत्सरस्ते कालावधिः । विमर्शः प्राह । महाप्रसादः । ततो विहितप्रणामश्चलितो विमर्शः ॥ अत्रान्तरे शुभोदयस्य पादयोर्निपत्याभिवन्द्य निजचारुतां प्रणम्य च जननीजनकौ प्रकर्षेणाभिहितं । तात यद्यपि ममार्यकताताम्बा-विरहेऽपि न मनसो निर्वृतिस्तथापि सहचरतया मामे मम गाढतरं प्रतिबद्धमन्तःकरणं । नाहं मामेन विरहितः क्षणमात्रमपि जीवितुमुत्सहे । ततो मामनुजानीत यूयं येनाहमेनं गच्छन्त-मनुगच्छामीति । एतच्चाकर्ण्योच्छसितापत्यस्नेहमोहपूरितहृदयेनान-न्दोदकबिन्दुसन्दोहप्लावितनयनपुटेन विचक्षणेन दक्षिणकराङ्गुली-भिरुन्नामितं प्रकर्षस्य मुखकमलकं दत्ता चुम्बिका आघ्रातो मूर्धप्रदेशः । साधु वत्स साध्विति वदता निवेशितश्चासौ निजो-त्सङ्गे । शुभोदयं च प्रत्यभिहितं । तात दृष्टो बालकस्य विनयः निरूपितो वचनविन्यासः आकलितः स्नेहसारः । शुभोदयः प्राह । वत्स किमत्राश्चर्यं । त्वया बुद्धेर्जातस्येदृशमेव चेष्टितं युज्यते ।

किं च वत्स ।

न युक्तमिदमस्माकं स्नुषापौत्रकवर्णनम् ।<br>
विशेषतस्तवाभ्यर्णे यत एतदुदाहृतम् ॥<br>
प्रत्यक्षं गुरवः स्तुत्याः परोक्षं मित्रबान्धवाः ।<br>
भृतका कर्मपर्यन्ते नैव पुत्रा मृताः स्त्रियः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि चानयोर्दृष्ट्वा गुणसम्भारगौरवम् ।
अवर्णितेन तेनाहं पुत्र शक्नोमि नासितुम् ॥
इयं हि भार्या ते बुद्धिरनुरूपा वरानना ।
गुणवृद्धिकरी धन्या यथा चन्द्रस्य चन्द्रिका ॥
भर्तृस्नेहपरा पत्नी सर्वकार्यविशारदा ।
बलसम्पादिका गेहभरनिर्वहणक्षमा ॥
विशालदृष्टिरप्येषा सूक्ष्मदृष्टिरुदाहृता ।
सर्वसुन्दरदेहापि द्वेषहेतुर्जडात्मनाम् ॥

अथवा ।

मलक्षयेण जनिता पुरे निर्मलमानसे ।
या च सुन्दरतापुत्री तस्याः को वर्णनक्षमः ॥
अत एव प्रकर्षोऽपि नेदानीं बहु वर्ण्यते ।
अनन्तगुण एवायं जनयित्र्या विभाव्यते ॥
वत्स किं बहुनोक्तेन धन्यस्त्वं सर्वथा जने ।
यस्येदृशं महाभागं संपन्नं ते कुटुम्बकम् ॥
अत एव वयं चित्ते साशङ्काः साम्प्रतं स्थिताः
आकर्ण्य रसनालाभं नोचितेयं यतस्तव ॥
मा भूद्बुद्धेर्विघाताय सपत्नी मत्सरादियम् ।
विशेषतः प्रकर्षस्य तेन चिन्तातुरा वयम् ॥
किं वा कालविलम्बेन प्रस्तुतं प्रविधीयताम् ।
ततो यथोचितं ज्ञात्वा युक्तं यत्तत्करिष्यते ॥
मातुलस्नेहबद्धात्मा प्रकर्षः प्रस्थितो यदि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदं चारुतरं जातं चीरे खण्डस्य योजनम् ॥
तदेतौ सहितावेव गच्छतां कार्यसिद्धये ।
युवाभ्यां न तु कर्तव्या चिन्तेति प्रतिभाति मे ॥

ततो विचक्षणेन बुद्ध्या चाभिहितं । यदाज्ञापयति तातः । ततो निपतितौ गुरूणां चरणेषु विमर्शप्रकर्षौ । कृतमुचितकरणीयं । प्रवृत्तौ गन्तुं ॥ इतश्च तदा शरत्कालो वर्तते । स च कीदृशः ।

शस्यसम्भारनिष्पन्नभूमण्डलो मण्डलाबद्धगोपालरासाकुलः ।
साकुलव्रजजातसारक्षणो रक्षणोद्युक्तसच्छालिगोपप्रियः ॥

यत्र च शरत्काले ।

जलवर्जितनीरदवृन्दचितं स्फुटकाशविराजितभूमितलम् ।
भुवनोदरमिन्दुकरैर्विशदं कलितं स्फटिकोपलकुम्भसमम् ॥

अन्यच्च ।

शिखिविरावविरागपरा श्रुतिः श्रयति हंसकुलस्य कलस्वनम् ।
न रमते च कदम्बवने तदा विषमपर्णरता जनदृष्टिका ॥
लवणतिक्तरसाच्च पराङ्मुखा मधुरखाद्यपरा जनजिह्विका ।
स्फुटमिदं तदहो प्रियताकरो जगति शुद्धगुणो न तु संस्तवः ॥

तथा ।

स्वच्छसन्नीरपूरं सरोमण्डलं फुल्लसत्पद्मनेत्रैर्दिवा वीक्षते ।
यन्नभस्तत्पुनर्लोकयात्रेच्छया रात्रिनक्षत्रसल्लोचनैरीक्षते ॥
नन्दितं गोकुलं मोदिताः पामराः पुष्पितो नीपवृक्षो निशा निर्मला ।
चक्रवाकस्तथापीह विद्राणको भाजनं यस्य यत्तेन तल्लभ्यते ॥

ततश्चैवंविधे शरत्समये पश्यन्तौ मनोरमकाननानि विलोकयन्तौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कमलषण्डभूषितसरोवराणि निरीक्षमाणौ प्रमुदितानि ग्रामाकरनगराणि दृष्टौ शक्रोत्सवदर्शनेन तुष्टौ दीपालिकावलोकनेन आल्हादितौ कौमुदीनिरीक्षणेन परीक्षमाणौ जनहृदयानि प्रयुञ्जानौ स्वप्रयोजनसिद्ध्यर्थमुपायशतानि विचरितौ बहिरङ्गदेशेषु विमर्शप्रकर्षौ। न दृष्टं क्वचिदपि रसनायाः कुलं। तथा च विचरतोस्तयोः समायातो हेमन्तः। कीदृशश्चासौ।

अर्घितचेलतैलवरकम्बलरल्लकचित्रभानुको
विकसिततिलकलोध्रवरकुन्दमनोहरमल्लिकावनः।
शीतलपवनविहितपथिकस्फुटवादितदन्तवीणको
जलशशिकिरणहर्म्यतलचन्दनमौक्तिकसुभगताहरः॥

यत्र च हेमन्ते दुर्जनसङ्गतानीव ह्रस्वतमानि दिनानि सज्जनमैत्रीव दीर्घतरा रजन्यः सज्ज्ञानानीव संगृह्यन्ते धान्यानि काव्यपद्धतय इव विरच्यन्ते मनोहरा वेण्यः सुजनहृदयानीव विधीयन्ते स्नेहसाराणि वदनानि परबलकलकलेन रणशिरसि सुभटा इव निवर्तन्ते दवीयोदेशगता अपि निजदयिताविकटनितम्बबिम्बपयोधरभरशीतहरोष्मसंस्मरणेन पथिकलोका इति।

प्रतापहानिः संपन्ना लाघवं च दिवाकरे।

अथवा।

दक्षिणाशावलग्नस्य सर्वस्यापीदृशी गतिः॥

अन्यच्च। अयं हेमन्तो दुर्गतलोकान्
प्रियवियोगभुजङ्गनिपातितान् शिशिरमारुतखण्डितविग्रहान्।
पशुगणानिव मुर्मुरराशिभिः पचति किं निशि भक्षणकाम्यया॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदा चेयतापि कालेन नोपलब्धा विमर्शप्रकर्षाभ्यां रसनामूलशुद्धिस्तदा प्रविष्टौ तावन्तरङ्गदेशेषु । तत्रापि पर्यटितौ नानाविधस्थानेषु । अन्यदा प्राप्तौ राजसचित्तनगरे ।

तच्च दीर्घमिवारण्यं भूरिलोकविवर्जितम् ।
कचिद्दृष्टगृहारब्धं ताभ्यां समवलोकितम् ॥

ततः प्रकर्षेणाभिहितं । माम किमितीदं नगरं विरलजनतया शून्यमिव दृश्यते । किं वा कारणमाश्रित्येदमीदृशं संपन्नं । विमर्शः प्राह ।

यथेदं दृश्यते सर्वं समृद्धं निजसम्पदा ।
केवलं लोकसन्दोहरहितं सुस्थितालयम् ॥
तथेदं भाव्यते नूनं नगरं निरुपद्रवम् ।
प्रयोजनेन केनापि कचिन्निष्क्रान्तराजकम् ॥

प्रकर्षः प्राह । एवमेतत्सम्यगवधारितं मामेन । विमर्शः प्राह । भद्र कियदिदं । जानाम्यहं सर्वस्यैव वस्तुनो दृष्टस्य यत्तत्त्वं । प्रष्टव्यमन्यदपि यत्र ते कचित्सन्देहः संभवति । प्रकर्षेणाभिहितं । माम यद्येवं ततः किमितीदं नगरं रहितमपि नायकेन विवर्जितमपि भूरिलोकैर्निजश्रियं न परित्यजति । विमर्शेनोक्तं । अस्यस्य मध्ये कश्चिन्महाप्रभावः पुरुषः । तज्जनितमस्य सश्रीकत्वं । प्रकर्षः प्राह । यद्येवं ततः प्रविश्य निरूपयावस्तं पुरुषं । विमर्शेनोक्तं । एवं भवतु । ततः प्रविष्टौ तौ नगरे प्राप्तौ राजकुले । दृष्टस्तत्राहंकारादिकतिचित्पुरुषपरिकरो मिथ्याभिमानो नाम महत्तमः । ततो विमर्शः प्राह । भद्र सोऽयं पुरुषो यत्प्रभावजन्यमस्य राज-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सचित्तनगरस्य सश्रीकत्वं । प्रकर्षेणोक्तं । यद्येवं ततस्तावेदनमुपसृत्य अभ्यथावः । पृच्छावश्च कोऽत्र वृत्तान्त इति । विमर्शेनोक्तं । एवं भवतु । ततः संभाषितस्ताभ्यां मिथ्याभिमानः पृष्टश्च । भद्र केन पुनर्व्यतिकरेण विरलजनमिदं दृश्यते नगरं । मिथ्याभिमानः प्राह । ननु सुप्रसिद्धैवेयं वार्ता कथं न विदिता भद्राभ्यां । विमर्शेनोक्तं । न कर्तव्योऽत्र भद्रेण कोपः । आवां हि पथिकौ न जानीवो महच्चाचार्थे कुतूहलमतो निवेदयितुमर्हति भद्रः । मिथ्याभिमानेनोक्तं । अस्ति तावत्समस्तभुवनप्रतीतोऽस्य नगरस्य स्वामी सुगृहीतनामधेयो देवो रागकेसरी । तज्जनकश्च महामोहः । तथा तयोर्मन्त्रिमहत्तमाश्च भूयांसो विषयाभिलाषादयः । तेषामितो नगरात् सर्वबलसमुदयेन दण्डयात्रया निर्गतानामनन्तकालो वर्तते । तेनेदं विरलजनमुपलभ्यते नगरं । विमर्शः प्राह । भद्र केन सह पुनस्तेषां विग्रहः । मिथ्याभिमानः प्राह । दुरात्मना सन्तोषहतकेन । विमर्शेनोक्तं । किं पुनस्तेन सार्धं विग्रहनिमित्तं । मिथ्याभिमानेनोक्तं । कश्चिद्देवादेशेनैव जगद्वशीकरणार्थं विषयाभिलाषेण प्रहितानि पूर्वं स्पर्शनरसनादीनि पञ्चात्मीयानि गृहमानुषाणि । ततस्तैर्वशीकृतप्राये त्रिभुवने सन्तोषहतकेन तान्यभिभूय निर्वाहिताः कियन्तोऽपि लोकाः प्रापिता निर्वृतौ नगर्यां । तच्छ्रुत्वा सन्तोषहतकस्योपरि प्रादुर्भूतक्रोधानुबन्धो निर्गतः स्वयमेव देवो रागकेसरी विक्षेपेण । तदिदमत्र विग्रहनिमित्तं । विमर्शेन चिन्तितं । अये उपलब्धं तावद्रसनाया नामतो मूलोत्थानं । गुणतः पुनर्विषयाभिलाषं दृष्ट्वा ज्ञास्यामि । यतो जनकानुरूपाणि प्रायेणापत्यानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवन्ति। ततो भविष्यति मे तद्दर्शनान्निश्चयः । ततोऽभिहितमनेन। भद्र यद्येवं ततो भवतां किंनिमित्तमिहावस्थानं । मिथ्याभिमानेनोक्तं । प्रस्थितोऽहमप्यासं तदा । केवलमग्रानीकान्निवर्तितो देवेन अभिहितश्च। यथार्य मिथ्याभिमान न चलितव्यमितो नगराद्भवता । इदं हि नगरं त्वयि स्थिते निर्गतेष्वप्यस्मास्वविनष्टश्रीकं निरुपद्रवमास्ते । वयमप्यत्र स्थिता एव परमार्थतो भवामः । यतस्त्वमेवास्य नगरस्य प्रतिजागरणक्षमः । मयाभिहितं । यदाज्ञापयति देवः । ततः स्थितोऽहं । तदिदमस्माकमत्रावस्थानकारणं । विमर्शेनोक्तं । अपि प्रत्यागता काचिद्देवसकाशात्कुशलवार्ता । मिथ्याभिमानः प्राह । बाढमागता । जितप्रायं वर्तते देवकीयसाधनेन । केवलमसावपि वष्टः सन्तोषहतको न शक्यते सर्वथाभिभवितुं दुरात्यन्तरान्तरा प्रत्यवस्कन्दान् निर्वाहयत्यद्यापि कंचित्कालं । अत एव देवेऽपि रागकेसरिणि लग्ने स्वयमेतावान् कालविलम्बो वर्तते । विमर्शेनोक्तं । क्व पुनरधुना भवदीयदेवः श्रूयते । ततः समुत्पन्ना मिथ्याभिमानस्य प्रणिधिशङ्का । न कथितं यथावस्थितं । अभिहितं चानेन । न जानीमः परिस्फुटं । केवलं तामसचित्तं नगरमुररीकृत्य तावदितो निर्गतो देवः। ततः कदाचित्तत्रैवावतिष्ठते। विमर्शेनोक्तं । पूरितं भद्रेणावयोः कुतूहलं । निवेदितः प्रस्तुतवृत्तान्तः । दर्शितं सौजन्यं । तद्गच्छावः साम्प्रतमावां । मिथ्याभिमानेनोक्तं। एवं सिद्धिर्भवतु । तदाकर्ण्य हृष्टो विमर्शः । ततः परस्परं विहितं मनागुत्तमाङ्गनमनं । निर्गतौ राजसचित्तनगराद्विमर्शप्रकर्षौ ।

विमर्शेनोक्तं । भद्र कथिता तावदनेन तेषां विषयाभिलाष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मानुषाणां मध्ये रसना। तदधुना तस्मैव विषयाभिलाषं दृष्ट्वा तस्याः स्वरूपमावयोर्गुणतो निश्चेतुं युक्तं। तद्गच्छावस्तत्रैव तामसचित्तनगरे। प्रकर्षः प्राह। यन्मामो जानीते। ततो गतौ तामसचित्तपुरे विमर्शप्रकर्षौ। तच्च कीदृशम्।

नाशिताशेषसन्मार्गमामूलतस्तेन दुर्गं न लंघ्यं परेषां सदा।
सर्वदोद्योतमुक्तं च तद्वर्तते चौरवृन्दं तु तत्रैव संवर्धते॥

वल्लभं तत्सदा पापपूर्णात्मनां निन्दितं तत्सदा शिष्टलोकैः पुरम्।
कारणं तत्सदानन्तदुःखोदधेर्वारणं तत्सदाशेषसौख्योन्नतेः॥

केवलं तदपि ताभ्यां विमर्शप्रकर्षाभ्यामीदृशमवलोकितं। यदुत।

दवदग्धमिवारण्यं कृष्णवर्णं समन्ततः।
रहितं भूरिलोकेन न मुक्तं च निजश्रिया॥
ततः प्रकर्षस्तद्दृष्ट्वा प्रत्याह निजमातुलम्।
माम किं विद्यते कश्चिदत्रापि पुरनायकः॥
विमर्शः प्राह नैवास्ति योऽत्र भो मूलनायकः।
केवलं नायकाकारः कश्चिदत्रास्ति मानवः॥

ततो यावदेतावान् विमर्शप्रकर्षयोर्जल्पः संपद्यते तावद्दृष्टस्ताभ्यां तत्रैव नगरे प्रवेष्टुकामो दैन्याक्रन्दनविलपनादिभिः कतिचित्प्रधानपुरुषैः परिकरितः शोको नाम पाण्डरिकः। ततः संभाषितोऽसौ विमर्शप्रकर्षाभ्यां पृष्टश्च। भद्र कोऽत्र नगरे राजा। शोकः प्राह। ननु भुवनप्रसिद्धोऽयं नरेन्द्रः। तथाहि।

महामोहसमुद्भूतो रागकेसरिसोदरः।
धवोऽविवेकितायास्तु प्रसिद्धोऽयं नराधिपः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वर्गपातालमर्त्त्येषु प्रचुभिर्भीतकम्पितैः ।
नामापि गृह्यते तस्य प्रतापहतवैरिणः ॥
देवस्याचिन्त्यवीर्यस्य सत्पराक्रमशालिनः ।
तस्य द्वेषगजेन्द्रस्य नाम कः प्रष्टुमर्हति ॥

किं च आस्तां तावद्देवः । किं तर्हि ।

या मोहयति वीर्येण सकलं भुवनत्रयम् ।
ख्याताविवेकितात्यत्र सा देवी देववल्लभा ॥

अन्यच्च ।

सा महामोहनिर्देशकारिणी गुरुवत्सला ।
सा महामूढताख्यायां वर्तते सुन्दरा वधूः ॥
रागकेसरिनिर्देशं न लङ्घयति सा सदा ।
मूढतायाश्च तत्पत्न्याः सौहार्दं दर्शयत्यलम् ॥
तथा द्वेषगजेन्द्रस्य सा भर्तुर्गाढवत्सला ।
तेनाविवेकिता लोके प्रख्यातिं समुपागता ॥
तदेतौ भुवनेऽप्यत्र ख्यातौ देवीनरेश्वरौ ।
इदानीं हन्त भद्राभ्यां कथं प्रष्टव्यतां गतौ ॥
विमर्शः प्राह नैवात्र कोपः कार्यस्त्वया यतः ।
सर्वः सर्वं न जानीते सिद्धमेतज्जगत्त्रये ॥
आवां दवीयसो देशादागतौ न च वीक्षितम् ।
पूर्वमेतत्पुरं किं तु श्रुतौ देवीनरेश्वरौ ॥

ततश्च ।

किं स्याद्द्वेषगजेन्द्रोऽत्र किं वा स्यान्नगरान्तरे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः कुतूहलेनेदं पृष्टं संदिग्धचेतसा ॥
तद्भद्र साम्प्रतं ब्रूहि किमत्रास्ते नराधिपः ।
किं वा विनिर्गतः क्वापि पश्चावत्तं नरेश्वरम् ॥
शोकेनोक्तं जगत्यत्र वृत्तान्तोऽयमपि स्फुटम् ।
प्रसिद्ध एव सर्वेषां विदुषां दत्तचेतसाम् ॥
यथा देवो महामोहस्तत्पुत्रो रागकेसरी ।
तथा द्वेषगजेन्द्रश्च समस्तबलसंयुताः ॥
सन्तोषहतकस्योच्चैर्वधाय कृतनिश्चयाः ।
विनिर्गताः स्वकस्थानाद्भूरिकालश्च लङ्घितः ॥
विमर्शः प्राह यद्येवं ततो भद्रः किमर्थकम् ।
इहागतः किमास्तेऽत्र पुरे भोः साविवेकिता ॥

शोकेनाभिहितम् ।

नास्त्यत्र नगरे तावदधुना साविवेकिता ।
नापि देवसमीपे सा तत्राकर्णय कारणम् ॥
यदा तातो महामोहस्तथान्यो रागकेसरी ।
सन्तोषहतकस्योच्चैर्वधार्थं कृतनिश्चयः ॥
तदा प्रचलिते देवे ताभ्यां सह कृतोद्यमे ।
देवेन सार्धं सा देवी प्रस्थिता भर्तृवत्सला ॥
ततो द्वेषगजेन्द्रेण सा प्रोक्ता कमलेक्षणा ।
स्कन्धावारक्षमं देवि न त्वदीयं शरीरकम् ।
दीर्घा कटकसेवेयं त्वं च गर्भभरालसा ।
नातः संवाहनायोग्या वेला मासस्य वर्तते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मात्तिष्ठ त्वमत्रेति व्रजामो वयमेककाः ।
तयोक्तं त्वां विना नाथ नात्र मे नगरे धृतिः ॥
तच्छ्रुत्वा देवपादैः सा पुनः प्रोक्ता वरानना ।
तथापि नैव युक्तं ते स्कन्धावारे प्रवर्तनम् ॥

किं तु ।

रौद्रचित्तपुरे गत्वा देवि दुष्टाभिसन्धिना ।
रचिता तिष्ठ निश्चिन्ता पदातिः स हि मेऽनघः ॥
ततोऽविवेकिता प्राह किमत्रास्माभिरुच्यताम् ।
यदार्यपुत्रो जानीते तदेव करणं मम ॥
ततो विनिर्गतो देवो महामोहादिभिः सह ।
रौद्रचित्तपुरे देवी देवादेशेन सा गता ॥
ततोऽपि बहिरङ्गेषु पुरेषु किल वर्तते ।
किंचित्कारणमाश्रित्य साधुना युक्तकारिणी ॥
जातस्तासीत्तदा पुत्रस्तथान्योऽप्यधुना किल ।
निजभर्तुः समायोगादेतदाकर्णितं मया ॥
तदेवं नास्ति सा देवी यत्पुनर्मम कारणम् ।
नगरागमने भद्र तदाकर्णय साम्प्रतम् ॥

अत्रान्तरे प्रज्ञाविशालयाभिहिताग्रहीतसङ्केता । प्रियसखि यदनेन संसारिजीवेन नन्दिवर्धनवैश्वानरवक्तव्यतायां हिंसापरिणयनावसरे वैश्वानरमूलशुद्धिं निवेदयता पूर्वमभिहितमासीत् यदुत यादृशं तन्नामसचित्तनगरं यादृशस्तासौ द्वेषगजेन्द्रो राजा यादृशी साविवेकिता यच्च तस्यास्तस्मात्तामसचित्तनगराद्रौद्रचित्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरं प्रत्यागमनप्रयोजनमेतत् सर्वमुत्तरत्र कथयिष्याम इति तदिदमधुना तेन संसारिजीवेन समस्तं निवेदितमिति। अगृहीतसङ्केतयाभिहितं। साधु प्रियसखि साधु सुन्दरं मम स्मारितं भवत्या। ततः प्रज्ञाविशालया संसारिजीवं प्रत्यभिहितं। भद्र यदा विचक्षणाचार्येण नरवाहननरेन्द्राय विमर्शप्रकर्षवक्तव्यतां कथयता तत्र रिपुदारणस्य सतस्तस्यामेव परिषदि निषसस्य समाकर्णयतो निवेदितमेवमविवेकितापूर्वचरितं तदा किं विज्ञातमासीद्भवता यदुत यासौ वैश्वानरस्य माताभून्नन्दिवर्धनकाले मम च धात्री सैवेयमविवेकिता साम्प्रतं शैलराजस्य जननी वर्तते मम च पुनर्धात्रीति किं वा न विज्ञातमिति। संसारिजीवेनोक्तं। भद्रे न किंचित्तदा मया विज्ञातं। अज्ञानजनित एव मे समस्तोऽपि निवेदयिष्यमाणोऽनर्थपरम्पराप्रबन्धः। केवलं तदाहं चिन्तयामि यथा कथानिकां कांचिदेष प्रव्रजितकस्तातायं कथयति। न पुनस्तद्भावार्थमहं लक्षयामि स्म यथेयं साम्प्रतमगृहीतसङ्केता न लक्षयति। अगृहीतसङ्केतयाभिहितं। भद्र किमन्यः कश्चिद्भावार्थो भवति। संसारिजीवः प्राह। बाढं भद्रे नास्ति प्रायेण मदीयचरिते भावार्थरहितमेकमपि वचनं। ततो न भवत्या कथानकमात्रेण सन्तोषो विधातव्यः किं तर्हि भावार्थोऽपि बोद्धव्यः। स च परिस्फुट एव भावार्थः। तथाप्यगृहीतसङ्केते यत्र क्वचिन्न बुध्यते भवती तत्र प्रज्ञाविशाला प्रष्टव्या। यतो बुध्यते सभावार्थमेषा मदीयवचनं। अगृहीतसङ्केतयोक्तं। एवं करिष्यामि। प्रस्तुतमभिधीयतां॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो विचक्षणसूरिवचनमनुसंदधानः संसारिजीवः कथानकशेषमिदमाह । यदुत । ततो विमर्शेनाभिहितं । भद्र वर्णय यदिहागमनकारणं भद्रस्य । शोकेनाभिहितम् ।

अस्तेऽत्र नगरेऽद्यापि वयस्योऽत्यन्तवल्लभः ।
मम जीवितसर्वस्वं मतिमोहो महाबलः ॥
तद्दर्शनार्थमायातस्ततोऽहं भद्र साम्प्रतम् ।
आवासितं महाटव्यां मुक्त्वा देवस्य साधनम् ॥

विमर्शेनोक्तम् ।

स कस्मात्स्वामिना सार्धं न गतस्तत्र साधने ।
शोकः प्राह स देवेन धारितोऽत्रैव पत्तने ॥
उक्तश्चासौ यथा नित्यं न मोक्तव्यं त्वया पुरम् ।
मतिमोह क्षमेवास्य यतः संरक्षणक्षमः ॥
ततः प्रपद्य देवाज्ञां संस्थितोऽत्र पुरे पुरा ।
एतन्निवेदितं तुभ्यं प्रविशामोऽधुना वयम् ॥
विमर्शः प्राह सिद्धिस्ते तुष्टः शोको गतः पुरे ।
विमर्शश्च ततश्चेदं प्रकर्षं प्रत्यभाषत ॥
भद्र या साधनाधारा प्रोक्तानेन महाटवी ।
गत्वा तस्यां प्रपश्यावो रागकेसरिमन्त्रिणम् ॥
प्रकर्षः प्राह को वात्र विकल्पो माम गम्यताम् ।
ततः प्रचलितौ तूर्णं हृष्टौ स्वस्त्रीयमातुलौ ॥
ततो विलंघ्य वेगेन मार्गं पवनगामिनौ ।
प्राप्तौ तौ मध्यमे भागे महाटव्याः प्रयाणकैः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तत्र महामोहं रागकेसरिसंयुतम् ।
युक्तं द्वेषगजेन्द्रेण चतुरङ्गबलान्वितम् ॥
आवासितं महानद्याः पुलिनेऽतिमनोरमे ।
महामण्डपमध्यस्थं वेदिकायां प्रतिष्ठितम् ॥
महासिंहासनारूढं भटकोटिविवेष्टितम् ।
गत्वा स्म नातिदूरं तौ दृत्तास्थानं प्रपश्यतः ॥

ततो विमर्शेनाभिहितं । भद्र प्राप्तौ तावदावामभीष्टप्रदेशे । लङ्घिता महाटवी । दृष्टं महामोहसाधनं । दर्शनपथमवतीर्णोऽयं दृत्तास्थानः सह रागकेसरिणा सपरिकरो महामोहराजः । तत्र युक्तोऽधुनावयोरस्मिन्नास्थाने प्रवेशः । मा भूदेतेषामास्थानस्थायिनां लोकानामपूर्वयोरावयोर्दर्शनेन काचिदाशङ्का । अन्यथाचैव प्रदेशे व्य स्थिताभ्यां दृश्यत एवेदं सकलमास्थानं । अतः कुतूहलेनापि न युक्तोऽत्र प्रवेशः । प्रकर्षेणोक्तं । एवं भवतु । केवलं मामेयं महाटवी इयं च महानदी इदं च पुलिनं अयं च महामण्डपः एषा च वेदिका एतच्च महासिंहासनं अयं च महामोहनरेन्द्रः एते च सपरिवाराः समस्ता अपि शेषनरेन्द्राः सर्वमिदमदृष्टपूर्वं अतो महदत्र कुतूहलं । तेनामीषामेकैकं नामतो गुणतश्च मामेन वर्ण्यमानं विस्तरतः श्रोतुमिच्छामि । अभिहितं च पूर्वं मामेन । यथा जानाम्यहं दृष्टस्य वस्तुनो यथावस्थितं तत्त्वं अतः समस्तं निवेदयितुमर्हति माम. । विमर्शः प्राह । सत्यमभिहितमिदं मया । केवलं भूरिप्रकारं परिप्रश्नितमिदं भद्रेण । ततः सम्यगवधार्य निवेदयामि । प्रकर्षः प्राह । विश्रब्धमवधारयतु मामः । ततो विमर्शेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समन्तादवलोकिता महाटवी निरीक्षिता महानदी विलोकितं पुलिनं निर्वर्णितो महामण्डपः निरूपिता वेदिका निभालितं महासिंहासनं विचिन्तितो महामोहराजा विचारिताः प्रत्येकं महताभिनिवेशेन सपरिकराः सर्वे नरेन्द्राः। हृदयेन प्रविष्टो ध्यानं। तत्र च व्युपरताशेषेन्द्रियग्रामवृत्तिर्निष्पन्दस्तिमितलोचनयुगलः स्थितः किंचित्कालं। ततः प्रकम्पयता शिरः प्रहसितमनेन। प्रकर्षः प्राह। माम किमेतत्। विमर्शेनोक्तं। अवगतं समस्तमिदमधुना मया। ततः समुद्भूतो हर्षः। प्रष्टव्यमन्यदपि साम्प्रतं यत्ते रोचते। प्रकर्षेणोक्तं। एवं करिष्यामि। तावदिदमेव प्रस्तुतं निवेदयतु मामः। विमर्शेनाभिहितं। यद्येवं ततस्तावदेषा चित्तवृत्तिर्नाम महाटवी।

इयं च भद्र विस्तीर्णविविधाद्भुतसंगता।
उत्पत्तिभूमिः सर्वेषां सद्रत्नानामुदाहृता॥
इयमेव च सर्वेषां लोकोपद्रवकारिणाम्।
महानर्थपिशाचानां कारणं परिकीर्तिता॥
सर्वेषामन्तरङ्गाणां लोकानामत्र संस्थिताः।
चित्तवृत्तिमहाटव्यां ग्रामपत्तनभूमयः॥
यद्यपि बहिरङ्गेषु निर्दिश्यन्ते पुरेषु ते।
किंचित्कारणमालोच्य विद्वद्भिर्ज्ञानचक्षुषा॥
तथापि परमार्थेन तेऽन्तरङ्गजनाः सदा।
अस्यामेव महाटव्यां विज्ञेयाः सुप्रतिष्ठिताः॥

यतः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नैवान्तरङ्गलोकानां चित्तवृत्तिमहाटवीम् ।
विहाय विद्यते स्थानं बहिरङ्गपुरे क्वचित् ॥

ततश्च ।

सुन्दरासुन्दराः सर्वे येऽन्तरङ्गाः क्वचिज्जनाः ।
एनां विहाय ते भद्र न वर्तन्ते कदाचन ॥

अन्यच्च ।

मिथ्यानिषेविता भद्र भवत्येषा महाटवी ।
घोरसंसारकान्तारकारणं पापकर्मणाम् ॥
सम्यङ्निषेविता भद्र भवत्येषा महाटवी ।
अनन्तानन्दसन्दोहपूर्णा मोक्षस्य कारणम् ॥
किं चेह बहुनोक्तेन सुन्दरेतरवस्तुनः ।
सर्वस्य कारणं भद्र चित्तवृत्तिमहाटवी ॥
इयं चासारविस्तारा दृश्यते या महानदी ।
एषा प्रमत्तता नाम भद्र गीता मनीषिभिः ॥
इयं निद्रातटिस्तुङ्गा कषायजलवाहिनी ।
विज्ञेया मदिरास्वादविकथास्रोतसां निधिः ॥
महाविषयकल्लोललोलमालाकुला सदा ।
विकल्पानल्पसत्त्वौघपूरिता च निगद्यते ॥
योऽस्यास्तटेऽपि वर्तेत नरो बुद्धिविहीनकः ।
तमुन्मूल्य महावर्त्ते क्षिपत्येषा महापगा ॥
यस्तु प्रवाहे नीरस्य प्रविष्टोऽस्याः पुमानलम् ।
स यज्जीवति मूढात्मा क्षणमात्रं तदद्भुतम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्दृष्टं भवता पूर्वं रागकेसरिपत्तनम् ।
यच्च द्वेषगजेन्द्रस्य सम्बन्धि नगरं परम् ॥
ताभ्यामेषा समुद्भूता विगाह्येमां महाटवीम् ।
गत्वा पुनः पतत्येषा घोरसंसारनीरधौ ॥
अतोऽस्यां पतितो भद्र पुरुषस्तत्र सागरे ।
अवश्यं याति वेगेन तस्य चोत्तरणं कुतः ॥
ये गन्तुकामास्तत्रैव भीमे संसारसागरे ।
अत एव सदा तेषां वल्लभेयं महापगा ॥
ये तु भीताः पुनस्तस्माद्घोरात्संसारसागरात् ।
ते दूराद्दूरतो यान्ति विहायेमां महानदीम् ॥
तदेषा गुणतो भद्र वर्णिता तव निम्नगा ।
त्वं तद्विलसितं नाम साम्प्रतं पुलिनं शृणु ॥
एतद्धि पुलिनं भद्र हास्यविब्बोकसैकतम् ।
विलासलाससङ्गीतहंससारसराजितम् ॥
स्नेहपाशमहाकाशटिकासधवलं तथा ।
घूर्णमानमहानिद्रामदिरामत्तदुर्जनम् ॥
केलिस्थानं सुविस्तीर्णं बालिशानां मनोरमम् ।
विज्ञाततत्त्वैर्दूरेण वर्जितं शीलशालिभिः ॥
तदिदं पुलिनं भद्र कथितं तव साम्प्रतम् ।
महामण्डपरूपं ते कथयामि सनायकम् ॥
अयं हि चित्तविक्षेपो नाम्ना संगीयते बुधैः ।
गुणतः सर्वदोषौघवासस्थानमुदाहृतः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र प्रविष्टमात्राणां विस्मरन्ति निजा गुणाः ।
प्रवर्तन्ते महापापसाधनेषु च बुद्धयः ॥
एतेषामेव कार्येण निर्मितोऽयं सुवेधसा ।
राजानो येऽत्र दृश्यन्ते महामोहादयः किल ॥
बहिरङ्गाः पुनर्लोका यदि मोहवशानुगाः ।
स्युर्महामण्डपे भद्र प्रविष्टाः क्वचिदत्र ते ॥
ततो विभ्रमसन्तापचित्तोन्मादप्रतस्नवान् ।
प्राप्नुवन्ति न सन्देहो महामण्डपदोषतः ॥
एवं भद्र प्रकृत्यैव महामण्डपमुच्चकैः ।
एते नरेन्द्राः संप्राप्य मोदन्ते तुष्टमानसाः ॥
बहिरङ्गाः पुनर्लोका मोहादासाद्य मण्डपम् ।
एवं हि दौर्मनस्येन लभन्ते दुःखसागरम ॥
अयं हि चित्तनिर्वाणकारिणीं निजवीर्यतः ।
तेषामेकाग्रतां हन्ति सुखसन्दोहदायिनीम् ॥
केवलं ते न जानन्ति वीर्यमस्य तपस्विनः ।
प्रवेशमाचरन्त्यत्र तेन मोहात्पुनः पुनः ॥
यैस्तु वीर्यं पुनर्ज्ञातं कथंचित् पुण्यकर्मभिः ।
अस्य नैवात्र ते भद्र प्रवेशं कुर्वते नराः ॥
एकाग्रमनसो नित्यं चित्तनिर्वाणयोगतः ।
ततस्ते सततानन्दा भवन्त्यत्रैव जन्मनि ॥
तदेष गुणतो भद्र चित्तविक्षेपमण्डपः ।
मया निवेदितस्तुभ्यमधुना शृणु वेदिकाम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एषा प्रसिद्धा लोकेऽत्र तृष्णानाम्नी सुवेदिका।
अस्यैव च नरेन्द्रस्य कारणेन निरूपिता॥
भद्रात एव त्वं पश्य महामोहेन यो निजः।
कुटुम्बान्तर्गतो लोकः स एवास्यां निवेशितः॥
ये तु शेषा महीपालास्तत्सेवामात्रवृत्तयः।
एते निविष्टास्ते पश्य सर्वे मुत्कलमण्डपे॥
एषा हि वेदिका भद्र प्रकृत्यैवास्य वल्लभा॥
महामोहनरेन्द्रस्य स्वजनस्य विशेषतः॥
अस्यां समुपविष्टोऽयमत एव मुहुर्मुहुः।
सगर्वं वीक्षते लोकं सिद्धार्थोऽहं किलाधुना॥
एतच्च प्रीणयत्येषा स्वभावेनैव वेदिका।
स्वस्योपरिष्टादासीनं महामोहकुटुम्बकम्॥
बहिरङ्गाः पुनर्लोका यद्येनां भद्र वेदिकाम्।
आरोहन्ति ततस्तेषां कौतस्त्यं दीर्घजीवितम्॥
अन्यच्चैषा स्ववीर्येण तृष्णाख्या भद्र वेदिका।
अत्रैव संस्थिता नित्यं भ्रामयत्यखिलं जगत्॥
तदेषा गुणतो भद्र यथार्था वरवेदिका।
मया निवेदिता तुभ्यमिदानीं शृणु विष्टरम्॥
एतत्सिंहासनं भद्र विपर्यासाख्यमुच्यते।
अस्यैव विधिना नूनं महामोहस्य कल्पितम्॥
यदिदं लोकविख्यातं राज्यं याश्च विभूतयः।
तत्राहं कारणं मन्ये नृपतेरस्य विष्टरम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावच्चास्य नरेन्द्रस्य विद्यते वरविष्टरम ।
इदं तावदहं मन्ये राज्यमेतास्य भूतयः ॥

यतः ।

अस्मिन्निविष्टो राजायं महासिंहासने सदा ।
सर्वेषामेव शत्रूणामगम्यः परिकीर्तितः ॥
यदा पुनरयं राजा भवेदस्माद्बहिः स्थितः ।
सामान्यपुरुषस्यापि तदा गम्यः प्रकीर्तितः ॥
एतद्धि विष्टरं भद्र बहिरङ्गजनैः सदा ।
आलोकितं करोत्येव रौद्रानर्थपरंपराम् ॥

यतः ।

तावत्तेषां प्रवर्तन्ते सर्वाः सुन्दरबुद्धयः ।
यावत्तैर्विष्टरे लोकैरत्र दृष्टिर्न पातिता ॥
निबद्धदृष्टयः सन्तः पुनरत्र महासने ।
ते पापिनो भवन्त्युच्चैः कुतः सुन्दरबुद्धयः ॥

किं च ।

यन्नद्यास्तत् पुलिनस्य मण्डपस्य च वर्णितम् ।
वेदिकायास्य तद्वीर्यं सर्वमत्र प्रतिष्ठितम् ॥
तदिदं गुणतो भद्र कथितं तव विष्टरम् ।
महामोहनरेन्द्रस्य निबोध गुणगौरवम् ॥
जराजीर्णकपोलापि येषा भुवनविश्रुता ।
अमुष्येयमविद्याख्या गात्रयष्टिरुदाहृता ॥
एषात्र संस्थिता भद्र सकलेऽपि जगत्त्रये ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्करोति स्ववीर्येण तदाकर्णय साम्प्रतम् ॥
अनित्येष्वपि नित्यत्वमशुचिष्वपि शुद्धताम्।
दुःखात्मकेषु सुखतामनात्मस्वात्मरूपताम् ॥
पुद्गलस्कन्धरूपेषु शरीरादिषु वस्तुषु।
लोकानां दर्शयत्येषा ममकारपरायणा ॥
ततस्ते बद्धचित्तत्वात्तेषु पुद्गलवस्तुषु।
आत्मरूपमजानन्तः क्लिश्यन्तेऽनर्थकं जनाः ॥
तदेनां धारयन्नुच्चैर्गाढयष्टिं महाबलः।
जराजीर्णोऽपि नैवायं मुच्यते निजतेजसा ॥
अयं हि भद्र राजेन्द्रो जगदुत्पत्तिकारकः।
तेनैव गीयते प्राज्ञैर्महामोहपितामहः ॥
ये रुद्रोपेन्द्रनागेन्द्रचन्द्रविद्याधरादयः।
तेऽप्यस्य भद्र नैवाज्ञां लङ्घयन्ति कदाचन ॥

तथा हि।

योऽयं स्ववीर्यदण्डेन जगच्चक्रं कुलालवत्।
विभ्रम्य घटयत्येव कार्यभाण्डानि लीलया ॥
तस्यास्याचिन्त्यवीर्यस्य महामोहस्य भूपतेः।
को नाम भद्र लोकेऽस्मिन्नाज्ञां लङ्घयितुं क्षमः ॥
तदेष गुणतो भद्र वर्णितस्ते नराधिपः।
अधुना परिवारोऽस्य वर्ण्यते तं विचिन्तय ॥
केवलं कथयत्येवं मयि भद्र विशेषतः।
केनाप्याकूतदोषेण न त्वं पृच्छसि किंचन ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हुङ्कारमपि नो दत्से भावितश्च न लक्ष्यसे ।
शिरःकम्पनखस्फोटविरहेण विभाव्यसे ॥
निश्चलाक्षो मदीयं तु केवलं मुखमीक्षसे ।
तदिदं नैव जानेऽहं बुध्यसे किं न बुध्यसे ॥
प्रकर्षः प्राह मा मैवं माम वोचः प्रसादतः ।
तवाहं नास्ति तल्लोके यन्न बुध्ये परिस्फुटम् ॥
विमर्शः प्राह जानामि बुध्यसे त्वं परिस्फुटम् ।
अयं तु विहितो भद्र परिहासस्त्वया सह ॥

यतः ।

विज्ञातपरमार्थोऽपि बालबोधनकाम्यया ।
परिहासं करोत्येव प्रसिद्धं पण्डितो जनः ॥
बालो विनोदनीयश्च मादृशां भद्र वर्तसे ।
अतो मत्परिहासेन न कोपं गन्तुमर्हसि ॥
अन्यच्च जानतापीदमस्माकं हर्षवृद्धये ।
त्वया प्रश्नोऽपि कर्तव्यः क्वचित्प्रस्तुतवस्तुनि ॥

किंच ।

अविचार्य मया सार्धं वस्तुतत्त्वं यथास्थितम् ।
त्वमच श्रुतमात्रेण भद्र न ज्ञातुमर्हसि ॥
ऐदम्पर्यमतस्तात बोद्धव्यं यत्नतस्त्वया ।
अज्ञातपरमार्थस्य मा भून्नौतकथानिका ॥

प्रकर्षः प्राह । मम कथय कीदृशी पुनः सा भौतकथानिका । विमर्शेनाभिहितं । भद्र समाकर्णय । अस्ति क्वचिन्नगरे जन्म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बधिरः सदाशिवो नाम शैताचार्यः। स च जराजीर्णकपोलः सन्नुपहासपरेण हस्तसंज्ञयाभिहितः केनचिद्धूर्तबटुना। यथा भट्टारक किलैवं नीतिशास्त्रेषु पठ्यते। यदुत।

विषं गोष्ठी दरिद्रस्य जन्तोः पापरतिर्विषम्।
विषं परे रता भार्या विषं व्याधिरुपेक्षितः॥

अतः शीघ्रमस्य बाधिर्यस्य करोतु किंचिदौषधं भट्टारकः। न खलूपेक्षितुं युक्तोऽयं महाव्याधिः। ततः प्रविष्टो शैताचार्यस्य मनसि स एवाग्रहविशेषः। ततोऽभिहितोऽनेन शान्तिशिवो नाम निजशिष्यः। यदुत गच्छ त्वं वैद्यभवने मदीयबधिरत्वस्य विज्ञाय भेषजं गृहीत्वा च तत्तूर्णमागच्छ। मा भूत्कालहरणेन व्याधिवृद्धिरिति। शान्तिशिवेनाभिहितं। यदाज्ञापयति भट्टारकः। ततः प्राप्तोऽसौ वैद्यभवने। दृष्टो वैद्यः। इतश्च बृहतीं वेलां रमणं विधाय द्वारात्समागतो वैद्यपुत्रः। ततः क्रोधान्धबुद्धिना वैद्येन गृहीतातिपरुषा वालमयी रज्जुः। बद्धश्चारटन्नसौ निजदारकः स्तम्भके। गृहीतो लकुटः। ताडयितुमारब्धः। ताड्यमाने च निर्दयं तत्र दारके शान्तिशिवः प्राह। वैद्य किमित्येनमेवं ताडयसि। वैद्येनोक्तं। न शृणोति कथंचिदप्येष पापः। अत्रान्तरे हाहारवं कुर्वाणा वेगेनागत्य लग्ना वैद्यस्य हस्ते वारणार्थं भार्या। वैद्यः प्राह। मारणीयो मयायं दुरात्मा यो ममैवं कुर्वतोऽपि न शृणोति। अपसरापसर त्वमितरथा तवापीयमेव गतिः। तथापि लगन्ती ताडिता सापि वैद्येन। शान्तिशिवेन चिन्तितं। अये विज्ञातं भट्टारकस्यौषधं। किमधुना पृष्टेन। ततो निर्गत्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतोऽसौ माहेश्वरगृहे। याचिता तेन रज्जुः। समर्पिता माहेश्वरैः प्रणमद्भिः। शान्तिशिवः प्राह। अलमनया। मम बालमध्यातिपरुषया प्रयोजनं। दत्ता तादृश्येव माहेश्वरैरभिहितं च। भट्टारक किं पुनरनया कार्यं। शान्तिशिवेनोक्तं। सुगृहीतनामधेयानां सदाशिवभट्टारकाणामौषधं करिष्यते। ततो गृहीत्वा रज्जुं गतो मठे शान्तिशिवः। तत्र च दृष्ट्वा गुरुं कृतमनेन विषमभ्रकुटितरङ्गभङ्गकरालं वक्त्रकुहरं बद्धश्चारारटीर्मुञ्चन्नसौ मठमध्यस्तम्भके निजाचार्यः। ततो गृहीतदृढलकुटोऽसौ प्रवृत्तस्तस्य ताडने। दृतश्च माहेश्वरैश्चिन्तितं। गच्छामो भट्टारकाणां क्रियायां क्रियमाणायां प्रत्यासन्नाः स्वयं भवामः। ततः समागतास्ते। दृष्टो निर्दयं ताडयन्नाचार्यं शान्तिशिवः। तैरभिहितं। किमित्येनमेवं ताडयसि। शान्तिशिवः प्राह। न शृणोति कथंचिदप्येष पापः। ततो विहितः सदाशिवेन म्रियमाणेन महाक्रन्दभैरवः शब्दः। ततो लग्ना वारणार्थं हाहारवं कुर्वन्तः शान्तिशिवस्य माहेश्वराः। शान्तिशिवः प्राह। मारणीयो मयायं दुरात्मा यो ममैवं कुर्वतोऽपि न शृणोति। अपसरतापसरत यूयमितरथा युष्माकमपीयमेव वार्तेति। तथापि वारयतो माहेश्वरानपि प्रवृत्तस्ताडयितुमसौ लकुटेन। ततो बद्धलात्तेषां रे लात लातेति ब्रुवाणैरुद्दालितस्तस्य हस्ताल्लकुटः। चिन्तितं च। नूनं ग्रहगृहीतोऽयं। ततो बद्धस्तैस्ताडयित्वा पश्चाद्बाहुबन्धेन शान्तिशिवः। विमोचितः सदाशिवः। लब्धा चेतना। जीवितो दैवयोगेन। माहेश्वरैरभिहितं। शान्तिशिव किमिदं भगवतस्त्वया कर्तुमारब्धमासीत्। शान्तिशिवः प्राह।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ननु बधिरताया वैद्योपदेशादौषधं। किंच। मुञ्चत मां। मा भट्टारकव्याधिमुपेक्षध्वं। माहेश्वरैश्चिन्तितं। महाग्रहोऽयं। ततोऽभिहितमेतैः। मुञ्चामस्त्वां यद्येवं न करोषि। शान्तिशिवः प्राह। किमहं भवतां वचनेन स्वगुरोरपि भेषजं न करिष्यामि। अहं हि यदि परं तस्यैव वैद्यस्य वचनेन तिष्ठामि नान्यथा। ततः समाहूतो वैद्यः। निवेदितस्तस्मै वृत्तान्तः। ततो मुखमध्ये हस-ताभिहितं वैद्येन। भट्टारक न बधिरोऽसौ मदीयो दारकः। किं तर्हि पाठितो मया क्लेशेन वैद्यकशास्त्राणि। स तु रमणशीलतया मम रटतोऽपि तदर्थं न शृणोति। ततो मया रोषात्ताडितः। तन्नेदमौषधं। किंच। प्रगुणीभूतः खल्वयं साम्प्रतं तव प्रभावा-दनेनैव भेषजेन। तस्मादतःपरं न कर्तव्यं मदीयवचनेन त्वयास्येद-मौषधमिति। शान्तिशिवेनाभिहितं एवं भवतु। भट्टारकैर्हि प्रगुणैर्मम प्रयोजनं। ते च यदि प्रगुणास्ततः किमौषधेन। ततो मुक्तः शान्तिशिवः॥

तदेषा भद्र भौतकथानिका श्रुतमात्रग्राहिणस्तवापि मया सार्धमविचारयतो मा भूदित्येवमर्थं परिचोदितस्त्वं मयेति। प्रकर्षः प्राह। साधु साधूक्तं मामेन। पृच्छामि तर्हीदानीं किंचिद्भवन्तं। विमर्शेनोक्तं। प्रश्नयतु भद्रः। प्रकर्षः प्राह। माम यद्येवं ततो विज्ञातेयं मया समस्तान्तरङ्गलोकाधारभूता बहिरङ्गलोकानां सर्वसुन्दरासुन्दरवस्तुनिर्वर्तिका सभावार्था चित्तवृत्तिर्महाटवी। एतानि तु महानदीपुलिनमहामण्डपवेदिकासिंहासनगात्रयष्टि-नरेन्द्ररूपाणि वस्तूनि यानि भवता प्रमत्ततातद्विलसितचित्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विक्षेपतृष्णाविपर्यासाविद्यामहामोहाभिधानानि निवेदितानि मया भावार्थमधिकृत्य न सम्यग्विज्ञातानि । विकल्पितानि मया यथानाम्ना परमेतानि भिद्यन्ते नार्थेन । यतः सर्वाण्यपि पुष्टिकारणतयामीषामन्तरङ्गलोकानामनर्थकारणतया च वहिरङ्गजनानां समानानि वर्तन्ते । ततो यद्येतेषामस्ति कश्चिदर्थेन भेदस्तं मे निवेदयतु मामः । विमर्शः प्राह । ननु निवेदित एव प्रत्येकमेतेषां गुणान् वर्णयता मया परिस्फुटोऽर्थभेदः । तथापि स यदि न विज्ञातो भद्रेण ततः पुनरपि निवेदयामि । ततः कथितो विमर्शेन महानद्यादीनां वस्तूनां प्रत्येकं भावार्थः । बुद्धः प्रकर्षेण ॥ अत्रान्तरे नरवाहनः प्राह । भदन्त वयमपि बोधनीयास्तेषां भावार्थं । ततः प्रबोधितो नरवाहननरेन्द्रोऽपि तेन भगवता विचक्षणसूरिणा । ततोऽगृहीतसङ्केतयाभिहितं । भद्र संसारिजीव तर्हि यद्येवं ततोऽहमपीदानीं तेषां महानद्यादिवस्तूनां बोधनीया भवतार्थं वेदनीया भवतार्थभेदं । संसारिजीवेनोक्तं । भद्रे स्पष्टदृष्टान्तमन्तरेण न त्वया सुखावसेयमेतेषां प्रविभक्तं स्वरूपं । अतो दृष्टान्तं कथयिष्ये । अगृहीतसङ्केतयोक्तं । अनुग्रहो मे । संसारिजीवेनाभिहितं ।

अस्ति संभावितसमस्तवृत्तान्तं भुवनोदरं नाम नगरम् । तत्र च निवारको हरिहरहिरण्यगर्भादीनामपि प्रभुशक्तेरनादिर्नाम राजा । तस्य च नीतिमार्गनिपुणा विच्छेदकारिणी कुयुक्तिमिथ्याविकल्पजल्पानां संस्थितिर्नाम महादेवी । तयोश्चात्यन्तवल्लभोऽस्ति वेल्लहलो नाम तनयः । स च गाढमाहारप्रियो दिवानिशमनवरतं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विविधखाद्यपेयानि भक्षयन्नास्ते। ततः संजातं महाजीर्णं प्रकुपिता दोषाः संपन्नोऽन्तर्लीनो ज्वरः। तथापि न विच्छिद्यते तस्याहाराभिलाषः। प्रवृत्ता चोद्यानिकागमनेच्छा। ततः कारिता भूरिप्रकारा भक्ष्यविशेषाः। तांश्च पश्यतस्तस्य एनमेनं च भक्षयिष्यामीति प्रवर्तन्ते चित्तकल्लोलाः। लौल्यातिरेकेण च भक्षितं सर्वेषामाहारविशेषाणां स्तोकस्तोकं। ततः परिवेष्टितो मित्रवृन्देन परिकरितोऽन्तःपुरेण पठता बन्दिवृन्देन ददद्दानं विविधैर्विलासैर्महता विमर्देन प्राप्तो मनोरमे कानने। निविष्टं सुखमासनं। तत्र चोपविष्टस्य विरचिताः पुरतो विविधाहारविस्ताराः। ततश्चाहारलेशभक्षणेन पवनस्पर्शादिना गाढतरं प्रवृद्धो ज्वरः। लक्षितश्च पार्श्ववर्तिना समयज्ञाभिधानेन महावैद्यसुतेन। यदुतातुरवदनो दृश्यते कुमारः। ततो दत्तस्तेन शङ्खयोर्हस्तः। निरूपितानि सन्धिस्थानानि। निश्चितमनेन। यथा ज्वरितः खल्वयं कुमारः। ततोऽभिहितं समयज्ञेन। देव न युक्तं तव भोक्तुं। प्रबलज्वरं ते शरीरं वर्तते। यतोऽत्यन्तमातुरा घूर्णते दृष्टिः। आताम्रस्निग्धं वदनकमलं। द्रगद्रगायेते शङ्खौ। धमधमायन्ते सन्धिस्थानानि। ज्वलतीव बहिस्त्वग्। दहतीव हस्तं। ततो निवर्तस्व भोजनात्। गच्छ प्रच्छन्नापवरके। भजस्व निवातं। कुरुष्व लङ्घनानि। पिब क्वथितमुदकं। समाचर विधिनास्य सर्वां प्रतिक्रियामितरथा सन्निपातस्ते भविष्यति॥ स तु वेल्लहलो दत्तदृष्टिः पुरतो विन्यस्ते तस्मिन्नाहारविस्तारे एतदेतच्च भक्षयामीति भ्रमयन्नपरापरेषु खाद्यप्रकारेषु स्वीयमन्तःकरणं नाकर्णयति तत्तदा वैद्यसुतभाषितं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाकलयति तस्य हितरूपतां न चेतयते तं वारणार्थं लगन्तमपि शरीरे। ततो वारयतो वचनेन धारयतो हस्तेन तस्य समयज्ञस्य समक्षमेव बलात्प्रवृत्तो भक्षयितुमाहारं वेल्लहलः। ततः समुत्कटतयाजीर्णस्य प्रबलतया ज्वरस्य न क्रमतेऽसौ गलकेनाहारः। तथापि बलादेव क्रामितः कियानपि वेल्लहलेन। ततः समुद्वृत्तं हृदयं संजातः कलमलकः संपन्नं वमनं विमिश्रितं च तेन वमनेन सर्वमपि पुरतो विन्यस्तं भोजनं। ततश्चिन्तितं वेल्लहलेन।

क्षुधाक्षामं शरीरं मे नूनमूनतया भृशम्।
एतद्धि वायुनाक्रान्तमन्यथा वमनं कुतः॥

एवं स्थिते।

रिक्तकोष्ठं शरीरं मे वाताक्रान्तं विनंक्ष्यति।
ततश्च प्रीणयामीदं भुञ्जे भूयोऽपि भोजनम्॥
ततोऽसौ वान्तिसंमिश्रं तत्पुरःस्थितभोजनम्।
निर्लज्जो भोक्तुमारब्धः सर्वेषामपि पश्यताम्॥
तद्दृष्ट्वा समयज्ञेन प्रोक्तः पूत्कुर्वता भृशम्।
देव देव न युक्तं ते कर्तुं काकस्य चेष्टितम्॥
मा च राज्यं शरीरं च यशश्च शशिनिर्मलम्।
देव हारय भक्तेन लमेकदिनभाविना॥
अन्यच्चेदं सतां निन्द्यममेध्यं शौचदूषणम्।
उद्वेगहेतु नो भक्तं देवः खादितुमर्हति॥
देव दुःखात्मकं चेदं सर्वव्याधिप्रकोपनम्।
गाढमुल्बणदोषाणां विशेषेण भवादृशाम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



का वास्योपरि ते मूर्च्छा यद्वाह्यं पुद्गलात्मकम्।
अतो देव विहायेदमात्मानं रक्ष यत्नतः॥
इत्थं च समयज्ञस्य रटतोऽपि वचस्तदा।
स राजपुत्रः श्रुत्वापि स्वचित्ते पर्यचिन्तयत्॥
अहो विमूढः खल्वेष समयज्ञो न बुध्यते।
नूनं मदीयप्रकृतिं नावस्थां न हिताहितम्॥
यो वातलं क्षुधाक्षामं भुञ्जानं मां निषेधति।
एतच्च दूषयत्येष भोजनं देवदुर्लभम्॥
तत्किमेतेन मूर्खेण भुञ्जे भोज्यं यथेच्छया।
स्वार्थसिद्धिर्मया कार्या किं ममापरचिन्तया॥
ततः परिजनेनोच्चैः सहितेऽपि पुनः पुनः।
समयज्ञे रटत्येवं भक्षितं तेन भोजनम्॥
ततः प्रबलदोषोऽसौ भक्षणानन्तरं तदा।
सन्निपातं महाघोरं संप्राप्तो निजकर्मणा॥
पुनर्वमनबीभत्से ततस्तत्रैव भूतले।
पश्यतां पतितस्तेषां काष्ठवन्नष्टचेतनः॥
स लोलमानस्तत्रैव जघन्ये वान्तिकर्दमे।
कुर्वन् घुरघुरारावं श्लेष्मापूर्णगलस्तदा॥
अनाख्येयामचिन्त्यां च तेषामुद्वेगकारिणीम्।
अशक्यप्रतिकारां च प्राप्तोऽवस्थां सुदारुणाम्॥
न शक्यः समयज्ञेन त्रातुमेष न बान्धवैः।
तदवस्थो न राज्येन न देवैर्नापि दानवैः॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केवलं तद्वशेन लुठताशुचिकर्दमे ।
अनन्तकालं तत्रैव स्थातव्यं तेन पापिना ॥
तदेष भद्रे दृष्टान्तः प्रस्तुतानां परिस्फुटः ।
वस्तूनां भेदसिद्ध्यर्थं मया तुभ्यं निवेदितः ॥
ततोऽगृहीतसङ्केता प्राह विकलमानसा ।
संसारिजीव नैवेदं पौर्वापर्येण युज्यते ॥

यतः ।

नद्यादिवस्तुभेदार्थं कथितं मे कथानकम् ।
त्वयेदं तत्र मे भाति कोष्ठो नीराजना क्व च ॥
अथास्ति कश्चित्सम्बन्धो हन्त प्रस्तुतवस्तुनि ।
स्फुटः कथानकस्यास्य स इदानीं निवेद्यताम् ॥
ततः संसारिजीवेन तद्दार्ष्टान्तिकयोजने ।
बकुभाषेण खिन्नेन तत्सखी संप्रचोदिता ॥

कथम् ।

अस्याः प्रज्ञाविशाले त्वं निःशेषं मत्कथानकम् ।
घटय प्रस्तुतार्थेन निजशैलिकया स्फुटम् ॥
अथ प्रज्ञाविशालाह कामं भोः कथयामि ते ।
भद्रेऽगृहीतसङ्केते समाकर्णय सांप्रतम् ॥
यस्ते वेल्लहलो नाम राजपुत्रो निदर्शितः ।
एषोऽनेन विशालाक्षि प्रोक्तो जीवः सकर्मकः ॥
स एव जायते भद्रे नगरे भुवनोदरे ।
अनादिसंस्थितिसुतः स एव परमार्थतः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स एवानन्तरूपत्वाद्वहिरङ्गजनः स्मृतः
सामान्यरूपमुद्दिश्य स चैकः परिकीर्तितः ॥
मनुष्यभावमापन्नः स प्रभुः सर्वकर्मणाम् ।
महाराजसुतस्तेन स प्रोक्तोऽनेन सुन्दरि ॥
तस्यैव सक्ता विज्ञेया चित्तवृत्तिर्महाटवी ।
सुन्दरेतरवस्तूनां सा तस्यैव च कारणम् ॥
केवलं यावदद्यापि स आत्मानं न बुध्यते ।
महामोहादिभिस्तावल्लुप्यते सा महाटवी ॥
यदा तु तेन विज्ञातः स स्यादात्मा कथंचन ।
तद्वीर्यं वीक्ष्य नश्यन्ति महामोहादयस्तदा ॥
यावच्च ते विवर्तन्ते चित्तवृत्तौ महाभटाः ।
महानद्यादिवस्तूनि तावत्तस्यां भवन्ति वै ॥
तेषामेव यतस्तानि क्रीड़ास्थानानि भूभुजाम् ।
अतस्तेषु विनष्टेषु तेषां नाशः प्रकीर्तितः ॥

एवं स्थिते ।

अविज्ञातात्मरूपस्य भद्रे जीवस्य कर्मणा ।
महामोहनरेन्द्रे च सप्रतापेऽटवीस्थिते ॥
यदा तानि विवर्धन्ते जीवस्य बहु मन्यते ।
महानद्यादिवस्तूनि नितरामात्मवैरिकः ॥
तदा तानि स्ववीर्येण यत्कुर्वन्ति पृथक् पृथक् ।
जीवस्य तद्विशेषार्थं दृष्टान्तोऽयं निवेदितः ॥
स चैवं योज्यते भद्रे प्रस्तुतार्थेन पण्डितैः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महानद्यादिवस्तूनां प्रत्येकं भेदसिद्धये ॥
यथाहारप्रियो नित्यं राजपुत्रो निवेदितः ।
तथायमपि विज्ञेयो जीवो विषयलम्पटः ॥
यथा च तस्य संजातमजीर्णं भूरिभक्षणात् ।
तथास्यापि कुरङ्गाक्षि कर्माजीर्णं प्रचक्षते ॥
पापाज्ञानात्मकं तच्च वर्तते कर्म दारुणम् ।
यतः प्रमत्ततोद्भूता तज्जन्यं तत्पुरद्वयम् ॥
यथा प्रकुपितास्तस्य दोषा जातस्तनुज्वरः ।
तथा रागादयोऽस्यापि वर्धन्ते ज्वरहेतवः ॥
यथा तथास्थितस्यापि बुद्धिर्भोज्येषु धावति ।
नरेन्द्रदारकस्येह तथास्यापि दुरात्मनः ॥

तथाहि ।

मनुष्यभावमापन्नः कर्माजीर्णं सुदारुणम् ।
रागादिकोपनं मूढश्चित्तज्वरविधायकम् ॥
जीवो न लक्षयत्येष ततश्चास्य प्रवर्तते ।
अहितेषु सदा बुद्धिः प्रकामं सुखकाम्यया ॥
तथाहि खदते मद्यं निद्रात्यन्तं सुखायते ।
विकथा प्रतिभात्युच्चैरस्यानेकविकल्पना ॥
इष्टः क्रोधः प्रियो मानो माया चात्यन्तवल्लभा ।
लोभः प्राणसमो मन्ये रागद्वेषौ मनोमतौ ॥
कान्तः स्पर्शो रसोऽभीष्टः कामं गन्धश्च सुन्दरः ।
अत्यन्तदयितं रूपं रोचते च कलध्वनिः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विलेपनानि ताम्बूलमलङ्काराः सुभोजनम् ।
माल्यं वरस्त्रियो वस्त्रं सुन्दरं प्रतिभासते ॥
आसनं ललितं यानं शयनं द्रव्यसञ्चयाः ।
श्लोककीर्तिश्च जने रुचितास्य दुरात्मनः ॥
चित्तवृत्तिमहाटव्यां भद्रे सततवाहिनी ।
महानदी वहत्युच्चैः सेयमस्य प्रमत्तता ॥
यथा च तद्वशस्यास्य राजपुत्रस्य सुन्दरि ।
समुत्पन्ना विलासेच्छा यातुमुद्यानिकां मतिः ॥
कारितानि च भोज्यानि लौल्येन प्राशितानि च ।
निर्गतश्च विलासेन पुरात्प्राप्तश्च कानने ॥
निविष्टमासनं दिव्यमुपविष्टश्च तत्र सः ।
विस्तारितं पुरो भक्तं नानाखाद्यकसंयुतम् ॥
तथास्यापि प्रमत्तस्य जीवस्य वरलोचने ।
कर्माजीर्णात्समुत्पन्ने भीषणेऽपि मनोज्वरे ॥
जायन्ते चित्तकल्लोला नानारूपाः क्षणे क्षणे ।
यथोपार्ज्य धनं भूरि विलसामि यथेच्छया ॥
करोम्यन्तःपुरं दिव्यं भुञ्जे राज्यं मनोहरम् ।
महाप्रासादसङ्घातं कारये काननानि च ॥

ततश्च ।

महाविभवसंपन्नः क्षपिताखिलवैरिकः ।
श्लाघितः सर्वलोकेन पूरितार्थमनोरथः ॥
शब्दादिसुखसन्दोहसागरे मग्नमानसः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिष्ठामि सततानन्दो नान्यन्मानुष्यके फलम् ॥
सेयमुद्यानिकाकाङ्क्षा विज्ञेया सुन्दरि त्वया ।
ततो जीवो महारम्भः कुरुते द्रव्यसञ्चयम् ॥
यथेष्टं दैवयोगेन विधत्तेऽन्तःपुरादिकम् ।
शब्दादिसुखलेशं च किंचिदास्वादयेदपि ॥
अस्य जीवस्य जानीहि तदिदं मृगवीक्षणे ।
कारणं मृष्टभोज्यानां तत्सवानां च भक्षणम् ॥
ततोऽलीकविकल्पैश्च सुखनिर्भरमानसः ।
विलासलास्यसङ्गीतहास्यविब्बोकतत्परः ॥
युतो दुर्ललितैर्नित्यं द्यूतमद्यरतिप्रियः ।
सन्मार्गनगराद् दूरे याति दौःशील्यकानने ॥
एतन्महाविमर्देन पुरनिर्गमनं मतम् ।
उद्यानप्रापणं चेदं विद्धि नीलाब्जलोचने ॥
स मिथ्याभिनिवेशाख्ये स्थितो विस्तीर्णविष्टरे ।
कर्माख्यपरिवारेण रचितानि ततोऽग्रतः ॥
मनोहराणि चित्राणि लब्धास्वादो विशेषतः ।
प्रमादवृन्दभोज्यानि सुन्दरत्वेन मन्यते ॥
प्रमत्ततामहानद्याः पुलिनं पद्मलोचने ।
तत्तद्विलसितं विद्धि वृत्तान्तस्यास्य कारणम् ॥
ततो यथाबलेशेन भक्षितेन तनुज्वरः ।
वायुस्पर्शादिभिश्चोच्चैर्वर्धितस्तस्य दारुणः ॥
लङ्घितश्च सुवैद्येन वारितश्च सुभोजनात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न चासौ बुध्यते किंचिद्भोजनाक्षिप्तमानसः ॥
जीवस्यापि तथा भद्रे कर्माजीर्णाद्भवो ज्वरः ।
प्रमादाग्निना वर्धेत तथैवाज्ञानवायुना ॥
लक्षयन्ति च तं वृद्धं धर्माचार्या महाधियः ।
समयज्ञमहावैद्या वारयन्ति च देहिनम् ॥

कथम् ।

अनादिभवकान्तारे भ्रान्त्वा भद्रातिसुन्दरम् ।
अवाप्य मानुषं जन्म महाराज्यमिवातुलम् ॥
कर्माजीर्णज्वराक्रान्तं प्रमादमधुनापि भोः ।
मा सेवस्व महामोहसन्निपातस्य कारणम् ॥
कुरुष्व ज्ञानचारित्रसम्यग्दर्शनलक्षणाम् ।
चित्तज्वरविघाताय जैनीं भद्र प्रतिक्रियाम् ॥
स तु प्रमादभोज्येषु क्षिप्तचित्तो न बुध्यते ।
तत्तादृशं गुरोर्वाक्यं पापो जीवः प्रपञ्चितम् ॥

ततस्च ।

उन्मत्त इव मत्त इव ग्राहग्रस्त इवातुरः ।
गाढसुप्त इवोद्भ्रान्तो विपरीतं विचेष्टते ॥
स एष भद्रे सर्वोऽपि चित्तविक्षेपमण्डपः ।
महानदीकूलसंस्थो जीवस्यास्य विजृम्भते ॥
यथा च राजपुत्रेण भोजनं चारुलोचने ।
अगच्छदपि कण्ठेन गमितं लौल्यदोषतः ॥
तदनन्तरमेवोच्चैर्वान्तं तत्रैव भोजने ।
जीवस्यापि विजानीहि समानमिदमञ्जसा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाहि।

कर्माजीर्णज्वरग्रस्तः सदा विक्लमानसः।
जराजीर्णतनुचामो रोगार्दितशरीरकः॥
सर्वेषामक्षमो भोगे भोगानामेष वर्तते।
तथापि जायते नास्य स्तोकापि विरतौ मतिः॥
ततश्च गाढलौल्येन तथाभूतोऽपि सेवते।
प्रमादवृन्दभोज्यानि वार्यमाणो विवेकिभिः॥
शतप्राप्तौ सहस्रेच्छा सहस्रे लक्षरोचनम्।
लक्षे कोटिगता बुद्धिः कोटौ राज्यस्य वाञ्छनम्॥
राज्ये देवत्ववाञ्छास्य देवत्वे शक्रतामतिः।
शक्रत्वेऽपि गतस्यास्य नेच्छापूर्तिः कथंचन॥
सुपुत्रैर्वरयोषाभिः सर्वकामैर्मुहुर्मुहुः।
नास्याभिलाषविच्छित्तिः कोटिशोऽपि निषेवितैः॥
संगृह्णाति ततो मूढः सर्वार्थान् सुखकाम्यया।
ते तु दुःखाय जायन्ते सज्वरस्येव भोजनम्॥
जलज्वलनदायादचौरराजादिभिस्तथा।
तस्यार्थभोजनस्योच्चैर्बलाद्वान्तिर्विधाप्यते॥
ह्त्कलमलकं घोरं वम्यमानः सहत्ययम्।
आराटीर्मुञ्चति प्राज्याः कृपाहेतुर्विवेकिनाम्॥
तदेषा चारुसर्वाङ्गि चित्तविक्षेपमण्डपे।
जीवस्य विलसत्युच्चैस्तृष्णानाम्नी सुवेदिका॥
यत्पुनश्चिन्तयत्येवं तदा वेल्लहलः किल।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाताक्रान्तं शरीरं मे ततोऽभूद्वमनं मम ॥
एतच्च रिक्तकोष्ठत्वाद्वायुनाभिभविष्यते ।
अतः संप्रणयामीदं भुञ्जे भूयोऽपि भोजनम् ॥
जीवोऽपि चिन्तयत्येव तदिदं तारवीचणे ।
पापज्वरवशादुच्चैर्नष्टे विभवसञ्चये ॥
मृतेषु च कलत्रेषु पुत्रेषु स्वजनेषु च ।
अन्येषु च विनष्टेषु चित्ताबन्धेषु मन्यते ॥
न मया चेष्टितं नीत्या न कृतं चारु पौरुषम् ।
नाश्रितो वा वरस्वामी न कृता वा प्रतिक्रिया ॥
तेनेदं मम सर्वस्वं पत्नी वा चारुदर्शना ।
पुत्रा वा बान्धवा वापि विनष्टाः पश्यतोऽपि मे ॥
न चैषां विरहे नूनं वर्तेऽहं चणमप्यतः ।
उपार्जयामि भूयोऽपि तान्येवोत्साहयोगतः ॥
उपार्जितानि सन्नीत्या रचिष्यामि प्रयत्नतः ।
अजागलस्तनस्येव जीवितव्यं वृथान्यथा ॥
सर्वमस्य विजानीहि तदिदं सुभ्रु भावतः ।
जीवस्यास्य विपर्याससनामविष्टरचेष्टितम् ॥
यथा च भोक्तुमारब्धः स निर्लज्जतया पुनः ।
पश्यतः सर्वलोकस्य वान्तिसंमिश्रभोजनम् ॥
ततः सपरिवारेण तेन पूत्कुर्वता भृशम् ।
वारितः समयज्ञेन तद्दोषाश्च निवेदिताः ॥
स तु तत्र गुणारोपाद्भोजने बद्धमानसः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं रटन्तमनालोच्य भक्षणं कृतवानिति ॥
तथायमपि चार्वङ्गि जीवः कर्ममलीमसः ।
भुक्तोत्सृष्टेषु भोगेषु निर्लज्जः संप्रवर्तते ॥
परमाणुमया ह्येते भोगाः शब्दादयो मताः ।
सर्वे चैकैकजीवेन गृहीताः परमाणवः ॥
गृहीत्वा मुक्तपूर्वाश्च बहुशो भवकोटिषु ।
भुक्तवान्तास्ततः सत्यमेते शब्दादयोऽनघे ॥
यच्चास्य किंचिल्लोकेऽत्र चित्ताबन्धविधायकम् ।
जीवस्य वस्तु सर्वं तत्सर्वं पुद्गलात्मकम् ॥
तथापि भद्रे पापात्मा पश्यतां विमलात्मनाम् ।
आबद्धचित्तस्तत्रैव जाम्बाले संप्रवर्तते ॥
कृपापरीतचित्तास्तु भोगकर्दमलम्पटम् ।
तं जीवं वारयन्त्येते धर्माचार्याः प्रयत्नतः ॥

कथम् ।

अनन्तानन्दसद्वीर्यज्ञानदर्शनरूपकः ।
देवस्त्वं भद्र नो युक्तमतो भोगेषु वर्तनम् ॥
अन्यच्चामी विवर्तन्ते सर्वे भोगाः क्षणे क्षणे ।
अपरापररूपेण तुच्छमास्थानिबन्धनम् ॥
वान्ताशुचिसमाश्चैते वर्णितास्तत्त्वदर्शिभिः ।
भद्रः परमदेवोऽपि नातोऽमून् भोक्तुमर्हसि ॥
दुःखोपढौकितास्त्वामी दुःखरूपाश्च तत्त्वतः ।
दुःखस्य कारणं तेन वर्जनीया मनीषिणा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ये च बाह्याणुनिष्पन्नास्तुच्छा गाढ़मनात्मकाः ।
तेषु कः पण्डितो रागं कुर्यादात्मस्वरूपवित् ॥
अतो ममोपरोधेन भद्र भोगेषु कुत्रचित् ।
अन्येषु च प्रमादेषु मा प्रवर्तिष्ट साम्प्रतम् ॥
तदेवं पद्मपत्राक्षि निवारयति सद्गुरौ ।
प्रमादभोजने सक्तः स जीवो हृदि मन्यते ॥
अहो विमूढः खल्वेष वस्तुतत्त्वं न बुध्यते ।
आल्हादजनकानेष यो भोगानपि निन्दति ॥

तथाहि ।

मद्यं वरस्त्रियो मांसं गान्धर्वं मृष्टभोजनम् ।
माल्यताम्बूलनेपथ्यविस्ताराः सुखमासनम् ॥
अलङ्काराः सुधा शुभ्रा कीर्तिर्भुवनगामिनी ।
सद्रत्ननिचयाः शूरं चतुरङ्गं महाबलम् ॥
राज्यं प्रणतसामन्तं यथेष्टाः सर्वसम्पदः ।
यद्येतद्दुःखहेतुस्ते किमन्यत्सुखकारणम् ॥
विप्रलब्धाः कुसिद्धान्तैः शुष्कपाण्डित्यगर्विताः ।
ये नूनमीदृशा लोके भोगभोजनवञ्चिताः ॥
ते मोहेन स्वयं नष्टाः परानपि कृतोद्यमाः ।
नाशयन्ति हि तत्त्वे ते वर्जनीया विजानता ॥

तथाहि ।

यो भोगरहितो मोक्षो बन्धनं तदुदाहृतम् ।
तदर्थं कस्त्यजेद्दृष्टमिदं भोगसुखामृतम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवंविधविकल्पैश्च गुरुवाक्यपराङ्मुखः ।
अभूतगुणसङ्घातं तेषु भोगेषु मन्यते ॥

कथम् ।

स्थिरा ममैते शब्दाश्च सुखरूपाश्च तत्त्वतः ।
एतदात्मक एवाहमलमन्येन केनचित् ॥
आस्तामेष गृहीतेन मोक्षेण प्रशमेन वा ।
अहं तु नेदृशैर्वाक्यैरात्मानं वञ्चयामि भोः ॥

ततश्च ।

सद्धर्मावेदनव्याजाद्गाढं पूत्कुर्वतोऽग्रतः ।
गुरोरपि प्रवर्त्तेत प्रमादाशुचिकर्दमे ॥
सा सर्वेयमविद्याख्या जीवस्यास्य वरानने ।
महामोहनरेन्द्रस्य गात्रयष्टिर्विजृम्भते ॥
यथा स भोजनं भूयो भक्षयित्वा पुनर्वमन् ।
संजातसन्निपातत्वात्पतितस्तत्र भूतले ॥
लुठन्नितस्ततो गाढं मुञ्चन्नाक्रन्दभैरवम् ।
अनाख्येयामचिन्त्यां च प्राप्तोऽवस्थां सुदारुणाम् ॥
न त्रातः केनचिल्लोके तदवस्थः स्थितः परम् ।
तथायमपि विज्ञेयो जीवः सर्वाङ्गसुन्दरि ॥

तथाहि ।

यदा प्रमत्ततायुक्तस्तद्विलासपरायणः ।
विक्षिप्तचित्तस्तृष्णार्त्तो विपर्यासवशंगतः ॥
अविद्यान्धीकृतो जीवः सक्तः संसारकर्दमे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आरोपितगुणव्रातस्तथैव विषयादिके ॥
सर्वज्ञं धर्मसूरिं वा वारयन्तं मुहुर्मुहुः ।
सुवैद्यसन्निभं पापो विमूढमिति मन्यते ॥

ततश्च ।

पापाजीर्णज्वराक्रान्तः स जीवो वान्तिसन्निभे ।
तं रटन्तमनालोच्यासत्प्रमादे प्रवर्तते ॥
तदा निःशेषदोषौघभरपूरितमानसे ।
सन्निपातसमो घोरो महामोहोऽस्य जृम्भते ॥
ततश्च तद्वशेनायं जीवः सुन्दरलोचने ।
पश्यतामेव निश्चेष्टो भवत्येव विवेकिनाम् ॥
मूत्रान्त्राशुचिजाम्बालवसारुधिरपूरिते ।
निर्बोलं निपतत्येव नरके वान्तिपिच्छले ॥
लुठतीतस्ततस्तत्र मुञ्चन्नाक्रन्दभैरवान् ।
सहते तीव्रदुःखौघं यद्वाचां गोचरातिगम् ॥
तथा विचेष्टमानं च वरगात्रि तपोधनाः ।
ज्ञानालोकेन पश्यन्ति तं जीवं शुद्धदृष्टयः ॥
केवलं सन्निपातेन समाक्रान्तं भिषग्वराः ।
अचिकित्स्यमिमं ज्ञात्वा वर्जयन्ति महाधियः ॥
ततश्च तदवस्थस्य तस्य तारविलोचने ।
कोऽन्यः स्यात्त्रायको जन्तोर्घोरदुःखौघसागरे ॥
अन्यच्च तदवस्थोऽपि जीवोऽयं वल्गुभाषिणि ।
प्रमादभोजनास्वादलाम्पट्यं नैव मुञ्चति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दोषाः प्रबलतां यान्तस्ततो मुष्णन्ति चेतनाम् ।
अत्यर्थं च महामोहसन्निपातो विवर्धते ॥

एवं च स्थिते ।

संसारचक्रवालेऽत्र रोगमृत्युजराकुले ।
अनन्तकालमासीनस्त्यक्तः सद्धर्मबान्धवैः ॥
तदिदं निजवीर्येण जीवस्यास्य महाबलः ।
सन्निपातसमो भद्र महामोहो विचेष्टते ॥

किं च ।

प्रवर्तकस्य सर्वेषां कार्यभूतस्य तत्त्वतः ।
महामोहनरेन्द्रोऽयं नद्यादीनां सुलोचने ॥
तदेवं राजपुत्रीयो दृष्टान्तोऽनेन सुन्दरि ।
महानद्यादिवस्तूनां दर्शितो भेदसिद्धये ॥
अथाद्यापि न ते जाता प्रतीतिः सुपरिस्फुटा ।
भूयोऽपीदं समासेन प्रस्पष्टं कथयामि ते ॥
विषयोन्मुखता यास्य सा विज्ञेया प्रमत्तता ।
तत्तद्विलसितं विद्धि यद्भोगेषु प्रवर्तनम् ॥
प्रवृत्तौ लौल्यदोषेण शून्यत्वं यत्तु चेतसः ।
ज्ञेयः स चित्तविक्षेपो जीवस्यास्य मृगेक्षणे ॥
तृप्तेरभावो भोगेषु भुक्तेषु सुबहुष्वपि ।
उत्तरोत्तरवाञ्छा च तृष्णा गीता मनीषिभिः ।
पापाद्भोगेषु जातेषु जातनष्टेषु वा पुनः ।
बाह्योपायेषु यो यत्नो विपर्यासः स उच्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनित्याशुचिदुःखेषु गाढं भिन्नेषु जीवतः।
विपरीता मतिस्तेषु या साविद्या प्रकीर्तिता॥
एतेषामेव वस्तूनां सर्वेषां यः प्रवर्तकः।
एतैरेव च यो जन्यो महामोहः स गीयते॥
तदेवं भिन्नरूपाणि तानि सर्वाणि सुन्दरि।
महानद्यादिवस्तूनि चिन्तनीयानि यत्नतः॥
प्राहागृहीतसङ्केता चारु चारु निवेदितम्।
सत्यं प्रज्ञाविशालासि नास्ति मे संशयोऽधुना॥
तत्तिष्ठ त्वं विशालाक्षि साम्प्रतं विगतः श्रमः।
निवेदयतु संसारिजीव एव ततः परम्॥
नरवाहनराजाय यद्विचक्षणसूरिणा।
निवेदितं प्रकर्षाय विमर्शेन च धीमता॥
ततः संसारिजीवेन प्रोक्तं विमललोचने।
निवेदयाम्यहं तत्ते विमर्शेन यदीरितम्॥
ततः प्रोक्तं विमर्शेन भद्र ज्ञातो यदि त्वया।
महानद्यादिभावार्थस्ततोऽन्यत्किं निवेद्यताम्॥
प्रकर्षः प्राह मे माम नामतो गुणतोऽधुना।
महामोहनरेन्द्रस्य परिवारं निवेदय॥
या चेयं दृश्यते स्थूला राजविष्टरसंस्थिता।
एषा किंनामिका ज्ञेया किंगुणा वा वराङ्गना॥
विमर्शः प्राह नन्वेषा प्रसिद्धा गुणशङ्करा।
भो महामूढता नाम भार्यास्य पृथिवीपतेः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चन्द्रिकेव निशानाथे स्वप्रभेव दिवाकरे।
एषा देवी नरेन्द्रेऽस्मिन् देहाभेदेन वर्तते॥
अत एव गुणा येऽस्य वर्णिता भद्र भूपतेः।
ज्ञेयास्त एव निःशेषास्त्वयामुष्या विशेषतः॥
प्रकर्षः प्राह यद्येवं ततोऽतिनिकटे स्थितः।
महाराजाधिराजस्य कृष्णवर्णः सुभीषणः॥
निरीक्षमाणो निःशेषं राजकं वक्रचक्षुषा।
य एष दृश्यते सोऽयं कतमो माम भूपतिः॥
विमर्शः प्राह विख्यातो राज्यसर्वस्वनायकः।
मिथ्यादर्शननामायं महामोहमहत्तमः॥
अनेन तन्स्थितं राज्यं वहत्यस्य महीपतेः।
बलसम्पादकोऽत्यर्थममीषामेष भूभुजाम्॥
अत्रैव संस्थितो भद्र निजवीर्येण देहिनाम्।
यदेष वहिरङ्गानां कुरुते तन्निबोध मे॥
अदेवे देवसङ्कल्पमधर्मे धर्ममानिताम्।
अतत्त्वे तत्त्वबुद्धिं च विधत्ते सुपरिस्फुटम्॥
अपात्रे पात्रतारोपमगुणेषु गुणग्रहम्।
संसारहेतौ निर्वाणहेतुभावं करोत्ययम्॥

तथाहि।

हसितोद्गीतविब्बोकनाट्याटोपपरायणाः।
हताः कटाक्षविक्षेपैर्नारीदेहार्धधारिणः॥
कामान्धाः परदारेषु सक्तचित्ता क्षतत्रपाः।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सक्रोधाः सायुधा घोरा वैरिमारणतत्पराः ॥
शापप्रसाद्योगेन लसचि + + + + + ।
ईदृशा भो महादेवा लोकेऽनेन प्रतिष्ठिता. ॥
ये वीतरागाः सर्वज्ञा ये शाश्वतसुखेश्वराः ।
क्लिष्टकर्मकलातीता निष्कलाश्च महाधियः ॥
शान्तक्रोधा गताटोपा हास्यस्त्रीहेतिवर्जिताः ।
आकाशनिर्मला धीरा भगवन्तः सदाशिवाः ॥
शापप्रसादनिर्मुक्तास्तथापि शिवहेतवः ।
त्रिकुटि शुद्धशास्त्रार्थदेशकाः परमेश्वराः ॥
ये पूज्याः सर्वदेवानां ये ध्येयाः सर्वयोगिनाम् ।
ये चाज्ञाकरणाराध्या निर्द्वन्द्वफलदायिनः ॥
++ +++++ न लोकेऽनेन स्ववीर्यतः ।
देवाः प्रच्छादिता भद्र न ज्ञायन्ते विशेषतः ॥

तथा ।

हिरण्यदानं गोदानं धरादानं मुहुर्मुहुः ।
स्नानं पानं च धूमस्य पञ्चाग्नितपनं तथा ॥
तर्पणं चण्डिकादीनां तीर्थान्तरनिपातनम् ।
यतेरेकगृहे पिण्डो गीतवाद्ये महादरः ॥
वापीकूपतडागादिकारणं च विशेषतः ।
यागे मन्त्रप्रयोगेण मारणं पशुसंहतेः ॥
कियन्तो वा भणिष्यन्ते भूतमर्दनहेतवः ।
रहिता शुद्धभावेन ये धर्माः केचिदीदृशाः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वेऽपि वञ्चिनानेन मुग्धलोके प्रपञ्चतः ।
ते मिथ्यादर्शनाङ्केन भद्र ज्ञेयाः प्रवर्तिताः ॥
क्षान्तिमार्दवसन्तोषशौचार्जवविमुक्तयः ।
तपःसंयमसत्यानि ब्रह्मचर्यं शमो दमः ॥
अहिंसास्तेयसद्ध्यानवैराग्यगुरुभक्तयः ।
अप्रमादसदैकाग्र्यनैर्ग्रन्थ्यपरतादयः ॥
ये चान्ये चित्तनैर्मल्यकारिणोऽमृतसन्निभाः ।
सद्धर्मा जगदानन्दहेतवो भवसेतवः ॥
तेषामेष प्रकृत्यैव महामोहमहत्तमः ।
भवेत्प्रच्छादनो लोके मिथ्यादर्शननामकः ॥

तथा ।

श्यामाकतण्डुलाकारस्तथा पञ्चधनुःशतः ।
एको नित्यस्तथा व्यापी सर्वस्य जगतो विभुः ॥
क्षणसन्तानरूपो वा ललाटस्थो हृदिस्थितः ।
आत्मेति ज्ञानमात्रं वा शून्यं वा सचराचरम् ॥
पञ्चभूतविवर्तो वा ब्रह्मोप्तमिति वाखिलम् ।
देवोप्तमिति वा ज्ञेयं महेश्वरविनिर्मितम् ॥
प्रमाणबाधितं तत्त्वं यदेवंविधमञ्जसा ।
सद्बुद्धिं कुरुते तत्र महामोहमहत्तमः ॥
जीवाजीवौ तथा पुण्यपापासंवरनिर्जराः ।
आस्रवो बन्धमोक्षौ च तत्त्वमेतन्नवात्मकम् ॥
सत्यं प्रतीतितः सिद्धं प्रमाणेन प्रतिष्ठितम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि निह्नुते भद्र तदेष जनदारुणः ॥

तथा ।

गृहिणो ललनावाच्यमर्दका भूतघातिनः ।
असत्यमन्त्राः पापिष्ठाः सङ्ग्रहोपग्रहे रताः ॥
तथान्ये पचने नित्यमासक्ताः पाचनेऽपि च ।
मद्यपाः परदारादिसेविनो मार्गदूषकाः ॥
तप्तायोगोलकाकारास्तथापि यतिरूपिणः ।
ये तेषु कुरुते भद्र पात्रबुद्धिमयं जने ॥
सज्ज्ञानध्यानचारित्रतपोवीर्यपरायणाः ।
गुणरत्नधना धीरा जङ्गमाः कल्पपादपाः ॥
संसारसागरोत्तारकारिणो दानदायिनाम् ।
अचिन्त्यवस्तुबोहित्थतुल्या ये पारगामिनः ॥
तेषु निर्मलचित्तेषु पुरुषेषु जडात्मनाम् ।
एषोऽपात्रधियं धत्ते महामहोमहत्तमः ॥

तथा ।

कौतुकं कुहकं मन्त्रमिन्द्रजालं रसक्रियाम् ।
निर्विषीकरणं तन्त्रमन्तर्धानं सविस्मयम् ॥
औत्पातमान्तरिक्षं च दिव्यमाङ्गं स्वरं तथा ।
लक्षणं व्यञ्जनं भौमं निमित्तं च शुभाशुभम् ॥
उच्चाटनं सविद्वेषमायुर्वेदं सजातकम् ।
ज्योतिषं गणितं चूर्णं योगलेपास्तथाविधाः ॥
ये चान्ये विस्मयकरा विशेषाः पापशास्त्रजाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्ये भूतोपमर्दस्य हेतवः शाठ्यकेतवः ॥
तानेव ये विजानन्ति निःशङ्काश्च प्रयुञ्जते ।
न धर्मबाधां मन्यन्ते शठाः पापपरायणाः ॥
त एव गुणिनो धीरास्ते पूज्यास्ते मनस्विनः ।
त एव धीरास्ते लाभभाजिनस्ते मुनीश्वराः ॥
इत्येवं निजवीर्येण बहिरङ्गजनेऽमुना ।
मिथ्यादर्शनसंज्ञेन भद्र पापाः प्रकाशिताः ॥
ये पुनर्मन्त्रतन्त्रादिवेदिनोऽप्यतिनिःस्पृहाः ।
निवृत्ता लोकयात्राया धर्मातिक्रमभीरवः ॥
मूकान्धाः परवृत्तान्ते स्वगुणाभ्यासने रताः ।
असक्ता निजदेहेऽपि किं पुनर्द्रविणादिके ॥
कोपाहंकारलोभाद्यैर्दूरतः परिवर्जिताः ।
तिष्ठन्ति शान्तव्यापारा निरपेक्षास्तपोधनाः ॥
न दिव्यादिकमाख्यान्ति कुहकादि न कुर्वते ।
मन्त्रादीन्नानुतिष्ठन्ति निमित्तं न प्रयुञ्जते ॥
लोकोपचारं निःशेषं परित्यज्य यथासुखम् ।
स्वाध्यायध्यानयोगेषु सक्तचित्ताः सदासते ॥
ते निर्गुणा अलोकज्ञा विमूढा भोगवर्जिताः ।
अपमानहता दीना ज्ञानहीनाश्च कुर्कुटाः ॥
इत्येवं निजवीर्येण बहिरङ्गजनेऽमुना ।
ते मिथ्यादर्शनाक्रेन ख्यापिता भद्र साधवः ॥

तथा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उद्वाहनं च कन्यानां जननं पुत्रसंहतेः ।
निपातनं च शत्रूणां कुटुम्बपरिपालनम् ॥
यदेवमादिकं कर्म घोरसंसारकारणम् ।
तद्धर्म इति संस्थाप्य दर्शितं भवतारणम् ॥
यः पुनर्ज्ञानचारित्रदर्शनाढ्यो विमुक्तये ।
मार्गः सर्वोऽपि सोऽनेन लोपितो लोकवैरिणा ॥
ततश्च भद्र यत्तुभ्यं समासेन मयोदितम् ।
वीर्यं महत्तमस्यास्य ब्रुवाणेन पुरा यथा ॥
अदेवे देवसङ्कल्पमधर्मे धर्ममानिताम् ।
अतत्त्वे तत्त्वबुद्धिं च करोत्येष जडात्मनाम् ॥
अपात्रे पात्रतारोपमगुणेषु गुणग्रहम् ।
संसारहेतौ निर्वाणहेतुभावं करोत्ययम् ।
तदिदं लेशतः सर्वं प्रविवेच्य निवेदितम् ।
विस्तरेण पुनर्वीर्यं कोऽस्य वर्णयितुं क्षमः ॥
अन्यच्चायं निजे चित्ते मन्यते भद्र सर्वदा ।
मदोद्धतः प्रकृत्यैव महामोहमहत्तमः ॥
निक्षिप्तभर एवायं राज्यसर्वस्वनायकः ।
महामोहनरेन्द्रेण कृतः सर्वत्र वस्तुनि ॥

एवं च स्थिते ।

विश्रम्भार्पितचित्ताय मयास्मै हितमुच्चकैः ।
अन्यव्यापारशून्येन कर्तव्यं ननु सर्वदा ॥

ततश्च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मण्डपं चित्तविक्षेपं तृष्णानाम्नीं च वेदिकां ।
गाढं समारयत्येष विपर्यासं च विष्टरम् ॥
समारितानि चानेन यदेतानि वहिर्जने ।
कुर्वन्ति तदहं वच्मि समाकर्णय साम्प्रतम् ॥
यदुन्मत्तग्रहग्रस्तसन्निभो भद्र सर्वदा ।
जनो दोलायतेऽत्यर्थं धर्मबुड्या वराककः ॥

कथम् ।

करोति भैरवे पातं याति मूढो महापथम् ।
शीतेन म्रियते माघे कुर्वाणो जलगाहनम् ॥
पञ्चाग्नितपने रक्तो दह्यते तीव्रवह्निना ।
गवाश्वत्यादिवन्दारुरास्फोटयति मस्तकम् ॥
कुमारीब्राह्मणादीनामतिदानेन निर्धनः ।
सहते दुःखसङ्घातं श्राद्धः पूतमलः किल ॥
परित्यज्य धनं गेहं बन्धुवर्गं च दुःखितः ।
अटाय्यते विदेशेषु तीर्थयाचाभिलाषुकः ॥
पितृतर्पणकार्येण देवाराधनकाम्यया ।
निपातयति भूतानि विधत्ते च धनव्ययम् ॥
मांसैर्मद्यैर्धनैः खाद्यैर्भक्तिनिर्भरमानसः ।
तप्तायोगोलकाकारं ततस्तर्पयते जनम् ॥
हास्यं विवेकिलोकस्य धर्मबुड्या विनाटितः ।
इत्येवमादिकं धर्मं करोत्येष पृथग्जने ॥
न लक्षयति शून्यात्मा भूतमर्दं सुदारुणम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नात्मनो दुःखमज्ञातं हास्यं नापि धनव्ययम् ॥
रागद्वेषादिजातस्य स्वपापस्य विशुद्धये ।
एवं च घटते लोकस्तत्त्वमार्गाद्बहिष्कृतः ॥
धर्मोपायमजानानः कुरुते जीवमर्दनम् ।
प्राप्नोति करभं नैव रासभं दामयत्ययम् ॥
तिला भस्मीकृता वह्नौ दग्धं पेयं तवेत्यहो ।
धनमुद्दालितं धूर्तैर्जनस्तु हृदि भावितः ॥
न च मन्मार्गवक्तारः पूत्कुर्वन्तोऽप्यनेकधा ।
लोकेनानेन गण्यन्ते प्रोच्यन्ते च विमूढकाः ॥
तदिदं भद्र निःशेषं मिथ्यादर्शनसंज्ञिना ।
अमुना संस्कृतस्यास्य मण्डपस्य विजृम्भितम् ॥
यत्पुनर्म्रियमाणोऽपि लोकोऽयं नैव मुञ्चति ।
भद्र कामार्थलाम्पट्यं नानाकारैर्विडम्बनैः ॥

कथम् ।

अप्सरोर्थं करोत्येष नन्दाकुण्डप्रवेशनम् ।
पत्युः सङ्गमनार्थं च दहत्यात्मानमग्निना ॥
स्वर्गार्थं भूतिकामेन पुत्रस्वजनकाम्यया ।
अग्निहोत्राणि यागांश्च कुरुतेऽन्यच्च तादृशम् ॥
दानं ददाति चाशास्ते भूयादेतन्मृतस्य मे ।
आशास्ते क्लेशनिर्मुक्तं न फलं मोक्षलक्षणम् ॥
यत्किंचित्कुरुते कर्म तन्निदानेन दूषितम् ।
अर्थकामप्रदं मेऽदः परलोके भविष्यति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदस्य सकलस्येयं मिथ्यादर्शनसंज्ञिता।
वृत्तान्तस्येह हृष्णाख्या वेदिका भद्र कारणम् ॥
यत्पुनर्भद्र लोकोऽयं दिङ्मूढ इव मानवः।
शिवं गन्तुमनास्तूर्णं विपरीतः पलायते ॥

कथम्।

देवं विगर्हते मूढः सर्वज्ञं सर्वदर्शिनम्।
वेदाः प्रमाणमित्येवं भाषते निष्प्रमाणकम् ॥
धर्मंच दूषयत्येष जडोऽहिंसादिलक्षणम्।
प्रख्यापयति यत्नेन यागं पशुनिवर्हणम् ॥
जीवादितत्त्वं मोहेनापकृतेऽलीकपण्डितः।
संस्थापयति शून्यं वा पञ्चभूतात्मकादि वा ॥
ज्ञानादिनिर्मलं पात्रं निन्दत्येष जडात्मकः।
सर्वारम्भप्रवृत्तेभ्यो दानमुच्चैः प्रयच्छति ॥
तपः क्षमा निरीहत्वममून् दोषांश्च मन्यते।
शाक्यमुत्कापिशाचत्वं षिङ्गत्वं मनुते गुणान् ॥
शुभ्रं ज्ञानादिकं मार्गं मन्यते धूर्तकल्पितम्।
कौलमार्गादिकं मूढो मनुते शिवकारणम् ॥
कलयत्यतुलं धर्मं विशेषेण गृहाश्रमम्।
निःशेषद्वन्द्वविच्छेदां गर्हते यतिरूपताम् ॥
तदनेनात्र रूपेण मिथ्यादर्शनसंज्ञितम्।
लोके भो विलसत्येतद्विपर्यासाख्यविष्टरम् ॥
अन्यच्चास्यैव सामर्थ्याल्लोकाध्वान्तवशंगताः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदन्यदपि कुर्वन्ति भद्र तत्ते निवेदये ॥
जराजीर्णकपोला ये हास्यप्रायाश्च योषिताम्।
वलीपलितखालित्यपिसुव्यङ्गादिदूषिताः ॥
तेऽपि त्रपन्ते जरसा विकाररसनिर्भराः।
कथयन्त्यात्मनो जन्म गाढमित्वरकालिकम् ॥
अनेकद्रव्ययोगैश्च कार्ष्ण्यसम्पत्तये किल।
तमसेव महार्देन रञ्जयन्ति शिरोरुहान् ॥
जनयन्ति रुजां देहे नानास्वेदैर्मुहुर्मुहुः।
तथा कपोलशैथिल्यं यत्नतश्छादयन्ति ते ॥
भ्रमन्ति विकटं मूढास्तरुणा इव लीलया।
वयःस्तम्भनिमित्तं च भक्षयन्ति रसायनम् ॥
स्वच्छायां दर्पणे बिम्बं निरीक्षन्ते जलेषु च।
क्लिश्यन्ते राढया नित्यं देहमण्डनतत्पराः ॥
आहूतास्तात तातेति ललनाभिस्तथापि ताः।
पितामहसमाः सन्तः कामयन्ते विमूढकाः ॥
सर्वस्य प्रेरणाकाराः सन्तोऽपि नितरां पुनः।
कुर्वन्तो हास्यविब्बोकान् गाढं गच्छन्ति हास्यताम् ॥
जराजीर्णशरीराणां येषामेषा विडम्बना।
ते भद्र सति तारुण्ये कीदृशाः सन्तु जन्तवः ॥
श्लेष्मान्त्रक्लेदजाम्बालपूरिते ते कडेवरे।
आसक्तचित्ताः खिद्यन्ते यावज्जीवं वराककाः ॥
अनन्तभवकोटीभिर्लब्धं मानुष्यकं भवम्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृथा कुर्वन्ति निर्ह्रीका धर्मसाधनवर्जिताः ॥
आयतिं न निरीक्षन्ते देहतत्त्वं न जानते ।
आहारनिद्राकामार्त्तास्तिष्ठन्ति पशुसन्निभाः ॥
ततस्तेषामपारेऽत्र पतितानां भवोदधौ ।
निर्नष्टशिष्टचेष्टानां पुनरुत्तरणं कुतः ॥
तदनेनापि रूपेण मिथ्यादर्शनसंस्कृतम् ।
इदं विजृम्भते भद्र विपर्यासाख्यमासनम् ॥

अन्यच्च ।

प्रशमानन्दरूपेषु भावेषु नियमादिषु ।
वशेनास्य भवेद्भद्र दुःखबुद्धिर्जडात्मनाम् ॥
गत्वरेषु सुतुच्छेषु दुःखरूपेषु देहिनाम् ।
भोगेषु सुखबुद्धिः स्यादासनस्यास्य तेजसा ॥
तथैष भुवनस्यान्तः प्रधानोऽत्र महाबलः ।
बहिरङ्गजनस्योच्चैः सर्वानर्थविधायकः ॥
मया भद्र समासेन मिथ्यादर्शननामकः ।
महामोहनरेन्द्रस्य कथितस्ते महत्तमः ॥

ततः प्रकर्षो हृष्टात्मा श्रुत्वा मातुलभाषितम् ।
उत्क्षिप्य दक्षिणं पाणिं तं प्रतीदमभाषत ॥
चारु चारु कृतं माम यदेष कथितस्त्वया ।
या त्वेषार्धासनेऽस्यैव सा किंनाम्नी वराङ्गना ॥
विमर्शोऽवददेषापि समानफलसाहसा ।
अस्यैव भार्या विज्ञेया कुदृष्टिर्नाम विश्रुता ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ये दृश्यन्ते विमार्गस्था बहिरङ्गजने सदा ।
भद्र पाषण्डिनः केचित्तेषामेषैव कारणम् ॥
ते चामी नामभिर्भद्र वर्ण्यमाना मया स्फुटम् ।
ज्ञेया देवादिभेदेन विभिन्नाश्च परस्परम् ॥

तद्यथा ।

शाक्यास्त्रैदण्डिकाः शैवाः गौतमाश्चरकास्तथा ।
सामानिकाः सामपरा वेदधर्माश्च धार्मिकाः ॥
आजीविकास्तथा शुद्धा विद्युद्दन्ताश्च चुञ्चुणाः ।
माहेन्द्राश्चारिका धूमा बद्धवेषाश्च खुंखुकाः ॥
उल्काः पाशुपताः कौलाः काणादाश्चर्मखण्डिकाः ।
सयोगिनस्तथोलूका गोदेहा यज्ञतापसाः ॥
घोषपाशुपताश्चान्ये कन्दच्छेदा दिगम्बराः ।
कामर्दकाः कालमुखाः पाणिलेहास्त्रिराशिकाः ॥
कापालिकाः क्रियावादा गोव्रता मृगचारिणः ।
लोकायताः शङ्खधमाः सिद्धवादाः कुलंतपाः ॥
तापसा गिरिरोहाश्च शुचयो राजपिण्डकाः ।
संसारमोचकाश्चान्ये सर्वावस्थास्तथा परे ॥
अज्ञानवादिनो ज्ञेयास्तथा पाण्डुरभिक्षवः ।
कुमारव्रतिकाश्चान्ये शरीररिपवस्तथा ॥
उत्कंदाश्चक्रवालाश्च त्रपवो हस्तितापसाः ।
चित्तदेवा बिलावासास्तथा मैथुनचारिणः ॥
अम्बरा असिधाराश्च तथा माठरपुत्रकाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चन्द्रोद्गमिकाश्चान्ये तथैवोदकमृत्तिकाः॥
एकैकस्थालिका मंखाः पचापचा गजध्वजाः।
उलूकपचा माचादिभक्ताः कण्टकमर्दकाः॥
कियन्तो वात्र गद्यन्ते नानाभिप्रायसंस्थिताः।
पाषण्डिनो भवन्त्येते भो नानाविधनामकाः॥
देवैर्वादैस्तथा वेषैः कल्पैर्मोचविशुद्धिभिः।
वृत्तिभिश्च भवन्त्येते भिन्नरूपाः परस्परम्॥

तथा हि।

रुद्रेन्द्रचन्द्रनागेन्द्रबुद्धोपेन्द्रविनायकाः।
निजाकूतवशादेतैरिष्टादेवाः पृथक् पृथक्॥
ईश्वरो नियतिः कर्म स्वभावः काल एव वा।
जगत्कर्तेति वादोऽयं सर्वेषां भिन्नरूपकः॥
त्रिदण्डकुण्डिकामुण्डवल्कचीवरभेदतः।
वेषः परस्परं भिन्नः स्फुट एवोपलक्ष्यते॥
कल्पोऽपि भक्ष्याभक्ष्यादिलचणः स्वधिया किल।
अन्योन्यं भिन्न एवैषां तीर्थिनां भद्र वर्तते॥
विध्यातदीपरूपाभः सुखदुःखविवर्जितः।
एषां पाषण्डिनां भद्र मोचो भिन्नः परस्परम्॥
निजाकूतवशेनैव विशुद्धिरपि तीर्थिकैः।
अमीभिर्भद्र सत्त्वानां भिन्नरूपा निवेदिता॥
कन्दमूलफलाहाराः केचिद्धान्याशिनोऽपरे।
वृत्तितोऽपि विभिद्यन्ते ततस्ते भद्र तीर्थिकाः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं च स्थिते ।

अमी वराकाः सर्वेऽपि डोलायन्ते भवोदधौ ।
अस्याः कुदृष्टेर्वीर्येण शुद्धधर्मवहिष्कृताः ॥
तत्त्वमार्गमजानन्तो विवदन्ते परस्परम् ।
स्वाग्रहं नैव मुञ्चन्ति रुष्यन्ति हितभाषिणे ॥
तदेषा भुवनख्याता मिथ्यादर्शनवत्सला ।
कुदृष्टिर्विलसत्येव वहिरङ्गजनाहिता ॥
यस्त्वेष विष्टरे तुङ्गे निविष्टः प्रविलोक्यते ।
प्रसिद्ध एव भद्रस्य स नूनं रागकेसरी ॥
एनं राज्ये निधायोच्चैर्महामोहनराधिपः ।
गतचिन्ताभरो नूनं कृतार्थो वर्ततेऽधुना ॥
केवलं दत्तराज्येऽपि महामोहनरेश्वरे ।
सविशेषं करोत्येष विनयं नयपण्डितः ॥
महामोहनरेन्द्रोऽपि सर्वेषामग्रतः स्फुटम् ।
अस्यैव भोः सुपुत्रस्य प्रभुत्वं ख्यापयत्यलम् ॥
तदेवं स्नेहसंबद्धौ पितापुत्रौ परस्परम् ।
एतावेव वशीकर्तुं क्षमौ भद्र जगत्त्रयम् ॥
यावद्विप्रतपत्येष नरेन्द्रो रागकेसरी ।
वहिरङ्गजने तावत्कीतस्त्यः सुखसङ्गमः ॥
यतोऽयं भद्र संसारसागरोदरवर्तिषु ।
वहिर्लोके पदार्थेषु प्रीतिमुत्पादयत्यलम् ॥
संक्लिष्टपुण्यजन्येषु संक्लिष्टेषु स्वरूपतः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संक्लेशजनकेष्वेव संबध्नाति पृथग्जनम् ॥
अन्यच्च भद्र पार्श्वस्थं यदस्य पुरुषत्रयम्।
रक्तवर्णमतिस्निग्धदेहं च प्रविभाव्यते ॥
एते हि निजवीर्येण शरीरादविभेदिनः।
अनेन विहिता भद्र त्रयोऽप्यात्मवयस्यकाः ॥
अतत्त्वाभिनिवेशाख्यः प्रथमोऽयं नरोत्तमः।
दृष्टिराग इति प्रोक्तः स एवापरसूरिभिः ॥
अयं हि भद्र तीर्थ्यानामात्मीयात्मीयदर्शने।
करोति चेतसोऽत्यन्तमाबन्धमनिवर्तकम् ॥
द्वितीयो भवपाताख्यः पुरुषो भद्र गीयते।
अयमेवापरैः प्राज्ञैः स्नेहराग इतीरितः ॥
अयं तु कुरुते द्रव्यपुत्रस्वजनसन्ततौ।
मूर्छातिरेकतो भद्र चेतसो गाढबन्धनम् ॥
अभिष्वङ्गाभिधानोऽयं तृतीयः पुरुषः किल।
गीतो विषयरागाख्यः स एव मुनिपुङ्गवैः ॥
अयं तु भद्र लोके ऽत्र भ्रमन्नुद्दामलीलया।
शब्दादिविषयग्रामे लौल्यमुत्पादयत्यलम् ॥
नरत्रयस्य सामर्थ्यादस्य भद्र जगत्त्रयम्।
आक्रान्तमेव मन्येऽहं रागकेसरिणा पुनः ॥
सन्मार्गमत्तमातङ्गकुम्भनिर्भेदनक्षमः।
स्ववीर्याक्रान्तभुवनः सत्योऽयं रागकेसरी ॥
या त्वेषा दृश्यते भद्र निविष्टास्यैव विष्टरे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्यैव भार्या सा ज्ञेया मूढता लोकविश्रुता ॥
ये केचिदस्य विद्यन्ते गुणा भद्र महीपतेः।
तस्यां सर्वे सुभार्यायां विज्ञेयाः सुप्रतिष्ठिताः ॥
यतः शरीरनिच्छिन्नां पार्वतीमिव शङ्करः।
एनामेष सदा राजा धारयत्येव मूढताम् ॥

ततश्च।

अन्योन्यानुगतो नित्यं यथा देहस्तथानयोः।
अविभक्ता विवर्तन्ते गुणा अपि परस्परम् ॥
यस्त्वेष वामके पार्श्वे निविष्टोऽस्यैव भूपतेः।
भद्र द्वेषगजेन्द्रोऽसौ प्रतीतः प्रायशस्तव ॥
अत्रापि च महामोहनरेन्द्रस्य सुतोत्तमे।
चित्तं विश्रान्तमेवोच्चैर्गुणाः कल्याणकारकाः ॥

यतः।

जन्मना लघुरप्येष रागकेसरिणोऽधुना।
वीर्येणाभ्यधिको लोके नरेन्द्रो भद्र वर्तते ॥

तथा हि।

न भयं यान्ति दृष्टेन रागकेसरिणा जनाः।
दृष्ट्वा द्वेषगजेन्द्रं तु जायन्ते भीतकम्पिताः ॥
यावदेष महावीर्यश्चित्ताटव्यां विजृम्भते।
बहिरङ्गजने तावत्कीतस्यः प्रीतिसङ्गमः ॥
येऽत्यन्तसुहृदो लोकाः स्नेहनिर्भरमानसाः।
तेषामेष प्रकृत्यैव चित्तविश्लेषकारकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चित्तवृत्तिमहाटव्यां चलत्येष यदा यदा ।
तदा तदा भवन्त्येव जनास्तेऽत्यन्तदुःखिताः ॥
परलोके पुनर्यान्ति नरके तीव्रवेदने ।
आबद्धमत्सरा वैरं प्रविधाय परस्परम् ॥
भद्र द्वेषगजेन्द्रोऽयं यथार्थो नात्र संशयः ।
यस्य गन्धेन भज्यन्ते विवेकाः कलभा इव ॥
या तस्य भार्या तदात्र्ता शोकेनैव निवेदिता ।
अत एव न पार्श्वस्था दृश्यते सा विवेकिता ॥
[प्रकर्षः प्राह यस्त्वेष निविष्टस्तुङ्गविष्टरे ।
नरत्रयपरीवारः पृष्ठतोऽस्यैव भूपतेः ॥
रक्तवर्णोऽतिलोलाक्षो विलासोल्लासतत्परः ।
पृष्ठापीडिततूणीरः सचापः पञ्चबाणकः ॥
भ्रमद्भ्रमरझङ्कारहारिगीतविनोदितः ।
विलसद्रीमिलावण्यवर्ण्यया वरयोषिता ॥
अस्या एव तनुश्लेषवक्त्रचुम्बनलालसः ।
कमनीयाकृतिः सोऽयं कतमो माम भूपतिः ॥
विमर्शः प्राह नन्वेष महाश्चर्यविधायकः ।
उद्दामपौरुषो लोके प्रसिद्धो मकरध्वजः ॥
यद्येषोऽद्भुतकर्तव्यो भवता नावधारितः ।
न किंचिदपि विज्ञातं भद्राद्यापि ततस्त्वया ॥
यो भद्र श्रूयते लोके परमेष्ठी पितामहः ।
सोऽनेन कारितो गौरीविवाहे बालविप्लवम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स एव चाप्सरोनृत्तरूपविच्छिन्नमानसः ।
अनेनैव कृतो भद्र पञ्चवक्त्रधरः किल ॥
यो लोके जगतो व्यापी श्रूयते किल केशवः ।
अनेन कारितः सोऽपि गोपीनां पादवन्दनम् ॥
अन्यच्च भद्र सोऽनेन सुप्रसिद्धो महेश्वरः ।
दापितोऽर्धं शरीरस्य गौर्यै विरहकातरः ॥
उल्लासितबृहल्लिङ्गः स एव सुरकानने ।
तद्भार्याक्षोभणे रक्तस्तथानेन विनाटितः ॥
उत्पाद्य सुरते तृष्णां स एवानेन धारितः ।
दिव्यं वर्षसहस्रं भो रतस्थ इति गीयते ॥
अन्येऽपि बहवो लोके मुनयो देवदानवाः ।
वशीकृत्य कृताः सर्वे भद्रानेनात्मकिङ्कराः ॥
कोऽस्य लङ्घयितुं शक्तो नूनमाज्ञां जगत्त्रये ।
आत्मभूतं महावीर्यं यस्येदं पुरुषत्रयम् ॥
अयं हि प्रथमो भद्र पुरुषोऽनघपौरुषः ।
नाम्ना विज्ञाततद्वीर्यैः पुंवेद इति गीयते ॥
अमुष्य तात वीर्येण बहिरङ्गा मनुष्यकाः ।
पारदार्ये प्रवर्तन्ते जायन्ते कुलदूषणाः ॥
द्वितीयः पुरुषो ह्येष स्त्रीवेद इति सूरिभिः ।
व्यावर्णितो महातेजा व्याप्तभुवनोदरः ॥
अस्य धाम्ना पुनस्तात योषितो विगतत्रपाः ।
विलंघ्य कुलमर्यादां रज्यन्ते परपूरुषे ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तृतीयः पुरुषो भद्र षण्ढवेद इति स्मृतः
येन दन्दह्यते लोको बहिरङ्गः स्वतेजसा ॥
आलप्यालमिदं तावदस्य वीर्यविचेष्टितम्।
अनिवेद्यं जने येन विगुप्यन्ते नपुंसकाः ॥
एतन्नरत्रयं भद्र पुरस्कृत्य प्रवर्तते।
अविज्ञातबलोऽन्येषां नूनमेष जगत्त्रये ॥
या त्वेषा पद्मपत्राक्षी रूपसौन्दर्यमन्दिरम्।
अस्यैव वल्लभा भार्या रतिरेषाभिधीयते ॥
येऽनेन निर्जिता लोका नरवीर्यपुरःसरम्।
तेषामेषा प्रकृत्यैव सुखबुद्धिविधायिका ॥

तथाहि।

अस्या वीर्येण भो लोका दुःखिताः परमार्थतः।
तथापि तेऽदो मन्यन्ते मकरध्वजनिर्जिताः ॥

यदुत।

आह्लादजनकोऽस्माभ्यं हितोऽयं मकरध्वजः।
प्रतिकूला पुनर्येऽस्य कुतस्तेषां सुखोद्भवः ॥
ततो रत्यानया भद्र ते वशीकृतमानसाः।
जाता निर्मिथ्यभावेन मकरध्वजकिङ्कराः ॥
तदादेशेन कुर्वन्ति हास्यस्थानं विवेकिनाम्।
आत्मनः सततं मूढा नानारूपं विडम्बनम् ॥

कथम्।

रचयन्त्यात्मनो वेषं योषितां चित्तरञ्जनम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आचरन्ति च मोहेन देहे भूषणविभ्रमम् ॥
तुष्यन्ति कामिनीलोललोचनार्धविलोकिताः ।
वहन्ति हृदये प्रीतिं तदालापैर्मनोरमैः ॥
भ्रमन्ति विकटैः पादैरुन्नामितशिरोधराः ।
रामाकटाक्षविक्षिप्ताः सुभगा इति गर्विताः ॥
कुलटादृष्टिमार्गेषु तच्चित्ताक्षेपलम्पटाः ।
निष्क्रीडयन्ति मोहान्धा हस्तकान् कारणं विना ॥
इतस्ततः प्रधावन्ति दर्शयन्ति पराक्रमम् ।
तासां मनोनुकूलं हि ते किं किं यन्न कुर्वते ॥
कुर्वन्ति चाटुकर्माणि भाषन्ते किङ्करा इव ।
पतन्ति पादयोस्तासां जायन्ते कर्मकारकाः ॥
सहन्ते योषितां पादप्रहारान्मस्तकेन ते ।
मन्यमाना निजे चित्ते मोहतस्तदनुग्रहम् ॥
आस्वाद्य मद्यगण्डूषं योषावक्त्रसमर्पितम् ।
श्लेष्मोन्मिश्रं च मन्यन्ते स्वर्गादभ्यधिकं सुखम् ॥
ये नरा वीर्यभूयिष्ठा ललनाभिः स्वलीलया ।
भ्रूक्षेपेणैव कार्यन्ते तेऽशुचेरपि मर्दनम् ॥
तत्सङ्गमार्थं दह्यन्ते सुरतेषु न तोषिणः ।
दूयन्ते विरहे तासां म्रियन्ते शोकविह्वलाः ॥
अवधूताश्च खिद्यन्ते रुण्टन्ति च बहिष्कृताः ।
परस्त्रस्वनारीभिः पात्यन्ते दुःखसागरे ॥
ईर्ष्यया च वितुद्यन्ते स्वभार्यारक्षणोद्यताः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एता विडम्बना भद्र प्राप्नुवन्तीह ते भवे ॥
परलोके पुनर्यान्ति घोरे संसारनीरधौ ।
ये जाता रतिवीर्येण मकरध्वजकिङ्कराः ॥
बहवस्त्वेदृशाः प्रायो बहिरङ्गा मनुष्यकाः ।
ये त्वस्य शासनातीता विरलास्ते मनीषिणः ॥
तदयं यस्त्वया पृष्टो लेशोद्देशादसौ मया ।
परिवारयुतो भद्र वर्णितो मकरध्वजः ॥

प्रकर्षः प्राह मामेदं सुन्दरं विहितं त्वया ।
यमन्यमपि पृच्छामि सन्देहं तं निवेदय ॥
मकरध्वजपार्श्वस्थं यदिदं प्रविभाव्यते ।
किंनाम किंगुणं चेदं माम मानुषपञ्चकम् ॥
विमर्शः प्राह यस्तावदेष शुक्लो मनुष्यकः ।
स हास इति विज्ञेयो विषमोऽत्यन्तदुष्करः ॥
अयं हि कुरुते भद्र निजवीर्येण मानुषम् ।
बहिरङ्गं विना कार्यं सशब्दमुखकोटरम् ॥
किंचिन्निमित्तमासाद्य निमित्तविरहेण वा ।
स्वं वीर्यं दर्शयत्युच्चैर्येषामेष महाभटः ॥
महाकहकहध्वानैर्हसन्तः शिष्टनिन्दिताः ।
निर्वादितमुखास्तुच्छास्ते जने यान्ति लाघवम् ॥
आशङ्कायाः पदं लोके जायन्ते निर्निमित्तकम् ।
जनयन्ति परे वैरं लभन्ते वक्त्रविभ्रमम् ॥
मक्षिकामशकादीनामुपघातं च देहिनाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आचरन्ति विना कार्यं परेषां च पराभवम् ॥
तदिदं भद्र निःशेषमिह लोके विजृम्भते।
हासोऽयं परलोकेऽस्मात्कर्मबन्धः सुदारुणः ॥
अस्यस्य तुच्छता नाम सद्भार्या हितकारिणी।
देहस्थास्यैव पश्यन्ति तां भो गम्भीरचेतसः ॥
एनमुल्लासयत्येव निमित्तेन विना सदा।
हासं सा तुच्छता वत्स लघुलोके यथेच्छया ॥
यतो गम्भीरचित्तानां निमित्ते सुमहत्यपि।
मुखे विकासमात्रं स्यान्न हास्यं बहुदोषलम् ॥
या लेषा कृष्णसर्वाङ्गी गाढं बीभत्सदर्शना।
दृश्यते ललना सेयमरतिर्नाम विश्रुता ॥
किंचित्कारणमासाद्य बहिरङ्गजने सदा।
करोत्येष मनोदुःखं जृम्भमाणातिदुःसहम् ॥
यस्त्वेष दृश्यते भद्र कम्पमानशरीरकः।
पुरुषः स भयो नाम प्रसिद्धो गाढदुःसहः ॥
विलसन्नेष महाटव्यामेतस्यां किल लीलया।
बहिरङ्गजनानुच्चैः कुरुते कातराननान् ॥

कथम्।

चस्यन्तीह मनुष्यादेः कम्पन्ते पशुसंहतेः।
अर्थादिहानिं मन्वानाः पलायन्तेऽतिकातराः ॥
अकस्मादेव जायन्ते चस्तास्तरललोचनाः।
जीविष्यामः कथं चेति चिन्तया सन्ति विह्वलाः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मरिष्यामो मरिष्याम इत्येवं भावनापराः।
मुधैव जीवितं हित्वा म्रियन्ते सत्त्ववर्जिताः॥
जने च मा भूदश्लाघेत्येवं भावेन विक्लवाः।
नोचितान्यपि कुर्वन्ति कर्माणि पुरुषाधमाः॥
स एष निकटस्थायिसत्समानुषसम्पदा।
विजृम्भते भयो भद्र बहिरङ्गजने सदा॥

किं च।

पलायनं रणे दैन्यमरीणां पादवन्दनम्।
अस्यादेशेन निर्लज्जास्ते कुर्वन्ति नराधमाः॥
तदेवं भद्र लोकेऽत्र ये भयस्य वशं गताः।
विनाटिताः परत्रापि यान्ति भीमे भवोदधौ॥
अस्यापि च शरीरस्था भार्यास्ति पतिवत्सला।
संवर्धिका कुटुम्बस्य प्रोच्यते हीनसत्त्वता॥
तां हीनसत्त्वतां देहाद्भार्यामेष न मुञ्चति।
नूनं हि म्रियते भद्र भयोऽयं रहितस्तया॥
भद्र प्रत्यभिजानीषे किमेनं तु न साम्प्रतम्।
तं तत्र नगरे शोकं यमसुं द्रक्ष्यसि स्फुटम्॥
अनेनैव तदा वार्ता समस्तापि निवेदिता।
सोऽयं समागतस्तूर्णं शोको भद्र पुनर्बले॥
अपेक्ष्य कारणं किंचिदयं लोके बहिर्गते।
आविर्भूतः करोत्येत्र दैन्याक्रन्दनरोदनम्॥
इष्टैर्वियुक्ता ये लोका निमग्नाश्च महापदि।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनिष्टैः संप्रयुक्तास्तु तस्य स्युर्वशवर्तिनः ॥
न लक्षयन्ति ते मूढा यथैष रिपुरुच्चकैः।
अस्यादेशेन मुञ्चन्ति आराटीः केवलं जडाः ॥
एष शोकः क्षिलास्माकं दुःखत्राणं करिष्यति।
अयं तु वर्धयत्येव तेषां दुःखं निषेवितः ॥
न साधयन्ति ते स्वार्थं धर्माद्भ्रश्यन्ति मानवाः।
प्राणैरपि वियुज्यन्ते मूर्छासंमीलितेक्षणाः ॥
ताडनं शिरसोऽत्यर्थं लुञ्चनं कचसन्ततेः।
कुट्टनं वक्षसो भूमौ लोठनं गाढविक्लवम् ॥
तथात्मोल्लम्बनं रज्ज्वा पतनं च जलाशये।
दहनं वह्निना शैलशिखरादात्ममोचनम् ॥
भक्षणं कालकूटादेः शस्त्रेणात्मनिपातनम्।
प्रलापनमुन्मादं च वैक्लव्यं दैन्यभाषणम् ॥
अन्तस्तापं महाघोरं शब्दादिसुखवञ्चनम्।
लभन्ते पुरुषा भद्र ये शोकवशवर्तिनः ॥
इत्थं भूरितरं दुःखं प्राप्नुवन्तीह ते भवे।
कर्मबन्धं विधायोच्चैर्यान्त्यमुत्र च दुर्गतौ ॥
तदेष बहिरङ्गानां दुःखदो भद्र देहिनाम्।
किंचिल्लेशेन शोकस्ते वर्णितः पुरतो मया ॥
अस्यापि च शरीरस्था भवस्था नाम दारुणा।
विद्यते पत्निका वत्स शोकस्य गृहनायिका ॥
सास्य संवर्धिका ज्ञेया तां विना नैव जीवति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत एव शरीरस्थां धारयत्येष सर्वदा ॥
या त्वेषा दृश्यते कृष्णा भोः संकोचितनासिका ।
नारी सा सूरिभिर्भद्र जुगुप्सा परिकीर्तिता ॥
इयं तु बहिरङ्गानां लोकानां मनसोऽधिकम् ।
व्यलीकभावमाधत्ते तत्त्वदर्शनवर्जिनाम् ॥
कृमिजालोल्बणं देहं पूयक्लिन्नं मलाविलम् ।
वस्तु दुर्गन्धिबीभत्सं ते हि दृष्ट्वा कथंचन ॥
कुर्वन्ति शिरसः कम्पं नासिकाधूननं जडाः ।
दूरतः प्रपलायन्ते मीलयन्ति च लोचने ॥
ऊं ऊं ऊमिति जल्पन्ति वक्रां कुर्वन्ति कन्धराम् ।
विशन्ति शौचवादेन सचेलाः शीतले जले ॥
नासिकां कुञ्चयन्त्युच्चैर्निष्ठीवन्ति मुहुर्मुहुः ।
आश्लेषे वर्त्मचेलादेः क्रुद्धाः स्नान्ति पुनः पुनः ॥
छायामपि च नेच्छन्ति परेषां स्प्रष्टुमात्मना ।
जायन्ते शौचवादेन वेताला इव दुःखिताः ॥
चित्तशूकावशादेव साक्षादुन्मत्तका अपि ।
केचिद्भद्र प्रजायन्ते ये जुगुप्सावशं गताः ॥
परलोके पुनर्यान्ति तत्त्वदर्शनवर्जिताः ।
तमोभिभूतास्ते मूर्खा घोरसंसारचारके ॥
तदेवं बहिरङ्गानां लोकानां बहुदुःखदा ।
किंचित्ते वर्णिता भद्र जुगुप्सापि मयाधुना ॥
प्रकर्षः प्राह दृश्यन्ते यान्येतानि पुरो मया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निविष्टानि नरेन्द्राणामुत्सङ्गादिषु लीलया ॥
गाढं दुर्दान्तचेष्टानि चटुलानि विशेषतः ।
आरक्तकृष्णवर्णानि डिम्भरूपाणि षोडश ॥
अमूनि नामभिर्नाम गुणैश्च सुपरिस्फुटम् ।
अधुना वर्ण्यमानानि श्रोतुमिच्छाम्यहं त्वया ॥
विमर्शः प्राह सर्वेषामेतेषां सूरिभिः पुरा ।
सामान्यतः कषायाख्या भद्र लोके प्रकाशिता ॥
विशेषतः पुनर्भद्र यान्येतानीह वीचसे ।
महत्तमानि दृष्टानि सर्वेषामग्रतस्तथा ॥
चत्वारि गर्भरूपाणि रौद्राकाराणि भावतः ।
तान्यनन्तानुबन्धीनि गीतानि किल संज्ञया ॥
अमूनि च प्रकृत्यैव मिथ्यादर्शननामकः ।
अयं महत्तमो भद्र स्वात्मभूतानि पश्यति ॥
ततश्च बहिरङ्गानां लोकानां निजवीर्यतः ।
एतान्यपि प्रकुर्वन्ति मिथ्यादर्शनभक्तताम् ॥

यतः ।

यावदेतानि जृम्भन्ते डिम्भरूपाणि लीलया
चित्तवृत्तिमहाटव्यां तावत्ते बाह्यमानुषाः ॥
अनन्यचित्ताः सततमेनमेव महत्तमम् ।
लोकवाक्यनिराकांक्षाः सद्भक्त्या पर्युपासते ॥

अत एव च ।

चित्तवृत्तिमहाटव्यामुत्सवत्वेषु ते जनाः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न तत्त्वमार्गं भावेन प्रपद्यन्ते कदाचन ॥

एवं स्थिते ।

ये दोषा वर्णिताः पूर्वं मिथ्यादर्शनसंश्रयाः ।
बहिर्जनानां सर्वेषां तेषामेतानि कारणम् ॥
एतेभ्यो लघुरूपाणि यानि चत्वारि सुन्दर ।
अप्रत्याख्याननामानि तानि गीतानि पण्डितैः ॥
एतानि निजवीर्येण बहिरङ्गमनुष्यकान् ।
प्रवर्तयन्ति पापेषु वारयन्ति निवर्तनम् ॥

किं बहुना ।

यावदेतानि गाहन्ते चित्तवृत्तिमहाटवीम् ।
तावद्भद्र निवर्तन्ते न ते पापादणोरपि ॥
तत्त्वमार्गं प्रपद्येरन्नेतेषु विलसत्स्वपि ।
लभन्ते तद्बलात्सौख्यं विरतिं तु न कुर्वते ॥
ततस्तेऽमुत्र संतप्ता निपतन्ति परत्र च ।
विधाय पापसंघातं संसारगहने जनाः ॥
यान्येतानि पुनर्भद्र लघीयांसि ततोऽपि च ।
प्रत्याख्यावारकाणीह बुधास्तानि प्रचक्षते ॥
अमूनि किल वल्गन्ते यावदत्रैव मण्डपे ।
बहिरङ्गजनाः सर्वं तावन्मुञ्चन्त्यघं न वै ॥
किंचिन्मात्रं तु मुञ्चेयुः पापं बाह्यजनाः किल ।
चित्तवृत्तिमहाटव्यामेतेषु विलसत्सु भोः ॥
एतान्यपि स्वरूपेण तस्मात्सन्तापकारणम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहिर्जनानां कल्याणे विरतिस्तत्र कारणम् ॥
एतेभ्योऽपि लघीयांसि यान्येतानीह सुन्दर ।
वर्तन्ते गर्भरूपाणि चत्वारि तव गोचरे ॥
तानि संज्वलनाख्यानि गीतानि मुनिपुङ्गवैः ।
लीलया चटुलानीत्थमुल्लसन्ति मुहुर्मुहुः ॥
एतानि सर्वपापेभ्यो विरतानामपि देहिनाम् ।
दृष्टोल्लसन्ति कुर्वन्ति बाह्यानां चित्तविप्लवम् ॥
दूषयन्ति ततो भूयः सर्वपापनिवर्हणम् ।
ते सातिचारा जायन्ते वीर्येणैषां बहिर्जनाः ॥
न सुन्दराणि सर्वेषां तदेतान्यपि देहिनाम् ।
लघुरूपाणि दृश्यन्ते तात यद्यपि जन्तुभिः ॥
चतुष्टयानि चत्वारि तदेतानि विशेषतः ।
एतेषां नामभिर्भद्र गुणैश्च कथितानि ते ॥
प्रत्येकं यानि नामानि ये गुणाश्च विशेषतः ।
एतेषां तत्पुनर्भद्र को वा वर्णयितुं क्षमः ॥
तस्मात्ते कथयिष्यामि विस्रब्धः कुत्रचित्पुनः ।
प्रस्तावागतमेवेह वीर्यमेषां विशेषतः ॥

अन्यच्च ।

एतेषां गर्भरूपाणां मध्येऽष्टौ परया मुदा ।
यान्येतानि प्रनृत्यन्ते रागकेसरिणोऽग्रतः ॥
तान्यस्मादेव जातानि रागकेसरिणः किल ।
अत्यन्तवल्लभान्यस्य मूढतानन्दनानि च ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यानि त्वेतानि चेष्टन्ते क्रीडयाष्टौ मुहुर्मुहुः।
पुरे द्वेषगजेन्द्रस्य गर्भरूपाणि सुन्दर॥
अस्मादेव प्रसूतानि प्रियाणि द्वेषभूपतेः।
मातावि‍वेकिताभीषां सर्वेषां भद्र गीयते॥

एवं च स्थिते।

महामोहनरेन्द्रस्य यानि पौत्राणि सुन्दर।
तत्पुत्रयोरपत्यानि तात विख्यातवीर्ययोः॥
तेषाममीषां लोकेऽत्र दौर्ललित्यविराजितम्।
वीर्यं सहस्रजिह्वोऽपि को निवेदयितुं क्षमः॥
पश्य पश्यत एवैषामेतानि निजचेष्टितैः।
शीर्षे सिद्धार्थकायन्ते सर्वेषामेव भूभुजाम्॥
तदिदं ते समासेन मया तात निवेदितम्।
महामोहनरेन्द्रस्य स्वाङ्गभूतं कुटुम्बकम्॥
ये त्वमी वेदिकाभ्यर्णे विवर्तन्ते महीभुजः।
ते महामोहराजस्य स्वाङ्गभूताः पदातयः॥

तत्र च।

य एष दृश्यते भद्र रागकेसरिणोऽग्रतः।
आश्लिष्टललनो मृष्टं ताम्बूलं खादयन्नलम्॥
रणद्द्विरेफरिंछोलिसूचितोत्कटगन्धकम्।
लीलाकमलमत्यर्थमाजिघ्रंश्च मुहुर्मुहुः॥
स्वभार्यामलवक्त्राब्जे कुर्वाणो दृष्टिविभ्रमम्।
वल्लकीनूपुरारावकाकलीगीतलम्पटः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्यैवं विषयानेष पश्चापि किल लीलया ।
भुञ्जानो मन्यते सर्वमात्मनो मुष्टिमध्यगम् ॥
भद्र सोऽयमिहायाता वयं यस्य दिदृक्षया ।
रागकेसरिणो मन्त्री लोके विख्यातपौरुषः ॥
अस्यैव तानि वर्तन्ते पुत्रभाण्डानि सुन्दर ।
यानि मिथ्याभिमानेन कथितानि पुरावयोः ॥
तद्बलेन जगत्सर्वं वशीकृत्य महाबलः ।
भद्र नूनं करोत्येव चेष्टया तुल्यमात्मनः ॥

तथा हि ।

एतत्प्रयुक्तैर्यं दृष्टा मानुषैर्भद्र देहिनः ।
ते स्पर्शरसगन्धरूपशब्देषु लालसाः ॥
कार्याकार्यं न पश्यन्ति बुध्यन्ते नो हिताहितम् ।
भक्ष्याभक्ष्यं न जानन्ति धर्माधर्मबहिष्कृताः ॥
तन्मात्रलब्धसौहार्दा वर्तन्ते सार्वकालिकम् ।
नान्यत्किंचन वीक्षन्ते यथासौ वर्तते जडः ॥
दर्शनादेव निर्णीतो बुद्ध्या च परिनिश्चितः ।
रसनाजनको भद्र स एवायं न संशयः ॥
रागकेसरिणो राज्यं तन्त्रयत्यिखिलं सदा ।
परबुद्धिप्रयोगेण नैवैष प्रतिहन्यते ॥
पुरुषाः पण्डितास्तावद्बहिरङ्गा दृढव्रताः ।
यावदेष स्ववीर्येण तान्नो क्षिपति कुत्रचित् ॥
यदा पुनर्महाप्राज्ञस्तानेष सचिवः क्वचित् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आरभेत स्ववीर्येण बहिरङ्गमनुष्यकान् ॥
तदा ते निहतप्राया बालिशा इव किङ्कराः।
प्रताग्रहं विमुच्यास्य जायन्ते विगतत्रपाः ॥
वर्धयत्येष साम्राज्यमेतेषामेव भूभुजाम्।
बहिरङ्गजनस्यायममात्यो दुःखदः सदा ॥

यतः।

अस्यादेशेन कुर्वन्ति पापं ते बाह्यमानुषाः।
तच्च पापं कृतं तेषामिहामुत्र च दुःखदम् ॥
निपुणो नीतिमार्गेषु गाढं निर्व्याजपौरुषः।
भेदकः परचित्तानामुपायकरणे पटुः ॥
विदिताशेषवृत्तान्तः सन्धिविग्रहकारकः।
विकल्पबहुलो लोके सचिवो नास्त्यमूदृशः ॥
किं वात्र बहुनोक्तेन तावदेते नरेश्वराः।
यावदेष महामन्त्री तन्त्रको राज्यसन्ततेः ॥

ततः सहर्षः प्रकर्षोऽब्रवीत्। साधु माम साधु सुन्दरं निर्णीतं मामेन। न तिलतुषत्रिभागमात्रयापि चलतीदं। एवंविध एवायं विषयाभिलाषो महामन्त्री नास्त्यत्र सन्देहः।

तथा हि।

आकारदर्शनादेव ते गुणा मम मानसे।
आदावेव समारूढा येऽस्य संवर्णितास्त्वया ॥
विमर्शः प्राह नाश्चर्यं लक्षयन्ति भवादृशाः।
नराणां दृष्टमात्राणां यद्गुणागुणरूपताम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा हि ।

ज्ञायते रूपतो जातिर्जातेः शीलं शुभाशुभम् ।
शीलाद्गुणाः प्रभासन्ते गुणैः सत्त्वं महाधियाम् ॥
न केवलं त्वयास्यैव दर्शनादेव लक्षिताः ।
गुणाः किं तर्हि सर्वेषां नूनमेषां महीभुजाम् ॥
वृद्धेर्जातस्य ते भद्र किं वा स्यादविनिश्चितम् ।
यत्तु मां प्रश्नयस्येवं तात सा तेऽभिज्ञातता ॥
प्रकर्षः प्राह यद्येवं ततो माम निवेद्यताम् ।
किंनामिकेयं भार्यास्य मन्त्रिणो मुग्धलोचना ॥
विमर्शः प्राह भद्रेयं भोगतृष्णाभिधीयते ।
गुणैस्तु तुल्या विज्ञेया सर्वथास्यैव मन्त्रिणः ॥
ये त्वेते पुरतः केचित्पार्श्वतः पृष्ठतोऽपरे ।
दृश्यन्ते भूभुजो भद्र मन्त्रिणोऽस्य नताननाः ॥
दुष्टाभिसन्धिप्रमुखास्ते विज्ञेया महाभटाः ।
महामोहनरेन्द्रस्य स्वाङ्गभूताः पदातयः ॥

अन्यच्च ।

महामोहनृपस्येष्टा रागकेसरिणो मताः ।
भृत्या द्वेषगजेन्द्रस्य सर्वेऽप्येते महीभुजः ॥
अनेन मन्त्रिणादिष्टा राज्यकार्येषु सर्वदा ।
एते भद्र प्रवर्तन्ते निवर्तन्ते च नान्यथा ॥
ये केचिद्बाह्यलोकानां क्षुद्रोपद्रवकारिणः ।
अन्तरङ्गा महीपालास्तेऽमीषां मध्यवर्तिनः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नार्यो डिम्भाश्च ये केचिदन्येऽप्येवंविधा जने ।
अमीषां मध्यगाः सर्वे द्रष्टव्यास्ते महीभुजाम् ॥
तदेते परिमातीता निवेद्यन्तां कथं मया ।
संक्षेपतः समाख्याताः स्वाङ्गभूताः पदातयः ॥
प्रकर्षः प्राह ये त्वेते वेदिकाद्दारवर्तिनः ।
निविष्टा भूभुजः सप्त मास सुत्कलमण्डपे ॥
युक्ताः सत्परिवारेण नानारूपविराजिनः ।
एते किंनामका ज्ञेयाः किंगुणा वा महीभुजः ॥
विमर्शः प्राह भद्रैते सप्तापि वरभूभुजः ।
महामोहनृपस्यैव बहिर्भूताः पदातयः ॥

तत्र च ।

य एष दृश्यते भद्र संयुक्तः पञ्चभिर्नरैः ।
ज्ञानसंवरणो नाम प्रसिद्धः स महीपतिः ॥
अत्रैव वर्तमानोऽयं बहिःस्थं सकलं जनम् ।
करोत्यन्धं स्ववीर्येण ज्ञानोद्योतविवर्जितम् ॥

किं च ।

सान्द्राज्ञानान्धकारेण यतो मोहयते जनम् ।
ततोऽयं शिष्टलोकेन मोह इत्यपि कीर्तितः ॥
यस्त्वेष नवभिर्युक्तो मानुषैः प्रविभाव्यते ।
दर्शनावरणो नाम विख्यातः स महीतले ॥
दृश्यन्ते पञ्च या नार्यस्ताः स्ववीर्येण सुन्दराः ।
करोत्येष जगत्सर्वं घूर्णमानगतिक्रियम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ये त्वमी पुरुषा भद्र चत्वारोऽस्य पुरः स्थिताः।
एतत्सामर्थ्ययोगेन जगद्वश्यं करोत्ययम्॥
नरद्वयसमायुक्तो यः पुनर्भद्र दृश्यते।
स एष वेदनीयाख्यो राजा विख्यातपौरुषः॥
सातनामा प्रसिद्धोऽस्य जगति प्रथमो नरः।
करोत्याह्लादसन्दोहनन्दितं भुवनत्रयम्॥
द्वितीयः पुरुषो भद्र यस्तस्य प्रविलोक्यते।
असातनामकः सोऽयं जगत्सन्तापकारकः॥
दीर्घह्रस्वैः समायुक्तश्चतुर्भिर्डिम्भरूपकैः।
विवर्तते महीपालो यस्त्वेष तव गोचरे॥
आयुर्नामा प्रसिद्धोऽयं सर्वेषां भद्र देहिनाम्।
निजे भवे स्थितावस्थां कुरुते डिम्भतेजसा॥
द्विचत्वारिंशता युक्तो मानुषाणां महाबलः।
यस्त्वेष दृश्यते भद्र नामनामा महीपतिः॥
निजमानुषवीर्येण जगदेष चराचरम्।
विडम्बयति यत्तात तदाख्यातुं न पार्यते॥
चतुर्गतिकसंसारे नरनारकरूपताम्।
ये दधाना विवर्तन्ते पशुदेवतया परे॥
एकेन्द्रियादिभेदेन नानादेहविवर्तिनः।
नानाङ्गोपाङ्गसंबद्धाः संघातकरणोद्यताः॥
भिन्नसंहननाः सत्त्वा नानासंस्थानचारिणः।
वर्णगन्धरसस्पर्शभेदेन विविधास्तथा॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गौरवेतरहीनाश्च स्वोपघातपरायणाः ।
पराघातपराः केचिदिष्टजन्मानुपूर्विणः ॥
सदुच्छ्वासातपोद्योतविहायोगतिगामिनः ।
त्रसस्थावरभेदाश्च सूक्ष्मबादररूपिणः ॥
पर्याप्तकेतराः केचिदन्ये प्रत्येकचारिणः ।
साधारणाः स्थिराः केचित्तथान्ये स्थिररूपिणः ॥
शुभाशुभत्वं बिभ्राणाः सुभगा दुर्भगास्तथा ।
सुस्वरा दुःस्वरा लोके ये चादेया मनोहराः ॥
अनादेयाः स्ववर्गेऽपि यशःकीर्तिसमन्विताः ।
अयशःकीर्तियुक्ताश्च निर्मितात्मशरीरकाः ॥
प्रणताशेषगीर्वाणमौलिमालार्चितक्रमाः ।
ये च तीर्थकरा लोके भवन्ति भवभेदिनः ॥
निजमानुषवीर्येण सर्वमेष नराधिपः ।
तदिदं जृम्भते वत्स नामनामा महाबलः ॥
यः पुनर्भद्र भूपोऽयं वीक्षते पुरतः स्थितम् ।
आत्मभूतं महावीर्यं नीचोच्चं पुरुषद्वयम् ॥
गोत्राभिधानो विख्यातः स एष जगतीपतिः ।
देहिनां कुरुते भद्र सुन्दरेतरगोत्रताम् ॥
नरपञ्चकसेव्योऽयं यः पुनः प्रविभाव्यते ।
अन्तराय इति ख्यातः स तात वरभूपतिः ॥
अयं तु नरवीर्येण कुरुते सर्वदेहिनाम् ।
दानभोगोपभोगाप्तिवीर्यविघ्नं नराधिपः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदेते कथितास्तात नामभिर्गुणलेशतः ।
सप्तापि भूभुजस्तुभ्यं समासेन मयाधुना ॥
वीर्यवक्तव्यतामेषां विस्तरेण पुनर्यदि ।
वर्णयामि ततोऽत्येति तत्रैव मम जीवितम् ॥
तदेवमतिगम्भीरं श्रुत्वा मातुलजल्पितम् ।
प्रकर्षो हृष्टचित्तत्वादिदं वचनमब्रवीत् ॥
चारु माम कृतं चारु मोचितो मोहपञ्जरात् ।
एतेषां वर्णनं राज्ञां कुर्वतैवमहं त्वया ॥
केवलं कंचिदद्यापि मामं पृच्छामि संशयम् ।
तमाकर्ण्य पुनर्मामो मह्यमाख्यातुमर्हति ॥
ततो विमर्शस्तुष्टात्मा तं प्रतीदमभाषत ।
पृच्छ यद्रोचते तुभ्यं भद्र विश्रब्धचेतसा ॥
प्रकर्षः प्राह मामायं विस्मयो मम मानसे ।
एषु संकीर्त्यमानेषु राजसु प्रतिभासते ॥
यदामून्मण्डपान्तःस्थान्निरीक्षे नायकानहम् ।
परिवारं न पश्यामि तदामीषां निजं निजम् ॥
यदा विलोकयाम्युच्चैः परिवारं विशेषतः ।
तदा विस्फारिताक्षोऽपि नैवेक्षे नायकानहम् ॥
भवता तु परीवारो नायकाश्च पृथक् पृथक् ।
नामतो गुणतश्चैव कीर्तिता बत तत्कथम् ॥
विमर्शेनोदितं वत्स न विधेयोऽत्र विस्मयः ।
नैकदोभयवेत्तात्र कश्चिदन्योऽपि विद्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतः ।

ये निरावरणज्ञानाः केवलालोकभास्कराः ।
प्रभुं परिकरं चैषां नैकदा तेऽपि जानते ॥

यतः । सामान्यरूपा राजानः सर्वेऽमी परिकीर्तिताः ।
विशेषरूपा विज्ञेयाः सर्वे चामी परिच्छदाः ॥

तथाहि ।

अवयव्यत्र सामान्यं विशेषोऽवयवाः स्मृताः ।
राजानश्चांशिनो ज्ञेयास्तदंशास्तु पदातयः ॥

इह च ।

नायातः कस्यचिल्लाचादेकदा ज्ञानगोचरम् ।
यथैतौ प्रकृतिस्तात सा सामान्यविशेषयोः ॥
देशकालस्वभावेषु भेदोऽपि च न विद्यते ।
तादात्म्यादेतयोस्तात तेनैकः प्रतिभाति ते ॥

तथाहि ।

के तरोर्भेदिनः सन्तु धवाश्वखदिरादयः ।
धवाशादिविनाभूतः कस्तरुर्वा प्रकाश्यताम् ॥
श्रुतस्कन्धातिरेकेण नास्त्यध्ययनसंभवः ।
न चाध्ययननिर्मुक्तः श्रुतस्कन्धोऽस्ति कश्चन ॥
केवलं यौगपद्येन न दृष्टौ तावितीयता ।
नादृष्टावेव तौ वत्स कालभेदेन दर्शनात् ॥

तथाहि ।

दृश्यते हि तरुर्दूराच लक्ष्यन्ते धवादयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभ्यर्णे तेऽपि दृश्यन्ते लक्ष्यते न तरुः पृथक् ॥
तथापि तद्द्वयं दृष्टं कालभेदेऽपि कीर्त्यते ।
यथाक्रमेण दृष्टत्वाद्रूपाद्यास्त्वचुरादिभिः ॥
अतो भेदेन दृष्टत्वाद्भिन्नमेवेदमिष्यताम् ।
अभिन्नस्य हि नो भिन्नं कालभेदेऽपि दर्शनम् ॥

तथाहि ।

अभेदेऽपि स्वभावाद्यैर्यत्सामान्यविशेषयोः ।
संख्यासंज्ञाङ्ककार्येभ्यो भेदोऽप्यस्ति परिस्फुटः ॥
तेन तद्द्वारजः सर्वो व्यवहारो न दूष्यति ।
भेदाभेदात्मके तत्त्वे भेदस्येत्थं निदर्शनात् ॥

तथाहि ।

संख्यया तरुरित्येको भूयांसः खदिरादयः ।
संज्ञापि तरुरित्येषा धवाश्वार्कादि भेदिनाम् ॥
अनुवृत्तिस्तरोस्तेषु लक्षणं पृथगोच्यते ।
धवाश्वत्थादिभेदानां व्यावृत्तिश्च परस्परम् ॥
कार्यं तु तरुमात्रेण साध्यं छायादिकं पृथक् ।
विशिष्टफलपुष्पाद्यमन्यदेवाम्रकादिभिः ॥
व्यवहारोऽपि सामान्ये श्रुतस्कन्धेऽन्य एव हि ।
अन्य एवास्य भेदेषु यदुद्देशादिलक्षणः ॥
तस्मात्तं भेदमाश्रित्य संख्यासंज्ञादिगोचरम् ।
अभेदं च तिरोधाय देशकालस्वभावजम् ॥
राजानः परिवाराश्च मया वत्स पृथक् पृथक् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नामतो गुणसंख्याभ्यां तवाग्रे परिकीर्तिताः ॥
एवं च भेदिनोऽप्येते न परस्परभेदिनः ।
यौगपद्येन भासन्ते भद्र तन्मुञ्च विस्मयम् ॥
न चान्यत्रापि कर्तव्यो विस्मयो लक्षणादिभिः ।
कथ्यमाने मया भेदे भो. सामान्यविशेषयोः ॥
प्रकर्षेणोदितं नाम नष्टोऽयं संशयोऽधुना ।
ममैष माम सन्देहः परिस्फुरति मानसे ॥

यदुत ।

य एते सप्त राजान एतेषां मध्यवर्तिनः ।
तृतीयश्च चतुर्थश्च पञ्चमः षष्ठ एव च ॥
एते महीपास्त्वारो यथा व्यावर्णितास्त्वया ।
तथा जनस्य लक्ष्यन्ते सुन्दरेतरकारिणः ॥
नैकान्तेनैव सर्वेषामपकारपरायणाः ।
एते हि बाह्यलोकानां केषांचित्सुखहेतवः ॥
आद्यो राजा द्वितीयश्च यश्च पर्यन्तभूपतिः ।
दुःखदा एव सर्वेषां त्रयोऽप्येते तु देहिनाम् ॥
ततः सपरिवारेण महामोहमहीभुजा ।
एतैश्च हृतसाराणां तेषां किं नाम जीवितम् ॥

एवं च स्थिते ।

किं विद्यन्ते जनाः केचिद्बहिरङ्गेषु देहिषु ।
अमीभिर्न कदर्थ्यन्ते ये चतुर्भिररातिभिः ॥
किं वा न संभवन्त्येव तादृशा नाम देहिनः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येऽमीषां निजवीर्येण प्रतापक्षतिकारिणः ॥
तच्छ्रुत्वा भागिनेयोक्तं वचनं विहितादरः।
अवादीदीदृशं वाक्यं विमर्शो मधुराक्षरैः ॥
विद्यन्ते बहिरङ्गेषु वत्स लोकेषु तादृशाः।
एतेषां वीर्यनिर्णाशाः केवलं विरला जनाः ॥

तथाहि।

सद्भूतभावनामन्त्रतन्त्रशास्त्रा महाधियः।
कृतात्मकवचा नित्यं ये तिष्ठन्ति बहिर्जनाः ॥
अप्रमादपरास्तेषामेते सर्वेऽपि भूभुजः।
महामोहादयो वत्स नोपतापस्य कारकाः ॥

यतः।

सततं भावयन्त्येवं निर्मलीमसमानसाः।
जगत्स्वरूपं ये धीराः श्रद्धासंशुद्धबुद्धयः ॥

कथम्।

अनादिनिधनो घोरो दुस्तरोऽयं भवोदधिः।
राधावेधोपमा लोके दुर्लभा च मनुष्यता ॥
मूलं हि सर्वकार्याणामाशापाशनिबन्धनम्।
जलबुद्बुदसंकाशं दृष्टनष्टं च जीवितम् ॥
बीभत्समशुचेः पूर्णं कर्मजं भिन्नमात्मनः।
गम्यं रोगपिशाचानां शरीरं क्षणभङ्गुरम् ॥
यौवनं च मनुष्याणां सन्ध्यारक्ताभ्रविभ्रमम्।
चण्डवातेरिताम्भोदमालारूपाश्च सम्पदः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदौ संपादिताल्हादाः पर्यन्तेऽत्यन्तदारुणाः ।
एते शब्दादिसम्भोगाः किंपाकफलसन्निभाः ॥
माता भ्राता पिता भार्या पुत्रो जातेति जन्तवः ।
जाताः सर्वेऽपि सर्वेषामनादिभवचक्रके ॥
उषित्वैकनगे रात्रौ यथा प्रातर्विहङ्गमाः ।
यथायथं व्रजन्त्येव कुटुम्बे विश्वबान्धवाः ॥
दृष्टैः समागमाः सर्वे स्वप्नाप्तनिधिरूपताम् ।
नूनं समाचरन्त्येव वियोगानलतापिनः ॥
जरा जर्जरयत्येव देहं सर्वशरीरिणाम् ।
दलयत्येव भूतानि भीमो मृत्युमहीधरः ॥

ततश्च ।

तेषामेवंविधानेकभावनाभ्यासलासिनाम् ।
निर्धूततमसां पुंसां निर्मलीभूतचेतसाम् ॥
भद्र नैष महीपालो महामोहः सभार्यकः ।
जायते बाधको नापि सवधूकाविमौ सुतौ ॥

अन्यच्च ।

न शोको नारतिस्तेषां न भयो नापि शोषकाः ।
दुष्टाभिसन्धिप्रमुखा नूनं बाधाविधायकाः ॥
नामूनि डिम्भरूपाणि न चान्ये भद्र तादृशाः ।
यैरेवं भावनाशस्त्रैः पितापुत्रा अमी जिताः ॥

तथा ।

सर्वज्ञागमदृष्टेषु तत्त्वेषु सुविनिश्चिताः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

gyanmandir@kobatirth.org
027657
Serving JinShasan

For Private And Personal Use Only